THE
MAHĀBHĀGAVATA PURĀṆA

(AN ANCIENT TREATISE ON ŚAKTI CULT)

श्रीमहाभागवतपुराणम्

(शाक्तसाम्प्रदायिकम्)

Critically Edited with Introduction and Index by

DR. PUSHPENDRA KUMAR

Eastern Book Linkers

DELHI : : INDIA

प्रथमोऽध्यायः

श्रीगणेशाय नमः ।

देवेन्द्रमौलिमन्दारमकरन्दकणारुणाः ।
विघ्नं हरन्तु हेरम्बचरणाम्बुजरेणवः ॥१॥

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥२॥

यामाराध्य विरिञ्चिरस्य जगतः स्रष्टा हरः पालकः,
संहर्ता गिरिशः स्वयं समभवद्ध्येया च या योगिभिः ।
यामाद्यां प्रकृतिं वदन्ति मुनयस्तत्त्वार्थविज्ञाः परां
तां देवीं प्रणमामि विश्वजननीं स्वर्गापवर्गप्रदाम् ॥३॥

या स्वेच्छयास्य जगतः प्रविधाय सृष्टिं
संप्राप्य जन्म च तथा पतिमाप शम्भुम् ।
उग्रैस्तपोभिरपि यां समवाप्य पत्नीं
शम्भुः पदं हृदि दधे परिपातु सा वः ॥४॥

एकदा नैमिषारण्ये शौनकाद्या महर्षयः ।
पप्रच्छुर्मुनिशार्दूलं सूतं वेदविदां वरम् ॥५॥

पुराणं साम्प्रतं ब्रूहि स्वर्गमोक्षसुखप्रदम् ।
विस्तृतं परमं यत्र देव्या माहात्म्यमुत्तमम् ॥६॥

जायते नवधा भक्तिर्यस्य संश्रवणेन वै ।
दिव्यज्ञानविहीनानां नृणामपि महामते ॥७॥

सूत उवाच—

एतदुक्तं महेशेन नारदाय महात्मने ।
पुराणं परमं गुह्यं महाभागवताह्वयम् ॥८॥

तदाह भगवान्व्यासः श्रद्धया भक्तिशालिने ।
स्वयं जैमिनये पूर्वं पुनस्तद्वो ब्रवीम्यहम् ॥९॥

गोपनीयं प्रयत्नेन न प्रकाश्यं कदाचन ।
एतस्य श्रवणे पाठे यत्पुण्यं लभते द्विजः ॥१०॥

तद्वक्तुं न महेशोऽपि शक्तो वर्षशतैरपि ।
किमहं कथयिष्यामि संख्याविरहितं यतः ॥११॥
श्रुत्वैवं विस्मयाविष्टा ऋषयस्त्वतिहर्षिताः ॥
पुनरूचुर्मुनिश्रेष्ठाः सूतं वेदविदां वरम् ॥१२॥

ऋषय ऊचुः—

यथा पुराणश्रेष्ठं तत्प्रकाशमभवत्क्षितौ ।
एतदाचक्ष्व तत्त्वेन कृपया मुनिपुङ्गव ॥१३॥

सूत उवाच—

महर्षिर्भगवान् व्यासः सर्ववेदविदां वरः ।
अशेषं धर्मशास्त्राणां वक्ता ज्ञानी महामतिः ॥१४॥
कृत्वा त्वष्टादशैतानि पुराणानि महामुनिः ।
न तृप्तिमभिलेभे स कथञ्चिदपि धर्मवित् ॥१५॥
महापुराणं परमं यत्परं नास्ति भूतले ।
भगवत्याः परं तत्त्वं माहात्म्य यत्र विस्तृतम् ॥१६॥
तत्कथं वर्णयिष्येऽहमिति चिन्तापरायणम् ।
देव्यास्तत्त्वमविज्ञाय क्षुब्धचित्तो बभूव सः ॥१७॥
यस्यास्तत्त्वं न जानाति महाज्ञानी महेश्वरः ।
यस्या हि परमं तत्त्वं ज्ञातव्यमतिदुष्करम् ॥१८॥
विचिन्त्यैवं महाबुद्धिश्चकार परमं तपः ।
गत्वा हिमवतः पृष्ठं दुर्गाभक्तिपरायणः ॥१९॥
तेनैव विधिना तुष्टा शर्वाणी भक्तवत्सला ।
अदृष्टरूपा चाकाशे स्थित्वैवं वाक्यमब्रवीत् ॥२०॥
यत्रासन् श्रुतयः सर्वा ब्रह्मलोके महामुने ।
गच्छ तत्र परं तत्त्वं मम वेत्स्यसि निष्कलम् ॥२१॥
प्रत्यक्षतां गमिष्यामि तत्रैव श्रुतिभिः स्तुता ।
तत्र सम्पादयिष्यामि तवाभिलषितं च यत् ॥२२॥
सच्छ्रुत्वा भगवान्व्यासो ब्रह्मलोकं तदा ययौ ।
वेदान्प्रणम्य पप्रच्छ किं ब्रह्मपदमव्ययम् ॥२३॥
ऋषेस्तद्वचनं श्रुत्वा विनयावनतस्य वै ।
वेदाः प्रत्येकशः प्राहुस्तत्क्षणान्मुनिपुङ्गवम् ॥२४॥

ऋग्वेद उवाच—

यदन्तःस्थानि भूतानि यतः सर्वं प्रवर्तते ।
यदाह तत्परं तत्त्वं साक्षाद्भगवती स्वयम् ॥२५॥

यजुर्वेद उवाच—

या यज्ञैरखिलैः सर्वैरीश्वरेण समिज्यते ।
यतः प्रमाणं हि वयं सैका भगवती स्वयम् ॥२६॥

सामवेद उवाच—

ययेदं धार्यते विश्वं योगिभिर्या विचिन्त्यते ।
ययेदं भासते विश्वं सैका दुर्गा जगन्मयी ॥२७॥

अथर्ववोवाच—

यां प्रपश्यन्ति देवेशीं भक्त्यानुग्रहिणो जनाः ।
तामाहुः परमं ब्रह्म दुर्गां भगवतीं पुमान् ॥२८॥

सूत उवाच—

श्रुतीरितं निशम्येत्थं व्यासः सत्यवतीसुतः ।
दुर्गां भगवतीं मेने परं ब्रह्मेति निश्चितम् ॥२९॥

श्रुतयस्त्वेवमुक्त्वा ताः पुनरूचुर्महामुनिम् ।
प्रत्यक्षं दर्शयिष्यामो यथास्माभिरुदाहृतम् ॥३०॥

इत्येवमुक्त्वा श्रुतयस्तुष्टुवुः परमेश्वरीम् ।
सर्वदेवमयीं शुद्धां सच्चिदानन्दविग्रहाम् ॥३१॥

श्रुतय ऊचुः—

दुर्गे विश्वमपि प्रसीद परमे सृष्ट्यादिकार्यत्रये
ब्रह्माद्याः पुरुषास्त्रयो निजगुणैस्त्वत्स्वेच्छया कल्पिताः ।

नो ते कोऽपि च कल्पकोऽत्र भुवने विद्येत मातर्यतः
कः शक्तः परिवर्णितुं तव गुणांल्लोके भवे दुर्गमान् ॥३२॥

त्वामाराध्य हरिर्निहत्य समरे दैत्यान् रणे दुर्जयान्,
त्रैलोक्यं परिपाति शम्भुरपि ते धृत्वा पदं वक्षसि ।

त्रैलोक्यक्षयकारकं समपिबद्यत्कालकूटं विषं
किं ते वा चरितं वयं त्रिजगतां ब्रूमः परित्र्यम्बिके ॥३३॥

या पुंसः परमस्य देहिन इह स्वीयैर्गुणैर्मायया
देहाख्याऽपि चिदात्मिकापि च परिस्पन्दादिशक्तिः परा ।
त्वन्मायापरिमोहितास्तनुभृतो यामेव देहस्थितां
भेदज्ञानवशाद्वदन्ति पुरुषं तस्यै नमस्तेऽम्बिके ॥३४॥

स्त्रीपुंस्त्वप्रमुखैरुपाधिनिचयैर्हीनं परं ब्रह्म यत्
त्वत्तो या प्रथमं बभूव जगतां सृष्टौ सिसृक्षा स्वयम् ।
सा शक्तिः परमोऽपि यच्च समभून्मूर्तिद्वयं शक्तितस्-
त्वन्मायामयमेव तेन हि परं ब्रह्मापि शक्त्यात्मकम् ॥३५॥

तोयोत्थं करकादिकं जलमयं दृष्ट्वा यथा निश्चयस्-
तोयत्वेन भवेद्ग्रहोऽप्यभिमतां तथ्यं तथैव ध्रुवम् ।
ब्रह्मोत्थं सकलं विलोक्य मनसा शक्त्यात्मकं ब्रह्म तत्-
शक्तित्वेन विनिश्चितः पुरुषधीः पारं पराब्रह्मणि ॥३६॥

षट्चक्रेषु लसन्ति ये तनुमतां ब्रह्मादयः षट्शिवास्
ते प्रेता भवदाश्रयाच्च परमेशत्वं समायान्ति हि ।
तस्मादीश्वरता शिवे नहि शिवे त्वय्येव विश्वाम्बिके
त्वं देवि त्रिदशैकवन्दितपदे दुर्गे प्रसीदस्व नः ॥३७॥

सूत उवाच—

इत्येवं श्रुतिवाक्यैस्तु श्रुतिभिः संस्तुता सती ।
स्वरूपं दर्शयामास जगदम्बा सनातनी ॥३८॥

ज्योतीरूपा हि सा देवी सर्वप्राणिव्यवस्थिता ।
व्यासस्य संशयं छेत्तुं स्वतन्त्राकृतिमादधे ॥३९॥

स्फुरत्सूर्यसहस्राभां चन्द्रकोटिसमद्युतिम् ।
सहस्रबाहुभिर्युक्तां दिव्यास्त्रैरभिसंवृताम् ॥४०॥

दिव्यालंकारभूषाढ्यां दिव्यगन्धानुलेपनाम् ।
सिंहपृष्ठे समारूढां कदाचिच्छववाहनाम् ॥४१॥

चतुर्भिर्बाहुभिर्युक्ता नवीनजलदप्रभा ।
द्विभुजा च चतुर्हस्ता तथा दशभुजा क्षणे ॥४२॥

अष्टादशभुजा क्वापि शतसंख्यभुजा तथा ।
अनन्तबाहुभिर्युक्ता दिव्यरूपधरा क्षणे ॥४३॥

कदाचिद्विष्णुरूपा च वामे च कमलालया ।
राधया सहिताकस्मात्कदाचित्कृष्णरूपिणी ॥४४॥

वामाङ्गाधिगता वाणी कदाचिद्ब्रह्मरूपिणी ।
कदाचिच्छिवरूपा च गौरी वामाङ्गसंस्थिता ॥४५॥

एवं सर्वमयी देवी कृत्वा रूपाण्यनेकधा ।
व्यासस्य संशयच्छेदं चकार ब्रह्मरूपिणी ॥४६॥

सूत उवाच—

एवं रूपाणि चालोक्य पराशरसुतो मुनिः ।
तां ज्ञात्वा परमं ब्रह्म जीवन्मुक्तो बभूव ह ॥४७॥

ततो भगवती देवी ज्ञात्वा तस्याभिवाञ्छितम् ।
स्वपादतलसंलग्नं पङ्कजं समदर्शयत् ॥४८॥

मुनिस्तस्य सहस्रेषु दलेषु परमाक्षरम् ।
महाभागवतं नाम पुराणं समलोकयत् ॥४९॥

प्रणम्य शिरसा देवीं नानास्तुतिभिरादरात् ।
जगाम स्वाश्रमं भूयः कृतकृत्यः स्वयं द्विजाः ॥५०॥

यथा तत्पङ्कजे दृष्टं पुराणं परमाक्षरम् ।
महाभागवतं पुण्यं प्रकाशमकरोत्तथा ॥५१॥

स्नेहात्तु कथितं तेन श्रुतं चाधिगतं मया ।
स्नेहाद्वः कथयिष्यामि गोपनीयं प्रयत्नतः ॥५२॥

अश्वमेधसहस्राणि वाजपेयशतानि च ।
महाभागवतस्यास्य कलां नार्हन्ति षोडशीम् ॥५३॥

एवं महाभागवतं प्रकाशमभवत्क्षितौ ।
परित्राणाय लोकानां महापातकिनामपि ॥५४॥

श्रीमहाभागवते उपपुराणे सूतशौनकवाक्ये प्रथमोध्यायः ।

द्वितीयोऽध्यायः

सूत उवाच—

श्रुत्वा बहुपुराणानि जैमिनिर्मुनिपुङ्गवः ।
प्रणम्य दण्डवद्भूमौ व्यासं पप्रच्छ सादरम् ॥१॥

जैमिनिरुवाच—

सर्ववेदविदां श्रेष्ठ नमस्ते मुनिपुङ्गव ।
त्वत्तोऽधिकतरो लोके वक्ता नास्ति महामते ॥२॥

श्रुत्वा तव मुखाम्भोजे कथां पुण्यतमां मुने ।
कृतार्थोऽस्मि कृतार्थोऽस्मि कृतार्थोऽस्मि न संशयः ॥३॥

अथान्यच्छ्रोतुमिच्छामि चिरं यन्मे हृदि स्थितम् ।
जगतामादिभूता या दुर्गा दुर्गतिनाशिनी ॥४॥

त्रैलोक्यजननी नित्या सच्चिदानन्दरूपिणी ।
यस्याः पादाम्बुजद्वन्द्वं दधद्धृदयपङ्कजे ॥५॥

विश्वेशः शवरूपेण ब्रह्मादीनां च दुर्लभम् ।
तस्या अतुलमाहात्म्यं संक्षेपेण त्वयोदितम् ॥६॥

न तृप्तिस्तेन जाता मे इदानीं विस्तरेण तु ।
कथयस्व महाभाग नमस्ते मुनिपुङ्गव ॥७॥

दुर्लभं मानुषं देहं बहुजन्मशतात्परम् ।
प्राप्य तन्न श्रुतं येन विफलं तस्य जीवनम् ॥८॥

तच्छ्रुत्वा वचनं तस्य व्यासः सत्यवतीसुतः ।
प्रशंस्य मुनिशार्दूलं जैमिनिं प्रत्युवाच तम् ॥९॥

व्यास उवाच—

साधु साधु महाबुद्धे जैमिने भक्तिमानसि ।
ज्ञानवानसि हे वत्स भद्रं पृच्छसि साम्प्रतम् ॥१०॥

यच्छ्रुत्वा न पुनर्जन्म लभन्ते मनुजा भुवि ।
महापातकिनो मर्त्या भक्तिधर्मविवर्जिताः ॥११॥

यच्छ्रुत्वा मुच्यते पापी ब्रह्महत्यादिपापतः ।
तां श्रोतुमिच्छसे यस्मात्तस्मात्त्वं भाग्यवानसि ॥१२॥

तावत्सर्वाणि पापानि ब्रह्महत्यादिकान्यपि ।
यावन्न दुर्गाचरितं भवेत्कर्णगतं मुने ॥१३॥
कृतपापशतोऽप्येतच्छृणोति यदि मानवः ।
तं दृष्ट्वा यमराड् दण्डं त्यक्त्वा पतति पादयोः ॥१४॥
माहात्म्यमतुलं तस्याः कः शक्तः कथितुं मुने ।
शिवोऽपि पञ्चभिर्वक्त्रैर्यद्वक्तुं न शशाक ह ॥१५॥
शम्भुर्वाराणसीक्षेत्रे मुमुक्षूणां नृणां स्वयम् ।
तस्या एव महामन्त्रं यमस्मै गुरुणेरितम् ॥१६॥
स्वयं तु तरसागत्य तारकं ब्रह्मसंज्ञकम् ।
कर्णेऽब्रुवन्महामोक्षं निर्वाणाख्यं प्रयच्छति ॥१७॥
सर्वेषामेव मन्त्राणां निर्वाणपददायिनी ।
सैका हि बीजं विप्रर्षे जैमिने मोक्षदायिनी ॥१८॥
तत्रत्यानां समस्तानां मन्त्राणां तां महामते ।
वेदाः प्राहुरधिष्ठात्रीं देवतां मोक्षदायिनीम् ॥१९॥
शशका मशकाद्याश्च ये चान्ये प्राणिनो भुवि ।
तेषां मोक्षप्रदानाय शम्भुर्वाराणसीपुरे ॥२०॥
दुर्गेति तारकं ब्रह्म स्वयं कर्णे प्रयच्छति ।
शृणुष्वावहितस्तत्ते जैमिने मुनिसत्तम ॥२१॥
वक्ष्ये माहात्म्यमतुलं दुर्गायास्त्वतिविस्तरात् ।
शिवनारदसंवादं महापातकनाशनम् ॥२२॥
मन्दरस्य गिरेः पृष्ठे सर्वे देवाः समागताः ।
ऋषयश्च सगन्धर्वाः सर्वे तत्र समागताः ॥२३॥
तस्मिन् गिरिवरे रम्ये नानावृक्षसमाकुले ।
सुगन्धिकुसुमोत्फुल्लगन्धामोदितदिङ्मुखे ॥२४॥
सुमेरुशृङ्गसंकाशे पृष्ठे मन्दरपर्वते ।
उपविष्टं महादेवं महर्षिर्नारदो मुनिः ॥२५॥
कृष्णं विलोक्य पप्रच्छ प्राञ्जलिर्विनयान्वितः ॥

नारद उवाच—

त्रिजगद्वन्द्य देवेश भक्तानुग्रहकारक ॥२६॥
त्वमेव ज्ञानिनां श्रेष्ठः शुद्धात्मा ब्रह्मसंज्ञकः ।
त्वमेव वस्तुनस्तत्त्वं जानासि परमेश्वर ॥२७॥

न जानन्त्यपरे देवा ऋषयो वा जगत्पते ।
त्रिजगत्पावनीं गङ्गां मूर्ध्ना वहसि सादरम् ॥२८॥

शशाङ्कं रम्यमालोक्य तच्छिरोभूषणं कृतम् ।
त्वं मे कथय सर्वज्ञ यत्त्वां पृच्छामि साम्प्रतम् ॥२९॥

युष्माकं तपसोपास्यं दैवतं किं महेश्वर ।
त्वं यथा भगवान् विष्णुर्ब्रह्मापि जगतां पतिः ॥३०॥

एतान् सम्भजते भक्त्या जायते परमं पदम् ।
यादृक् त्वद्वचसा लोके शक्तो वक्तुं न भूतले ॥३१॥

एवंविधानां भवतां यदुपास्यं हि दैवतम् ।
तदवश्यं मया ज्ञेयं ब्रूहि मे तत्कृपाभय ॥३२॥

व्यास उवाच—

इति तस्य वचः श्रुत्वा महादेवः पुनः पुनः ।
विचार्य तमुवाचेदं जैमिने मुनिपुङ्गव ॥३३॥

श्रीमहादेव उवाच—

यत्त्वया प्रस्तुतं तात तत्तु गुह्यतमं परम् ।
न प्रकाश्यं कथं वत्स वक्ष्यामि मुनिपुङ्गव ॥३४॥

व्यास उवाच—

इत्युक्तो देवदेवेन नारदस्तत्र संस्थितः ।
प्राञ्जलिर्जगतां नाथं प्राह नारायणं विभुम् ॥३५॥

भक्तानुकम्पी भगवान्देवदेवो महेश्वरः ।
वक्तुं कृपणतां धत्ते समुपास्यं स्वदैवतम् ॥३६॥

त्वमाज्ञापय देवेश प्रणतानां कृपाकर ॥

श्रीनारायण उवाच—

किं कार्यं तेन ते तात युष्माकं देवता वयम् ॥३७॥
अस्मानेव समाराध्य परं पदमवाप्स्यसि ।
अस्माकं दैवतेनात्र भवतः किं प्रयोजनम् ॥३८॥

व्यास उवाच—

एवं तस्यापि तद्वाक्यमाकर्ण्य मुनिसत्तमः ।
तुष्टाव स्तुतिवाक्यैस्तु शिवविष्णू कृताञ्जलिः ॥३९॥

नारद उवाच—

प्रसीद विश्वेश्वर देवदेव प्रसीद नारायण वासुदेव ।
प्रसीद सर्पाभरणोज्ज्वलाङ्ग प्रसीद मां कौस्तुभभूषिताङ्ग ॥४०॥

प्रसीद गङ्गाधर मां शरण्य प्रसीद चक्रायुध मां वरेण्य ।
प्रसीद विश्वेश्वर मां दिगम्बर प्रसीद विश्वेश्वर मां गदाधर ॥४१॥

नमस्त्रिपुरनाशाय कंसासुरविघातिने ।
अन्धकासुरनाशाय तृणावर्तविनाशिने ॥४२॥

नमस्ते पञ्चवक्त्राय विष्णवे ते नमो नमः ।
गरुडासनसंस्थाय वृषारूढाय ते नमः ॥४३॥

व्यास उवाच—

इत्येवं संस्तुवन्तं तं दृष्ट्वा देवर्षिसत्तमम् ।
विलोक्य भगवान् विष्णुः प्राह देवं महेश्वरम् ॥४४॥

विष्णुरुवाच—

भक्तोऽयं ज्ञानवान् देव विनीतो ब्रह्मणः सुतः ।
अनुग्राह्यस्त्वयावश्यं यतस्त्वं भक्तवत्सलः ॥४५॥

व्यास उवाच—

महेश्वरोऽपि तेनोक्तं वाक्यमाकर्ण्य विष्णुना ।
भद्रं मेऽवहितं प्राह प्रणतानां कृपाकरः ॥४६॥

ततः पुनर्महादेवं महाज्ञानी महामतिः ।
नारदः परिपप्रच्छ देवदेवं कृपानिधिम् ॥४७॥

नारद उवाच—

त्वामुपास्य तथा विष्णुं ब्रह्माणं च जगत्पतिम् ।
इन्द्रादयो लोकपालाः संप्रापुः परमं पदम् ॥४८॥

युष्माकं यत्समाराध्यं दैवतं पूर्णमव्ययम् ।
तन्मे कथय देवेश यदि ते मय्यनुग्रहः ॥४९॥

एतादृशं महैश्वर्यं यत्प्रसादाच्च लब्धवान् ।
तच्चेद्वदसि मे देव तदा सोऽनुग्रहो मयि ॥५०॥

व्यास उवाच—

इत्येवं प्रतिभाषितो मुनिवरं श्रीनारदं शङ्करः
कृत्वादौ प्रणिधानमेव सततं योगीश्वरं सादरम् ।
श्रीदुर्गाचरणाम्बुजं हृदि मुहुर्ध्यायन्यदेकं परं
पूर्णब्रह्म तदेव निर्मलमतिर्वक्तुं समारब्धवान् ॥५१॥

श्रीमहाभागवते उपपुराणे व्रतोपासनावर्णनं द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः

श्रीमहादेव उवाच—

या मूलप्रकृतिः शुद्धा जगदम्बा सनातनी ।
सैव साक्षात्परं ब्रह्म सास्माकं देवताऽपि च ॥१॥

अयमेको यथा ब्रह्मा तथा चायं जनार्दनः ।
तथा महेश्वरश्चाहं सृष्टिस्थित्यन्तकारिणः ॥२॥

एवं हि कोटिकोटानां नानाब्रह्माण्डवासिनाम् ।
सृष्टिस्थितिविनाशानां विधात्री सा महेश्वरी ॥३॥

अरूपा सा महादेवी लीलया देहधारिणी ।
तयैतत्सृज्यते विश्वं तयैव परिपाल्यते ॥४॥

विनाश्यते तयैवान्ते मोह्यते च तया जगत् ।
सैव स्वलीलया पूर्णा दक्षकन्याभवत्पुरा ॥५॥

तथा हिमवतः पुत्री तथा लक्ष्मीः सरस्वती ।
अंशेन विष्णोर्वनिता सावित्री ब्रह्मणस्तथा ॥६॥

नारद उवाच—

यदि प्रसन्नो देवेश मयि प्रीतिरनुत्तमा ।
तदा कथय मे नाथ विस्तरेण महामते ॥७॥

यथा सा प्रकृतिः पूर्णा दक्षकन्याभवत्पुरा ।
यथा च तां हरः प्राप पत्नीं ब्रह्मस्वरूपिणीम् ॥८॥

पुनश्च सा यथा जाता हिमालयगृहे सुता ।
तथा भूयोपि तां प्राप महादेवस्त्रिलोचनः ॥९॥

यथा सा सुषुवे पुत्रौ महाबलपराक्रमौ ।
कार्तिकेयगणेशौ द्वौ षडाननगजाननौ ॥१०॥

श्रीमहादेव उवाच—

आसीज्जगदिदं पूर्वमनर्कशशितारकम् ।
अहोरात्रादिरहितमनग्निकमदिङ्मुखम् ॥११॥

शब्दस्पर्शादिरहितमन्यत्तेजोविवर्जितम् ।
तत्तद्ब्रह्मेति यच्छ्रुत्या सदेकं प्रतिपद्यते ॥१२॥

स्थिता प्रकृतिरेका सा सच्चिदानन्दविग्रहा ।
शुद्धज्ञानमयी नित्या वाचातीता सुनिष्कला ॥१३॥

दुर्गम्या योगिभिः सर्वव्यापिनी निरुपद्रवा ।
नित्यानन्दमयी सूक्ष्मा गुरुत्वादिभिरुज्झिता ॥१४॥

सृष्टीच्छा समभूत्तस्या मुदा सद्यस्तदैव हि ।
अरूपापि दधे रूपं स्वेच्छया प्रकृतिः परा ॥१५॥

भिन्नाञ्जननिभा चारुफुल्लाम्भोजवरानना ।
चतुर्भुजा रक्तनेत्रा मुक्तकेशी दिगम्बरा ॥१६॥

पीनोत्तुङ्गस्तनी भामा सिंहपृष्ठनिषेदुषी ।
ततस्तु स्वेच्छया स्वीयै रजःसत्त्वतमोगुणैः ॥१७॥

ससर्ज पुरुषं सद्यश्चैतन्यपरिवर्जितम् ।
तं जातं पुरुषं वीक्ष्य सत्त्वादित्रिगुणात्मकम् ॥१८॥

सिसृक्षामात्मनस्तस्मिन् समाक्रामयदिच्छया ।
ततः स शक्तिमान् दृष्ट्वा पुत्रयं(?) गुणत्रयैः ॥१९॥

त्रयो बभूवुः पुरुषा ब्रह्मविष्णुशिवाह्वयाः ।
तथापि जायते नैव सृष्टिरेवं विलोक्य सा ॥२०॥

द्विधा चक्रे पुमांसं तं जीवं च परमं तथा ।
त्रिधा चकार चात्मानं स्वेच्छया प्रकृतिः स्वयम् ॥२१॥

माया विद्या च परमा चेत्येवं सा त्रिधाभवत् ।
माया विमोहिनी पुंसां या संसारप्रवर्तिका ॥२२॥

परिस्पन्दादिशक्तिर्या पुंसां सा परमा मता ।
तत्त्वज्ञानात्मिका चैव सा संसारनिवर्तिका ॥२३॥

मायाकृतो हि जीवस्तां व्यपनेक्षत्तदा मुने ।
तां तां समाश्रितास्तेऽपि पुरुषा विषयैषिणः ॥२४॥

बभूवुर्मुनिशार्दूल मत्तास्तन्मायया तदा ।
सा तृतीया परा विद्या पञ्चधा याभवत्स्वयम् ॥२५॥

गङ्गा दुर्गा च सावित्री लक्ष्मीश्चैव सरस्वती ।
सा प्राह प्रकृतिः पूर्णा ब्रह्मविष्णुमहेश्वरान् ॥२६॥

प्रत्यक्षगा जगद्धात्री योज्य सृष्टौ पृथक् पृथक् ।
सृष्टयर्थं हि पुरा यूयं मया सृष्टा निजेच्छया ॥२७॥

तत्कुरुध्वं महाभागा यथेच्छा जायते मम ।
ब्रह्मा सृजतु भूतानि स्थावराणि चराणि च ॥२८॥

विविधानि विचित्राणि चासंख्येयमसंयतः ।
विष्णुरेव महाबाहुः करोतु प्रतिपालनम् ॥२९॥

निहत्य जगतः क्षोभकारकान् बलिनां वरः ।
शिवस्तमोगुणाक्रान्तः शेषे सर्वमिदं जगत् ॥३०॥

नाशयिष्यति नाशेच्छा यदा मे सम्भविष्यति ।
परस्परं च सृष्टयादिकार्येषु त्रिषु वै ध्रुवम् ॥३१॥

विधातव्यं हि साहाय्यं युष्माभिः पुरुषत्रयैः ।
अहं च पञ्चधा भूत्वा सावित्र्याद्या वराङ्गनाः ॥३२॥

भवतां वनिता भूत्वा विहरिष्ये निजेच्छया ।
तथा शम्भुश्च सम्भूय सर्वजन्तुषु योषितः ॥३३॥

प्रसविष्यामि भूतानि विविधानि निजेच्छया ।
ब्रह्मंस्त्वं मानुषीं सृष्टिं कुरुष्व मम शासनात् ॥३४॥

सांप्रतं नान्यथा सृष्टिर्विस्तृतेयं भविष्यति ।
इत्युक्त्वा तान्महाविद्या प्रकृतिः सा परात्परा ॥३५॥

स्वयमन्तर्दधे तेषां ब्रह्मादीनां च पश्यताम् ।
आकर्ण्य च वचस्तस्या ब्रह्मा सृष्टिं प्रचक्रमे ॥३६॥

पूर्णां तां प्रकृतिं लब्धुं पत्नीभावेन संयतः ।
तपसाराधितुं भक्त्या समारेभे महेश्वरः ॥३७॥

तज्ज्ञात्वा ज्ञाननेत्रेण विष्णुः परमपूरुषः ।
सोऽपि तामेव संलब्धुं तपस्तप्तुमुपाविशत् ॥३८॥

तज्ज्ञात्वा भगवान्ब्रह्मा सृष्टिं त्यक्त्वा सुनिश्चलः ।
अभिलाषेण तेनैव तपसे समुपाविशत् ॥३९॥

एवं समाराधयतां त्रयाणां प्रकृतिः स्वयम् ।
तपसस्तु परीक्षार्थं तेषामन्तिकमाययौ ॥४०॥

कृत्वा तु भीषणां मूर्तिं ब्रह्माण्डक्षोभकारिणीम् ।
तां दृष्ट्वा भयसंत्रस्तो ब्रह्माभूद्विमुखस्तदा ॥४१॥

सापि तत्संमुखं प्रायात्ततोऽपि विमुखस्थितः ।
एवं चापि चतुर्दिक्षु चतुर्वारं समागमत् ॥४२॥

सोऽपि भूत्वा चतुर्वक्त्रो भीतभीतस्तदैव हि ।
तपस्त्यक्त्वा भयत्रस्तः पलायनपरोऽभवत् ॥४३॥

अथ सा प्रययौ यत्र विष्णुः परमपूरुषः ।
तपश्चरति संयत्तो महाभयकरो द्रुतम् ॥४४॥

तथा दृष्ट्वा च तां सोऽपि परं भीतस्तदाभवत् ।
सहस्रशीर्षः पुरुषः सहस्राक्षः सहस्रपात् ॥४५॥

मुद्रिताक्षस्तपस्त्यक्त्वा मग्नोऽभूज्जलमध्यतः ।
एवं भग्ने च तपसि तयोः सा भीमरूपिणी ॥४६॥

महेशसन्निधिं प्रायान्नच ध्यानंनिवारणे ।
समर्थाभून्महेशस्य कदाचिदपि सा स्वयम् ॥४७॥

ज्ञात्वा विज्ञानमात्रेण प्रकृतिं भीमरूपिणीम् ।
परीक्षार्थं समायातां समाधौ संस्थितो हरः ॥४८॥

तेन तुष्टा भगवती स्वयं प्रकृतिरुत्तमा ।
पूर्णैव गिरिशं प्राप स्वर्गे गङ्गास्वरूपिणी ॥४९॥

अंशेन भूत्वा सावित्री प्राकट्यीकृतबलेन च ।
पतिमाप विधिं देवी तथा लक्ष्मीः सरस्वती ॥५०॥

भूत्वा प्राप पतिं विष्णुं निजांशेन महामते ।
अथ मग्नसमाधिस्तु ब्रह्मा लोकपितामहः ॥५१॥

सृष्ट्वा क्षित्यादिभूतानि तत्त्वानि च महामते ।
ससर्ज तनयांश्चापि मानसान् दश तत्क्षणात् ॥५२॥

मरीचिर्मात्रि पुलहं क्रतुमङ्गिरसं तथा ।
प्रचेतसं वसिष्ठं च नारदं च तथा भृगुम् ॥५३॥

पुलस्त्यं सर्व एवैते दश तुल्या महामते ।
ससर्ज दक्षप्रमुखान्प्रजाधीशांश्च मानवान् ॥५४॥

संध्यां च मानसीं कन्यां कामं चापि मनोभवम् ।
स्त्रीपुंसानां विमोहार्थं स्वर्गे मर्त्ये रसातले ॥५५॥

स्वयं नियोजयामास पुरुषं कामरूपिणम् ।
पौष्पांश्च सायकान्पञ्च धनुः पुष्पमयं तथा ॥५६॥

सर्वलोकविमोहाय ददौ तस्मै प्रजापतिः ।
ततो ब्रह्मा द्विधा चक्रे स्वकीयं वपुरुत्तमम् ॥५७॥

वामार्धं शतरूपाख्या जाता स्त्री चारुरूपिणी ।
दक्षिणार्धं समभवन्नाम्ना स्वायंभुवो मनुः ॥५८॥

स तां जग्राह चार्वङ्गीं भार्यार्थे चारुहासिनीम् ।
प्रविद्धां पञ्चबाणेन पञ्चभिः कुसुमायुधैः ॥५९॥

स तस्यां शतरूपायां तिस्रः कन्याः सुतद्वयम् ।
उत्पादयामास तदा मनुः स्वायम्भुवो मुने ॥६०॥

आकूतिर्देवहूतिश्च प्रसूतिश्चैव कन्यकाः ।
प्रियव्रतोत्तानपादौ पुत्रौ देवर्षिसत्तमः ॥६१॥

आकूतिं रुचये प्रादान्मध्यमां कर्दमाय च ।
दक्षाय प्रददौ कन्यां तृतीयां चारुरूपिणीम् ॥६२॥

कर्दमो जनयामास देवहूत्यां सुतान्नव ।
अरुन्धतीप्रभृतयो वसिष्ठादिस्त्रियश्च ताः ॥६३॥

दक्षस्यापि समुद्भूताः कन्यकाश्च चतुर्दश ।
अदितिर्दितिर्दनुः काष्ठा चारिष्टा सुरसा तिमिः ॥६४॥

मनुः क्रोधवशा ताम्रा विनता कद्रुरेव च ।
स्वाहा सानुमती चेति तासामाख्याः प्रकीर्तिताः ॥६५॥

तां स्वाहामग्नये प्रादात्कश्यपाय त्रयोदश ।
कश्यपस्तासु पत्नीषु प्रजा नानाविधाः स्वयम् ॥६६॥

उत्पादयामास ततस्तैर्व्याप्तमखिलं जगत् ।
एवं ससर्ज भगवान् ब्रह्मा सर्वमिदं जगत् ॥६७॥

तं प्राह प्रकृतिर्देवी भूत्वांशेन महामते ।
सावित्री यां द्विजाः सर्वे संध्यात्रयमुपासते ॥६८॥

तथांशेन समुत्पन्ना लक्ष्मीश्चापि सरस्वती ।
त्रिजगत्पालकं विष्णुं पतिं प्राप स्वलीलया ॥६९॥

भवन्तौ विषयासक्तौ ब्रह्मविष्णू बभूवतुः ।
शिवोऽभूत्परमो योगी साक्षात्तां प्रकृतिं पराम् ॥७०॥

अन्विच्छन्पूर्णभावेन पत्नीं देवर्षिसत्तमः ।
तथा तपस्यतस्तस्य शम्भोः प्रकृतिरुत्तमा ॥
प्रसन्ना वचनं प्राह प्रत्यक्षं जगदम्बिका ॥७१॥

प्रकृतिरुवाच—

किं तेऽभिलषितं शम्भो वरं तद्वरयस्व मे ।
दास्यामि परमप्रीत्या तपसा समुपासिता ॥७२॥

शिव उवाच—

सा पूर्वं प्रकृतिः शुद्धा यस्याः पञ्च वराङ्गनाः ।
समवाप्स्यसि चास्मांस्तान् ब्रह्मविष्णुमहेश्वरान् ॥७३॥

तत्र प्राप्तासि सावित्री भूत्वांशेन विधातरम् ।
तथा विष्णुं निजांशेन भूत्वा लक्ष्मीः सरस्वती ॥७४॥

किन्तु मां परमा पूर्णा प्रकृतिः स्वयमेव हि ।
त्वमेहि जन्म सम्प्राप्य कुत्रचिन्निजलीलया ॥७५॥

प्रकृतिरुवाच—

पूर्णा प्रकृतिरेवाहं भविष्ये तव गेहिनी ।
सम्भूय मायया चारुदेहा दक्षप्रजापतेः ॥७६॥

यदा देहाभिमानेन भविष्यति मयि त्वयि ।
अनादरस्तु दक्षस्य तदांशेन विमोह्य तम् ॥७७॥

मायय्यैव गमिष्यामि भूयः स्वस्थानमुत्तमम् ।
तदा त्वया मे विच्छेदो भविष्यति महेश्वर ॥७८॥

तदा त्वमपि कुत्रापि नैव स्थास्यसि मां विना ।
एवं हि परमा प्रीतिरावयोः सम्भविष्यति ॥७९॥

श्रीमहादेव उवाच—

इत्युक्त्वा सा महेशानं प्रकृतिः परमेश्वरी ।
अन्तर्दधे मुनिश्रेष्ठ हरः प्रीतमना अभूत् ॥८०॥

श्रीमहाभागवते उपपुराणे सूतशौनकवाक्ये तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः

श्रीमहादेव उवाच—

अथैकदा जगत्स्रष्टा प्राह दक्षं प्रजापतिम् ।
हर्षयन् शृणु पुत्र त्वं वक्ष्ये तव हितं वचः ॥१॥
प्रकृतिः परमा पूर्णा शम्भुनाराधिता स्वयम् ।
याचिता वनिताभावं तथेत्यङ्गीकृतं तया ॥२॥
तस्मादवश्यं कुत्रापि समुत्पन्ना महेश्वरी ।
पतिमाप्स्यति सा नूनं तत्र मे नास्ति संशयः ॥३॥
सा यथा त्वत्सुता भूत्वा हरपत्नी भविष्यति ।
तथा प्रार्थय सद्भक्त्या महोग्रतपसा च ताम् ॥४॥
सा यस्य तनया लोके सम्भविष्यति भाग्यतः ।
सफलं जीवनं तस्य धन्यास्तत्पितरोऽपि च ॥५॥
तस्मादत्र समुद्भूतां मायां तां जगदम्बिकाम् ।
पुत्रीं प्राप्य जगद्वन्द्यां स्वजन्म सफलं कुरु ॥६॥

दक्ष उवाच—

एवमेव पितर्नूनं यतिष्ये तव शासनात् ।
यथा सा मत्सुता साक्षात्प्रकृतिः सम्भविष्यति ॥७॥

श्रीमहादेव उवाच—

इत्युक्त्वा वेधसं दक्षः प्रजापतिरतिद्रुतम् ।
क्षीरोदतीरमासाद्य समाराधयदम्बिकाम् ॥८॥
दिव्यवर्षसहस्राणां निनाय त्रितयं मुने ।
आराधयन्भगवतीमुपवासादिभिः परैः ॥९॥
तथा तपस्यतः सापि प्रत्यक्षमभवच्छिवा ।
स्निग्धाञ्जननिभा चारुत्रिबाहुचतुष्टयैः ॥१०॥
खड्गाम्बुजाभयकरा नीलोत्पलरसेक्षणा ।
सुचारुदशना चारुमुण्डमालाविभूषिता ॥११॥
दिगम्बरा मुक्तकेशी मणिजालविभूषिता ।
सिंहपृष्ठे समारूढा मध्याह्नार्कशतप्रभा ॥१२॥
सा प्राह दक्षं किं वत्स मत्तः प्रार्थयसि द्रुतम् ।
तत्प्रीत्याहं प्रदास्यामि तव भावात्प्रजापते ॥१३॥

दक्ष उवाच—

यदि प्रसन्ना मातस्त्वं मयि दासे तवानघे ।
तदा मम सुता भूत्वा जन्म प्राप्नुहि मद्गृहे ॥१४॥

श्रीदेव्युवाच—

शम्भुना प्रार्थिता पत्नीकामेनाहं स्वयं पुरा ।
सा मन्ये कुत्रचिज्जन्मेदानीमङ्गीकृतं पुरा ॥१५॥

तज्जन्म प्राप्य ते गेहे भविष्ये हरमोहिनी ।
तपसानेन तुष्टाहं पूर्णैव प्रकृतिः स्वयम् ॥१६॥

लसत्कनकगौराङ्गी भविष्ये तव नन्दिनी ।
चार्वङ्गी सौम्यरूपा च स्थास्येऽहं तावदेव हि ॥१७॥

यावत्ते तपसः पुण्यं क्षीणत्वं नाभ्युपैति वै ।
क्षीणे तु तपसः पुण्ये मयि मन्दादरो भवान् ॥१८॥

भविष्यति तदैवाहं पुनरेतादृशीं तनुम् ।
धृत्वा तव पुरो गत्वा गमिष्ये स्वीयमालयम् ॥१९॥

विमोह्य मायया सर्वं जगत्स्थावरजङ्गमम् ॥

श्रीमहादेव उवाच—

इत्युक्त्वा त्रिजगन्माता दक्षं प्रकृतिरुत्तमा ॥२०॥

अन्तर्दधे मुनिश्रेष्ठ सहसा तस्य पश्यतः ।
दक्षोऽपि स्वपुरीं गत्वा वेधसे तं न्यवेदयत् ॥२१॥

वरो यः स जगद्धात्र्या दत्तः प्रीत्या प्रजापतिः ।
अथ सा प्रकृतिः पूर्णा स्वयमाद्या सनातनी ॥२२॥

प्रपेदे जन्मना दक्षपत्नीं सर्वगुणाश्रयाम् ।
ततः प्रसूतिः सुषुवे कन्यामेकां शुभेऽहनि ॥२३॥

तामेव प्रकृतिं पूर्णां गौराङ्गीं दीर्घलोचनाम् ।
शशाङ्ककोटितुल्याभां फुल्लेन्दीवरलोचनाम् ॥२४॥

अष्टाभिर्बाहुवल्लीभिर्भ्राजमानां शुभाननाम् ।
तथाभूत्सर्वतः पुष्पवृष्टिर्दुन्दुभयस्तथा ॥२५॥

आकाशे शतशो नेदुर्विशश्चासन् सुनिर्मलाः ।
दक्षः श्रुत्वा समागत्य दृष्ट्वा तां तनयां तदा ॥२६॥

प्रहृष्टमानसोऽकार्षीन्महोत्सवमतीव सः ।
सतीति चाकरोन्नाम दशमेऽहनि बन्धुभिः ॥२७॥

ववृधे सा प्रतिदिनं चारुतां च समादधे ।
वर्षासु स्वर्णदीवेन्दुज्योत्स्नेव शरदि स्वयम् ॥२८॥

अथैकदा त्रिलोकेयं तां दक्षो रुचिराननाम् ।
विवाहार्हां विवाहार्थं चिन्तयामास चेतसा ॥२९॥

कन्येयं क्व प्रदेया वा प्रकृतिः परमा च या ।
अनया हि वरस्तस्मै तदैव हि प्रतिश्रुतः ॥३०॥

तस्मात्तदन्यथा नैव भविष्यति कथञ्चन ।
कृतेऽपि बहुयत्नेऽद्य मया सर्वात्मनापि च ॥३१॥

यस्यांशसम्भवा रुद्रा ममाज्ञावशवर्तिनः ।
तमाहूय सुरूपेयं दातव्या सर्वथा नहि ॥३२॥

आहूय त्रिदशश्रेष्ठान् दैत्यगन्धर्वकिन्नरान् ।
शिवशून्यां सभां कृत्वा तमनाहूय शूलिनम् ॥३३॥

स्वयंवरमुदे यागः कर्तव्यः सर्वथा मया ।
तत्र तत्तु भवेदेव यद्विधेर्मनसि स्थितम् ॥३४॥

इति निश्चित्य सुमनाः समाहूय सुरासुरान् ।
विना शिवं सभां चक्रे तदा सत्याः स्वयंवरे ॥३५॥

तस्य चित्रमये रम्ये सापि चित्रमयी सभा ।
देवदैत्यमुनीन्द्राणां कान्त्यातीव व्यराजत ॥३६॥

तेजसा सूर्यसंकाशा कान्त्या चन्द्रसमा तथा ।
दिव्यमालाम्बरधराः किरीटकनकोज्ज्वलाः ॥३७॥

विरेजुस्त्रिदशेन्द्राश्च सभायां मुनिसत्तम ।
तेषां रथाश्चनागेन्द्रैर्मणिहेमपरिष्कृतैः ॥३८॥

ध्वजैश्छत्रैः पताकाभिर्नानावर्णैः समन्ततः ।
सर्वैः परिष्कृता दक्षपुरी कान्त्या व्यराजत ॥३९॥

भेरीमृदङ्गपणवैः शतशोऽथ सहस्रशः ।
विनेदुस्तेन शब्देन सर्वतः पूरितं नभः ॥४०॥

गानं सुललितं चक्रुर्गन्धर्वास्तत्र संसदि ।
ननन्दुश्चाप्सरोमुख्याः शतशोऽथ सहस्रशः ॥४१॥

अथ प्रजापतिर्दक्षः काले प्राप्ते सुलक्षणे ।
आनयामास तां कन्यां सतीं त्रैलोक्यसुन्दरीम् ॥४२॥

तत्रागता सती चारुकान्त्या परमया मुदा ।
विबभौ मुनिशार्दूल सौन्दर्यप्रतिमैव सा ॥४३॥

एतस्मिन्नेव काले तु महेशः समुपागतः ।
स्थितोऽन्तरिक्षे वृषभोपरि सर्वपरो यतः ॥४४॥

अथालोक्य सभां तां च शिवेन रहितां तदा ।
प्रजापतिरुवाचेदं सतीं परमसुन्दरीम् ॥४५॥

मातरेते समायाताः सुरासुरगणास्तथा ।
ऋषयश्च महात्मान एतेषु गुणशालिनम् ॥४६॥

वृणु त्वं मालया चारुरूपिणं यत्र ते रुचिः ।
इत्युक्ता तेन सा देवी सती प्रकृतिरूपिणी ॥४७॥

शिवाय नम उच्चार्य मालां भूमौ समर्पयत् ।
सत्या दत्तां च तां मालां दधार शिरसा हरः ॥४८॥

आविर्भूय ततः स्थानाद्दिव्यरूपधरस्तदा ।
रत्नशोभितसर्वाङ्गः शशिकोटिसमप्रभः ॥४९॥

दिव्यमाल्याम्बरधरो दिव्यगन्धानुलेपनः ।
प्रफुल्लपङ्कजप्रख्यनयनत्रितयोज्ज्वलः ॥५०॥

तां मालां स समादाय सत्या दत्तां सदाशिवः ।
सहसान्तर्दधे हृष्टः सर्वदेवस्य पश्यतः ॥५१॥

तस्मै सती ददौ मालां तेन दक्षप्रजापतिः ।
तस्या मन्दादरः किञ्चिद् बभूव मुनिपुङ्गव ॥५२॥

अथ ब्रह्मात्रवीद्वाक्यं दक्षं सर्वप्रजापतिम् ।
सहान्यैर्मानसैः पुत्रैर्मरीच्यादिमुनीश्वरैः ॥५३॥

कन्यां तवेयं देवेशं शिवं वृतवती वरम् ।
तमाहूय विधानेन सुतां त्वं देहि यत्नतः ॥५४॥

इति तस्य वचः श्रुत्वा स्मृत्वा प्रकृतिभाषितम् ।
समानीय महेशानं तस्मै दक्षो ददौ सतीम् ॥५५॥

सोऽप्युद्वाहविधानेन पाणिं जग्राह हर्षितः ।
ततो ब्रह्मा च विष्णुश्च नारदाद्या महर्षयः ॥५६॥

तुष्टुवुर्वेदवाक्यैस्तु शुश्रूषू तौ सतीशिवौ ।
ववर्षुः पुष्पवृष्टिं च सर्व एव दिवौकसः ॥५७॥

नेदुर्दुन्दुभयश्चापि शतशोऽथ सहस्रशः ।
सर्वे प्रहृष्टा अभवन्देवगन्धर्वकिन्नराः ॥५८॥

दक्षस्तून्मादचित्तोऽभूत्सतीं चापि व्यगर्हयत् ।
चेतसा वीक्ष्य विश्वेशं जटाभस्मविभूषितम् ॥५९॥

ततः सतीं समादाय सर्वलोकैकसुन्दरीम् ।
महेशः प्रययौ प्रस्थं हिमाद्रेरतिशोभनम् ॥६०॥

हरेण सार्धं यातायां सत्यां दक्षप्रजापतेः ।
दिव्यज्ञानं समभवद्विलुप्तं मुनिपुङ्गव ॥६१॥

श्रीमहाभागवते उपपुराणे शिवनारदसंवादे सतीविवाहवर्णनं चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः

श्रीमहादेव उवाच—

ततो रुरोद दुःखार्तः क्षीणपुण्यः प्रजापतिः ।
विनिन्दन् शङ्करं देवं तथा दाक्षायणीमपि ॥१॥

तं दृष्ट्वा दुःखसंतप्तहृदयं मुनिपुङ्गव ।
दधीचिस्तमुवाचेदं ज्ञानी शिवपरायणः ॥२॥

दधीचिरुवाच—

किं रोदिषि सतीं मोहादज्ञात्वा परमं शिवम् ।
सती च बहुभाग्येन जाता तव गृहे सुता ॥३॥

सतीयमाद्या प्रकृतिः स्वयमेवाशरीरिणी ।
शिवः परः पुमान् साक्षादत्र मा संशयं कुरु ॥४॥

उग्रैरपि तपोभिर्या ब्रह्मेन्द्रादिसुरासुरैः ।
दृश्यते न कदाचित्तां प्राप्य पुत्रीं प्रजापते ॥५॥

अज्ञात्वा कुरुषे निन्दां कथं मोहेन तां सतीम् ।
तयैव वञ्चितो नूनं महामोहस्वरूपया ॥६॥

दक्ष उवाच—

स चेत्परः पुमान् शम्भुरनादिर्जगदीश्वरः ।
प्रेतभूमिप्रियः कस्माद्विरूपाक्षस्त्रिलोचनः ॥७॥

भिक्षुको भस्मलिप्ताङ्गो भवेद्वापि कथं मने ॥

दधीचिरुवाच —

नित्यानन्दमयः पूर्णः स हि सर्वेश्वरेश्वरः ॥८॥
समाश्रयन्ति तं ये वै नापि ते दुःखभागिनः ।
स भिक्षुर्भगवान् शम्भुरिति ते दुर्मतिः कथम् ॥९॥
ब्रह्माद्यैस्त्रिदशश्रेष्ठैर्योगिभिस्तत्त्वदर्शिभिः ।
यस्य तत्परमं रूपं लक्षितुं नैव शक्यते ॥१०॥
तमज्ञात्वा तथा शम्भुं विरूपं निन्दसे कथम् ।
सर्वत्र गामी भगवान् सर्वस्थश्च सदाशिवः ॥११॥
श्मशाने वा पुरे रम्ये विशेषो नास्य दृश्यते ।
अपूर्वः शिवलोकः स विष्णुब्रह्मादिदुर्लभः ॥१२॥
वैकुण्ठो ब्रह्मलोकश्च यस्य नैव कलासमः ।
तथा स्वर्गेऽपि कैलासं पुरं देवसुदुर्लभम् ॥१३॥
नानादेवसमाकीर्णं सन्तानकवनावृतम् ।
स्वर्गाधिपपुरं यस्य कलां नार्हति षोडशीम् ॥१४॥
मर्त्येऽपि रम्या नगरी पुरी वाराणसी परा ।
मुक्तिक्षेत्रात्मिका चैव देवा ब्रह्मपुरोगमाः ॥१५॥
अपि मृत्युं समिच्छन्ति किं पुनर्मानवादयः ।
एवं दिव्यालयस्तस्य महेशस्य परात्मनः ॥१६॥
विना श्मशानमावासो नास्तीति तव दुर्मतिः ।
सत्यमेवंविधं देवं त्रिलोकेशं सदाशिवम् ॥१७॥
कदाचिदपि मोहेन नैव निन्द्यात्सुरेश्वरम् ।
सतीमपि महेशानीं साक्षाद्ब्रह्मस्वरूपिणीम् ॥१८॥
बहुभाग्यवशाज्जातां पुत्रीभावेन ते गृहे ॥

श्रीमहादेव उवाच —

एवमुक्तोऽपि बहुधा मुनिना तत्त्वदर्शिना ॥१९॥
न मेने परमेशानमसदाचारवर्जितम् ।
प्रोवाच वचनैश्चापि गर्हयंस्तं मुहुर्मुहुः ॥२०॥
रुरोदाक्षिप्य तनयां सतीं चापि स नारद ।
हे वत्से ! सति ! हा पुत्रि ! त्वं प्राणसदृशी मम ॥२१॥

विहाय मां क्व यासि त्वं क्षिप्त्वा शोकमहार्णवे ।
हा पुत्रि चारुसर्वाङ्गि महार्हशयनोचिते ॥२२॥
प्रेतभूमौ कथं स्थेयं त्वया पत्या विरूपिणा ।
तच्छ्रुत्वा स पुनः प्राह दधीचिर्मुनिसत्तमः ॥२३॥
सान्त्वयन् प्रियवाक्येन पाणिना चक्षुषी मृजन् ॥२४॥

दधीचिरुवाच—

प्रजापते ज्ञानवतां प्रवीर त्वं मूर्खवद्रोदिषि किं महात्मन् ।
विज्ञाय देवेशमशेषतोऽपि छिन्नं न तेऽज्ञानमिदं तु चित्रम् ॥२५॥
क्षितौ जले वा गगने रसातले याः सन्ति नार्यः पुरुषास्तथा च ये ।
तयोस्तु ते रूपमयाः समागता इत्येवमाकर्णय शुद्धचेतसा ॥२६॥
नूनं महेशानमनादिपूरुषं स्वयं विजानीहि यथार्थतः परम् ।
सतीं च विद्धि त्रिगुणां परात्परां चिदात्मरूपां प्रकृतिं प्रजापते ॥२७॥
संप्राप्य भाग्येन सतीं परात्परां विश्वेश्वरं तत्पतिभावतोऽपि ।
न मन्यसे यत्खलु भाग्यमात्मनः प्रतप्यसे त्वं विधिनात्र वञ्चितः ॥२८॥
सत्यं शृणुष्व शोकार्तः श्रेयःप्रेप्सुः प्रजापते ।
प्रकृतिं पुरुषं चापि विजानीहि सतीशिवम् ॥२९॥

दक्ष उवाच—

सत्यं वदसि मे पुत्रीं सतीं प्रकृतिरूपिणीम् ।
शिवं पुराणपुरुषं त्रिलोकेशं मुनीश्वर ।३०॥
श्रुत्वापि न भवेद्बुद्धिस्तथापि परमार्थतः ।
महेशान्नापरो देव इत्येवं मुनिसत्तम ॥३१॥
ऋषयः सत्यवचसः कथयन्ति च यद्यपि ।
तथापि शम्भुः परम इत्येवं न मतिर्मम ॥३२॥
शिवं च यदसूयामि तस्य मूलं निबोधय ।
पूर्वं ब्रह्मा मम पिता यदा समसृजत्प्रजाः ॥३३॥
तदा प्रादुर्बभूवुश्च रुद्रा एकादशैव हि ।
सर्वे ते तुल्यवपुषस्तथा भीमपराक्रमाः ॥३४॥
भीमरूपा महात्मानः क्रोधरक्तविलोचनाः ।
द्वीपिचर्माम्बरधरा जटामण्डितमस्तकाः ॥३५॥

ते ब्रह्मसृष्टिलोपार्थमुद्यताश्चाभवंस्ततः ।
ततो निरीक्ष्य तान्ब्रह्मा सृष्टिलोपार्थमुद्यतान् ॥३६॥

आज्ञया शमयामास मामप्युच्चैरुवाच ह ।
यथैते भीमकर्माणः प्रशमं यान्ति चैव हि ॥३७॥

तथा कुरु सुत क्षिप्रं वशे नय ममाज्ञया ।
इत्येवं ब्रह्मवचनाद्भीतास्ते भीमविक्रमाः ॥३८॥

स्थिता मद्वशगाः सर्वे गतप्रश्रयविक्रमाः ।
तदारभ्य ममवशा शिवे जाता महामुने ॥३९॥

यस्यांशसम्भवा एते रुद्रा भीमपराक्रमाः ।
ममाज्ञावशगास्तस्य किं श्रेष्ठत्वं ममाग्रतः ॥४०॥

सती मे यादृशी कन्या रूपेण च गुणेन च ।
त्वयैव ज्ञायते सम्यक् किं तेऽन्यत्प्रवदाम्यहम् ॥४१॥

तस्याः किं भर्तृयोग्यः स्यान्ममाज्ञावशगः शिवः ।
सत्पात्रे विहितं दानं पुण्यकीर्तिकरं भवेत् ॥४२॥

अतः सत्पात्रमालोक्य कन्यां दद्याद्विचक्षणः ।
कुलं शीलं तथा रूपं विचार्य सह बान्धवैः ॥४३॥

दद्याद्दुहितरं प्राज्ञः सत्पात्राय महामुने ।
इत्यादीनि विचार्यैव पूर्वं सत्याः स्वयंवरे ॥४४॥

मया न स समाहूतः कुलशीलविवर्जितः ।
शृणु यच्चेतसि मम स्फुटमेव वदामि ते ॥४५॥

यावदेते महारुद्रा ममाज्ञावशवर्तिनः ।
यस्यांशसम्भवा मां स साकमेष्यति वै शिवः ।
तावत्तस्मिन्मम त्वीर्ष्या सत्यमेव वदामि ते ॥४६॥

तद्विद्वेषफलं शम्भुर्यदा दातुं भवेत्क्षमः ।
तदैव पूज्यः स मया प्रतिज्ञैषा दृढा मम ॥४७॥

श्रीमहादेव उवाच—

एवं स दक्षस्य वचो मुनीश्वरः श्रुत्वा दधीचिर्मनसा व्यचिन्तयत् ।
अयं महामूढमतिः प्रजापतिर्नूनं भवान्या च शिवेन वञ्चितः ॥४८॥

कायेन वाचा मनसापि ये जनाः समाश्रयन्तीह सतीमहेश्वरौ ।
न ते विजानन्त्यपि ये विमोहिता न ज्ञायतेऽसौ कथमेव मूढधीः ॥४९॥

विज्ञेन केनापि जनेन यद्यसौ प्रशक्यते ज्ञापयितुं कुधीर्जनः ।
तद्भक्तिहीनो जगतीह को जनस्तदा न मुक्तिं समुपैति नारद ॥५०॥
एवं विचिन्त्यैव ययौ निकेतनं न किञ्चिदुक्त्वा स मुनिः पुनस्तदा ।
वक्षः स्वकीयं गृहमाविवेश दुःखेन निःश्वस्य पुनः पुनर्मुने ॥५१॥
श्रीमहाभागवते उपपुराणे दक्षप्रजापतिविषादवर्णनं पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः

श्रीमहादेव उवाच—

अथागते महादेवे हिमाद्रेः पृष्ठमुत्तमम् ।
सत्या सार्धं ततः सर्वे देवास्तत्र समागताः ॥१॥
महर्षयस्तथा याता देवपत्न्यस्तथोरगाः ।
गन्धर्वाश्च समायाताः किन्नर्यश्च सहस्रशः ॥२॥
गिरीन्द्रवनिता मेरुतनया मेनकापि च ।
सखीभिः सहिता याता मुनिपत्न्यस्तथागताः ॥३॥
मुमुचुस्त्रिदशाः पुष्पवृष्टिं परमहर्षिताः ।
ननृतुश्चाप्सरोमुख्या गन्धर्वपतयो जगुः ॥४॥
यथाचारं स्त्रियश्चक्रुर्महोत्सवपुरःसरम् ।
प्रमथा हृष्टमनसः प्रणेमुस्तौ सतीशिवौ ॥५॥
ननृतुः करवाद्यं च चक्रुर्गानध्वनिं तथा ।
अथ प्रणम्य देवेशं सतीं च सुरसत्तमाः ॥६॥
विसृष्टास्तेन ते याताः स्वं स्वं स्थानं सुरोत्तमाः ।
तथैवान्ये ययुः स्वीयं स्थानं परमहर्षिताः ॥७॥
स्त्रियश्च प्रययुः सर्वा मेनाद्या मुनिपुङ्गव ।
मेना विलोक्य चार्वङ्गीं सतीं परमसुन्दरीम् ॥८॥
चेतसा चिन्तयामास धन्यास्या जननी तु या ।
अहमेनां समागत्य प्रत्यहं रुचिराननाम् ॥९॥
आराध्य पुत्रीभावेन प्रार्थयामि न संशयः ।
एवं विचिन्त्य मनसा सतीं त्रिजगदम्बिकाम् ॥१०॥

विस्मृता न कदाचित्तु गिरिराजस्य गेहिनी ।
आगत्यानुदिनं चापि सतीं शङ्करगेहिनीम् ॥११॥

प्रीतिं संवर्धयामास तस्याः परमभावतः ।
अथैकदा समायातो नन्दी बुद्धिमतां वरः ॥१२॥

दक्षस्यानुचरो ज्ञानी शिवभक्तिपरायणः ।
प्रणनाम महेशानं दण्डवत्पतितो भुवि ॥१३॥

स प्राह देवदेवाहं दक्षस्यानुचरः प्रभो ।
शिष्यो दधीचिविप्रर्षेस्त्वत्प्रभावविदः सतः ॥१४॥

न मां मोहय देवेश शरणागतवत्सल ।
जानामि त्वां परात्मानं साक्षात्परमपूरुषम् ॥१५॥

सतीं च मूलप्रकृतिं सृष्टिस्थित्यन्तकारिणीम् ।
एवमुक्त्वा महादेवं भक्तानुग्रहकारिणम् ॥१६॥

तुष्टाव नन्दी परया भक्त्या गद्गदया गिरा ॥१७॥

नन्द्युवाच—

त्वमादिर्लोकानां परमपुरुषः सर्वजगतां
विधाता संपाता शिव प्रलयकर्ता त्वमपि च ।
त्वमैश्वर्योपेतस्त्वमपि युवको वृद्ध इति च
त्वमेकं ब्रह्म त्वं सुरवर भवानीश वरद ॥१८॥

अचिन्त्यं ते रूपं जितशशिसमूहं हिमरुचिं
शशाङ्कार्धभ्राजद्विमलमुकुटञ्चेन्दुरुचिरम् ।
स्फुरन्मौलौ सर्पामलमणिभुजङ्गाभरणकं
नमामि ब्रह्माद्यैर्नमितपदपङ्केरुहयुगम् ॥१९॥

त्वां नित्यं परिपूजयन्ति भुवि ये गायन्ति नामानि ते
मन्त्रं सम्प्रति संजपन्ति सततं भक्त्याप्यभक्त्याथ वा ।
तेऽपि त्वत्पदवीमुपेत्य सततं स्वर्गे रमन्ते प्रभो
को दीनेषु दयापरः पशुपते त्वां देवदेवं विना ॥२०॥

श्रीमहादेव उवाच—

नन्दिनेत्रं स्तुतो देवो महेशः प्राह तं मुने ।
किं तेऽभिलषितं नन्दिन् वृणु तत्प्रददामि ते ॥२१॥

नन्द्युवाच—

सदा त्वन्निकटस्थायी दासतां जगदीश्वर ।
त्वत्तो याचे तथा नित्यमनुपश्यामि चक्षुषा ॥२२॥

शिव उवाच—

यथा सम्प्रार्थितो वत्स भविष्यति तथा ध्रुवम् ।
सदा मन्निकटे वासो नूनं तव भविष्यति ॥२३॥
स्तोत्रेणानेन ये भक्त्या स्तोष्यन्ति भुवि मानवाः ।
तेषां न विद्यते किञ्चिदशुभं भुवनत्रये ॥२४॥
मर्त्येऽपि सुचिरं स्थित्वा चान्ते मोक्षमवाप्नुयुः ।
त्वमेषां प्रमथानां मे श्रेष्ठो भूत्वा महामते ॥२५॥
वसेह मत्पुरे नन्दिन् भक्तोऽसि मम च प्रियः ॥२६॥

श्रीमहादेव उवाच—

एवं वरमनुप्राप्य नन्दीप्रमथवृन्दपः ।
बभूव मुनिशार्दूल महादेवप्रभावतः ॥२७॥

श्रीमहाभागवते उपपुराणे नन्दिकेश्वरवर्णनं षष्ठोऽध्यायः ।

———

सप्तमोऽध्यायः

श्रीमहादेव उवाच—

अथ शम्भुः सतीं प्राप्य भृशं कामप्रपीडितः ।
प्रमथानाह भगवान्नन्दिनं च महाबलम् ॥१॥
प्रमथा यूयमेतस्मात्स्थानात्किञ्चित्सुदूरतः ।
कुरुध्वं च स्थितिं शीघ्रं सुचिरं मम शासनात् ॥२॥
यदा युष्मान् स्मरिष्यामि तदा यास्यथ मेऽन्तिकम् ।
न ममाज्ञां विना कोऽपि समायातु कदाचन ॥३॥
इति शम्भोर्वचः श्रुत्वा प्रमथाः सर्व एव ते ।
महेशसन्निधिं त्यक्त्वा स्थिताः किञ्चित्सुदूरतः ॥४॥
ततः स निर्जने तस्मिन् सत्या सार्धं महेश्वरः ।
यथाभिलषितं रेमे दिवारात्रं महामुने ॥५॥

आनीय वन्यपुष्पाणि मालां निर्माय शोभनाम् ।
दत्त्वा सतीं कौतुकेन कदाचित्स ददर्श ह ॥६॥

कदाचित्प्रेमभावेन मुखं फुल्लाम्बुजोपमम् ।
अमृजत्पाणिना स्वेन रुचिरं परमादृतः ॥७॥

कदाचिद्गह्वरे रेमे कदाचित्पुष्पकानने ।
कदाचित्सरसां तीरे रेमेऽभिलषितं यथा ॥८॥

दृष्टिं व्यापारयामास नान्यत्र क्षणमप्यपि ।
विना सतीं महादेवः सती चापि शिवं विना ॥९॥

कदाचित्प्रययौ सत्या कैलासेऽपि महेश्वरः ।
प्रययौ यत्र कुत्रापि पुनः सत्या महागिरेः ॥१०॥

प्रस्थं हिमवतः शम्भुः समायाति स नारद ।
तया विहरमाणोऽसौ दशवर्षसहस्रकम् ॥११॥

दिनं वा रजनीं वापि ज्ञातवान्न महामते ।
एवं हिमवतः पृष्ठे सती त्रैलोक्यमोहिनी ॥१२॥

समास्थिता महादेवं विमोह्य निजमायया ।
मेनका समयं ज्ञात्वा गत्वा चानुदिनं सतीम् ॥१३॥

पुत्रीभावेन सततं प्रार्थयामास भक्तितः ।
व्रतं चकार चारभ्य महाष्टम्यामुपोषिता ॥१४॥

वर्षं यावत्सिताष्टम्यां सम्पूज्य हरगेहिनीम् ।
पुनर्बवीं महाष्टम्यां सम्पूज्य विधिवन्मुने ॥१५॥

उपोषिता व्रतं पूर्णं चकार गिरिगेहिनी ।
ततः प्रसन्ना भूत्वा तु सती शङ्करगेहिनी ॥१६॥

अङ्गीचक्रे भविष्यामि सुता तव न संशयः ।
एवं सत्या वचः श्रुत्वा मेनका हृष्टमानसा ॥१७॥

संध्यायार्हनिशं देवीं संस्थिता गिरिमन्दिरे ।
दक्षश्चानुदिनं शम्भुं निनिन्दासौ विमोहितः ॥१८॥

शम्भुश्चापि न मेने तं संमान्यत्वेन नारद ।
अप्रीतिरेवम्भूताभूत्तयोरन्योन्यमद्भुता ॥१९॥

शिवदक्षप्रजापत्योरतीव मुनिसत्तम ।
अथैकदा समागत्य नारदो ब्रह्मणः सुतः ॥२०॥

प्रोवाच वचनं दक्षप्रजापतिमिदं मुने ।
प्रजापते त्वया नित्यं निन्द्यते यन्महेश्वरः ॥२१॥
तेन क्रुद्धः स च यथा कर्तुमिच्छति तच्छृणु ।
नूनं त्वामेत्य भवतः पुरं भूतगणैः सह ॥२२॥
भस्मास्थिवर्षणं कृत्वा सकुलं नाशयिष्यति ।
स्नेहान्निवेदितं तुभ्यं न प्रकाश्यं कदाचन ॥२३॥
उपायं मन्त्रिभिः सार्धं मन्त्रयाशु विचक्षणैः ।
इत्युक्त्वाकाशमार्गेण स ययौ निजमालयम् ॥२४॥
दक्षोऽपि मन्त्रिणः सर्वानाहूयेदमभाषत ।
यूयं तु मन्त्रिणः सर्वे सर्वदा हितकारकाः ॥२५॥
चेष्टितं मद्विपक्षेण न केनाप्यवधीयते ।
अथ मां नारदः प्राह महर्षिः समुपेत्य वै ॥२६॥
मत्पुरे शिव आगत्य सर्वभूतगणैः सह ।
वर्षान्भस्मास्थिरक्तानां करिष्यति न संशयः ॥२७॥
तदत्र यद्विधेयं हि साम्प्रतं ब्रूत तन्मम ।
इति दक्षवचः श्रुत्वा मन्त्रिणः सर्व एव ते ॥२८॥
ऊचुर्हि वचनं चेदं भयत्रस्ता महामुने ।

मन्त्रिण ऊचुः—

शिवेन देवदेवेन कथमेवं करिष्यते ॥२९॥
अनये कारणं नैव चास्माभिरुपलक्ष्यते ।
त्वं तु बुद्धिमतां श्रेष्ठः सर्वशास्त्रविशारदः ॥३०॥
आज्ञापय यथा युक्तं ततो भद्रं विरच्यते ॥

दक्ष उवाच—

अहं यज्ञं करिष्यामि सर्वा आहूय देवताः ॥३१॥
विना श्मशानसंवासं शिवं भूतगणाधिपम् ।
विष्णुं यज्ञेश्वरं देवं सर्वविघ्ननिवारकम् ॥३२॥
मखसंरक्षकत्वेन परिकल्प्य प्रयत्नतः ।
एवं पुण्यक्रियारम्भे कृते भूतपतिः शिवः ॥३३॥
कथमायास्यति पुरं पुण्यकर्मयुतं मम ।

श्रीमहादेव उवाच—

तथोक्तवति दक्षे तु मया ते मन्त्रिणस्तदा ॥३४॥
भद्रमेतन्महाराजेत्येवमूचुः प्रजापतिम् ।
ततः प्रजापतिर्गत्वा क्षीरोदतटमाश्रितम् ॥३५॥
विष्णुं संप्रार्थयामास यज्ञरक्षणकारणात् ।
ततः प्रसन्नो भगवान् विष्णुः परमपूरुषः ॥३६॥
मखसंरक्षणार्थाय स्वयं प्रायाच्च तत्पुरम् ।
तत आहूतवान्दक्षो देवानिन्द्रपुरोगमान् ॥३७॥
ब्रह्माणमथ देवर्षीन् ब्रह्मर्षींश्च पुरोगमान् ।
सेन्द्रान्यक्षांश्च गन्धर्वान् पितॄन्दैत्यांश्च किन्नरान् ॥३८॥
अद्रींश्च सर्वानाहूय तस्मिन्यज्ञमहोत्सवे ।
विद्वेषाद्वर्जितः शम्भुस्तत्पत्नी च सती मुने ॥३९॥
सर्वांस्तान्कथयामास मम यज्ञमहोत्सवे ।
मया शिवस्तु नाहूतः सती नापि शिवप्रिया ॥४०॥
अत्र ये नागमिष्यन्ति ते स्युर्भागबहिष्कृताः ।
नारायणस्तु भगवानादिः परमपूरुषः ॥४१॥
रक्षार्थं मम यज्ञस्य स्वयमेव समागतः ।
तस्मात्त्यक्तभयाः सर्वे समागच्छन्तु मन्मखे ॥४२॥
एवं तस्य वचः श्रुत्वा भीता एव सुरादयः ।
शिवशून्यामपि सभामागताः सर्व एव हि ॥४३॥
विष्णुं समागतं श्रुत्वा यज्ञरक्षणतत्परम् ।
निर्भीताः सकला आसन् देवाश्चान्येऽपि शङ्करात् ॥४४॥
अदित्याद्याः सुताः सर्वाः समानीय विना सतीम् ।
वस्त्रालङ्कारनिचयैस्तोषयामास सादरम् ॥४५॥
महाद्रिसदृशं चक्रे अन्नानां सञ्चयं मुने ।
पयोदधिघृतादीनां महानद्यः प्रकल्पिताः ॥४६॥
अथान्यद्वस्तु यज्ञार्थं द्रव्यं तेषां तु सञ्चयम् ।
रसानां सागरसमम्न्येषां गिरिणा समम् ॥४७॥
चक्रे प्रजापतिर्दक्षस्ततो यज्ञः प्रवर्तत ।
वसुधाभूत्स्वयं वेदी स्वयं कुण्डे हुताशनः ॥४८॥

जज्वालोर्ध्वामलशिखो विधूमो मुनिसत्तम ।
वेदपाठनियुक्ताश्च समासंस्तत्र ये मखे ॥४६॥

स्वयं यज्ञः समायातस्तत्र वेद्यां महामते ।
नारायणस्तु भगवानादिः परमपूरुषः ॥५०॥

यज्ञसंरक्षकस्वामी जगतां रक्षकः स्वयम् ।
एवं प्रवृत्ते यज्ञे तु दधीचिर्ज्ञानिनां वरः ॥५१॥

अदृष्ट्वा शिवमेवैकं दक्षमाह महामतिः ।

दधीचिरुवाच—

प्रजापते महाप्राज्ञ यज्ञोऽयं यादृशस्त्वया ॥५२॥

क्रियते न कदाप्येवं भूतो वा न भविष्यति ।
यत्रैते त्रिदशाः सर्वे समागत्य स्वयं स्वयम् ॥५३॥

गृह्णन्ति चाहुतिं साक्षात्प्रलभ्य निजभागतः ।
प्राणिनः सर्व एवात्र दृश्यन्ते वै समागताः ॥५४॥

दृश्यते न कथं शम्भुस्त्रिदशानामधीश्वरः ।

दक्ष उवाच—

न मया स समाहूतो यज्ञेऽस्मिन्मुनिसत्तम ॥५५॥

पुण्यकर्मणि लब्धो न स इत्येष महेश्वरः ।

दधीचिरुवाच—

यथा विविधरत्नेन देहः सम्भूषितोऽपि च ॥५६॥

न शोभते जीवहीनः सर्वथापि प्रजापते ।
तथेश्वरं विना यज्ञः श्मशानमिव दृश्यते ॥५७॥

दक्ष उवाच—

त्वं केन वा समाहूतः कथमागतवानसि ।
पृष्टस्त्वं केन वा दुष्ट यदेवं वदसि द्विज ॥५८॥

दधीचिरुवाच—

आहूतो वाप्यनाहूतस्त्वयाहं तव दुर्मखे ।
शृणोषि यदि मे वाक्यं तवाह्वय सदाशिवम् ॥५९॥

विना तेन कृतो यज्ञः कदाचिन्न फलप्रदः ।
यथाऽर्थवर्जितं वाक्यं श्रुतिहीनो यथा द्विजः ॥६०॥

गङ्गाहीनो यथा देशस्तथा यज्ञः शिवं विना ।
पतिहीना यथा नारी पुत्रहीनो यथा गृही ॥६१॥

यथा काङ्क्षा निर्धनानां तथा यज्ञः शिवं विना ।
दर्भहीना यथा सन्ध्या तिलहीनं च तर्पणम् ॥६२॥
यथा होमो हविर्हीनस्तथा हीनश्च शम्भुना ।
यो विष्णुः स महादेवः शिवो नारायणः स्वयम् ॥६३॥
नानयोर्विद्यते भेदः कदाचिदपि कुत्रचित् ।
एवं विनिन्दते यः स स्वयमेव हि गर्हितः ॥६४॥
एकं द्विषन्तमपरो न प्रसन्नः कदाचन ।
शिवापमानकामेन क्रियते यत्त्वया मखः ॥६५॥
एतेन शम्भुः संक्रुद्धो यज्ञं ते नाशयिष्यति ।

दक्ष उवाच—

सर्वस्य जगतो गोप्ता यस्य गोप्ता जनार्दनः ॥६६॥
तत्र श्मशानसंवासी शम्भुर्मे किं करिष्यति ।
यदि चायाति मे यज्ञे प्रेतभूमिप्रियः शिवः ॥६७॥
तदा विष्णुः स्वचक्रेण वारयिष्यति ते शिवम् ।

दधीचिरुवाच—

भवादृशो न मूढोऽयं भगवान्पुरुषोऽव्ययः ॥६८॥
येनार्थेन स्वयं युद्धं करिष्यति विमोहितः ।
यत्त्वया दृश्यते शम्भूरक्षार्थं समुपागतः ॥६९॥
यथा रक्षिष्यति मखं चक्षुषा द्रक्ष्यसेऽचिरात् ।

श्रीमहादेव उवास—

इति तस्य वचः श्रुत्वा क्रोधसंरक्तलोचनः ॥७०॥
दक्षः स्वकीयानाहेदमिमं दूरयत द्विजम् ।
दधीचिरपि तं दक्षं प्राह सन्मुनिपुङ्गवः ॥७१॥
किं मां दूरयसे मूढ दूरीभूतोऽसि मङ्गलात् ।
शिवस्य क्रोधजो दण्डः पतिष्यत्यचिरेण तु ॥७२॥
तव मूर्धनि नास्त्यत्र संशयो दुर्मते क्वचित् ।
इत्युक्त्वा क्रोधताम्राक्षो मध्याह्नार्कसमप्रभः ॥७३॥
निर्जगाम सभामध्याद्दधीचिर्मुनिसत्तमः ।
दुर्वासा वामदेवश्च च्यवनो गौतमादयः ॥७४॥

शिवतत्त्वविदः सर्वे पश्चादुत्थाय निर्ययुः ।
गतेषु तेषु सर्वेषु दक्षः शेषद्विजातये ॥७५॥

द्विगुणां दक्षिणां दत्त्वा महायज्ञं समारभत् ।
उक्तः स बन्धुभिः सर्वैरपि देवीं सतीं नहि ॥७६॥

समानयत्त्वत्र यज्ञे कदाचिदपि नारद ।
प्रक्षीणपुण्यस्तेनावामन्यत प्रकृतिमुत्तमाम् ॥७७॥

तदैव वञ्चितो दक्षो महामायास्वरूपया ।
अथ ज्ञात्वा तु तत्सर्वं सर्वज्ञा जगदम्बिका ॥७८॥

चिन्तयामास पार्श्वस्था शम्भोर्गिरिवरोपरि ।
प्रार्थिता गिरिराजस्य पत्न्याहं मेनया स्वयम् ॥७९॥

पुत्रीभावेन सद्भक्त्या विनयात्प्रेमभावतः ।
अङ्गीचक्रे भविष्यामि सुताहं नात्र संशयः ॥८०॥

पूर्वं सम्प्रार्थयामास यदा मां स प्रजापतिः ।
तदा तस्मै मयाप्युक्तं यदा मन्दादरो भवान् ॥८१॥

भविष्यति क्षीणपुण्यस्तदा सम्मोह्य मायया ।
त्यक्ष्यामि ध्रुवमित्येवं सोऽयं काल उपस्थितः ॥८२॥

प्रजापतिः क्षीणपुण्यो मयि मन्दादरोऽधुना ।
तं परित्यज्य यास्यामि स्थानं तन्निजलीलया ॥८३॥

ततश्च हिमवद्गेहे प्राप्य जन्म महेश्वरम् ।
पतिमाप्स्यामि देवेशं भूयः प्राणैकवल्लभम् ॥८४॥

एवं विचिन्त्य मनसा दक्षकन्या महेश्वरी ।
क्षणं प्रतीक्षमाणाभूद्दक्षयज्ञविनाशने ॥८५॥

एतस्मिन्नेव काले तु नारदो ब्रह्मणः सुतः ।
दक्षालयात्समायातो यत्रास्ति भगवान् हरः ॥८६॥

त्रिधा प्रदक्षिणीकृत्य देवदेवं त्रिलोचनम् ।
सर्व एव समाहूतास्तेन तस्मिन्महामखे ॥८७॥

देवा मनुष्या गन्धर्वाः किन्नरोरगपर्वताः ।
ये चान्ये प्राणिनः सन्ति स्वर्गे मर्त्ये च भूतले ॥८८॥

ते सर्वे तेन चाहूता युवामेव विवर्जितौ ।
युवाभ्यां रहितां वीक्ष्य पुरीं तस्य प्रजापतेः ॥८९॥

दुःखेनाहं परित्यज्य समायातस्तवान्तिकम् ।
उचितं युवयोस्तत्र गमनं मा चिरं कुरु ॥९०॥

शिव उवाच—

किं तत्र गमनेनैव प्रयोजनमयावयोः ।
यथारुचि तथा यज्ञं स करोतु प्रजापतिः ॥९१॥

नारद उवाच—

तवापमानमन्विच्छन् यद्येवं स महाध्वरम् ।
निष्पादयति लोकानां तदावज्ञा भवेत्त्वयि ॥९२॥
तज्ज्ञात्वा यज्ञभागं वै गृहाण परमेश्वर ।
विघ्नं वाचर तद्यज्ञे सुचिरं त्रिदशेश्वर ॥९३॥

शिव उवाच—

न तत्राहं गमिष्यामि न सत्येषा मम प्रिया ।
आगतेऽपि च नो यज्ञभागं मे सम्प्रदास्यति ॥९४॥

श्रीमहादेव उवाच—

इत्येवं शम्भुना प्रोक्तो महर्षिर्नारदस्तदा ।
सतीमाह जगन्मातर्गमनं तूचितं तव ॥९५॥
कन्या पितृगृहे श्रुत्वा महायज्ञमहोत्सवम् ।
कथं धैर्यं समास्थाय स्थातुमुत्सहते गृहे ॥९६॥
भगिन्यस्तव या दिव्यास्ताः सर्वास्तु समागताः ।
ताभ्यः सम्प्रददौ नानाविधं स्वर्णादिभूषणम् ॥९७॥
त्वमेका वर्जिता तेन यथा दर्पात्सुरेश्वरि ।
तथा त्वं दर्पनाशाय यतस्व जगदम्बिके ॥९८॥
शिवस्तु परमो योगी समः पूजापमानयोः ।
न गमिष्यति तद्यज्ञे न विघ्नं वा करिष्यति ॥९९॥
इत्युक्त्वा दक्षतनयां महर्षिर्नारदस्तदा ।
प्रणम्य शङ्करं प्रायाद्दक्षस्य निलयं पुनः ॥१००॥

श्रीमहाभागवते उपपुराणे दक्षप्रजापतियज्ञारम्भवर्णनं नाम सप्तमोऽध्यायः ॥

अष्टमोऽध्यायः

श्रीमहादेव उवाच—

इत्याकर्ण्य मुनीन्द्रस्य वचनं दक्षकन्यका ।
गन्तुमैच्छत्पितुर्यज्ञे शिवमाह शिवाङ्गना ॥१॥

सत्युवाच—

प्रभो देवमहेशान पिता दक्षः प्रजापतिः ।
करोति सुमहायज्ञं बहुसञ्चयपूर्वकम् ॥२॥
आवयोर्गमनं तत्र न्याय्यं चेतसि राजते ।
समुपस्थितयोर्नूनं सम्मानं स करिष्यति ॥३॥

शिव उवाच—

नैवं सति प्रिये चिन्तां मनसापि समाचर ।
अनाहूतस्य गमनं मरणं च द्वयं समम् ॥४॥
यक्षविद्याधरकुले गर्वितो मम हेलनम् ।
करोति निलयं तस्य गन्तव्यं न कदाचन ॥५॥
ममापमानमेवेच्छन्कुरुते स महाध्वरम् ।
यदि यामि च तत्राहं त्वं यासि यदि वा सति ॥६॥
आवयोस्तत्र सम्मानं पिता ते न करिष्यति ।
श्वशुरस्यालये गच्छेद्यदि तत्रास्ति गौरवम् ॥७॥
अगौरवं चेद्गमनं मरणादतिरिच्यते ।
जामाता श्वशुरस्थानेऽपेक्षते परमादरम् ॥८॥
श्वशुरोऽपि तमाहृत्य स्वालयेषु समानयेत् ।
अनादरं च श्वशुरो जामातरि विवर्जयेत् ॥९॥
अन्यथा धर्महानिः स्यात्सत्यं सत्यं वरानने ।
जामातुर्द्वेषतः पापं जायते हि सुदारुणम् ॥१०॥
तस्माद्विवर्जयेद्द्वेषं जामातरि विचक्षणः ।
जामातापि न कुर्याद्वै श्वशुरस्याप्रियं क्वचित् ॥११॥

कुर्वन् स निरयं याति बहुजन्मशतान्यपि ।
अमानितो नैव गच्छेत्कदाचिच्छ्वशुरालयम् ॥१२॥
यत्रकुत्रचिदाह्वानं विनैव गमनं प्रिये ।
मरणेन समं प्रोक्तं किं पुनः श्वशुरालये ॥१३॥
तदहं न गमिष्यामि श्वशुरस्यालयेऽधुना ।
अप्रियं तत्र गमनं यतो दक्षः प्रजापतिः ॥१४॥
श्वशुरप्रीतिकरणाद्रूपवृद्धिः प्रजायते ।
प्रजावृद्धिर्धर्मवृद्धिरपि सञ्जायते सति ॥१५॥
अप्रीतिकरणाद्धानिर्जायते च तथा प्रिये ।
तन्न गच्छामि यज्ञेऽस्मिन् पितुस्तव सुरोत्तमे ॥१६॥
भाषतेऽहर्निशं दक्षो मां दरिद्रं सुदुःखिनम् ।
अनाहूते मयि गते तद्द्रक्ष्यति विशेषतः ॥१७॥
अनाह्वानं च दुर्वाक्यं न सह्यं श्वशुरालये ।
आयान्तं वीक्ष्य दुहितुः पतिं श्वशुर एत्य तम् ॥१८॥
समर्चयेद्यथाशक्ति धर्मलोपोऽन्यथा भवेत् ।
एवमेवंविधो यत्र सम्मानः प्रतिपादितः ॥१९॥
तत्रापमानलाभाय को गच्छति सुबुद्धिमान् ।
तत्क्षमस्व महेशानि पितुस्तव महाध्वरे ॥२०॥
नावयोर्गमनं युक्तं विनाह्वानं सुरार्चिते ।

सत्युवाच—

यदुक्तं सत्यमेवैतत्प्रभो नास्त्यत्र संशयः ॥२१॥
गतस्य हि कदाचित्ते सम्मानं स करिष्यति ।

शिव उवाच—

न तादृशस्तव पिता यदाह्वानं विना गतम् ॥२२॥
कदाचिन्नौ सभामध्ये सम्मानेन ग्रहीष्यति ।
मन्नामस्मरणादेव निन्दते मामहर्निशम् ॥२३॥
स करिष्यति सम्मानं ममेति तव दुर्मतिः ।

सत्युवाच—

त्वं याहि वा महादेव मा वा कुरु यथारुचि ॥२४॥
अहं यास्यामि तत्राज्ञां देहि मां त्वं महेश्वर ।
कन्या पितृगृहे श्रुत्वा महायज्ञमहोत्सवम् ॥२५॥

कथं धैर्यं समास्थाय स्थातुमुत्सहते गृहे ।
असम्मान्याः समाहूता लभन्ते यत्र पूजनम् ॥२६॥
सम्मान्यस्तु समाकर्ण्य कथं धैर्यं समाश्रयेत् ।
अन्यत्र विद्यतेऽपेक्षा चाह्वानस्य महेश्वर ॥२७॥
गन्तुं पितृगृहे कन्या नाह्वानं समपेक्षते ।
तस्मात्पितृगृहे नूनं गमिष्याम्यनुमन्यताम् ॥२८॥
मम तत्र गतायाश्च सम्मानं कुरुते यदि ।
तदोक्त्वा पितरं तुभ्यं दापयिष्यामि चाहुतिम् ॥२९॥
ममाग्रे यदि ते निन्दां करिष्यति विमूढधीः ।
तदा तस्य महायज्ञं नाशयामि न संशयः ॥३०॥

शिव उवाच—

न तत्र गमनं युक्तं कदाचिदपि ते सति ।
ब्रवीमि सत्यं सम्मानस्तत्र ते न भविष्यति ॥३१॥
मन्निन्दनमसह्यं ते करिष्यति पिता तव ।
प्राणान् हास्यति तच्छ्रुत्वा तस्य त्वं किं करिष्यसि ॥३२॥

सत्युवाच—

यास्याम्येव महादेव सत्यं मत्पितुरालये ।
तदाज्ञापय वा नो वा सत्यं सत्यं वदामि ते ॥३३॥

शिव उवाच—

मद्वाक्यमुल्लङ्घ्य पुनः पुनः किं ब्रवीषि गन्तुं पितुरालये वचः ।
प्रयोजनं वात्र किमस्ति सत्यं ब्रूहि स्फुटं तत्कथये तदुत्तरम् ॥३४॥
असम्मानभयं येषां वर्तते न दुरात्मनाम् ।
त एव तत्र गच्छन्ति यत्रासम्मानसम्भवः ॥३५॥
मान्यः कदापि नो गच्छेदपूजकगृहे सति ।
अपूजकस्य या पूजा न सा पूजेति भण्यते ॥३६॥
मन्निन्दनश्रुतौ चेन्न प्राप्तिस्ते जायते सति ।
मन्निन्दकगृहे कस्माद्धेतोस्त्वं गन्तुमिच्छसि ॥३७॥

सत्युवाच—

त्वन्निन्दनश्रुतौ शम्भो न प्राप्तिर्जायते मम ।
तच्छ्रोतुमिच्छुर्नो वापि तत्र गन्तुं समुत्सहे ॥३८॥
यदैव त्वां परित्यज्य सर्वानाहूय दैवतान् ।
समारभन्महायज्ञमसम्मानस्तदैव हि ॥३९॥

जातस्तव महेशान तत्समालोकते प्रजा ।
यद्येनं स महायज्ञं सम्पादयति मत्पिता ॥४०॥

त्वामनादृत्य दर्पेण तदा ते कोऽपि नो जनः ।
आहुतिं श्रद्धयोपेतः सम्प्रदास्यति भूतले ॥४१॥

ततोहं तत्र यास्यामि तदाज्ञापय वा न वा ।
नाप्स्यामि यज्ञभागं वा नाशयिष्यामि वा मखम् ॥४२॥

श्रीशिव उवाच—

वारितापि महादेवि न शृणोषि वचो मम ॥
अपकर्म स्वयं कृत्वा परं दूषयते कुधीः ॥४३॥

जानामि वाग्बिहर्भूतां त्वामहं दक्षकन्यके ।
यथारुचि कुरु त्वं च ममाज्ञां किं प्रतीक्षसे ॥४४॥

श्रीमहादेव उवाच—

एवमुक्ता महेशेन तदा दाक्षायणी सती ।
चिन्तयामास सा क्रुद्धा क्षणमारक्तलोचना ॥४५॥

सम्प्रार्थ्य मामनुप्राप्य पत्नीभावेन शङ्करः ।
अधिक्षिपत्यद्य तस्मात्प्रभावं दर्शयाम्यहम् ॥४६॥

शम्भुः समीक्ष्य तां देवीं क्रोधविस्फुरिताधराम् ।
कालाग्नितुल्यनयनां मीलिताक्षस्तदाऽभवत् ॥४७॥

सहसा भीमदंष्ट्रास्या साट्टहासं तदाकरोत् ।
तन्निशम्य महादेवो भीतभीतो विमुग्धवत् ॥४८॥

कष्टेनोन्मील्य नेत्राणि तां ददर्श भयानकाम् ।
एवं संवीक्ष्यमाणा सा सहसा तेन नारद ॥४९॥

त्यक्त्वा हेमपटीमासीद्वृद्धावस्थासमप्रभा ।
दिगम्बरा लसत्केशा ललज्जिह्वा चतुर्भुजा ॥५०॥

कालानललसद्देहा स्वेदाक्तेन तनूरुहा ।
महाभीमा घोरराव मुण्डमालाविभूषणा ॥५१॥

उद्यत्प्रचण्डकोट्याभा चन्द्रार्धकृतशेखरा ।
उद्यदादित्यसंकाशा किरीटोज्ज्वलमस्तका ॥५२॥

एवं समादाय वपुर्भयानकं जाज्वल्यमानं निजतेजसा सती ।
कृत्वाट्टहासं सहसा महास्वनं सोत्तिष्ठमाना विरराज तत्पुरः ॥५३॥
तथाविधां कार्यवतीं निरीक्ष्य तां विहाय धैर्यं सह चेतसा तदा ।
चकार बुद्धिं स पलायने भयात् समभ्यधावच्च दिशो विमुग्धवत् ॥५४॥
तं धावमानं गिरिशं विलोक्य वै दाक्षायणी वारयितुं पुनः पुनः ।
चकार माभैरिति शब्दमुच्चकैः साट्टाट्टहासं सुमहाभयानकम् ॥५५॥
निशम्य तद्वाक्यमतीव सम्भयात्तस्थौ न शम्भुः क्षणमप्यमुत्र वै ।
दिगन्तुमागन्तुमतीव वेगतः समभ्यधावद्भयविह्वलस्तदा ॥५६॥
एवं पतिं वीक्ष्य भयाभिभूतं दयान्विता सा पतिवारणेच्छया ।
सर्वासु दिक्षु क्षणमग्रतः स्थिता तदा च धृत्वा दश मूर्तयः पराः ॥५७॥
संधावमानो गिरिशोऽतिवेगतः प्राप्नोति यां यां दिशमेव तत्र ताम् ।
भयानकां वीक्ष्य भयेन विद्रुतो दिशं तथान्यां प्रति चाप्यधावत ॥५८॥
न प्राप्य शम्भुर्हि भयोज्झितां दिशं तत्रैव सम्मुद्रितचक्षुरास्थितः ।
उन्मील्य नेत्राणि ददर्श तां पुरः श्यामां लसत्पङ्कजसन्निभाननाम् ॥५९॥
हसन्मुखीं पीनपयोधरद्वयां दिगम्बरां भीमविशाललोचनाम् ।
विमुक्तकेशीं रविकोटिसन्निभां चतुर्भुजां दक्षिणसम्मुखस्थिताम् ॥६०॥

एवं विलोक्य तां शम्भुरतिभीत इवाब्रवीत् ।
का त्वं श्यामा सती कुत्र गता मत्प्राणवल्लभा ॥६१॥

सत्युवाच—

न पश्यसि महादेव सतीं मां पुरतः स्थिताम् ।
काली तारा च लोकेशी कमला भुवनेश्वरी ॥६२॥
छिन्नमस्ता षोडशी च सुन्दरी बगलामुखी ।
धूमावती च मातङ्गी नामान्यासामिमानि वै ॥६३॥

शिव उवाच—

कस्याः किं नाम देवि त्वं विशिष्य च पृथक् पृथक् ।
कथयस्व जगद्धात्रि सुप्रसन्नासि मे यदि ॥६४॥

देव्युवाच—

येयं ते पुरतः कृष्णा सा काली भीमलोचना ।
श्यामवर्णा च या देवी स्वयमूर्ध्वं व्यवस्थिता ॥६५॥

सेयं तारा महाविद्या महाकालस्वरूपिणी ।
सव्येतरेयं या देवी विशीर्षातिभयप्रदा ॥६६॥

इयं देवी छिन्नमस्ता महाविद्या महामते ।
वामे तवेयं या देवी सा शम्भो भुवनेश्वरी ॥६७॥

पृष्ठतस्तव या देवी बगला शत्रुसूदिनी ।
वह्निकोणे तवेयं या विधवारूपधारिणी ॥६८॥

सेयं धूमावती देवी महाविद्या महेश्वरी ।
नैर्ऋत्यां तव या देवी सेयं त्रिपुरसुन्दरी ॥६९॥

वायौ यत्ते महाविद्या सेयं मातङ्गकन्यका ।
ऐशान्यां षोडशी देवी महाविद्या महेश्वरी ॥७०॥

अहं तु भैरवी भीमा शम्भो मा त्वं भयं कुरु ।
एताः सर्वाः प्रकृष्टास्तु मूर्तयो बहुमूर्तिषु ॥७१॥

भक्त्या सम्भजतां नित्यं चतुर्वर्गफलप्रदाः ।
सर्वाभीष्टप्रदायिन्यः साधकानां महेश्वर ॥७२॥

मारणोच्चाटनक्षोभमोहनद्रावणानि च ।
वश्यस्तम्भनविद्वेषाद्यभिप्रेतानि कुर्वते ॥७३॥

इमाः सर्वा गोपनीया न प्रकाश्याः कदाचन ।
तासां मन्त्रं तथा यन्त्रं पूजाहोमविधिं तथा ॥७४॥

पुरश्चर्याविधानं च स्तोत्रं च कवचं तथा ।
आचारं नियमं चापि साधकानां महेश्वर ॥७५॥

त्वमेव वक्ष्यसि विभो नान्यो वक्तात्र विद्यते ।
त्वदुक्तागमशास्त्रं तु लोके ख्यातं भविष्यति ॥७६॥

आगमश्चैव वेदश्च द्वौ बाहू मम शङ्कर ।
ताभ्यामेव धृतं सर्वं जगत्स्थावरजङ्गमम् ॥७७॥

यस्त्वेतौ लङ्घयेन्मोहात्कदाचिदपि मूढधीः ।
सोऽधः पतितहस्ताभ्यां गलितो नात्र संशयः ॥७८॥

तावेव श्रेयसां हेतू दुरूहावतिदुर्घटौ ।
सुधीभिरतिदुर्ज्ञेयौ पारावारविवर्जितौ ॥७९॥

यश्चागमं वा वेदं वा समुल्लङ्घ्यान्यथा भजेत् ।
तमुद्धर्तुमशक्ताऽहं सत्यमेव न संशयः ॥८०॥

विविच्य चानयोरैक्यं मतिमान्धर्ममाचरेत् ।
कदाचिदपि मोहेन भेदयेन्न विचक्षणः ॥८१॥

अासां ये साधकास्ते तु सभायां वैष्णवा मताः ।
मय्यर्पितान्तःकरणा भवेयुः सुसमाहिताः ॥८२॥

मन्त्रं यन्त्रं च कवचं दत्तं यद्गुरुणा स्वयम् ।
गोपनीयं प्रयत्नेन तत्प्रकाश्यं न कुत्रचित् ॥८३॥

प्रकाशात्सिद्धिहानिः स्यात्प्रकाशादशुभं भवेत् ।
तस्मात्सर्वप्रयत्नेन गोपयेत्साधकोत्तमः ॥८४॥

इति ते कथितं कर्म महादेव महामते ।
अहं तव प्रियतमा त्वं च मेऽतिप्रियः पतिः ॥८५॥

पितुः प्रजापतेर्दर्पनाशायाद्य व्रजाम्यहम् ।
तदाज्ञापय देवेश त्वं न गच्छसि चेद्यदि ॥८६॥

इति देव ममाभीष्टं त्वयि वानुमताप्यहम् ।
गच्छामि यज्ञनाशाय पितुर्दक्षप्रजापतेः ॥८७॥

श्रीमहादेव उवाच—

इति तस्याः वचः श्रुत्वा भीतभीत इव स्थितः ।
प्रोवाच वचनं शम्भुः कालीं भीमविलोचनाम् ॥८८॥

शिव उवाच—

जाने त्वां परमेशानीं पूर्णां प्रकृतिमुत्तमाम् ।
अजानता मया मोहाद्यदुक्तं क्षन्तुमर्हसि ॥८९॥

त्वमाद्या परमा विद्या सर्वभूतेष्ववस्थिता ।
स्वतन्त्रा परमा शक्तिः कस्ते विधिनिषेधकः ॥९०॥

त्वं चेदृगभिष्यसि शिवे दक्षयज्ञविनाशने ।
का मे शक्तिस्त्वां निषेद्धुं कथं तत्रास्मि वा क्षमः ॥९१॥

यच्चोक्तं पतिभावेन मया ते ह्यप्रियं वचः ।
तत्क्षमस्व महेशानि यथारुचि कुरुष्व च ॥९२॥

श्रीमहादेव उवाच—

एवमुक्ता महेशेन तदा सा जगदम्बिका ।
ईषत्सुहास्यवदना वचनं चेदमब्रवीत् ॥९३॥

त्वं तिष्ठ सर्वप्रमथैरत्र देव महेश्वर ।
याम्यहं मातुरगेहे साम्प्रतं यज्ञदर्शने ॥९४॥

इत्युक्त्वा स महादेवं ताराप्यूर्ध्वं व्यवस्थिता ।
एकरूपा समभवत्सहसा तत्र नारद ॥९५॥

अन्याश्च मूर्तयश्चाष्टौ सहसान्तर्हितास्तदा ।
अथ शम्भुः समालोक्य गन्तुकामां सुरेश्वरीम् ॥९६॥

प्रमथानाह भगवान् रथमानयतोत्तमम् ।
युतं चायुतसिंहेन रत्नजालविराजितम् ॥९७॥

तच्छ्रुत्वा तत्क्षणादेव प्रमथाधिपतिः स्वयम् ।
रथं समानयत्सिंहैरयुतैर्युतमाशुगैः ॥९८॥

तं रत्नजालसंयुक्तं रथं पर्वतसन्निभम् ।
नानाविधपताकाभिः सर्वतः समलङ्कृतम् ॥९९॥

वायुप्रवेगैः सिंहैश्च युतं चायुतसङ्ख्यकैः ।
तां समारोपयामास प्रमथाधिपतिः स्वयम् ॥१००॥

तस्मिन् रथे स्थिता काली विबभौ भीमरूपिणी ।
सुमेरुशृङ्गमारूढा मेघपङ्क्तिरनुत्तमा ॥१०१॥

त्रासयन्ती जगत्सर्वं युगान्ते मुनिसत्तम ।
ततो नन्दी रथं तूर्णं चोदयामास बुद्धिमान् ॥१०२॥

रुरोद शोकदुःखार्तः शम्भुः सोऽपि महामते ।
कालीं क्रोधान्वितां दृष्ट्वा चलिताः सर्वदेहिनः ॥१०३॥

चण्डांशुरपि सम्भीतः पततीति धरातले ।
संक्षुब्धाः सागराश्चासन् दिशो व्याकुलितास्तथा ॥१०४॥

वायुर्ववौ महावेगः सूर्यं निर्भिद्य भूतले ।
पेतुरुल्काश्च शतशो महाऽमङ्गलसूचकाः ॥१०५॥

प्रायाच्च दक्षनिलयं स रथश्च क्षणार्धतः ।
दृष्ट्वा तां भयसन्त्रस्ताः सतीं दक्षालयस्थिताः ॥१०६॥

श्रीमहाभागवते उपपुराणे कालीरथगमनं नामाष्टमोऽध्यायः ।

नवमोऽध्यायः

श्रीमहादेव उवाच—

अथ दाक्षायणी देवी मुक्तकेशी शुभस्तनी ।
अवतीर्य रथात्तूर्णं प्रययौ मातृसन्निधिम् ॥१॥

दक्षपत्नी प्रसूतिस्तु पुत्रीं दृष्ट्वा चिरागताम् ।
क्रोडं कृत्वा मुखाम्भोजं वाससा परिमृज्य च ॥२॥

चुम्बयन्ती सतीं प्राह विलपन्ती मुहुर्मुहुः ।
मातस्त्वं सर्वदेवेशं पतिं प्राप्य सदाशिवम् ॥३॥

अशोच्यासि गतास्यस्मान् क्षिप्त्वा शोके महार्णवे ।
त्वमाद्या परमा शक्तिस्त्रिजगज्जननी स्वयम् ॥४॥

त्वं ममोदरजातासि भाग्यं मम महत्तरम् ।
दूरभूतोऽद्य मे शोकश्चिरेणाधिगतः सति ॥५॥

यत्त्वां पश्यामि मद्गेहे कृपया समुपस्थिताम् ।
पितापि तव दुर्बुद्धिरज्ञात्वा परमं शिवम् ॥६॥

तमेव विद्विषन्मोहात्कुरुते यज्ञमुत्तमम् ।
न त्वामसावाह्वयति न शिवं परमेश्वरम् ॥७॥

उक्तोऽपि बहुधास्माभिर्मुनिभिश्च विचक्षणैः ॥

सत्युवाच—

शिवं यज्ञेश्वरं देवं सर्वदेवतदैवतम् ॥८॥

अनाहूत्य पिता यज्ञं कुरुते सर्वदैवतैः ।
निर्विघ्नेन समाप्तिस्तु नैवास्य परिदृश्यते ॥९॥

ममैवं जायते बुद्धिर्मन्यतां कोऽपि किञ्चन ।

प्रसूतिरुवाच—

शृणु वत्से मया स्वप्ने यद्रात्रावलोकितम् ॥१०॥

अतीवभयदं घोरं तुमुलं लोमहर्षणम् ।
यत्र दक्षो देवगणैर्महायज्ञे व्यवस्थितः ॥११॥

तत्राकस्मात्समायाता काचिद्देवी महेश्वरी ।
महामेघप्रभाश्यामा मुक्तकेशी दिगम्बरा ॥१२॥

चतुर्भुजा अट्टहासा ज्वलन्नेत्रत्रयोज्ज्वला ।
तां दृष्ट्वा चकितो दक्षः पप्रच्छ विनयान्वितः ॥१३॥

कासि कस्यासि दयिता कथमत्र समागता ।
सा प्राह किं न जानासि सती ते तनया ह्यहम् ॥१४॥

ततो दक्षः शिवं निन्दन्नुवाच बहुधा वचः ।
तच्छ्रुत्वा सा महाक्रोधाद्यज्ञवह्नौ विवेश ह ॥१५॥

ततश्च भीमकर्माणः प्रमथाः कोटिशः क्षणात् ।
समायाता भीमरूपास्ततश्च पुरुषो महान् ॥१६॥

महोग्रकर्मा चायातः कालान्तकयमोपमः ।
स तु विष्णुमुखान्देवान् विनिर्जित्य महाध्वरम् ॥१७॥

बभञ्ज प्रमथैः सार्द्धं दक्षमुण्डं समच्छिनत् ।
प्रजापतिर्वक्त्रहीनो यज्ञकुण्डतटे स्थितः ॥१८॥

महोग्ररूपिणः क्रुद्धाः खादितुं तं समुद्यताः ।
कौपीनवाससः सर्वे जटामुकुटमण्डिताः ॥१९॥

विभूतिलिप्तसर्वाङ्गाः शूलपाशासिपाणयः ।
पिबन्ति शोणितं तस्य नृत्यन्ति च हसन्ति च ॥२०॥

दृष्ट्वैवं तु तदा सर्वे दक्षस्य पुरवासिनः ।
व्याकुला रोदमानाश्च हाहाकारपरायणाः ॥२१॥

ततो ब्रह्मा तु सम्प्रार्थ्य देवदेवं सदाशिवम् ।
समानीय स्वयं प्राह दक्षं जीवय जीवय ॥२२॥

यज्ञं समापय विभो देवदेव प्रसीद माम् ।
तच्छ्रुत्वा वचनं तस्य दक्षं स समजीवयत् ॥२३॥

दत्त्वैकं छागमुण्डं तु शिवनिन्दनकारणात् ।
एवं दृष्टो मया स्वप्नो रजन्याः शेष एव हि ॥२४॥

सा च त्वं श्यामकर्णाद्य समायातासि मत्पुरम् ।
यथा स्वप्ने मया दृष्टा तथा साक्षात्प्रदृश्यसे ॥२५॥

भवितव्यं यथादृष्टं दक्षस्यापि प्रजापतेः ।
यतस्त्वां स्वप्नसंदृष्टां तथैव हि विलोकये ॥२६॥

मातः कदाचित्तत्स्वप्नं विफलं सम्भविष्यति ।
शिवनिन्दाफलं प्राप्य मूर्खत्वं सोऽपि हास्यति ॥२७॥

युवां ज्ञास्यति विद्वेषमचिरेणैव हास्यति ।
त्वं चिरं जीव हे पुत्रि न ते हानिः कदाचन ॥२८॥

भूयात्स्वप्ने वियोगं तु दृष्ट आयुश्च वो भवेत् ।
त्वं यस्य स ह्यशोच्यश्च धन्यश्च स हि भाग्यवान् ॥२९॥

नाहं त्वया कदाचित्तु त्यक्तव्या जननी तव ।

श्रीमहादेव उवाच—

एवं सम्प्राप्य सन्मानं सती नत्वा च मातरम् ॥३०॥

अनुज्ञाता तया तूर्णं ययौ दक्षस्य सन्निधिम् ।
एतस्मिन्नेव काले तु दक्षस्य पुरवासिनः ॥३१॥

परस्परं समाजस्थाः किमेतन्महदद्भुतम् ।
सती कनकगौराङ्गी सौम्यरूपा वराङ्गना ॥३२॥

भीमरूपा कथमभून्नवीनजलदप्रभा ।
मुक्तकेशी भीमदंष्ट्रा क्रोधाद्दीप्तविलोचना ॥३३॥

द्वीपिचर्मपरीधाना वीरबाहुचतुष्टया ।
कथमेवं समायाता यज्ञेऽस्मिन्सुरसंसदि ॥३४॥

मन्ये जगदिदं क्रोधाद्ग्रसन्तीव क्षणार्धतः ।
न जाने का गतिर्वा स्यादद्य दक्षप्रजापतेः ॥३५॥

कृत्वापमानमस्यास्तु यज्ञं तु कुरुते सुरैः ।
नूनं तस्य फलं दातुं क्रुद्धैषा समुपागता ॥३६॥

संहारकाले या विष्णुं ब्रह्माणमपि नाशयेत् ।
सैषा चेन्नाशयेद्यज्ञं विष्णुर्वा किं करिष्यति ॥३७॥

अथागत्य सती यज्ञशालायां तं प्रजापतिम् ।
ददर्श शिवविद्वेषोद्भवहर्षसमाकुलम् ॥३८॥

तां दृष्ट्वा हव्यभोक्तारो देवाश्च ऋषयस्तथा ।
बृहस्पतिः सुराश्चापि समकम्पन्त साध्वसात् ॥३९॥

निश्चलाक्षास्त्यक्तकार्यास्तामेव ददृशुः पराम् ।
देवाः सर्वे महात्मानः पटे चित्रार्पिता इव ॥४०॥

न नमन्ति भयात्केचित्साक्षाद्दक्षभयात्सुराः ।
प्रणेमुर्मनसा कालीं देवीं संहारकारिणीम् ॥४१॥
ततो दक्षो विलोक्यैव सर्वानेव तथाविधान् ।
दिक्ष्वक्षिणी प्रसार्यैव सर्वतः समलोकयत् ॥४२॥
ततो ददर्श तां कालीं क्रोधादीप्तविलोचनाम् ।
मुक्तकेशीं त्यक्तवस्त्रां धूमाञ्जनचयप्रभाम् ॥४३॥

दक्ष उवाच—

कासि कस्यासि दुहिता वनिता विगतत्रपा ।
कथमत्र समायाता सतीव समलक्ष्यसे ॥४४॥
किं वा शिवालयात्पुत्रि सती मे त्वं समागता ॥

सत्युवाच—

पितः किमेतत्स्वां कन्यां मां न जानासि ते सतीम् ॥४५॥
त्वं मे पिताहं त्वत्कन्या पितरं त्वां नतास्म्यहम् ॥

दक्ष उवाच—

किं मातरेवं कस्मात्त्वं श्यामा भूतासि हा सति ॥४६॥
लसत्कनकगौराङ्गी शरच्चन्द्रसमप्रभा ।
दिव्यवस्त्रपरीधाना पूर्वमासीर्गृहे मम ॥४७॥
सा त्वं विगतवस्त्राद्य सभायामागतासि किम् ।
कथं वा मुक्तकेशी त्वं कथं वा भीमलोचना ॥४८॥
किमयोग्यं पतिं लब्ध्वा प्राप्ता त्वमीदृशीं दशाम् ।
मम यज्ञमहोत्साहे त्वं नाहूता मया पुनः ॥४९॥
शिवपत्नीत्वहेतोर्वै न तु स्नेहाद्यभावतः ।
भद्रं कृतवती या त्वं स्वयमेव समागता ॥५०॥
त्वदर्थे वस्त्रभूषादि स्थापितं परिगृह्यताम् ।
हा सुते प्राणतुल्यासि सति त्रैलोक्यसुन्दरि ॥५१॥
प्राप्यायोग्यं पतिं शम्भुं दुःखितासि सुलोचने ।
इति दक्षोदितं श्रुत्वा शिवनिन्दाकरं वचः ॥५२॥
रुषा ज्वलितसर्वाङ्गी चिन्तयामास सा सती ।
क्षणार्धेनैव पितरं समखं दैवतैः सह ॥५३॥
शक्नोमि भस्मसात्कर्तुं पितृहत्याभयेन तत् ।
न करिष्यामि किन्त्वेनं मोहये सह दैवतैः ॥५४॥

एवं विचिन्त्य मनसा सती दाक्षायणी तदा ।
आत्मनस्तुल्यरूपा सा छायां समसृजत्क्षणात् ॥५५॥

छायासतीं सती प्राह मद्वाक्यमवधारय ।
त्वमेकं कुरु मत्कार्यं यज्ञमेनं विनाशय ॥५६॥

उक्त्वा बहुविधं वाक्यं पित्रा सह सुलोचने ।
शिवनिन्दाकरं वाक्यं श्रुत्वा पितुमुखान्मम ॥५७॥

विशस्व यज्ञवह्नौ त्वं रुषा ज्वलितविग्रहा ।
अहमस्य सुतेत्यस्माद्गर्वितः शिवनिन्दनम् ॥५८॥

करोति तेन तं गर्वं त्वमाशु परिचूर्णय ।
त्वयि वह्नौ प्रविष्टायां श्रुत्वा देवो महेश्वरः ॥५९॥

शोकसन्तप्तहृदयः समायास्यति निश्चितम् ।
निर्जित्य देवान् विष्णुं च यज्ञरक्षणतत्परम् ॥६०॥

नाशयिष्यति यज्ञं च पितरं च वधिष्यति ।
एवमुक्त्वा महाकाली छायाकालीं हसन्मुखी ॥६१॥

स्वयमन्तर्हिता भूत्वा देवी गगनमास्थिता ।
भेरीमृदङ्गनादैश्च तूर्यशब्दैर्महोत्सवैः ॥६२॥

तत्राभवत्पुष्पवृष्टिरतीव मुनिपुङ्गव ।
नैतदालोकितं कैश्चिद् देवैर्वापि महर्षिभिः ॥६३॥

तन्मायामोहितैस्तस्या निकटे संस्थितैरपि ।
अथ छायासती क्रुद्धा प्राह दक्षं प्रजापतिम् ॥६४॥

किं निन्दसि सतीं मोहाद्देवदेवं सनातनम् ।
वाचं नियच्छ कल्याणं यदीच्छसि सुदुर्मते ॥६५॥

छिन्दे जिह्वां महामूर्ख शिवनिन्दाकरामिमाम् ।
चिरं यत्परमेशानो निन्दितः सुरसंसदि ॥६६॥

फलं समागतमिति तस्याद्यैव हि लक्षये ।
यो निन्दति महेशानं सर्वलोककारणम् ॥६७॥

शिरश्छिनत्ति तेषां स परमात्मा सदाशिवः ॥

दक्ष उवाच —

बालिके स्वल्पमतिके मा पुनर्ब्रूहि मेऽग्रतः ॥६८॥

जानामि तं दुराचारं प्रेतभूमिनिवासिनम् ।
स्वयं समार्जितं बुद्ध्या पतिं भूतगणाधिपम् ॥६९॥

गत्वा स्वयोग्यं परमं सुखमाप्नोषि दुर्मते ।
अहं प्रजापतिर्दक्षो देवदेवीषु गोचरः ॥७०॥
ममाग्रे किं शिवं स्तौषि यच्छ्रोतुं नैव शक्यते ॥

छायासत्युवाच—

पुनर्ब्रवीमि हे दक्ष यदि कल्याणमिच्छसि ॥७१॥
त्यज पापमतिं भक्त्या भज देवं सदाशिवम् ।
यदि मोहात्परात्मानं पुनर्निन्दसि शङ्करम् ॥७२॥
तदा त्वां समखं शम्भुर्नाशयिष्यति निश्चितम् ॥

दक्ष उवाच—

कुपुत्रि दुश्चरित्रा त्वं चक्षुषोर्मे बहिर्भव ॥७३॥
प्राप्ता यदा पतिं शम्भुं तदैव त्वं मृतासि मे ।
पुनः पुनः स्मारयसि कथं रुद्रं निजं पतिम् ॥७४॥
तुषानल इवान्तस्थो येन मे वर्धतेऽनलः ।
त्वं मे कुपुत्रि दुर्बुद्धिः शिवं पतिमुपागता ॥७५॥
त्वद्दर्शनेन महेहो दह्यते शोकवह्निना ।
सा त्वं मे चक्षुषोर्बाह्यं शीघ्रं भव दुरात्मिके ॥७६॥
भर्तुर्गुणानुवादं ते मा कुरुष्व ममाग्रतः ॥

श्रीमहादेव उवाच—

एवमुक्ता तु सा देवी छायाकाली रुषान्विता ॥७७॥
दधौ भयानकां मूर्तिं ज्वलन्नेत्रत्रयोज्ज्वलाम् ।
नक्षत्रलोकसम्प्राप्तमस्तकां विस्तृताननाम् ॥७८॥
आपादलम्बिसंमुक्तकेशपाशविराजिताम् ।
मध्याह्नार्कसहस्राभां युगान्तजलदप्रभाम् ॥७९॥
ततः सा क्रोधदीप्ताङ्गी साट्टहासं मुहुर्मुहुः ।
कृत्वा गम्भीरया वाचा दक्षमाह महेश्वरी ॥८०॥
अहं ते चक्षुषोर्बाह्यं भविष्यामि न केवलम् ।
त्वज्जातदेहबाह्यापि भविष्याम्यचिरादिह ॥८१॥
एवं छायासती देवी क्रोधाद्दीप्तविलोचना ।
पश्यतां सर्वदेवानां यज्ञवह्नौ समाविशत् ॥८२॥
ततश्चचाल वसुधा वायुः सुतुमुलो ववौ ।
पेतुः सूर्यं विनिर्भिद्य महोल्का धरणीतले ॥८३॥

दिशश्च व्याकुला ह्यासन् ववर्षुः शोणितं घनाः ।
देवाः सर्वे विवर्णाः स्युः कुण्डेऽग्निर्निर्ववौ ततः ॥८४॥
शृगालकुक्कुरैर्हव्यं भक्षितं यज्ञमण्डपे ।
श्मशानवद्यज्ञगृहं समभूच्च क्षणार्धतः ॥८५॥
दक्षोऽपि म्लानवदनो निःश्वासान्मुमुचे मुहुः ।
पुनर्यथाकथञ्चिच्च यज्ञं प्रावर्तयन् द्विजाः ॥८६॥
देवास्तु चकिता आसन् भयात्पशुपतेर्मुने ।
ऊचुः परस्परं सर्वे देवाश्चापि महर्षयः ॥८७॥
वार्ताऽशुभा क्षणेनैव संचरत्यतिदूरतः ।
अद्यैव श्रोष्यति शिवः सत्या देहविसर्जनम् ॥८८॥
स तु क्रुद्धो महाराजो जगत्संहारकारकः ।
न जाने कस्य किं कुर्यात्किंवा सृष्टिं विलोपयेत् ॥८९॥
नारदस्तु सभामध्यादतर्कितरवोत्थितः ।
कैलासं प्रययौ शीघ्रं महर्षिर्मुनिपुङ्गवः ॥९०॥

श्रीमहाभागवते उपपुराणे छायासत्यग्निप्रवेशो नाम नवमोऽध्यायः ॥

दशमोऽध्यायः

श्रीमहादेव उवाच—

अथागत्य मुनिश्रेष्ठो नारदो ब्रह्मणः सुतः ।
अश्रुपूर्णेक्षणं प्राह देवदेवं त्रिलोचनम् ॥१॥
देवदेव नमस्तुभ्यं नारदोऽहं महेश्वर ।
दक्षालयात्समायातो वार्तां त्वं श्रुतवान्नहि ॥२॥
दक्षयज्ञे गता देवी सती ते प्राणवल्लभा ।
तव निन्दां ततः श्रुत्वा जहौ देहं रुषान्विता ॥३॥
दक्षः सतिसतीत्येवमाक्षिप्य स मुहुर्मुहुः ।
पुनर्दधौ मनो यज्ञे देवा गृह्णन्ति चाहुतिम् ॥४॥
इति नारदवक्त्रात्स श्रुत्वा दुःखपरं वचः ।
रुरोद बहुधा शोकाद्देवदेवस्त्रिलोचनः ॥५॥

हा हा सति गता क्वासि त्यक्त्वा मां शोकसागरे ।
त्वया विना कथं वाद्य जीवितं धारये ह्यहम् ॥६॥
किं त्वं पितृगृहे गन्तुं निषिद्धा बहुधा मया ।
तेन सञ्जातरोषा मां परित्यज्य गता शिवे ॥७॥
विलप्यैवं बहुविधं महादेवस्त्रिलोचनः ।
चुक्रोध रक्तनेत्रास्यो बभूव च महामुने ॥८॥
रुद्रं क्रोधान्वितं दृष्ट्वा सर्वभूतानि तत्रसुः ।
क्षुब्धमासीज्जगत्सर्वं चचाल वसुधा भृशम् ॥९॥
अथोर्ध्वनयनादग्निः प्रादुरासीन्महाद्युतिः ।
तस्मादग्नेः समभवदेकः परमपूरुषः ॥१०॥
प्रदधन्महतीं मूर्तिं कालान्तकयमोपमः ।
ज्वलद्वह्निस्फुलिङ्गाभनेत्रत्रयभयानकः ॥११॥
विभूतिलिप्तसर्वाङ्गश्चन्द्रार्धकृतशेखरः ।
मध्याह्नकोटिसूर्याभजटामण्डितमस्तकः ॥१२॥
स प्रणम्य महादेवं देवदेवं महेश्वरम् ।
त्रिश्च प्रदक्षिणीकृत्य कृताञ्जलिपुटोऽब्रवीत् ॥१३॥
किं पितः करवाण्यद्य ब्रह्माण्डं सचराचरम् ।
नाशयामि क्षणार्धेन यद्यनुज्ञां ददासि मे ॥१४॥
किमिन्द्राद्यान् सुरश्रेष्ठान्केशे धृत्वा तवाग्रतः ।
आनयामि यमं, मृत्युं नयामि वद चेद्विभो ॥१५॥
प्रतिज्ञा मे महेशान सत्यं सत्यं ब्रवीमि ते ।
यस्य त्वं शमनार्थाय कथयिष्यसि मामिह ॥१६॥
तथैव शमयिष्यामि अपि शक्रं सुरेश्वरम् ।
अपि वैकुण्ठनाथश्चेत्तत्सहायं करिष्यति ॥१७॥
तदा तं कुण्ठितास्त्रं च करिष्येऽहं तवाज्ञया ।

शिव उवाच—

त्वं नाम्ना वीरभद्रोऽसि प्रमथानां पतिः स्वयम् ॥१८॥
गत्वा दक्षपुरं यज्ञं नाशयाशु ममाज्ञया ।
तत्सहायाश्च ये देवा मां परित्यज्य चागताः ॥१९॥

तेषामपि नियन्ता त्वं भव वत्स ममाज्ञया ।
मन्निन्दनरतं वक्त्रं दक्षस्यापि प्रजापतेः ॥२०॥
छिन्धि गच्छ द्रुतं तत्र मा चिरं कुरु हे सुत ।
इत्युक्त्वा वीरभद्रं स महादेवस्त्रिलोचनः ॥२१॥
निःश्वासान्मुमुचे तस्माद्गणा जाताः सहस्रशः ।
सर्वे ते भीमकर्माणः सर्वे युद्धविशारदाः ॥२२॥
गदासिमुसलप्रासशूलपाषाणपाणयः ।
तैर्वृतो वीरभद्रश्च प्रणम्य परमेश्वरम् ॥२३॥
प्रदक्षिणत्रयं कृत्वा निर्जगाम महामतिः ।
सिंहनादं ततः कृत्वा सर्वे ते प्रमथाः क्षणात् ॥२४॥
ययुर्दक्षपुरीं यत्र यज्ञमाऽब्धवान् हि सः ।
अथ क्रुद्धो वीरभद्रः प्रमथानाह कोपितान् ॥२५॥
यज्ञं नाशयत क्षिप्रं विद्रावयत वै सुरान् ।
ततस्ते प्रमथाः सर्वे बभञ्जुस्तं महाध्वरम् ॥२६॥
केचिदुत्पाट्य यूपांश्च चिक्षिपुश्च दिशो दश ।
कश्चिन्निर्वापयामास कुण्डं हव्यं तथापरे ॥२७॥
बुभुजुः क्रोधताम्राक्षा देवान् व्यद्रावयंस्तथा ।
एवं विध्वंसितं यज्ञं प्रमथैर्भीमरूपिभिः ॥२८॥
दृष्ट्वा विष्णुरथागत्य प्रमथानब्रवीद्वचः ।
कथं विनाशितो यज्ञो युष्माभिर्देवता अपि ॥२९॥
कथं विद्राविता यूयं के तद्वदत मा चिरम् ।

प्रमथा ऊचुः—

वयं श्रीदेवदेवेन प्रेषिताः प्रमथाः प्रभो ॥३०॥
शिवापमानजनकं नाशयामो महाध्वरम् ।
अथाह प्रमथान् क्रुद्धो वीरभद्रः प्रतापवान् ॥३१॥
क्व स दक्षो दुराचारः शिवद्वेषपरायणः ।
क्व च ते हव्यभोक्तारो धृत्वानयत मत्पुरः ॥३२॥
इत्याज्ञप्ता गणाः क्रुद्धाः प्राभ्यधावन् दिशो दश ।
गृहीत्वा त्रिदशान् सर्वान् ममर्दुः क्रोधमूर्छिताः ॥३३॥

केचित्सूर्यं प्रगृह्यैव दन्तपङ्क्तिमचूर्णयन् ।
कश्चिद्गिं बलाद्धृत्वा जिह्वां तस्य समाच्छिनत् ॥३४॥

भयात्पलायमानस्य यज्ञस्य मृगरूपिणः ।
कश्चिच्छिरोऽच्छिनन्नासां सरस्वत्याश्च कश्चन ॥३५॥

अर्यम्णश्चाच्छिनद्बाहू ओष्ठमङ्गिरसोऽपरः ।
यमं बबन्ध कश्चिच्च नैर्ऋतं वरुणं तथा ॥३६॥

प्रमथा ब्राह्मणान् दृष्ट्वा प्रणम्य विनयान्विताः ।
भयं त्वजत हे विप्रा यात यातेति चाब्रुवन् ॥३७॥

तच्छ्रुत्वा ब्राह्मणाः सर्वे वस्त्रालङ्करणादिकम् ।
यज्ञलब्धं गृहीत्वैव प्रययुः स्वीयमालयम् ॥३८॥

सहस्राक्षो महाबुद्धिर्मायूरं वपुरास्थितः ।
उड्डीय पर्वतं गत्वा छन्नः कौतुकमैक्षत ॥३९॥

एवं विद्रावितान् दृष्ट्वा प्रमथैर्देवपुङ्गवान् ।
विष्णुर्नारायणो मौनी चिन्तयामास चेतसा ॥४०॥

दक्षो मूढमतिः शम्भुं विद्विषन्कुरुते मखम् ।
तस्मै तादृक् फलं नो चेद्विफलं स्याच्छ्रुतीरितम् ॥४१॥

शिवविद्वेषणेनैव विद्विष्टोऽस्मि न संशयः ।
अहं शिवः शिवो विष्णुर्भेदो नास्त्यावयोर्यतः ॥४२॥

अनेन विष्णुरूपेण प्रार्थितोऽस्मि विशेषतः ।
निन्दितोऽस्मि महादेवस्वरूपेणाहमेव हि ॥४३॥

अस्यापि भावद्वैविध्यं कर्मणा मनसापि च ।
विधत्ते द्विविधं भावं करिष्याम्यहमेव तत् ॥४४॥

रक्षिता विष्णुरूपेण संहर्ता शिवरूपतः ।
कृत्वा स्नेहात्स्वयं युद्धं लब्ध्वा तत्र पराजयम् ॥४५॥

रुद्ररूपेण तं दक्षं शमयिष्याम्यसंशयम् ।
पश्चात्तु यज्ञं सम्पूर्णं करिष्यामि सुरैः सह ॥४६॥

विष्णोराराधनस्यात्र फलमेतद्धि कीर्तितम् ।
एवं निश्चित्य मनसा शङ्खचक्रगदाधरः ॥४७॥

प्रमथान्वारयामास सिंहनादं मुमोच ह ।
अथ क्रुद्धो वीरभद्रः प्राह विष्णुं सनातनम् ॥४८॥

विष्णो यज्ञपुमांस्त्वं हि श्रूयतेऽस्मिन्महाध्वरे ।
क्व स दक्षो दुराचारः शिवनिन्दापरायणः ॥४९॥

समानीय स्वयं देहि न त्वं युद्धं मया कुरु ।
प्रायशः शम्भुभक्तानां विशिष्टेषु त्वमग्रणीः ॥५०॥

विद्वेषिणां हितायापि त्वं चाप्येको व्यवस्थितः ।
ततः स्मित्वा प्राह विष्णुरहं योत्स्ये त्वया सह ॥५१॥

विजित्य मां रणे दक्षं नय पश्यामि ते बलम् ।
इत्युक्त्वा धनुरुद्यम्य शरजालमवाकिरत् ॥५२॥

क्षतविक्षतसर्वाङ्गा गणास्तैरभवन् क्षणात् ।
रक्तं वेमुश्च शतशो मूर्छिताश्च सहस्रशः ॥५३॥

ततः स वीरभद्रोऽपि गदां चिक्षेप तं प्रति ।
सा तद्देहमनुप्राप्य विदीर्णा शतधाभवत् ॥५४॥

विष्णुश्चापि गदामेव प्रचिक्षेप रुषान्वितः ।
वीरभद्रं समासाद्य साप्यासीत्तु महामुने ॥५५॥

ततः पुनरमेयात्मा क्रोधाद्दीप्तविलोचनः ।
जग्राहान्यामपि गदामद्रिसारमयीं क्षणात् ॥५६॥

ततः खट्वाङ्गमादाय वीरभद्रो गदाधरम् ।
सन्ताड्य बाहुदण्डे तं गदां भूमौ न्यपातयत् ॥५७॥

ततः प्रकुपितो विष्णुश्चक्रं चिक्षेप तं प्रति ।
सुदर्शनं महाघोरं ज्वलन्तं निजतेजसा ॥५८॥

तं दृष्ट्वा वीरभद्रोऽपि शिवं संस्मार चेतसा ।
तेन कण्ठगतं चक्रं मालेव विबभौ मुने ॥५९॥

ततः क्रुद्धो रणे विष्णुः खड्गं सूर्यशतप्रभम् ।
जग्राह वीरभद्रं च निहन्तुं सोऽभ्यधावत ॥६०॥

ततः खड्गं च तं विष्णुं वीरभद्रः प्रतापवान् ।
हुङ्कारेण महाबाहुः स्तम्भयामास तत्क्षणात् ॥६१॥

ततः संस्तम्भितं विष्णुं वीरभद्रः समभ्यगात् ।
शूलमुद्गरमुद्यम्य निहन्तुं क्रोधमूर्च्छितः ॥६२॥

ततोऽभवद्देववाणी वीरभद्र स्थितो भव ।
किमात्मानं विस्मृतोऽसि क्रोधमासाद्य चाहवे ॥६३॥

यो विष्णुः स महादेवः शिवो नारायणः स्वयम् ।
नानयोर्विद्यते भेदः कदाचिदपि कुत्रचित् ॥६४॥

इति श्रुत्वा वीरभद्रो नत्वा विष्णुं शिवात्मकम् ।
दक्षं गृहीत्वा केशेषु वाक्यमाह महामतिः ॥६५॥

येन वक्त्रेण देवेशं शिवं परमपूरुषम् ।
निनिन्दिथ त्वं तद्वक्त्रं प्रहरामि प्रजापते ॥६६॥

इत्युक्त्वा सम्प्रहार्यैव दक्षवक्त्रं पुनः पुनः ।
नखाग्रेण प्रचिच्छेद क्रोधसंरक्तलोचनः ॥६७॥

तथान्ये ये महादेवनिन्दामाकर्ण्य हर्षिताः ।
तेषां जिह्वाः श्रुतीश्चापि चिच्छेद प्रमथाधिपः ॥६८॥

एवं विनष्टे यज्ञे तु विधिः कैलासमभ्यगात् ।
प्रणम्य च महादेवं विधिलोपं न्यवेदयत् ॥६९॥

उवाच तं महादेवं कथमेवं करोषि वा ।
सती नित्या जगद्धात्री जाता ब्रह्मस्वरूपिणी ॥७०॥

तस्या देहपरिग्राह इति भ्रान्तं विडम्बनम् ।
सा तु दक्षविमोहाय महामाया जगन्मयी ॥७१॥

छायासती यज्ञकुण्डसन्निधौ स्थापिता तया ।
सैव छाया यज्ञवह्नौ मोहार्थं वै प्रजापतेः ॥७२॥

प्राविशत्प्राकृता देवी स्वयं गगनमास्थिता ।
तद्धि किं त्वं न जानासि कथमेवं करोषि वा ॥७३॥

आगच्छ देवदेवेश प्रणतेषु कृपां कुरु ।
विधिसंरक्षकस्त्वं हि मा विधिं परिलोपय ॥७४॥

अत्र यज्ञं समाप्यैव सहितोऽस्माभिरेव च ।
सम्प्रार्थ्य परमेशानीं पुनर्द्रक्ष्यसि निश्चितम् ॥७५॥

तदागच्छ महादेव दक्षस्य निलयं प्रति ।
न तु गृह्णीष्व मां देव नान्यथा कर्तुमर्हसि ॥७६॥

इति तस्य वचः श्रुत्वा शिवो दक्षालयं ययौ ।
समागतं विलोक्यैव वीरभद्रो ननाम तम् ॥७७॥

ततो ब्रह्मा पुनर्देवं सम्प्रार्थ्योवाच सम्भ्रमात् ।
आज्ञापय महेशान पुनर्यज्ञः प्रवर्तताम् ॥७८॥

ततः शम्भुर्वीरभद्रं समाज्ञापयदुत्सुकम् ।
त्यज कोपं वीरभद्र पुनर्यज्ञं प्रकल्पय ॥७९॥

इत्याज्ञप्तो वीरभद्रो महादेवेन तत्क्षणात् ।
पूर्ववत्कल्पयामास यज्ञं देवेन मोचयत् ॥८०॥

ततो ब्रह्मा पुनः प्राह देवदेवं त्रिलोचनम् ।
दक्षं जीवयितुं चाज्ञां विधेहि परमेश्वर ॥८१॥

तच्छ्रुत्वा वचनं तस्य ब्रह्मणः प्राह शङ्करः ।
वीरभद्र महाबाहो दक्षं जीवय जीवय ॥८२॥

तच्छ्रुत्वा वचनं तस्य देवदेवस्य बुद्धिमान् ।
दत्त्वैकं छागमुण्डं तु स दक्षं समजीवयत् ॥८३॥

ईश्वरं ये विनिन्दन्ति ते मूकाः पशवो ध्रुवम् ।
एवं विविच्य दक्षाय छागमुण्डं ददौ मुने ॥८४॥

ब्रह्मणा प्रार्थिताः सर्वे निर्भीताः पुनराययुः ।
दत्त्वाहुतिं महेशाय दक्षो यज्ञं समापयत् ॥८५॥

ततो ब्रह्मा च विष्णुश्च दक्षं प्राह प्रजापतिम् ।
शिवं पूजय देवेशं नानास्तुतिभिरादरात् ॥८६॥

चिरं विनिन्द्य देवेशं यत्पापं समुपार्जितम् ।
न चास्य स्थास्यति तदा वैरस्यं त्वत्कृते पुनः ॥८७॥

तयोरिति वचः श्रुत्वा दक्षस्तं प्रणनाम ह ।
तस्माद्विमुक्तिकामस्त्वं स्तुहि देवं सनातनम् ॥८८॥

आशु तुष्यत्ययं देवः स्वभावाच्छ्रवनामतः ।
न चास्य स्थास्यति तदा वैरस्यं त्वत्कृते पुनः ॥८९॥

तयोरिति वचः श्रुत्वा दक्षस्तं प्रणनाम ह ।
स्तोतुं समारभद्देवं परमेश्वरमव्ययम् ॥९०॥

दक्ष उवाच—

न त्वां जानाति विष्णुर्नच कमलरुहो योगविद्योगमुख्य
एवं दुर्गम्यरूपं कथमतिकुमतिर्ज्ञातुमेवास्य योग्यः ।
त्वं सर्वेषां च बुद्धिस्तव मतिवशगाः सर्व एवेह लोका-
स्तत्को मे वापराधस्तव मतिवशगस्यास्ति ते निन्दनेन ॥९१॥

त्वं शुद्धः परमः परात्परतरो ब्रह्मादिदेवार्चितः
किं तेऽहं चरितं वदामि परमं किंवा स्वरूपं तव ।

दासोऽहं शरणागतस्तव पदद्वन्द्वं विना का गतिः
शम्भो तन्मेऽपराधं क्षमसि निजगुणैस्त्राहि पापार्णवान्माम् ॥९२॥
त्वं देवः परमेश्वरो जगति ये दीना महान्तोऽपि च
ते सर्वे तव मूर्तयः पशुपते त्वं विश्वरूपो यतः ।
तस्मिन्नेव हि संस्थिते मम कथं निन्दाकृतं पातकं
दीनं मां शरणागतं करुणया विश्वेश्वर त्राहि माम् ॥९३॥

त्वत्पादपङ्कजरजः शिरसा विधृत्य ब्रह्मा हरिश्च सुरवृन्दविवन्द्यपादः ।
यत्त्वां समागतमिहात्मदृशा सुरेशं पश्यामि भाग्यमतुलं मम पूर्वजानाम् ॥९४

त्वं कुबुद्धिः सुबुद्धिश्च सर्वेषां देहिनामिह ।
निन्दनीयश्च वन्द्यश्च नापराधस्ततो मम ॥९५॥

एवं सम्प्रार्थितः शम्भुराशुतोषः प्रजापतिम् ।
आकृष्य निजपाणिभ्यामुद्दधार दयानिधिः ॥९६॥

शिवाङ्गस्पर्शनादेव कृतकृत्यः प्रजापतिः ।
जीवन्मुक्तमिवात्मानं मेने भाग्यं महत्तरम् ॥९७॥

विविधैरुपहारैश्च पूजयामास शङ्करम् ।
कायेन मनसा वाचा भक्त्या परमया युतः ॥९८॥

ततो ब्रह्मा महादेवं पुनः प्रोवाच भक्तितः ।
भक्तानुकम्पी भगवान् त्वमेव हि सदाशिवः ॥९९॥

सानुग्रहेण भवता निशम्य वचनं मम ।
यतः प्रजापतिर्दक्षो रक्षितः परमेश्वर ॥१००॥

विहाय देवास्त्वां यज्ञे यास्यन्ति यदि कुत्रचित् ।
तादृशीं च दशां नूनं लभिष्यन्त्येव तत्क्षणात् ॥१०१॥

ये त्वां विना सुराश्चान्यान्यजन्ते च नराधमाः ।
हतयज्ञा भविष्यन्ति महापातकिनश्च ते ॥१०२॥

श्रीमहाभागवते उपपुराणे दक्षयज्ञविध्वंसनवर्णनं दशमोऽध्यायः ।

एकादशोऽध्यायः

श्रीमहादेव उवाच—

एवं यज्ञे तु सम्पूर्णे महादेवः पुनः पुनः ।
सतीवियोगदुःखार्तो रुरोद प्राकृतो यथा ॥१॥

ततो ब्रह्मा च विष्णुश्च तमुवाच महेश्वरम् ।
किं रोदिषि महाज्ञानिन् भ्रान्तवत्त्वं विमोहितः ॥२॥

पूर्णब्रह्ममयी देवी जगदम्बा सनातनी ।
महाविद्या विश्वकर्त्री विश्वचैतन्यरूपिणी ॥३॥

यस्या मायावशात्सर्वे वयं चापि विमोहिताः ।
तस्या देहपरित्याग इति भ्रान्तिविडम्बनम् ॥४॥

मृत्युञ्जयस्त्वं भगवान् यत्प्रसादान्महेश्वर ।
तस्या देहपरित्यागो मोहमात्रं न वास्तवम् ॥५॥

वयं त्रयस्तु पुरुषास्तस्या एव हि मूर्तयः ।
एषा तु तव निन्दा न तस्या निन्दा प्रजायते ॥६॥

तन्निन्दा तु महापापजनिका परमेश्वर ।
यस्य सञ्जायते पापं सा तं त्यजति निश्चितम् ॥७॥

धर्मिष्ठं सा महादेवी न जहाति कदाचन ।
अधर्मिणः परित्यागे न पित्रादिविवेचना ॥८॥

विद्यतेऽस्या धर्ममात्रं सम्बन्धो न तु लौकिकः ।
धर्मं यः कुरुते सोऽस्याः पिता माता च बान्धवः ॥९॥

अधर्मकारी परमः पशुरेव न बान्धवः ।
तस्मात्प्रजापतिं दक्षं तन्निन्दनपरायणम् ॥१०॥

कृतपापं विलोक्यैव सा तत्याज महेश्वरी ।
यद्यस्य पुत्रीभावेन सा तिष्ठति परा स्वयम् ॥११॥

तदा कथं स्याद्गमनं दुर्दान्तस्य प्रजापतेः ।
इत्यस्मात्सा महादेवी धर्मकर्मफलप्रदा ॥१२॥

त्यक्त्वातिपापिनं पूर्वं स्वयं स्वस्थानमाययौ ।
सा क्षणेनापि किं हन्तुमसमर्था प्रजापतिम् ॥१३॥

तथापि यत्कृतापेक्षा तल्लोकान् प्रति शिक्षितुम् ।
धर्मोपदेशकर्त्री सा यद्येवं न समाचरेत् ॥१४॥
तदा लोकाः कथं धैर्यं विदध्युः पितरं प्रति ।
तस्मात्सा परमा नित्या मोहयन्ती प्रजापतिम् ॥१५॥
मायया न्तर्हिता भूत्वा स्वयं गगनमास्थिता ।
शोकं त्यज महादेव वह्नौ छायासती गता ॥१६॥

शिव उवाच—

यदुक्तं सत्यमेवैतत्सती मे प्रकृतिः परा ।
नित्या ब्रह्ममयी सूक्ष्मा नैव देहं जहौ स्वयम् ॥१७॥
किन्तु कुत्र गता सा मे सती प्राणैकवल्लभा ।
पश्यामि चेच्छान्तमना भवामि परमेश्वरीम् ॥१८॥

ब्रह्मविष्णुरुद्रा ऊचुः—

स्तुवीमस्तां जगद्धात्रीं सर्वलोकैकवन्दिताम् ।
तदैव सुप्रसन्ना सा पुनर्दृश्या भविष्यति ॥१९॥

श्रीमहादेव उवाच—

एवं निश्चित्य ते देवाः शम्भुना सह नारद ।
तुष्टुवुस्तां महादेवीं साक्षाद्ब्रह्मस्वरूपिणीम् ॥२०॥

ब्रह्मविष्णुशिवा ऊचुः—

त्वं नित्या परमा विद्या जगच्चैतन्यरूपिणी ।
पूर्णब्रह्ममयी देवी स्वेच्छया धृतविग्रहा ॥२१॥
अद्वैतं ते परं रूपं वेदागमसुनिश्चितम् ।
नमामो ब्रह्म विज्ञानगम्यं परमगोपितम् ॥२२॥
सृष्ट्यर्थं सशरीरा त्वं प्रधानं पुरुषः स्वयम् ।
कल्पितं श्रुतिभिस्तेन द्वैतरूपा त्वमुच्यसे ॥२३॥
तत्रापि त्वां विनाऽपूर्णः पुरुषः शवरूपवत् ।
अतः सर्वेषु देवेषु तव प्राधान्यमुच्यते ॥२४॥
तां त्वामेवंविधां देवीमचिन्त्यचरिताकृतिम् ।
किं खर्वबुद्धयः स्तोतुं समर्थाः स्मो वयं शिवे ॥२५॥

अस्मांश्च स्वेच्छया त्वं हि सृष्ट्वा संहरसि स्वयम् ।
तस्मात्स्तोतुं समर्थः को भवेदिह जगत्त्रये ॥२६॥
त्वन्मायामोहिताः सर्वे ज्ञानिनो मानवाइव ।
वयं तत्त्वां कथं स्तोतुं शक्ताः स्मः परमेश्वरीम् ॥२७॥
त्वमस्माकं चेतना च बुद्धिः शक्तिस्तथैव च ।
विना त्वां शववत्सर्वे स्तोष्यामस्त्वां कथं वयम् ॥२८॥
यस्त्वं गुणैस्त्रिभिर्बद्धवा विमोहयसि मायया ।
अज्ञानिन इवास्मांश्च कस्त्वां विज्ञातुमुत्सहेत् ॥२९॥
दृष्टं तु तादृशं रूपमस्माभिर्दक्षवेश्मनि ।
तथैव दर्शनं देहि कृपया परमेश्वरि ॥३०॥
त्वामदृष्ट्वा जगद्धात्रीं विदर्णाः स्मो महेश्वरीम् ॥
ततः प्राणमिवात्मानं लक्षयामो शवा वयम् ॥३१॥

श्रीमहादेव उवाच—

एवं स्तुता महादेवी दृष्ट्वा देवविषण्णताम् ।
शिवं च व्याकुलं दृष्ट्वा गगने दर्शनं ददौ ॥३२॥
भूत्वा तु यादृशी काली दक्षयज्ञे समागता ।
छाया च यादृशी वह्नौ प्रविष्टा निजमायया ॥३३॥
प्रकृतिं तादृशीं तेऽपि ददृशुर्नीलश्चलेक्षणाः ।
शिवमाह महादेवी महादेव स्थिरो भव ॥३४॥
पुनस्त्वां प्रतिलप्स्यामि हिमालयसुता स्वयम् ।
भूत्वा मेनोदराज्जाता सा सत्यं तद्ब्रवीमि ते ॥३५॥
न मया सम्परित्यक्तस्त्वं कदाचिन्महेश्वर ।
तवैव हृदयस्थानं महाकालीपराश्रयः ॥३६॥
तस्मात्त्वं हि महाकालो जगत्संहारकारकः ।
त्वं प्रभुत्वाभिमानेन किञ्चिन्मामुक्तवानसि ॥३७॥
अहं तेनापराधेन साक्षात्पत्नीस्वरूपतः ।
न स्थास्यामि कियत्कालं भव शान्तमनाः शिव ॥३८॥
उपायं कथयाम्येकं कुरु शम्भो तदेव हि ।
प्रतिलप्स्यसि मां नूनं पूर्वतोऽधिकरूपिणीम् ॥३९॥

मम छाया यज्ञवह्नौ प्रविष्टा या महेश्वर ।
तां मूर्ध्नि कृत्वा मां प्रार्थ्य भ्रम पृथ्वीमिमां शिव ॥४०॥

स देहो बहुधा भूत्वा पतिष्यति धरातले ।
तत्र तद्धि महापीठं भविष्यत्यघनाशनम् ॥४१॥

योनिः पतिष्यते यत्र तत्तु पीठोत्तमं परम् ।
तत्र स्थित्वा तपस्तप्त्वा पुनर्मां प्रतिलप्स्यसे ॥४२॥

इत्युक्त्वा सा महादेवं समाश्वास्य पुनः पुनः ।
बभूवान्तर्हिता सद्यः सहसा मुनिपुङ्गव ॥४३॥

ब्रह्माद्यास्त्रिदशश्रेष्ठाः स्वस्वस्थानं विनिर्ययुः ।
ततः शिवः समागत्य पुनर्दक्षालये मुने ॥४४॥

प्रिये सति सतीत्येवं रुरोद प्राकृतो यथा ।
यज्ञशालां प्रविश्यैव छायासत्याः शरीरकम् ॥४५॥

ददर्श दीप्यमानं स भूमिष्ठं मुद्रितेक्षणम् ।
अक्षुण्णां तां विलोक्यैव निद्रितां प्राकृतामिव ॥४६॥

शोकसन्तप्तहृदयः प्राहेदं वचनं शिवः ।
सति तेऽहं पतिः शम्भुस्त्वत्समीपमुपागतः ॥४७॥

उत्तिष्ठ त्वं पूर्ववन्मां कथं न परिभाषसे ।
कृतागसं मां दक्षं च क्षिप्त्वा शोकमहार्णवे ॥४८॥

स्वयमन्तर्हितास्यस्मान्मोहयन्ती स्वमायया ।
न त्वां कदाचित्त्यक्ष्यामि मम प्राणैकवल्लभाम् ॥४९॥

प्रगृह्य परमामोदात्कियत्कालं भ्रमाम्यहम् ।
एवं विलप्य बहुधा शम्भुः प्राकृतलोकवत् ॥५०॥

बाहुभ्यां तां समालिङ्ग्य जग्राह शिरसो मुने ।
छायासत्यास्तु तं देहं धृत्वा शिरसि शङ्करः ॥५१॥

सम्प्राप्य परमं मोदं ननर्त धरणीतले ।
ब्रह्मादयः सुराधीशा देवा इन्द्रपुरोगमाः ॥५२॥

अपूर्वं रथमास्थाय गगने द्रष्टुमागमन् ।
पुष्पवृष्टिः समभवत्प्रमथाश्च दिशो दश ॥५३॥

मुखवाद्यं ततश्चक्रुर्ननृतुश्च लसज्जटाः ।
कदाचिच्छिरसा धृत्वा कदाचिद्दक्षिणे करे ॥५४॥

कदाचिद्ब्रह्महस्ते च कदाचित्स्कन्धदेशके ।
कदाचिद्वक्षसि प्रीत्या परिनृत्यन् सदाशिवः ॥५५॥

ननर्त चरणाघातैः कम्पयन् धरणीतलम् ।
चन्द्रलोकस्थितश्चन्द्रो ललाटे तिलकोऽभवत् ॥५६॥

ज्वलज्जटाविनिक्षिप्ता बभूवुस्तारकागणाः ।
सूर्यलोकस्थितः सूर्यः कण्ठे भूषणतां गतः ॥५७॥

कूर्मानन्तौ पीडितौ तां धरणीं त्यक्तुमुद्यतौ ।
नृत्यवेगप्रवृद्धेन वायुना च महीधराः ॥५८॥

सुमेरुप्रमुखाश्चेलुर्वृक्षा इव महामुने ।
एवं भूतानि संक्षोभ्य नृत्यन् सर्वां वसुन्धराम् ॥५९॥

बभ्राम शिरसा धृत्वा छायासत्यङ्गविग्रहम् ।
शिवस्तु परमामोदो मनसैवं व्यचिन्तयत् ॥६०॥

सति त्वं मम भार्येति लोकलज्जां परित्यजन् ।
मूर्ध्ना वहामि ते छायां भाग्यं मम महत्तरम् ॥६१॥

एवं स आत्मनो भाग्यमुपवर्ण्य सदाशिवः ।
अतीव परमामोदो ननर्त च मुहुर्मुहुः ॥६२॥

क्षुब्धमासीज्जगत्सर्वं पक्षिणो मृतकाइव ।
अकालप्रलयं भूता गणयामासुरव्रतः ॥६३॥

ब्रह्माज्ञया तु ऋषयश्चक्रुः स्वस्त्ययनं महत् ।
देवास्तु चिन्तयामासुः किमिदं समुपस्थितम् ॥६४॥

उपायं नैव पश्यामो जगद्रक्षा कथं भवेत् ।
दक्षोऽस्माकं विनाशाय जगतोऽस्य क्षयाय च ॥६५॥

आरब्धवान् कुयज्ञं स शिवविद्वेषकारणात् ।
शम्भुरानन्दसम्मग्नो विघूर्णनयनः प्रभुः ॥६६॥

न चिन्तयति लोकानां विपत्तिं समुपस्थिताम् ।
कथं शान्तो भवेद्देवो जगत्संहारकारकः ॥६७॥

ब्रवीम्युपायं त्रिदशा यत्नतः कुरुताधुना ।
उक्तं तदा महादेव्या छायादेव्यास्तु विग्रहम् ॥६८॥

भूतले विविधो भूत्वा पतिष्यति सुनिश्चितम् ।
यत्र यत्र च देहोऽयं खण्डशः प्रपतिष्यति ॥६९॥

तत्तत्स्थानं महापीठं पुण्यतीर्थं भविष्यति ।
तया यदुक्तं तन्मिथ्या कदाचिन्न भविष्यति ॥७०॥
पतिष्यति धरापृष्ठे छायासत्यास्तु विग्रहः ।
अहं तु सृष्टिरक्षार्थं कृत्वा साहसमुत्तमम् ॥७१॥
परमानन्दमग्नस्य महेशस्य शिरःस्थितम् ।
खण्डशः पातयिष्यामि छायासत्याः शरीरकम् ॥७२॥
सुदर्शनेन चक्रेण प्रभोः शम्भोरजानतः ।
एवं मयि कृते नूनं जगद्रक्षणकारिणी ॥७३॥
सैव ब्रह्ममयी देवी मां रक्षिष्यति शङ्करात् ॥

देव्युवाच—

प्रभो विष्णो जगन्नाथ यद्येवं कर्तुमर्हसि ॥७४॥
तवैव जगतां रक्षा न चेत्प्रलयमेष्यति ॥७५॥

श्रीमहादेव उवाच—

ततो विष्णुर्महाबाहुर्जगतः परिपालकः ॥७६॥
छायासत्याः शरीरं स पातयामास खण्डशः ।
सुदर्शनेन चक्रेण महाभीत इवेश्वरात् ॥७७॥
आनन्दमग्नचित्तस्य शिरसः परमेशितुः ।
नृत्यमानो यदा शम्भुः क्षिपते चरणौ भुवि ॥७८॥
तदैव प्राक्षिपच्चक्रं छायादेहं चकर्त सः ।
विष्णुचक्रेण सञ्छिन्नास्तद्देहावयवाः पृथक् ॥७९॥
निपेतुः पृथिवीपृष्ठे स्थाने स्थाने महामुने ।
महातीर्थानि तान्येव मुक्तिक्षेत्राणि भूतले ॥८०॥
सिद्धिपीठा हि ते देशा देवानामपि दुर्लभाः ।
तेषु देवीं समुद्दिश्य होमपूजादिकं तु यत् ॥८१॥
कुरुते कोटिगुणितं फलं तस्य महामुने ।
तत्र जप्त्वा महादेवीं साक्षात्पश्यति मानवः ॥८२॥
पातकी मुच्यते पापाद्ब्रह्महत्यादिकादपि ।
भूमौ निपतितास्ते तु छायाङ्गावयवाः क्षणात् ॥८३॥
जग्मुः पाषाणतां सर्वलोकानां हितहेतवे ।
ब्रह्मा विष्णुश्च रुद्रश्च तथेन्द्राद्याः सुरा मुने ॥८४॥

आगत्याहुर्वचस्तेषु सेवार्थे परमेश्वरीम् ।
एवं छायासतीदेहे निकृत्ते चक्रपाणिना ॥८५॥
निर्भारं स्वशिरो ज्ञात्वा शिवो धैर्यमुपेत्य च ।
ददर्श व्याकुलं सर्वं जगत्स्थावरजङ्गमम् ॥८६॥
एतस्मिन्नन्तरे विष्णुर्नारदं ब्रह्मणः सुतम् ।
शान्त्यर्थं देवदेवस्य प्रेषयामास सन्निधिम् ॥८७॥
गच्छ नारद भद्रं ते शिवं सान्त्वय मत्कृते ।
त्वमेवात्र समर्थोऽसि ब्रह्मपुत्रो महामतिः ॥८८॥
शिवः सतीवियोगेन दुःखार्तः परमेश्वरः ।
कस्य किं प्रकरोत्येष लयं वा जगतां विभुः ॥८९॥
यथा शान्तमना भूत्वा तिष्ठत्यद्य महेश्वरः ।
तथा कुरु महाबुद्धे सान्त्वयस्व सदाशिवम् ॥९०॥
इति तस्य वचः श्रुत्वा नारदः प्रययौ ततः ।
सम्मुखे देवदेवस्य कृताञ्जलिरुपस्थितः ॥९१॥
नृत्यन् स नारदं दृष्ट्वा कृताञ्जलिपुटं स्थितम् ।
प्राह मे क्व गता साध्वी सती प्राणैकवल्लभा ॥९२॥

नारद उवाच—

भव शान्तमनाः शम्भो सतीं लप्स्यसि सर्वथा ।
अस्त्येव ते सती नित्या गच्छन्तीं च विहायसा ॥९३॥
दृष्ट्वापि प्रत्ययो नैव जातः किं परमेश्वर ।
अकाले प्रलयं नैव कुरु शम्भो स्थिरो भव ॥९४॥

शिव उवाच—

युष्माकं किं करोम्येव कथं वदसि नारद ।
अकाले प्रलयं वापि करोमि कुत्र चाप्यहम् ॥९५॥
सतीविरहदुःखार्तश्छायासत्यास्तु विग्रहम् ।
प्राप्य विस्मृतदुःखोऽहमभवं तच्च केन वा ॥९६॥
शिरसः सोऽप्यपहृतो देहो दुष्टविचेतसा ॥

नारद उवाच—

भव शान्तमना देव सर्वं ते कथयाम्यहम् ॥९७॥

प्रसीदास्मान्महादेव त्यज नृत्यं लयप्रदम् ।
त्वन्नृत्येन विपन्नेयं वसुधापि निमज्जति ॥९८॥
पर्वताश्चलिताः सर्वे देवाः स्वर्गं तथात्यजन् ।
नाशमेति जगत्सर्वं सदेवासुरमानुषम् ॥९९॥
त्वया तु स्वकृतश्चासौ प्रलयो नैव दृश्यते ।
कथं नृत्यच्छलेनेदं विश्वं नाशयसि प्रभो ॥१००॥
किमीदृशं कर्मसु यत्स्वकीयार्थं विनाशयेत् ।
त्रैलोक्यरक्षको विष्णुर्दृष्ट्वा विपदमद्भुताम् ॥१०१॥
त्वां सान्त्वयितुकामोऽसौ धृत्वा चक्रं सुदर्शनम् ।
प्रक्षिप्य शनकैश्छायासतीदेहं समाच्छिनत् ॥१०२॥
स देहः खण्डशो भूमौ यत्र तत्र समापतत ।
महापीठास्तत्र जाताः कामरूपादयः प्रभो ॥१०३॥
उक्तं तया जगद्धात्र्या समाराधितया त्वया ।
पूर्वमेव हि देहोऽयं पतिष्यति धरातले ॥१०४॥
खण्डशो बहुधा भूत्वा महापीठप्रसिद्धये ।
तस्माद्विष्णुस्तथा चक्रे भव शान्तः सदाशिव ॥१०५॥

श्रीमहादेव उवाच—

एवमुक्तस्तु मुनिना त्यक्तनृत्यः सदाशिवः ।
विनिःश्वसन्मुहुर्विष्णुं शशाप कमलापतिम् ॥१०६॥
विष्णुर्मानुषरूपेण जनिष्यति महीतले ।
त्रेतायां सूर्यवंशेऽसौ मम शापेन निश्चितम् ॥१०७॥
तत्रातिरम्या तत्पत्नी सतीव प्राणवल्लभा ।
छायां संस्थाप्य सन्त्यक्त्वा माययान्तर्हिता स्वयम् ॥१०८॥
भविष्यति ततश्चासौ मायया विप्रमोहितः ।
आनन्दमग्नचित्तश्च भूत्वा यास्यति दूरतः ॥१०९॥
ततो यथा मां चक्रेऽसौ छायापत्नीवियोगिनम् ।
क्रूरराक्षसवद्विष्णुस्तथा राक्षसपुङ्गवः ॥११०॥
एनं करिष्यति क्रूरश्छायापत्नीवियोगिनम् ।

हृत्वा छायामयीं पत्नीं सत्यं सत्यं महामुने ।
शोकसन्तप्तहृदयः स यथाहं भविष्यति ॥१११॥

श्रीमहादेव उवाच—

एवं श्रुत्वा शिवो विष्णुं स्वस्थचित्तोऽभवत्ततः ।
प्रसार्य त्रीणि नेत्राणि ददर्श च जगत्त्रयम् ॥११२॥
दृष्ट्वा योनिं कामरूपे रोमाञ्चितकलेवरः ।
कामव्याकुलितोत्कण्ठो बभूव गिरिशः स्वयम् ॥११३॥
दृष्टमात्रे तु सा योनिः काममुग्धेन शम्भुना ।
पृथ्वीं विभिद्य पातालं गच्छन्तीव बभूव ह ॥११४॥
दृष्ट्वैवं शङ्करः सत्या भूत्वांशेन गिरिः स्वयम् ।
दधार योनिं हृष्टात्मा वर्णयन् भाग्यमात्मनः ॥११५॥
सर्वेषु तेषु पीठेषु कामरूपादिषु स्वयम् ।
पाषाणलिङ्गरूपेण ह्यधिष्ठाय व्यसेवत ॥११६॥
सस्मार पूर्वं तद्वृत्तं यदुक्तं हि तया मुने ।
योनिपीठे तपस्तप्त्वा पुनर्लब्ध्वा महेश्वरीम् ॥११७॥
ततः शान्तमना भूत्वा योगचिन्तापरोऽभवत् ।
विहायसा मुनिश्चापि ययौ स्वस्थानमुत्तमम् ॥११८॥

श्रीमहाभागवते उपपुराणे छायासतीवर्णनं नामैकादशोऽध्यायः ।

द्वादशोऽध्यायः

श्रीमहादेव उवाच—

गत्वा तु नारदः श्रीमान् विष्णोः सन्निकटं ततः ।
अथाब्रवीद्यथावृत्तं देवदेवस्य चेष्टितम् ॥१॥
अभिशापादिकं श्रुत्वा शिवस्याकुलितं तथा ।
ब्रह्मणा सहितो विष्णुः कामरूपं समभ्यगात् ॥२॥
द्रष्टुं देवं महेशानं शोकव्याकुलमानसम् ।
अश्रुधाराभिसंसिक्तगात्रं सान्त्वयितुं तथा ॥३॥

तौ दृष्ट्वा भगवान् शम्भुर्मुक्तकण्ठो रुरोद ह ।
पत्नीमाक्षिप्य बहुधा सतीं प्राकृतलोकवत् ॥४॥

ब्रह्मविष्णू ऊचतुः—

किमेवं देवदेवेश मृषा रोदिषि शङ्कर ।
विद्यमानामपि सतीं दृष्ट्वा ज्ञात्वापि मूढवत् ॥५॥

शिव उवाच—

सत्यं वदसि जानामि सतीं प्रकृतिरूपिणीम् ।
नित्यां ब्रह्ममयीं शुद्धां सृष्टिस्थित्यन्तकारिणीम् ॥६॥

दृष्ट्वा स्वचक्षुषा दक्षयज्ञभङ्गोत्तरं मया ।
तथैव तां न दृष्ट्वैव पत्नीभावेन पूर्ववत् ॥७॥

स्वगृहे मे मनोऽतीव व्याकुलं जायतेऽधुना ।
कथं पुनर्लभिष्यामि पूर्ववत्तां महेश्वरीम् ॥८॥

उपायं ब्रूहि मे ब्रह्मन् विष्णो त्वं चापि साम्प्रतम् ।

ब्रह्मविष्णू ऊचतुः—

भूत्वा शान्तमना देवं कामरूपेऽत्र संस्थितः ॥९॥

तामेव मनसि ध्यात्वा तपश्चर समाहितः ।
महापीठोऽयमत्रैव साक्षात्सा परमेश्वरी ॥१०॥

प्रत्यक्षफलदा देवी साधकानां न संशयः ।
माहात्म्यमस्य पीठस्य वक्तुं वा केन शक्यते ॥११॥

त्वमेव सर्वं जानासि सर्वज्ञः परमेश्वरः ।
किमावां कथयिष्यावो भव शान्तमनाः शिव ॥१२॥

शिव उवाच—

अत्रैवाहं तपश्चोग्रं चरिष्ये सुसमाहितः ।
तथापि कथितोऽप्येवं युवाभ्यामपि चाधुना ॥१३॥

श्रीमहादेव उवाच—

इत्युक्त्वा स शिवः शान्तस्तपस्तेपे समाहितः ।
कामरूपे महापीठे ध्यायंस्तां परमेश्वरीम् ॥१४॥

ब्रह्मा विष्णुश्च तत्रैव महापीठे ततः स्थितः ।
समाहितमनास्तीव्रं चचार परमं तपः ॥१५॥

बहुकाले गते देवी प्रसन्ना जगदम्बिका ।
प्रत्यक्षाभूज्जगन्माता तेषां त्रैलोक्यमोहिनी ॥१६॥
प्रोवाच च महादेवी किं तेऽभिलषितं वद ।

शिव उवाच—

यथा हि कृपया पूर्वं स्थिता मद्गेहिनी स्वयम् ॥१७॥
तत्रैव हि पुनश्चापि भव त्वं कृपयेश्वरि ।

देव्युवाच—

अतस्त्वामचिरेणैव हिमालयसुता स्वयम् ॥१८॥
द्विधा भूत्वा भविष्यामि सत्यमेव महेश्वर ।
यतस्तां शिरसा हर्षात्कृत्वा मन्नृत्यतत्परः ॥१९॥
अहं तेनांशतो भूत्वा गङ्गा जलमयी स्वयम् ।
त्वामेव पतिमापन्ना भविष्ये तव मूर्धनि ॥२०॥
अपरा पार्वती भूत्वा पत्नीभावेन शङ्कर ।
स्थास्यामि तव गेहेऽहं पूर्णैव हि महामते ॥२१॥

महादेव उवाच—

ततो भगवती देवी यत्राभिलषितं वरम् ।
ब्रह्मणे विष्णवे दत्त्वा स्वयमन्तर्हिताभवत् ॥२२॥
ततः सापि महादेवी द्विधा भूत्वा हिमालयम् ।
प्रययौ मेनकागर्भं स्वयं दुर्गाभवत्ततः ॥२३॥
ज्येष्ठा गङ्गाभवद्देवी कनिष्ठा पार्वती शुभा ।
शिवस्तु हृष्टचित्तः सन् कामरूपे महामतिः ॥२४॥
कामाख्यानिकटे भूयश्चचार परमं तपः ।
महापीठस्य माहात्म्याद्देवी भगवती स्वयम् ॥२५॥
महेशाय प्रसन्नाभूदभीष्टं च ददौ तथा ।
एवमन्यो यदा कश्चित्तस्मिन् पीठे महेश्वरीम् ॥२६॥
समाराधयते तस्य मनोऽभीष्टं प्रयच्छति ।

नारद उवाच—

कामरूपस्य माहात्म्यं कथयस्व महेश्वर ॥२७॥
यत्र साक्षाद्भगवती प्रत्यक्षफलदायिनी ।
आनुपूर्व्येषु पीठेषु श्रेष्ठं यत्परमेश्वर ॥२८॥
यतस्त्वयापि तत्रैव तपसाराधितेश्वरी ।

श्रीमहादेव उवाच—

पीठानि चैकपञ्चाशदभवन्मुनिपुङ्गव ॥२९॥
अङ्गप्रत्यङ्गपातेन छायासत्या महीतले ।
तेषु श्रेष्ठतमः पीठः कामरूपो महामते ॥३०॥

यत्र साक्षाद्भगवती स्वयमेव व्यवस्थिता ।
तत्र गत्वा महापीठे स्नात्वा लोहित्यवारिणि ॥३१॥

ब्रह्महापि नरः सद्यो मुच्यते भवबन्धनात् ।
ब्रह्मपुत्रः स्वयं साक्षाद्दवरूपी जनार्दनः ॥३२॥

तस्मिन्नेव कृतस्नानो मुच्यते सर्वपातकात् ।
तत्र स्नात्वा विधानेन पितॄन् संतर्प्य भक्तितः ॥३३॥

कामेश्वरीं नमस्कुर्यान्मन्त्रेणानेन साधकः ।
कामेश्वरीं च कामाख्यां कामरूपनिवासिनीम् ॥३४॥

तातकाञ्चनसंकाशां तां नमामि सुरेश्वरीम् ।
ततो मानसकुण्डादितीर्थं गत्वा विधानतः ॥३५॥

कृत्वा स्नानादिकं क्षेत्रं प्रविश्य च यथाविधि ।
दृष्ट्वा पीठं नरः सद्यो मुक्तो भवति नान्यथा ॥३६॥

तत्र तन्त्रोक्तविधिना सम्पूज्य परमेश्वरीम् ।
जपहोमादिकं कृत्वा यादृशं फलमश्नुते ॥३७॥

तद्वक्तुं नैव शक्नोमि कोटिभिर्वक्त्रकैरपि ।
यस्य सञ्जायते मृत्युस्तस्मिन् क्षेत्रे महामुने ॥३८॥

स मुक्तिमेति सद्यो वै सत्यं सत्यं न संशयः ।
किमत्र बहुनोक्तेन यत्र क्षेत्रे महामुने ॥३९॥

देवा मरणमिच्छन्ति किं पुनर्मानवादयः ।
इति ते कथितं वत्स संक्षेपेण महामुने ॥४०॥

कामरूपस्य माहात्म्यं सर्वपापप्रणाशनम् ।
तस्मिन् क्षेत्रे शिवः स्तुत्वा महेशीं तपसि स्थितः ॥४१॥

सती हिमवतो गेहं द्विधा भूत्वा समभ्यगात् ।
एवं दक्षगृहे जाता स्वयं प्रकृतिरुत्तमा ॥४२॥

संस्थाप्य परमां कीर्तिं लोकानां त्राणहेतवे ।
जगाम मेनकागर्भं पुनर्लब्धुं महेश्वरम् ॥४३॥

य इदं चरितं देव्या महापातकनाशनम् ।
शृणोति परया भक्त्या स शिवत्वमवाप्नुयात् ॥४४॥

देवा मनुष्या गन्धर्वा यक्षराक्षसचारणाः ।
तस्याज्ञावशगाः सर्वे भवन्तीह न संशयः ॥४५॥

अव्याहताज्ञः सर्वत्र भवेत्संश्रवणान्नरः ।
भवत्यवश्यं दुर्गं च सुदुष्करमपि क्षणाद् ॥४६॥

श्रवणान्नाशमायाति पापं जन्मान्तरार्जितम् ।
रिपवः संक्षयं यान्ति वंशवृद्धिः प्रजायते ॥४७॥

संसारे जन्म चासाद्य नैतदाकलितं हि यैः ।
तेषां जन्म वृथा मर्त्ये सत्यमेव महामते ॥४८॥

श्रुत्वेदं चरितं देव्याः संसारव्याधिभेषजम् ।
जीवन्मुक्तो भवेत्सद्यो यदि स्यादतिपातकी ॥४९॥

श्रीमहाभागवते उपपुराणे कामरूपादि माहात्म्यवर्णनं नाम द्वादशोऽध्यायः ।

त्रयोदशोऽध्यायः

श्रीमहादेव उवाच—

शृणु वत्स प्रवक्ष्यामि द्विधा भूत्वा स्वयं सती ।
यथाऽभवन्मेनकाया गर्भे हिमवतः सुता ॥१॥

तत्रादौ समभूद्गङ्गा निजांशेन सितप्रभा ।
स्थातुं शिरसि शम्भोः सा भूत्वा द्रवमयी मुने ॥२॥

तत्पश्चात्समभूद्गौरी पूर्णा शङ्करगेहिनी ।
सा हि यत्प्रेमभावेन शरीरार्धं महेशितुः ॥३॥

तत्राभूत्सा यथा गङ्गा तच्छृणुष्व महामते ।
यच्छ्रुत्वा मुच्यते पापी ब्रह्महापि नरः क्षणात् ॥४॥

सुमेरुतनया मेना गिरिराजस्य गेहिनी ।
तां जन्मनि सुता प्राप निजांशेन महेश्वरी ॥५॥

गङ्गा समभवद्गर्भे सती गिरिवराङ्गना ।
सुषुवे च सुतां चारुसर्वाङ्गीं रुचिराननाम् ॥६॥
वैशाखे मासि शुक्लायां तृतीयायां दिनार्धके ।
गङ्गा समभवच्छुक्ला सुचारुमुखपङ्कजा ॥७॥
त्रिनेत्रा असितापाङ्गी चतुर्बाहुविशोभिता ।
अथाद्रिराजः श्रुत्वा तु पुत्रीं जातां समुत्सुकः ॥८॥
मङ्गलं चाकरोद्दानं विप्रेभ्यः प्रददौ बहु ।
ववृधे सा पितुर्गेहे कलेव शशिनः सिते ॥९॥
वर्षासु च यथा नित्यं नदी तोयेन वर्धते ।
अथैकदा गिरीन्द्रस्तां क्रोडे कृत्वा पुरान्तरे ॥१०॥
उपविष्टस्तदायातो नारदो ब्रह्मणः सुतः ।
गङ्गां द्रष्टुं भगवतीं ज्ञात्वा जातां निजांशतः ॥११॥
प्रकृतिं यां समाराध्य कामरूपे स्थितो हरः ।
गिरिराजस्तमालोक्य प्रणम्य चरणद्वयम् ॥१२॥
प्रक्षाल्याचमनं दत्त्वा प्रोवाच विनयान्वितः ।

हिमालय उवाच —

मुने भाग्यवशादेव लभ्यते तव दर्शनम् ॥१३॥
दृष्टोऽसि साम्प्रतं ब्रह्मन्कथं तेऽत्र समागमः ।

नारद उवाच—

श्रुतमेतन्मया लोकात्कन्या सर्वाङ्गसुन्दरी ॥१४॥
काचित्तव गृहे जाता तां द्रष्टुमहमागतः ।

हिमालय उवाच—

अहो बहुतरं भाग्यमेतस्माच्च नमामि च ॥१५॥
यदेनां द्रष्टुकामस्त्वमागतो देवदुर्लभः ।

नारद उवाच—

त्वं धन्यः कृतकृत्यश्च सर्वसौभाग्यसंयुतः ॥१६॥
यतस्तवैषा तनया देवानामपि दुर्लभा ।

श्रीमहादेव उवाच—

इत्युक्त्वा गिरिराजं च मुनिः परमकौतुकात् ॥१७॥
तस्याङ्कात्तां निजाङ्केऽसावानयत्परमादृतः ।
मुनिर्विधाय तां क्रोडे गङ्गां त्रैलोक्यपावनीम् ॥१८॥

धन्योऽस्मीत्यब्रीद्वाक्यं रोमाञ्चितवपुस्ततः ।
ततः प्राह गिरिं हृष्टो मुनीन्द्रो नारदः स्मयन् ॥१९॥
पुत्रीं यथार्थतः किं त्वं ज्ञातवानसि वा न वा ।

हिमालय उवाच—

ज्ञायते मम कन्येयं चार्वङ्गी शुभलक्षणा ॥२०॥
नान्यस्तु ज्ञायते कश्चिद्विशेषो मुनिपुङ्गव ।

नारद उवाच—

या मूलप्रकृतिः सूक्ष्मा दक्षकन्याभवत्पुरा ॥२१॥
नाम्ना सती सैव देवी निजांशेन महामते ।
कन्या तवेयं सम्भूता प्रतिलब्धुं हरं पतिम् ॥२२॥
गङ्गेति क्रियते नाम सर्वपातकनाशनम् ।
लोकानां त्राणकर्त्रीयं महापातकनाशिनी ॥२३॥
विवाहोऽस्याः स्वर्गपुरे भविष्यति महागिरे ।
शिव एव हि भर्तास्याः पूर्वमेव सुनिश्चितः ॥२४॥
एनां स्वर्गपुरं नेतुं ब्रह्मा लोकपितामहः ।
भवन्तं स्वयमागत्य प्रार्थयिष्यति यत्नतः ॥२५॥
तदा त्वया समर्प्येषा ब्रह्मणे चारुरूपिणी ।
स तु नीत्वा स्वर्गपुरे शिवमाहूय सादरम् ॥२६॥
सम्प्रदास्यति तस्मै ते पुत्रीमेनां शुभाननाम् ।

हिमालय उवाच—

त्वं ज्ञाता विषयाणां हि भूतभव्यभविष्यताम् ॥२७॥
विज्ञानचक्षुषा सर्वं प्रत्यक्षमिव पश्यसि ।
विधात्रा विहितं यत्तु तद्भविष्यति नान्यथा ।२८॥
तदहं किं करिष्यामि नेश्वरेच्छा वृथा भवेत् ।

महादेव उवाच—

इत्युक्तो गिरिराजेन स मुनिः प्रययौ द्रुतम् ॥२९॥
यत्रास्ति भगवान्ब्रह्मा सर्वलोकपितामहः ।
तं प्रणम्याह स मुनिः प्रहृष्टात्मा महामतिः ॥३०॥
प्रभो सती समुत्पन्ना हिमालयगृहे पुनः ।
निजांशेनाभवदियं गङ्गा परमसुन्दरी ॥३१॥

पूर्णापि देवी तत्रैव सम्भविष्यत्युमापि च ।

ब्रह्मोवाच—

सत्यं जानामि जाता सा हिमालयगृहेऽधुना ॥३२॥
निजांशेन महादेवी गङ्गा त्रैलोक्यपावनी ।
महेशपूर्वपत्नी सा महेशमभियास्यति ॥३३॥
शिवोऽपि तामनुप्राप्य निर्वृतिं लप्स्यते पराम् ।
किन्तु छायासती देहं धृत्वा मूर्ध्नि यदा हरः ॥३४॥
आनन्दमग्नचित्तः सन्ननर्त धरणीतले ।
तदा तस्य शिरःसंस्थं छायादेहं हरिः स्वयम् ॥३५॥
चकर्तास्या मतेनैव जगद्रक्षणहेतवे ।
तेनापराधेनाद्यापि रुष्टोऽस्मान्प्रति शङ्करः ॥३६॥
तस्य किं वा करिष्यामि कथं तुष्टो भवेच्छिवः ।

नारद उवाच—

शृणु ब्रह्मन्प्रवक्ष्यामि यद्विद्वेषो महेशितुः ॥३७॥
प्रसन्नता भवेदस्मान्प्रति येनात्र वै प्रभो ।
गिरीणामधिपः श्रीमान् दाता परमधर्मवित् ॥३८॥
तत्सन्निधिं समागच्छ सार्धमिन्द्रादिदेवतैः ।
भिक्षयाऽर्थय तां गङ्गां तदा नूनं स दास्यति ।.३९॥
ततश्च तां समानीय स्वर्गपुर्यां महोत्सवम् ।
कृत्वा शम्भुं समाहूय गङ्गां देहि प्रयत्नतः ॥४०॥
यथा छायासती तस्य स्थिता मूर्ध्नि तथैव हि ।
इयं द्रवमयी भूत्वा संस्थास्यति सुनिश्चितम् ॥४१॥
तदैव तुष्टो भगवान्भविष्यति महेश्वरः ।

ब्रह्मोवाच—

पुत्र त्वं तु चिरंजीव यदेवमुक्तवानसि ॥४२॥
यद्येवं स्यात्तदा शम्भुः प्रीतियुक्तो भविष्यति ।
गच्छ पुत्र द्रुतं तत्र देवानिन्द्रपुरोगमान् ॥४३॥
कथयस्व यथावृत्तमायान्तु मम सन्निधिम् ।

श्रीमहादेव उवाच—

इत्युक्तो ब्रह्मणा प्रीतः प्रययौ नारदो मुनिः ॥४४॥

यत्र देवा महात्मानः सन्तीन्द्राद्या महामते ।

नारद उवाच—

देवराज समायातो ब्रह्मलोकावहं प्रभो ॥४५॥
युष्माकं सन्निधिं पित्रा समादिष्टो महात्मना ।
मर्त्ये हिमवतो गेहे पुत्री जाता स्वयं सती ॥४६॥
भागार्धेन महादेवी गङ्गा त्रैलोक्यपावनी ।
तामानेतुं स्वर्गपुरं ब्रह्मा यास्यति भूतलम् ॥४७॥
यूयमागच्छत क्षिप्रं मर्त्ये गन्तुं सुरोत्तमाः ।

देवा ऊचुः—

किं ब्रवीषि मुनिश्रेष्ठ मर्त्ये जाता स्वयं सती ॥४८॥
वृत्तमेतन्महेशाय कथितं किं न वा मुने ।

नारद उवाच—

आनीय तां देवपुरे ततो यास्यामि शङ्करम् ॥४९॥
द्रुतमागच्छत सुरा ब्रह्मणो निकटं ततः ।

श्रीमहादेव उवाच—

तथेत्युक्त्वा सुरगणा जग्मुर्ब्रह्मपुरं तदा ॥५०॥
इन्द्राद्यास्ते मुनिश्रेष्ठ हर्षोत्फुल्लमुखाम्बुजाः ।
प्रणेमुश्च महात्मानं ब्रह्माणं जगतः पतिम् ॥५१॥
ऊचुः कृताञ्जलिपुटाः किमाज्ञापयसि प्रभो ।

ब्रह्मोवाच—

सती हिमवतो गेहे जाता गङ्गा महेश्वरी ॥५२॥
भागार्धेन तथैवोमा तत्रैव हि भविष्यति ।
साम्प्रतं तां स्वर्गपुरं यास्यामो नेतुमुत्तमाम् ॥५३॥
भवन्तः स्वनिकेताच्च समागच्छन्तु माचिरात् ।
इन्द्रः कुबेरो वरुणः सोमसूर्याग्निमारुताः ॥५४॥
समायान्तु मया साकं बुद्धिमांश्चैव नारदः ।

श्रीमहादेव उवाच—

तथेत्युक्त्वा ययुर्देवा इन्द्राद्या मुनिपुङ्गव ॥५५॥
ब्रह्मा महर्षिणा तेन नारदेन ययौ द्रुतम् ।
हिमाद्रिसन्निधिं गङ्गायाचने कृतमानसः ॥५६॥

तदहःपूर्वरात्रे तु गङ्गा गिरिवरं स्वयम् ।
स्वप्ने प्राह महादेवी ज्ञात्वा देवविचेष्टितम् ॥५७॥
स्वप्नं सन्दर्शयामास रजन्याः शेष एव हि ।
शुक्ला त्रिनयना काचिद्देवी मकरवाहना ॥५८॥
उवाच प्रमुखे स्थित्वा पितुस्ते तनया ह्यहम् ।
आद्या प्रकृतिरेकैव साहं दक्षप्रजापते ॥५९॥
पुत्री सती पितुर्यज्ञे शिवं त्यक्तवती पतिम् ।
शिवस्तु मद्वियोगार्तः कामरूपे व्यवस्थितः ॥६०॥
तपश्चरति मां लब्धुं पत्नीभावेन वै पुनः ।
त्वयाप्याराधिता चाहं पुत्रीभावेन भावितः ॥६१॥
तेनाहं त्वद्गृहे जाता भागार्धेन तु साम्प्रतम् ।
भागार्धेनापरेणापि भविष्यामि तवात्मजा ॥६२॥
मां नेतुमागमिष्यन्ति ब्रह्माद्यास्त्रिदशेश्वराः ।
त्वां सम्प्रार्थ्य स्वर्गपुरं यास्यामि सह तैः सुरैः ॥६३॥
लप्स्यामि च पतिं शम्भुं देवैर्दत्तं महात्मभिः ।
मदर्थं मा शुच पितः कदाचिदपि मोहितः ॥६४॥
पूर्वमुक्तमतस्तात नानुशोचितुमर्हसि ।
इत्येवमुक्त्वा सा स्वप्ने गङ्गा शैलाधिपं मुने ॥६५॥
अन्तर्हिताऽभवत्तत्र गिरिराट् प्रबुबोध च ।
विचारयामास सर्वं यदुक्तं गङ्गया ततः ॥६६॥
मोह आसीत्पुरा यो वै तं तत्याज महागिरिः ।
अथायाताः सुरास्ते तु ब्रह्माद्या मुनिपुङ्गव ॥६७॥
हिमालयगृहे गङ्गां नेतुकामा महौजसः ।
स प्रणम्य गिरिश्रेष्ठस्तानुवाच महामतिः ॥६८॥
कथमत्रागता देवाः कथयध्वं यथार्हतः ।

देवा ऊचुः—

दाता त्वं सर्वलोकेषु गीयसे भूधराधिप ॥६९॥
भिक्षार्थमागताः स्मोऽद्य तवान्तिकमतो गिरे ।
इति तेषां वचः श्रुत्वा स्मृत्वा स्वप्नकथां गिरिः ॥७०॥
भाषितं नारदेनापि नोवाच वचनं तदा ।
ततः सञ्चिन्त्य मनसा देवानाह महागिरिः ॥७१॥

त्रैलोक्यस्याधिपा यूयं कथं भिक्षार्थिनः सुराः ।
किं प्रदास्यामि युष्मभ्यं तन्मे वदत साम्प्रतम् ॥७२॥

ब्रह्मोवाच—

शृणु वत्स प्रवक्ष्यामि यदर्थं समुपागताः ।
इमे देवास्तव पुरं सर्वरत्नसुशोभिता ॥७३॥
प्रकृतिः परमा जाता दक्षपुत्री स्वयं सती ।
शिवं वृतवती साध्वी पतिं त्रिभुवनेश्वरम् ॥७४॥
दक्षस्तु शिवनिन्दासु रतः कुमतिरीश्वरम् ।
शिवं द्विषन्महायज्ञमारभद्गिरिपुङ्गव ॥७५॥
सर्वानेवाह्वयत्तत्र देवानिन्द्रपुरोगमान् ।
विष्णुं मां च महामोहाद्वर्जयित्वा सतीशिवौ ॥७६॥
तेन क्रुद्धा महादेवी गन्तुं दक्षपुरं स्वयम् ।
समुद्यता महेशेन निषिद्धा बहुधा गिरे ॥७७॥
प्रभुत्वाभिमतेनेति शम्भुर्जातोऽपराधकृत् ।
तेन क्रुद्धा शिवं त्यक्त्वा दक्षगेहं गता सती ॥७८॥
दक्षोऽपि मायया मुग्धः शिवमेव व्यनिन्दयत् ।
तेन तं च परित्यज्य शिवं चाप्यपराधिनम् ॥७९॥
विमोह्य मायया देवी छायया मृतरूपया ।
नित्या ब्रह्ममयी पूर्णा स्वयमन्तर्हिताभवत् ॥८०॥
तेन शोकेन दुःखार्तः शिवस्त्रिभुवनेश्वरः ।
तां छायां शिरसा धृत्वा ननर्त धरणीतले ॥८१॥
तेन नृत्येन भुवनं रसातलगमोद्यतम् ।
दृष्ट्वा विष्णुं देवगणा ऊचू रक्ष जगत्त्रयम् ॥८२॥
ततश्चक्रेण भगवान् विष्णुः परमपूरुषः ।
छायासत्यास्तु तं देहं प्रचिच्छेद शनैः शनैः ॥८३॥
स तद्देहवियोगेन दुःखितः परमेश्वरः ।
अद्यापि रुष्ट आस्तेऽस्मान्प्रति भूधरपुङ्गव ॥८४॥
सैव दाक्षायणी देवी साम्प्रतं तव वेश्मनि ।
अंशेन तनया जाता गङ्गा त्रिभुवनेश्वरी ॥८५॥
शिवस्य पूर्वपत्नीयं शिवमेव हि लप्स्यति ।
केवलं रुष्टचित्तोऽस्मान्प्रति स्थास्यति शङ्करः ॥८६॥

अतस्त्वं यदि चास्मभ्यं कन्यामेनां प्रयच्छसि ।
तदा स्वर्गपुरं नीत्वा महोत्सवपुरःसरम् ॥८७॥
महेशाय समप्यैव प्राप्स्यामो निर्वृतिं पराम् ।
या देवी पूर्णभावेन भविष्यत्यपरा सुता ॥८८॥
तां त्वमेव महेशाय सम्प्रदास्यसि सादरम् ।
एनां देहि त्वियं नीत्वा ददामः शम्भवे गिरे ॥८९॥

हिमालय उवाच—

कन्याया न पितुर्गेहे स्थितिर्भवति शाश्वती ।
परार्थाय भवेत्कन्या न स्वकीया कदाचन ॥९०॥
जानाम्येवं बहुविधं तथापि मम चेतसि ।
गङ्गाविरहजं दुःखं दुःसहं सम्भविष्यति ॥९१॥

श्रीमहादेव उवाच—

एवमुक्त्वा गिरिश्रेष्ठः साश्रुपूर्णविलोचनः ।
रुरोद बहुधा गङ्गां क्रोडे कृत्वा महामतिः ॥९२॥
गङ्गा प्राह पितस्त्वं तु त्यज शोकं कृते मम ।
प्रयच्छ ब्रह्मणे चास्मै यास्ये स्वर्गं तु साम्प्रतम् ॥९३॥
नाहं तव विदूरस्था न मे दूरस्थितो भवान् ।
त्वं भक्तो भक्तिगम्याहं सदैव निकटे स्थिता ॥९४॥
एवमुक्त्वा तु पितरं प्रणम्य गिरिनन्दिनी ।
ब्रह्मणो निकटं प्रायाद्गन्तुं भूतपतिं पतिम् ॥९५॥

श्रीमहाभागवते उपपुराणे गङ्गागमनं नाम त्रयोदशोऽध्यायः ।

चतुर्दशोऽध्यायः

श्रीमहादेव उवाच—

ततो ब्रह्मा गिरीन्द्रानुमतो गङ्गां महामुने ।
कमण्डलौ समादाय प्रायात्स्वर्गपुरं द्रुतम् ॥१॥
अथ मेना समागत्य गिरीन्द्रस्यान्तिकं तदा ।
अदृष्ट्वा तनयां वाचमुवाच गिरिपुङ्गवम् ॥२॥

मेनकोवाच—

क्व गता मे सुता राजन् गङ्गा प्राणसमा प्रभो ।
संस्थिता तु तवाङ्के सा केन नीता वद प्रभो ॥३॥

श्रीमहादेव उवाच—

ततः साश्रुपरीताक्षः प्राह तस्यै हिमालयः ।
गङ्गाया गमनं स्वर्गं याच्ञया ब्रह्मणोऽपि च ॥४॥
तच्छ्रुत्वा तु मुनिश्रेष्ठ गङ्गाविच्छेददुःखिता ।
रुरोद गिरिराजस्य पत्नी मेनातिविस्तरम् ॥५॥
ततस्तां सान्त्वयामास गिरीन्द्रो ज्ञानिनां वरः ।
श्रावयन् भाषितं सर्वं गङ्गायाः स्वयमेव हि ॥६॥
ततः स्वतनयां रोषाच्छशाप गिरिगेहिनी ।
असम्भाष्य गतां स्वर्गं गङ्गां प्राणसमामपि ॥७॥
मातरं मामसम्भाष्य गता यस्मात्त्रिविष्टपम् ।
ततो द्रवमयी भूत्वा पुनरेहि धरातलम् ॥८॥
एवं कृत्वाभिशापं तु मेना हिमवतोऽङ्गना ।
प्रविवेश गृहं देवी गिरिराजोऽपि नारद ॥९॥
अथ स्वर्गपुरे देवा गङ्गां नीत्वा समुत्सुकाः ।
अकार्षुर्मङ्गलं तस्या विवाहार्थं महामते ॥१०॥
नारदं प्रेषयामास ब्रह्मा हृष्टमनास्तदा ।
कामरूपं महापीठं शम्भुमानेतुमादरात् ॥११॥
ततः स नारदो गत्वा कामरूपे महेश्वरम् ।
ददर्श ध्यानसन्निष्ठं योगचिन्तापरायणम् ॥१२॥
निवृत्तेन्द्रियकार्यं हि महायोगविचिन्तकम् ।
मध्याह्नार्कसहस्राभं स्फुरदिन्दुविलोचनम् ॥१३॥
एवं विलोक्य देवेशं नारदस्तत्र संस्थितः ।
चिन्तयामास भीतात्मा ध्यानभङ्गे महेशितुः ॥१४॥
यद्येनं कथये देव्याः सत्या हिमवतो गृहे ।
जन्माभूदिति तत्तस्य ध्यानभङ्गो भविष्यति ॥१५॥
न चेद्वदामि तद्भ्रष्टप्रतिज्ञोऽहं भवामि च ।
किंवा श्रुत्वा सतीदेव्याः पुनर्जन्म महेश्वरः ॥१६॥

तुष्टया परमया युक्तो मयि प्रीतो भविष्यति ।
इति सञ्चिन्त्य शनकैः शम्भोरन्तिकमाययौ ॥१७॥
उवाच नारदो देवं योगैकासक्तमानसम् ।

नारद उवाच—

देवदेव नमस्ये त्वां प्रसन्नो मे जगद्गुरो ॥१८॥
यस्ते सतीं समानेतुं प्रत्युद्यातस्त्वदन्तिकात् ।
जाता तव सती भूयस्त्वामिच्छन्ती पतिं प्रभो ॥१९॥
तां ग्रहीतुं समागच्छ त्यज योगविचिन्तनम् ।

श्रीमहादेव उवाच—

इति श्रुत्वा महादेवो ध्यानं त्यक्त्वा तदैव हि ॥२०॥
क्वास्ति मे सा सतीत्येवमुक्त्वा तस्थौ महीतले ।
ततस्तां प्राह देवर्षिर्जाता हिमवतः सुता ॥२१॥
अंशेन सा सती देवी गङ्गा नाम्ना सुलोचना ।
तां ब्रह्मा तु समानीय स्वर्गे सर्वसुरैः सह ॥२२॥
तुभ्यं दत्तमना भूत्वा प्रेषयामास मां प्रभो ।
त्वमेहि परिगृह्णीष्व पत्नी ते चारुरूपिणी ।
ततः कमण्डलौ ब्रह्मा पश्य तां चारुरूपिणीम् ॥२३॥
स्थितामंशेन त्रैलोक्यपावनीं शिवगेहिनीम् ।
महेशस्तां प्रगृह्यैव तमः प्रायान्महामते ॥२४॥
कैलासं सुप्रसन्नात्मा समस्तैः प्रमथैर्वृतः ।
स्थितौ कमण्डलौ या तु सैव मायापुरं हरम् ॥२५॥
प्राप्य द्रवमयी भूत्वा वसुधामपि सागमत् ।
स्वर्गाद्ब्रह्मनदीरूपा समुपागत्य भूतलम् ॥२६॥
उद्धृत्य सागरं वंशं प्राप्य सागरमम्बुधिम् ।
पातालं प्राप्य लोकानां परित्राणाय नारद ॥२७॥
एवं हिमगिरेः पुत्री भूत्वांशेन सती मुने ।
पतिमाप महादेवं प्रसन्ना जगदम्बिका ॥२८॥
अपरापि मुनिश्रेष्ठ ततस्तु सा सती स्वयम् ।
सम्भूयापि च पूर्णैव पतिमाप च शङ्करम् ॥२९॥

श्रीमद्भागवते उपपुराणे गङ्गाविवाहवर्णनं नाम चतुर्दशोऽध्यायः ।

पञ्चदशोऽध्यायः

नारद उवाच—

ब्रूहि देव महेशान यथा सा परमेश्वरी ।
बभूव मेनकागर्भे पूर्णभावेन पार्वती ॥१॥
श्रुतं बहुपुराणेषु ज्ञायतेऽपि च यद्यपि ।
जन्मकर्मादिकं तस्यास्तथापि परमेश्वर ॥२॥
श्रोतुं समिष्यते त्वत्तो यतस्त्वं वेत्सि तत्त्वतः ।
तद्वदस्व महादेव विस्तरेण महामते ॥३॥

श्रीमहादेव उवाच—

त्रैलोक्यजननी दुर्गा ब्रह्मरूपा सनातनी ।
प्रार्थिता गिरिराजेन तत्पत्न्या मेनयापि च ॥४॥
महोग्रतपसा पुत्रीभावेन मुनिपुङ्गव ।
प्रार्थिता च महेशेन सतीविरहदुःखिना ॥५॥
प्रययौ मेनकागर्भे पूर्णब्रह्ममयी स्वयम् ।
ततः शुभदिने मेना राजीवसदृशाननाम् ॥६॥
सुषुवे तनयां देवीं सुप्रभां जगदम्बिकाम् ।
ततोऽभवत्पुष्पवृष्टिः सर्वतो मुनिसत्तम ॥७॥
पुण्यगन्धो ववौ वायुः प्रसन्नाश्च दिशो दश ।
तथाद्रिराजः श्रुत्वा तु पुत्रीं जातां शुभाननाम् ॥८॥
तरुणादित्यकोटिभां त्रिनेत्रां दिव्यरूपिणीम् ।
अष्टहस्तां विशालाक्षीं चन्द्रार्धकृतशेखराम् ॥९॥
मेने तां प्रकृतिं सूक्ष्मामाद्यां जातां स्वलीलया ।
तदा हृष्टमना भूत्वा विप्रेभ्यो प्रददौ बहु ॥१०॥
धनं वासांसि च मुने दोग्ध्रीर्गाश्च सहस्रशः ।
द्रष्टुं प्रतिययौ चाशु बन्धुभिः परिवारितः ॥११॥
ततस्तमागतं ज्ञात्वा गिरीन्द्रं मेनका तदा ।
प्रोवाच तनयां पश्य राजन् राजीवलोचनाम् ॥१२॥
आवयोस्तपसा जाता सर्वभूतहिताय च ।
ततः सोऽपि निरीक्ष्यैनां ज्ञात्वा तां जगदम्बिकाम् ॥१३॥

प्रणम्य शिरसा भूमौ कृताञ्जलिपुटः स्थितः ।
प्रोवाच वचनं देवीं भक्त्या गद्गदया गिरा ॥१४॥

हिमालय उवाच—

का त्वं मातर्विशालाक्षि चित्ररूपा सुलक्षणा ।
न जाने त्वामहं वत्से यथावत्कथयस्व माम् ॥१५॥

श्रीदेव्युवाच—

जानीहि मां परां शक्तिं महेश्वरकृताश्रयाम् ।
शाश्वतैश्वर्यविज्ञानमूर्तिं सर्वप्रवर्तिकाम् ॥१६॥

ब्रह्मविष्णुमहेशादिजननीं सर्वमुक्तिदाम् ।
सृष्टिस्थितिविनाशानां विधात्रीं जगदम्बिकाम् ॥१७॥

अहं सर्वान्तरस्था च संसारार्णवतारिणी ।
नित्यानन्दमयी नित्या ब्रह्मरूपेश्वरीति च ॥१८॥

युवयोस्तपसा तुष्टा पुत्रीभावेन लीलया ।
जाता तव गृहे तात बहुभाग्यवशात्तव ॥१९॥

हिमालय उवाच—

मातस्त्वं कृपया गृहे मम सुता जातासि नित्यापि यद्
भाग्यं मे बहुजन्मजन्मजनितं मन्ये महत्पुण्यदम् ।
दृष्टं रूपमिदं परात्परतरं सूतिं भवान्या अपि
माहेशीं प्रति दर्शयाशु कृपया विश्वेशि तुभ्यं नमः ॥२०॥

देव्युवाच—

ददामि चक्षुस्ते दिव्यं पश्य मे रूपमैश्वरम् ।
छिन्धि हृत्संशयं विद्धि सर्वदेवमयीं पितः ॥२१॥

श्रीमहादेव उवाच—

इत्युक्त्वा तं गिरिश्रेष्ठं दत्त्वा विज्ञानमुत्तमम् ।
स्वरूपं दर्शयामास दिव्यं माहेश्वरं तदा ॥२२॥

शशिकोटिप्रभं चारुचन्द्रार्धकृतशेखरम् ।
त्रिशूलवरहस्तं च जटामण्डितमस्तकम् ॥२३॥

भयानकं घोररूपं कालानलसहस्रभम् ।
पञ्चवक्त्रं त्रिनेत्रं च नागयज्ञोपवीतिनम् ॥२४॥

द्वीपिचर्माम्बरधरं नागेन्द्रकृतभूषणम् ।
एवं विलोक्य तद्रूपं विस्मितो हिमवान् पुनः ॥२५॥

प्रोवाच वचनं माता रूपमन्यत्प्रदर्शय ।
ततः संहृत्य तद्रूपं दर्शयामास तत्क्षणात् ॥२६॥
रूपमन्यन्मुनिश्रेष्ठ विश्वरूपा सनातनी ।
शरच्चन्द्रनिभं चारुमुकुटोज्ज्वलमस्तकम् ॥२७॥
शङ्खचक्रगदापद्महस्तं नेत्रत्रयोज्ज्वलम् ।
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ॥२८॥
योगीन्द्रवृन्दसम्वन्द्यं सुचारुचरणाम्बुजम् ।
सर्वतः पाणिपादं च सर्वतोक्षिशिरोमुखम् ॥२९॥
दृष्ट्वा तदेतत्परमं रूपं स हिमवान्पुनः ।
प्रणम्य तनयां प्राह विस्मयोत्फुल्ललोचनः ॥३०॥

हिमालय उवाच—

मातस्तवेदं परमं रूपमैश्वरमुत्तमम् ।
विस्मितोऽस्मि समालोक्य रूपमन्यत्प्रदर्शय ॥३१॥
त्वं यस्य सो ह्यशोच्यो हि धन्यश्च परमेश्वरि ।
अनुगृह्णीष्व मातर्मां कृपया त्वां नमो नमः ॥३२॥

श्रीमहादेव उवाच—

इत्युक्ता सा तदा पित्रा शैलराजेन पार्वती ।
तद्रूपमपि संहृत्य दिव्यं रूपं समादधे ॥३३॥
नीलोत्पलदलश्यामं वनमालाविभूषितम् ।
शङ्खचक्रगदापद्ममभिव्यक्तं चतुर्भुजम् ॥३४॥
एवं विलोक्य तद्रूपं शैलानामधिपस्ततः ।
कृताञ्जलिपुटः स्थित्वा हर्षेण महता युतः ॥३५॥
स्तोत्रेणानेन तां देवीं तुष्टाव परमेश्वरीम् ।
सर्वदेवमयीमाद्यां ब्रह्मविष्णुशिवात्मिकाम् ॥३६॥

हिमालय उवाच—

मातः सर्वमयि प्रसीद परमे विश्वेशि विश्वाश्रये
त्वं सर्वं नहि किञ्चिदस्ति भुवने तत्त्वं त्वदन्यच्छिवे ।
त्वं विष्णुर्गिरिशस्त्वमेव नितरां धातासि शक्तिः परा
किं वर्ण्यं चरितं त्वचिन्त्यचरिते ब्रह्माद्यगम्यं मया ॥३७॥

त्वं स्वाहाखिलदेवतृप्तिजननी विश्वेशि त्वं वै स्वधा
पितृणामपि तृप्तिकारणमसि त्वं देवदेवात्मिका ।
हव्यं कव्यमपि त्वमेव नियमो यज्ञस्तपो दक्षिणा
त्वं स्वर्गादिफलं समस्तफलदे देवेशि तुभ्यं नमः ॥३८॥

रूपं सूक्ष्मतमं परात्परतरं यद्योगिनो विद्यया
शुद्धं ब्रह्ममयं वदन्ति परमं मातः सुतृप्तं तव ।
वाचा दुर्विषयं मनोऽतिगमपि त्रैलोक्यबीजं शिवे
भक्त्याहं प्रणमामि देवि वरदे विश्वेश्वरि त्राहि माम् ॥३९॥

उद्यत्सूर्यसहस्राभां मम गृहे जातां स्वयं लीलया
देवीमष्टभुजां विशालनयनां बालेन्दुमौलिं शिवाम् ।
उद्यत्कोटिशशाङ्ककान्तिनयनां बालां त्रिनेत्रां परां
भक्त्या त्वां प्रणमामि विश्वजननीं देवि प्रसीदाम्बिके ॥४०॥

रूपं ते रजताद्रिकान्तिविमलं नागेन्द्रभूषोज्ज्वलं
घोरं पञ्चमुखाम्बुजत्रिनयनैर्भीमैः समुद्भासितम् ।
चन्द्रार्धाङ्कितमस्तकं धृतजटाजूटं शरण्ये शिवे
भक्त्याहं प्रणमामि विश्वजननि त्वां त्वं प्रसीदाम्बिके ॥४१॥

रूपं शारदचन्द्रकोटिसदृशं दिव्याम्बरं शोभनं
दिव्यैराभरणैर्विराजितमलं कान्त्या जगन्मोहनम् ।
दिव्यैर्बाहुचतुष्टयैर्युक्तमहं वन्दे शिवे भक्तितः
पादाब्जं जननि प्रसीद निखिलब्रह्मादिदेवस्तुते ॥४२॥

रूपं ते नवनीरदद्युतिरुचि फुल्लाब्जनेत्रोज्ज्वलं
कान्त्या विश्वविमोहनं स्मितमुखं रत्नाङ्गदैर्भूषितम् ।
विभ्राजद्वनमालया विलसितोरस्कं जगत्तारिणि
भक्त्याहं प्रणतोऽस्मि देवी कृपया दुर्गे प्रसीदाम्बिके ॥४३॥

मातः कः परिवर्णितुं तव गुणं रूपं च विश्वात्मकं
शक्तो देवि जगत्त्रये बहुगुणैर्देवोऽथवा मानुषः ।
तत् किं स्वल्पमतिर्ब्रवीमि करुणां कृत्वा स्वकीयैर्गुणै-
र्नो मां मोहय मायया परमया विश्वेशि तुभ्यं नमः ॥४४॥

अद्य मे सफलं जन्म तपश्च सफलं मम ।
यत्त्वं त्रिजगतां माता मत्पुत्रीत्वमुपागता ॥४५॥

धन्योऽहं कृतकृत्योऽहं मातस्त्वं निजलीलया ।
नित्यापि मद्गृहे जाता पुत्रीभावेन वै यतः ॥४६॥
किं ब्रुवे मेनकायाश्च भाग्यं जन्मशतार्जितम् ।
यतस्त्रिजगतां मातुरपि माता भवेत्तव ॥४७॥

श्रीमहादेव उवाच—

एवं गिरीन्द्रतनया गिरिराजेन संस्तुता ।
बभूव सहसा चारुरूपिणी पूर्ववन्मुने ॥४८॥
मेनकापि विलोक्यैवं विस्मिता भक्तिसंयुता ।
ज्ञात्वा ब्रह्ममयीं पुत्रीं प्राह गद्गदया गिरा ॥४९॥

मेनकोवाच—

मातः स्तुतिं न जानामि भक्तिं वा जगदम्बिके ।
तथाप्यहमनुग्राह्या त्वया निजगुणेन हि ॥५०॥
त्वया जगदिदं सृष्टं त्वमेवैतत्फलप्रदा ।
सर्वाधारस्वरूपा च सर्वं व्याप्याधितिष्ठसि ॥५१॥

श्रीदेव्युवाच—

त्वया मातस्तथा पित्राप्यनेनाराधिता ह्यहम् ।
महोग्रतपसा पुत्रीं लब्धुं मां परमेश्वरीम् ॥५२॥
युवयोस्तपसस्तस्य फलदानाय लीलया ।
नित्या लब्धवती जन्म गर्भे तव हिमालयात् ॥५३॥

श्रीमहादेव उवाच—

ततो गिरीन्द्रस्तां देवीं प्रणिपत्य पुनः पुनः ।
पप्रच्छ ब्रह्मविज्ञानं प्राञ्जलिर्मुनिसत्तम ॥५४॥

हिमालय उवाच—

मातस्त्वं बहुभाग्येन मम जातासि कन्यका ।
ब्रह्माद्यैर्दुर्लभा योगिदुर्गम्या निजलीलया ॥५५॥
अहं तव पदाम्भोजं प्रपन्नोऽस्मि महेश्वरि ।
यथाञ्जसा तरिष्यामि संसारापारवारिधिम् ॥५६॥
यस्मात्कालस्य कालस्त्वं महाकालीति गीयसे ।
तस्मात्त्वं शाधि मातर्मां ब्रह्मविज्ञानमुत्तमम् ॥५७॥

श्रीपार्वत्युवाच—

शृणु तात प्रवक्ष्यामि योगसारं महामते ।
यस्य विज्ञानमात्रेण देही ब्रह्ममयो भवेत् ॥५८॥

गृहीत्वा मम मन्त्रान्वै सद्गुरोः सुसमाहितः ।
कायेन मनसा वाचा मामेव हि समाश्रयेत् ॥५९॥

मच्चित्तो मद्गतप्राणो मन्नामजपतत्परः ।
मत्प्रसङ्गो मदालापो मद्गुणश्रवणे रतः ॥६०॥

भवेन्मुमुक्षू राजेन्द्र मयि भक्तिपरायणः ।
मदर्चाप्रीतिसंसक्तमानसः साधकोत्तमः ॥६१॥

पूजायज्ञादिकं कुर्याद्यथाविधिविधानतः ।
श्रुतिस्मृत्युदितैः सम्यक्स्वस्वर्णाश्रमवर्णितैः ॥६२॥

सर्वयज्ञतपोदानैर्मामेव हि समर्चयेत् ।
ज्ञानात्सञ्जायते मुक्तिर्भक्तिर्ज्ञानस्य कारणम् ॥६३॥

धर्मात्सञ्जायते भक्तिर्धर्मो यज्ञादिको मतः ।
तस्मान्मुमुक्षुर्धर्मार्थं ममेदं रूपमाश्रयेत् ॥६४॥

सर्वाकाराहमेवैका सच्चिदानन्दविग्रहा ।
मदंशेन परिच्छिन्ना देहाः स्वर्गौकसां पितः ॥६५॥

तस्मान्मामेव विध्युक्तैः सकलैरेव कर्मभिः ।
विभाव्य प्रयजेद्भक्त्या नान्यथा भावयेत्सुधीः ॥६६॥

एवं वियुक्तकर्माणि कृत्वा निर्मलमानसः ।
आत्मज्ञानसमुद्युक्तो मुमुक्षुः सततं भवेत् ॥६७॥

घृणां वितत्य सर्वत्र पुत्रमित्रादिकेष्वपि ।
वेदान्तादिषु शास्त्रेषु संनिविष्टमना भवेत् ॥६८॥

कामादिकं त्यजेत्सर्वं हिंसां चापि विवर्जयेत् ।
एवं कृत्वा परां विद्यां जानीते नात्र संशयः ॥६९॥

यदैवात्मा महाराज प्रत्यक्षमनुभूयते ।
तदैव जायते मुक्तिः सत्यं सत्यं ब्रवीमि ते ॥७०॥

किं त्वेतद्दुर्लभं तात मद्भक्तिविमुखात्मनाम् ।
तस्माद्भक्तिः परा कार्या मयि यत्नान्मुमुक्षुभिः ॥७१॥

त्वमप्येवं महाराज मयोक्तं कुरु सर्वदा ।
संसारदुःखैरखिलैर्बाध्यसे न कदाचन ॥७२॥

श्रीमहाभागवते उपपुराणे विज्ञानयोगोपदेशवर्णनं नाम पञ्चदशोऽध्यायः ।

षोडशोऽध्यायः

हिमालय उवाच—

विद्या वा कीदृशी मातर्यतो मुक्तिः प्रजायते ।
आत्मा वा किंस्वरूपश्च तन्मे ब्रूहि महेश्वरी ॥१॥

श्रीपार्वत्युवाच—

शृणु तात प्रवक्ष्यामि या संसारनिवर्तिका ।
विद्या तस्याः स्वरूपं हि संक्षेपेण महामते ॥२॥

बुद्धिप्राणमनोदेहाहङ्कृतीन्द्रियतः पृथक् ।
अद्वितीयश्चिदात्माहं शुद्ध एवेति निश्चितम् ॥३॥

संवेत्ति येन ज्ञानेन विद्या तद्ध्यानमुच्यते ।
आत्मा निरामयः शुद्धो जन्मनाशादिवर्जितः ॥४॥

बुद्ध्याद्युपाधिरहितश्चिदानन्दात्मको मतः ।
आनन्दः सुप्रभः पूर्णः सत्यज्ञानादिलक्षणः ॥५॥

एक एवाद्वितीयश्च सर्वदेहगतः परः ।
स्वप्रकाशेन देहादीन् भासयन् सुसमास्थितः ॥६॥

इत्यात्मनः स्वरूपं ते गिरिराज मयोदितम् ।
एवं विचिन्तयेन्नित्यमात्मानं सुसमाहितः ॥७॥

अनात्मनि शरीरादावात्मबुद्धिं विवर्जयेत् ।
रागद्वेषादिदोषाणां हेतुभूता हि सा यतः ॥८॥

रागद्वेषादिदोषेभ्यः सदोषं कर्म सम्भवेत् ।
ततः पुनः संसृतिश्च तस्मात्तां परिवर्जयेत् ॥९॥

हिमालय उवाच—

अशुभादृष्टजनका रागद्वेषादयः शिवे ।
कथं जनैः परित्याज्यास्तन्मे त्वं वक्तुमर्हसि ॥१०॥
कुर्वन्ति येऽपकारांश्च कथं तान् सहते जनः ।
तेषु रागश्च विद्वेषः कथं वा न भवेत्तयोः ॥११॥

श्रीपार्वत्युवाच—

अपकारः कृतः कस्य तवेवाशु विचारयेत् ।
विचार्यमाणे तस्मिंश्च द्वेष एव न जायते ॥१२॥
पञ्चभूतात्मको देहो मुक्तो जीवो यतः स्वयम् ।
वह्निना दह्यते वापि शिवाद्यैर्भक्षितोऽपि वा ॥१३॥
तथापि यो विजानाति कोऽपकारोऽस्ति तस्य वै ।
आत्मा शुद्धः स्वयंपूर्णः सच्चिदानन्दविग्रहः ॥१४॥
न जायते न म्रियते निर्लेपो न च दुःखभाक् ।
विच्छिद्यमाने देहेऽपि नापकारोऽस्य जायते ॥१५॥
यथा गेहान्तरस्थस्य नभसः क्वापि लक्ष्यते ।
गृहेषु दह्यमानेषु गिरिराज तथैव हि ॥१६॥
हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतः ।
तावुभौ भ्रान्तहृदयौ नायं हन्ति न हन्यते ॥१७॥
स्वस्वरूपं विदित्वैवं द्वेषं त्यक्त्वा सुखी भवेत् ।
द्वेषमूलो मनस्तापो द्वेषः संसारखण्डनम् ॥१८॥
मोक्षविघ्नकरो द्वेषस्तं यत्नात्परिवर्जयेत् ।

हिमालय उवाच—

देहस्यापि न चेद्देवि न जीवस्य परात्मनः ॥१९॥
नापकारोऽत्र विद्येत नैतौ दुःखस्य भागिनौ ।
तत्कस्य जायते दुःखं यत्साक्षादनुभूयते ॥२०॥
अन्यो वा कोऽस्ति देहेऽस्मिन् दुःखभोक्ता महेश्वरि ।
एतन्मे ब्रूहि तत्त्वेन मयि ते यद्यनुग्रहः ॥२१॥

श्रीपार्वत्युवाच—

नैव दुःखं हि देहस्य नात्मनोऽपि परात्मनः ।
तथापि जीवो निर्लेपो मोहितो मम मायया ॥२२॥

सुख्यहं दुःख्यहं चैव सुमेवाभिमन्यते ।
अनाद्यविद्या सा माया जगन्मोहनकारिणी ॥२३॥

जातमात्रं हि सम्बद्धस्तया सञ्जायते पितः ।
संसारी जायते तेन रागद्वेषादिसंकुलः ॥२४॥

आत्मा स्वलिङ्गं तु मनः परिगृह्य महामते ।
निलीना वासना यत्र संसारे वर्ततेऽवशः ॥२५॥

विशुद्धः स्फटिको यद्वद्रक्तपुष्पसमीपतः ।
तत्तद्वर्णयुतो भाति वस्तुतो नास्ति रञ्जनम् ॥२६॥

बुद्धीन्द्रियादिसामीप्यादात्मनोऽपि तथा गतिः ।
मनो बुद्धिरहङ्कारो जीवस्य सहकारिणः ॥२७॥

स्वकर्मवशतस्तात फलभोक्तार एव ते ।
सर्वं वैषयिकं तात सुखं वा दुःखमेव वा ॥२८॥

त एव भुञ्जते नात्मा निर्लेपः प्रभुरव्ययः ।
सृष्टिकाले पुनः पूर्ववासनावासितैः सह ॥२९॥

जायते जीव एवं हि वसत्याभूतसम्प्लवम् ।
ततो ज्ञानविचारेण त्यक्त्वा मोहं विचक्षणः ॥३०॥

सुखी भवेन्महाराज इष्टानिष्टोपपत्तिषु ।
देहमूलो मनस्तापो देहः संसारकारणम् ॥३१॥

देहः कर्मसमुत्पन्नः कर्म च द्विविधं मतम् ।
पापं पुण्यं च राजेन्द्र तयोरंशानुसारतः ॥३२॥

देहिनः सुखदुःखं स्यादलङ्घ्यं दिनरात्रिवत् ।
स्वर्गादिकामः कृत्वापि पुण्यं कर्म विधानतः ।
प्राप्य स्वर्गं पतत्याशु भूयः कर्म प्रचोदितम् ॥३३॥

तस्मात्सत्संगमं कृत्वा विद्याभ्यासपरायणः ।
विमुक्तसङ्गः परमं सुखमिच्छेद्विचक्षणः ॥३४॥

श्रीमहाभागवते उपपुराणे ब्रह्मविद्योपदेशवर्णनं नाम
षोडशोऽध्यायः

———

सप्तदशोऽध्यायः

हिमालय उवाच—

दुःखस्य कारणं देहः पञ्चभूतात्मकः शिवे ।
यतस्तद्विरहादेही न दुःखै परिभूयते ॥१॥
सोऽयं सञ्जायते मातः कथं देहो महेश्वरि ।
तं प्राप्य सुकृतान् कामान् कृत्वा स्वर्गमवाप्स्यति ॥२॥
क्षीणपुण्यः कथं जीवो जायते च पुनर्भुवि ।
तद्ब्रूहि विस्तरेणाशु यदि ते मय्यनुग्रहः ॥३॥

श्रीपार्वत्युवाच—

क्षितिर्जलं तथा तेजो वायुराकाश एव च ।
एतैः पञ्चभिराबद्धो देहीयं पाञ्चभौतिकः ॥४॥
प्रधानं पृथिवी तत्र शेषाणां सहकारिता ।
उक्तश्चतुर्विधः सोऽयं गिरिराज निबोध मे ॥५॥
अण्डजाः स्वेदजाश्चैवोद्भिज्जाश्चैव जरायुजाः ।
अण्डजाः पक्षिसर्पाद्याः स्वेदजा मशकादयः ॥६॥
वृक्षगुल्मप्रभृतयश्चोद्भिज्जा हि विचेतनाः ।
जरायुजा महाराज मानुषाः पशवस्तथा ॥७॥
शुक्रशोणितसम्भूतो देहो ज्ञेयो जरायुजः ।
भूयः स त्रिविधो ज्ञेयः पुंस्त्रीक्लीबविभेदतः ॥८॥
शुक्राधिक्येन पुरुषो भवेत्पृथ्वीधराधिप ।
रक्ताधिक्ये भवेन्नारी तयोः साम्ये नपुंसकम् ॥९॥
स्वकर्मवशतो जीवो नीहारकलया युतः ।
पतित्वा धरणीपृष्ठे व्रीहिमध्यगतो भवेत् ॥१०॥
स्थित्वा तत्र चिरं भुक्त्वा भुज्यते पुरुषैस्ततः ।
ततः प्रविष्टं तद्गुह्यं पुंसो देहे प्रजायते ॥११॥
रेतस्तेन स जीवोऽपि भवेद्रेतोगतस्तदा ।
ततः स्त्रियाऽभियोगेन ऋतुकाले महामते ॥१२॥
रेतसा सहितः सोऽपि मातृगर्भं प्रयाति हि ।
ऋतुस्नाता भवेन्नारी चतुर्थेऽहनि तद्दिनात् ॥१३॥

आषोडशदिनाद्राजन् ऋतुकाल उदाहृतः ।
अयुग्मदिवसे नारी जायते पर्वतर्षभ ॥१४॥
जायते च पुमांस्तत्र युग्मके दिवसे पितः ।
ऋतुस्नाता तु कामार्ता मुखं यस्य समीक्षते ॥१५॥
तदाकृतिः सन्ततिः स्यात्तत्पश्ये्दूर्तुराननम् ।
तद्रेतो योनिरक्तेन युक्तं भूत्वा महामते ॥१६॥
दिनेनैकेन कललं जरायुपरिवेष्टितम् ।
भूत्वा पञ्चदिनैरेव बुद्बुदाकारतामियात् ॥१७॥
या तु चर्माकृतिः सूक्ष्मा जरायुः सा निगद्यते ।
शुक्रशोणितयोर्योगस्तस्मिन् सञ्जायते यतः ॥१८॥
तत्र गर्भो भवेत्तस्मात्तेन प्रोक्तो जरायुजः ।
ततस्तत्सप्तरात्रेण मांसपेशीत्वमाप्नुयात् ॥१९॥
पक्षमात्रेण सा पेशी तच्छोणितपरिप्लुता ।
ततश्चाङ्कुर उत्पन्नः पञ्चविंशतिरात्रिषु ॥२०॥
स्कन्धो ग्रीवा शिरःपृष्ठोदराणि च महामते ।
पञ्चधाङ्गानि जायन्ते एवं मासेन च क्रमात् ॥२१॥
द्वितीये मासि जायन्ते पाणिपादादयस्तथा ।
अङ्गानां सन्धयः सर्वे तृतीये सम्भवन्ति हि ॥२२॥
अङ्गुल्यश्चापि जायन्ते चतुर्थे मासि सर्वतः ।
अभिव्यक्तिश्च जीवस्य तस्मिन्नेव हि जायते ॥२३॥
ततश्चलति 'गर्भोऽपि जनन्या जठरे स्थितः ।
श्रोत्रे नेत्रे तथा नासा जायन्ते मासि पञ्चमे ॥२४॥
तथैव च मुखं श्रोणिर्गुह्यं तस्मिन् प्रजायते ।
पायुर्मेढ्रमुपस्थं च कर्णच्छिद्रद्वयं तथा ॥२५॥
तथैव मासि षष्ठे तु नाभिश्चापि भवेन्नृणाम् ।
सप्तमे केशरोमाद्या जायन्ते च तथाष्टमे ॥२६॥
विभक्तावयवत्वं च जायते गर्भमध्यतः ।
विहाय श्मश्रुदन्तादीन् जन्मान्तरसमुद्भवात् ॥२७॥
समस्तावयवा एवं जायन्ते क्रमतः पितः ।
नवमे मासि जीवस्तु चैतन्यं सर्वशो लभेत् ॥२८॥

मातृभुक्तानुसारेण वर्धते जठरे स्थितः ।
प्राप्य वै यातनां घोरां खिद्यते च स्वकर्मतः ॥२९॥

स्मृत्वा प्राक्तनदेहोत्थकर्माणि बहुदुःखतः ।
मनसा वचनं ब्रूते विचार्य स्वयमेव हि ॥३०॥

एवं दुःखमनुप्राप्य भूयो जन्म लभेत्क्षितौ ।
अन्यायेनार्जितं वित्तं कुटुम्बभरणं कृतम् ॥३१॥

नाराधिता भगवती दुर्गा दुर्गतिहारिणी ।
यद्यस्मान्निष्कृतिर्मे स्याद्गर्भदुःखा त्तदा पुनः ॥३२॥

विषयान्नानुसेविष्ये विना दुर्गां महेश्वरीम् ।
नित्यं तामेव भक्त्याहं पूजये यतमानसः ॥३३॥

वृथा पुत्रकलत्रादिवासनावशतोऽसकृत् ।
निविष्टसंसारमनाः कृतवानात्मनोऽहितम् ॥३४॥

तस्येदानीं फलं भुञ्जे गर्भदुःखं दुरासदम् ।
तन्न भूयः करिष्यामि वृथा संसारसेवनम् ॥३५॥

इत्येवं बहुधा दुःखमनुभूय स्वकर्मतः ।
अस्थियन्त्रविनिष्पिष्टो निर्याति योनिवर्त्मना ॥३६॥

सूतिवातवशाद्घोरनरकादिव पातकी ।
मेदोऽसृक्प्लुतसर्वाङ्गो जरायुपरिवेष्टितः ॥३७॥

ततो मन्मायया मुग्धस्तानि दुःखानि विस्मृतः ।
अकिञ्चित्करतां प्राप्य मांसपिण्ड इव स्थितः ॥३८॥

सुषुम्ना पिहिता नाडी श्लेष्मणा यावदेव हि ।
तावद्वक्तुं न शक्नोति सुव्यक्तवचनं त्वसौ ॥३९॥

न गन्तुमपि शक्नोति बन्धुभिः परिरक्ष्यते ।
श्वमार्जारादिदंष्ट्रिभ्यो दृप्तः कालवशात्ततः ॥४०॥

यथेष्टं भाषते वाक्यं गच्छत्यपि सुदूरतः ।
ततश्च यौवनोद्रिक्तः कामक्रोधादिसंयुतः ॥४१॥

कुरुते विविधं कर्म पापपुण्यात्मकं पितः ।
कुरुते कर्मतन्त्राणि देहभोगार्थमेव हि ॥४२॥

स देहः पुरुषाद्भिन्नः पुरुषः किं समश्नुते ।
प्रतिक्षणं क्षरत्यायुश्चलत्पर्णस्थतोयवत् ॥४३॥

स्वप्नोपमं महाराज सर्वं वैषयिकं सुखम् ।
तथापि न भवेद्धानिरभिमानस्य देहिनाम् ॥४४॥
न चैतद्वीक्षते देही मोहितो मम मायया ।
वीक्षते केवलान्भोगांस्तत्र शाश्वतिकानिव ॥४५॥
अकस्माद्ग्रसते कालः पूर्णे चायुषि भूधर ।
यथा व्यालोन्तिके प्राप्तं मण्डूकं ग्रसते क्षणात् ॥४६॥
हा हन्त जन्मैतदपि विफलं यातमेव हि ।
एवं जन्मान्तरमपि विफलं जायते तथा ॥४७॥
निष्कृतिर्विद्यते नैव विषयाननुसेविनाम् ।
तस्मादात्मविचारेण त्यक्त्वा वैषयिकं सुखम् ॥४८॥
शाश्वतैश्वर्यमन्विच्छन्मदर्चनपरो भवेत् ।
तदैव जायते भक्तिरियं ब्रह्मणि निश्चला ॥४९॥
देहादिभ्यः पृथक्त्वेन निश्चित्यात्मानमात्मना ।
देहादिममतां मिथ्याज्ञानजां परिसंत्यजेत् ॥५०॥
पितस्त्वं यदि संसारदुःखान्निर्वृत्तिमिच्छसि ।
तदाराधय मां भक्त्या ब्रह्मरूपां समाहितः ॥५१॥

श्रीमहाभागवते उपपुराणे ब्रह्मयोगोपदेशवर्णनं नाम सप्तदशोऽध्यायः

अष्टादशोऽध्यायः

हिमालय उवाच—

अनाश्रितानां त्वां देवि मुक्तिश्चेन्नैव विद्यते ।
कथं समाश्रयेत्त्वां तत्कृपया ब्रूहि मे तदा ॥१॥
सन्ध्येयं कीदृशं रूपं मातस्तव मुमुक्षुभिः ।
त्वयि भक्तिः पराः कार्या देहबन्धविमुक्तये ॥२॥

श्रीपार्वत्युवाच—

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
तेषामपि सहस्रेषु कोऽपि मां वेत्ति तत्त्वतः ॥३॥

रूपं मे निष्कलं सूक्ष्मं वाचातीतं सुनिर्मलम् ।
निर्गुणं परमं ज्योतिः सर्वव्याप्यैककारणम् ॥४॥
निर्विकल्पं निरालम्बं सच्चिदानन्दविग्रहम् ।
ध्येयं मुमुक्षुभिस्तात देहबन्धविमुक्तये ॥५॥
अहं मतिमतां तात सुमतिः पर्वताधिप ।
पृथिव्यां पुण्यगन्धोऽहं रसोऽप्सु शशिनः प्रभा ॥६॥
तपस्विनां तपश्चास्मि तेजश्चास्मि विभावसोः ।
कामरागादिरहितं बलिनां बलमप्यहम् ॥७॥
सर्वकर्मसु राजेन्द्र कर्म पुण्यात्मकं तथा ।
छन्दसामस्मि गायत्री बीजानां प्रणवोऽस्म्यहम् ॥८॥
धर्माविरुद्धः कामोऽस्मि सर्वभूतेषु भूधर ।
एवमन्येऽपि ये भावाः सात्त्विका राजसास्तथा ॥९॥
तामसा मत्त उत्पन्ना मदधीनाश्च ते मयि ।
नाहं तेषामधीनास्मि कदाचित्पर्वतर्षभ ॥१०॥
एवं सर्वगतं रूपमद्वैतं परमव्ययम् ।
न जानन्ति महाराज मोहिता मम मायया ॥११॥
ये भजन्ति च मां भक्त्या मायामेतां तरन्ति ते ।
ममैश्वर्यं न जानन्ति ऋगाद्याः श्रुतयः परम् ॥१२॥
सृष्ट्यर्थमात्मनो रूपं मयैव स्वेच्छया पितः ।
कृतं द्विधा नगश्रेष्ठ स्त्री पुमानिति भेदतः ॥१३॥
शिवः प्रधानः पुरुषः शक्तिश्च परमा शिवा ।
शिवशक्त्यात्मकं ब्रह्म योगिनस्तत्त्वदर्शिनः ॥१४॥
वदन्ति मां महाराज तत्त्वमेवं परात्परम् ।
सृजामि ब्रह्मरूपेण जगदेतच्चराचरम् ॥१५॥
संहरामि महारुद्ररूपेणान्ते निजेच्छया ।
दुर्वृत्तशमनार्थाय विष्णुः परमपूरुषः ॥१६॥
भूत्वा जगदिदं कृत्स्नं पालयामि महामते ।
अवतीर्य क्षितौ भूयो भूयो रामादिरूपतः ॥१७॥
निहत्य दानवान्पृथ्वीं पालयामि पुनः पुनः ।
रूपं शक्त्यात्मकं तात प्रधानं यच्च मे स्मृतम् ॥१८॥

यतस्तया विना पुंसः कार्यं नेहात्मना स्थितम् ।
रूपाण्येतानि राजेन्द्र तथा काल्यादिकानि च ॥१९॥
स्थूलानि विद्धि सूक्ष्मं च पूर्वमुक्तं तवानघ ।
अनभिज्ञाय रूपं तु स्थूलं पर्वतपुङ्गव ॥२०॥
अगम्यं सूक्ष्मरूपं मे यद्दृष्ट्वा मोक्षभाग्भवेत् ।
तस्मात्स्थूलं हि मे रूपं मुमुक्षुः पूर्वमाश्रयेत् ॥२१॥
क्रियायोगेन तान्येव समभ्यर्च्यं विधानतः ।
शनैरालोचयेत्सूक्ष्मं रूपं मे परमव्ययम् ॥२२॥

हिमालय उवाच—

मातर्बहुविधं रूपं स्थूलं तव महेश्वरि ।
तेषु किंरूपमाश्रित्य सहसा मोक्षभाग्भवेत् ॥२३॥
तन्मे ब्रूहि महादेवि यदि ते मय्यनुग्रहः ।
संसारान्मोचय त्वं मां दासोऽस्मि भक्तवत्सले ॥२४॥

श्रीपार्वत्युवाच—

मया व्याप्तमिदं विश्वं स्थूलरूपेण भूधर ।
तत्राराध्यतमा देवीमूर्तिः शीघ्रं विमुक्तिदा ॥२५॥
सापि नानाविधा तत्र महाविद्या महामते ।
विमुक्तिदा महाराज तासां नामानि मे शृणु ॥२६॥
महाकाली तथा तारा षोडशी भुवनेश्वरी ।
भैरवी बगला छिन्ना महात्रिपुरसुन्दरी ॥२७॥
धूमावती च मातङ्गी नृणां मोक्षफलप्रदा ।
आसु कुर्वन् परां भक्तिं मोक्षं प्राप्नोत्यसंशयम् ॥२८॥
आसामन्यतमां तात क्रियायोगेन चाश्रय ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यसि निश्चितम् ॥२९॥
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
न लभन्ते महात्मानः कदाचिदपि भूधर ॥३०॥
अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं मुक्तिदा राजन् भक्तियुक्तस्य योगिनः ॥३१॥
यस्तु संस्मृत्य मामन्ते प्राणं त्यजति भक्तितः ।
सोऽपि संसारदुःखौघैर्बाध्यते न कदाचन ॥३२॥

अनन्यचेतसो ये मां भजन्ते भक्तिसंयुताः ।
तेषां मुक्तिप्रदा नित्यमहमस्मि महामते ॥३३॥

शक्त्यात्मकं हि मे रूपमनायासेन मुक्तिदम् ।
समाश्रय महाराज ततो मोक्षमवाप्स्यसि ॥३४॥

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव राजेन्द्र यजन्ते नात्र संशयः ॥३५॥

अहं सर्वमयी यस्मात्सर्वयज्ञफलप्रदा ।
किन्तु तेष्वेव ये भक्तास्तेषां मुक्तिः सुदुर्लभा ॥३६॥

ततो मामेव शरणं देहबन्धविमुक्तये ।
याहि संयतचेतास्त्वं मामेष्यसि न संशयः ॥३७॥

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
सर्वं मदर्पणं कृत्वा मोक्ष्यसे कर्मबन्धनात् ॥३८॥

ये मां भजन्ति सद्भक्त्या मयि ते तेषु चाप्यहम् ।
न च मेऽस्ति प्रियः कश्चिदप्रियोऽपि महामते ॥३९॥

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
सोऽपि पापविनिर्मुक्तो मुच्यते भवबन्धनात् ॥४०॥

क्षिप्रं भवति धर्मात्मा शश्वत्तरति सोऽपि च ।
मयि भक्तिमतां मुक्तिः सुलभा पर्वताधिप ॥४१॥

ततस्त्वं परया भक्त्या मां भजस्व महामते ।
अहं त्वां जन्मजलधेस्तारयामि सुनिश्चितम् ॥४२॥

मन्मना भव मद्याजी मां नमस्कुरु मत्परः ।
मामेवैष्यसि संसारदुःखैर्नैव हि बाध्यसे ॥४३॥

श्रीमहाभागवते उपपुराणे मोक्षयोगोपदेशवर्णनं नामाष्टादशोऽध्यायः

———

एकोनविंशतितमोऽध्यायः

श्रीमहादेव उवाच—

एवं श्रीपार्वतीवक्त्राद्योगसारं परं मुने ।
निशम्य पर्वतश्रेष्ठो जीवन्मुक्तो बभूव ह ॥१॥
सापीयं शैलराजाय योगमुक्त्वा महेश्वरी ।
मातृस्तन्यं पपौ बाला प्राकृतेव हि लीलया ॥२॥
गिरीन्द्रस्तु महाहर्षादकरोत्सुमहोत्सवम् ।
यथा न दृष्टं केनापि श्रुतं वा केनचित्क्वचित् ॥३॥
षष्ठेऽह्नि षष्ठीं सम्पूज्य सम्प्राप्ते दशमेऽहनि ।
पार्वतीत्यकरोन्नाम सान्वयं पर्वताधिपः ॥४॥
एवं त्रिजगतां माता नित्या प्रकृतिरुत्तमा ।
सम्भूय मेनकागर्भाद्धिमालयगृहे स्थिता ॥५॥
हिमालयाय पार्वत्या कथितं योगमुत्तमम् ।
यः पठेत्सुलभा मुक्तिस्तस्य नारद जायते ॥६॥
तुष्टा भवति शर्वाणी नित्यं मङ्गलदायिनी ।
जायते च दृढा भक्तिः पार्वत्यां मुनिपुङ्गव ॥७॥
अष्टम्यां च चतुर्दश्यां नवम्यां भक्तिसंयुतः ।
पठन् श्रीपार्वतीगीतां जीवन्मुक्तो भवेन्नरः ॥८॥
शरत्काले महाष्टम्यां यः पठेत्समुपोषितः ।
रात्रौ जागरितो भूत्वा तस्य पुण्यं ब्रवीमि किम् ॥९॥
स सर्वदेवपूज्यश्च दुर्गाभक्तिपरायणः ।
इन्द्रादयो लोकपालास्तदाज्ञावशवर्तिनः ॥१०॥
स्वयं दैवीकलामेति साक्षाद्देव्याः प्रसादतः ।
नश्यन्ति तस्य पापानि ब्रह्महत्यादिकान्यपि ॥११॥
पुत्रं सर्वगुणोपेतं लभते चिरजीविनम् ।
नश्यन्ति रिपवस्तस्य नित्यं प्राप्नोति मङ्गलम् ॥१२॥
अमावास्यां तिथिं प्राप्य यः पठेद्भक्तिसंयुतः ।
सर्वपापविनिर्मुक्तः स दुर्गातुल्यतामियात् ॥१३॥
निशीथे पठते यस्तु बिल्ववृक्षस्य सन्निधौ ।
तस्य सम्वत्सराद्दुर्गा स्वयं प्रत्यक्षमेति वै ॥१४॥

किमत्र बहुनोक्तेन शृणु नारद तत्त्वतः ।
अस्याः पाठसमं पुण्यं नास्त्येव पृथिवीतले ॥१५॥
तपसां यज्ञदानादिकर्मणामिह विद्यते ।
फलस्य संख्या नैतस्य विद्यते मुनिपुङ्गव ॥१६॥
इत्युक्तं ते यथा जाता नित्यापि परमेश्वरी ।
लीलया मेनकागर्भे भूयः किं श्रोतुमिच्छसि ॥१७॥

श्रीमहाभागवते उपपुराणे भगवतीगीता माहात्म्यवर्णनं
नामैकोनविंशतितमोऽध्यायः

विंशतितमोऽध्यायः

नारद उवाच—

स्थिता हिमवतो गेहे लीलया परमेश्वरी ।
कथमाप पतिं शम्भुं योगचिन्तापरायणम् ॥१॥
कथं देवो मनश्चक्रे दाराग्रहणकर्मणि ।
त्यक्त्वा योगं महायोगी संसारविमुखः प्रभुः ॥२॥
कथमर्धशरीरं साऽहरत्स्मररिपोः प्रभो ।
एतन्मे सर्वमाचक्ष्व विस्तरेण महेश्वर ॥३॥

श्रीमहादेव उवाच—

ययेदं मोह्यते विश्वं परया मायया मुने ।
को बोद्धुमपि शक्नोति तस्या मायां महामते ॥४॥
या सर्वजगतां माया सृष्टिस्थित्यन्तकारिणी ।
सातिबाल्यं समास्थाय स्थिता हिमवतो गृहे ॥५॥
ततः सा ववृधे नित्यं वर्षासु स्वर्णदी यथा ।
चारुतामपि सन्दध्रे यथा शरदि चन्द्रिका ॥६॥
सखीभिः सहिता नित्यं चिक्रीड निजलीलया ।
स्वगुणैः पितरौ नित्यं तर्पयामास पार्वती ॥७॥

गिरिराजस्तथा मेना दृष्ट्वा दृष्ट्वा च तन्मुखम् ।
दृष्टिं व्यापारयामास नान्यत्र क्षणमप्यपि ॥८॥
विद्यते मुनिशार्दूल नासाध्यं हि तपस्यतः ।
तपसा यन्न चाप्नोति विद्यते नैव तत्फलम् ॥९॥
अपि ब्रह्मादिदेवानां यस्या दुर्लभमीक्षणम् ।
तां कृत्वाङ्के दिवारात्रं हिमवान्मेनकापि च ॥१०॥
निरीक्षेते कौतुकेन पुत्रीभावेन तारिणीम् ।
एवं भजन्ति ये भक्त्या तेषामिष्टवरप्रदा ॥११॥
दुर्गम्यापि सुरश्रेष्ठ सुलभा जगदम्बिका ।
एवं स्थिता भगवती गिरिराजगृहे स्वयम् ॥१२॥
मातुस्तृप्तिकरी नित्यं पितृप्रीणनतत्परा ।
अथैकदा गिरीन्द्रस्तां कृत्वाङ्के परमेश्वरीम् ॥१३॥
तनयां च सुसंगम्य स्थितः परमकौतुकात् ।
एतस्मिन्नेव काले तु नारदो मुनिपुङ्गवः ॥१४॥
नभसा च समायातो द्रष्टुं देवीं महेश्वरीम् ।
स ददर्श तदा गौरीं गिरीन्द्रनिकटस्थिताम् ॥१५॥
शरन्निशि निशानाथज्योत्स्नामिव सुनिर्मलाम् ।
गिरीन्द्रस्त्वथ संवीक्ष्य मुनिं स्वगृहमागतम् ॥१६॥
सम्पूज्य प्राञ्जलिर्भूत्वा प्रणनाम महामतिः ।
उपविश्य मुनिः प्राह शैलराजं प्रहर्षयन् ॥१७॥
गिरिराज मया पूर्वं यदुक्तं ज्ञातवानसि ।
स्वयं प्रकृतिराद्येति तनया सम्भविष्यति ॥१८॥
तेन ते तनया जाता स्वयं प्रकृतिरुत्तमा ।
शम्भोर्भवित्री दयिता प्रेम्णा देहार्धहारिणी ॥१९॥
स चाप्येनां विना जायां नान्यामुद्वाहयिष्यति ।
अनयैव गिरिश्रेष्ठ अर्धनारीश्वरो हरः ॥२०॥
भविष्यति महेशाय देयेयं तनया त्वया ।
तस्यैव पूर्वपत्नीयं जाता दक्षगृहे तु या ॥२१॥
अनयोर्यादृशं प्रेम भविष्यति महामते ।
कयोर्न तादृशं भूतं विद्यते वा भविष्यति ॥२२॥

अनया देवकर्माणि करिष्यति बहूनि च ।
पुत्रोऽपि भविता चास्या महाबलपराक्रमः ॥२३॥
येन तुल्यबलो योद्धा न भूतो न भविष्यति ।
नान्यस्मै त्वमिमां दातुं मनः कर्तुमिहार्हसि ॥२४॥
इत्यृषेर्वचनं श्रुत्वा गिरिराज उवाच तम् ।
श्रूयते त्यक्तसङ्गः स महायोगी महेश्वरः ॥२५॥
तपश्चचारात्युग्रं च देवानामप्यगोचरः ।
केवलं परमं ब्रह्म सोऽन्तः पश्यति निश्चलः ॥२६॥
न बाह्यमीक्षते शुद्धब्रह्मण्यर्पितमानसः ।
तस्यैवं निश्चलं चेतः कश्चालयितुमुत्सहेत् ॥२७॥
कथं वा तनयामेनां भार्यार्थे सङ्ग्रहीष्यति ।

नारद उवाच—

तदर्थं नैव चिन्तां त्वं कुरु पर्वतपुङ्गव ॥२८॥
भविष्यति च भङ्गो वै यथा तस्य निशामय ।
तारकेणासुरेन्द्रेण जित्वा देवान् सबान्धवान् ॥२९॥
त्रैलोक्याधिपते राज्यं हृतं मद्बलाश्रयात् ।
तथान्येषां सुराणां स आधिपत्यं बलाद्धरत् ॥३०॥
एक आस्ते त्रिलोकेशो ब्रह्मदत्तवरेण हि ।
ब्रह्मणा कल्पितो मृत्युस्तस्य नूनं दुरात्मनः ॥३१॥
शिवस्यौरसजातेन पुत्रेणामिततेजसा ।
तेन देवाः सुसंयत्ता इन्द्राद्या ब्रह्मशासनात् ॥३२॥
सर्वे च व्यापरिष्यन्ति महादेवविमोहने ।
निमित्तमात्रमेतद्धि लौकिकं पर्वतर्षभ ॥३३॥
वस्तुतस्तु सुतैवैषा हरं सम्मोहयिष्यति ।
इयं जाता महामाया जगन्मोहनकारिणी ॥३४॥
विष्णुसम्मोहिनी लक्ष्मीः शिवसम्मोहिनी शिवा ।
सोऽपि नित्यं महाकालो निजान्तर्यामिनीमिमाम् ॥३५॥
महाकालीं महायोगी समाधिस्थो निरीक्षते ।
तपश्चरति चैतस्या आत्मनिश्चलमानसः ॥३६॥
एनां प्राप्य पुनः पत्नीं त्यक्तयोगो भविष्यति ।
अचिरेणैव भावेन ध्यानयोगेन शङ्करः ॥३७॥

ज्ञात्वैनां त्वद्गृहे जातां ब्रह्मरूपां सनातनीम् ।
तव प्रस्थे तपस्तप्तुं समायास्यति निश्चितम् ॥३८॥

श्रीमहादेव उवाच—

उक्त्वैवं गिरिराजाय स मुनिः प्रययौ द्रुतम् ।
विहायसा स्वयं स्थानं मध्याह्नार्कसमप्रभम् ॥३९॥

श्रीमहाभागवते उपपुराणे महादेवनारदसम्वादे विंशतितमोऽध्यायः

एकविंशोऽध्यायः

श्रीमहादेव उवाच—

गते तस्मिन्मुनिश्रेष्ठे गिरीन्द्रः सह मेनया ।
पुनश्च निश्चितं मेने पार्वतीं भवगेहिनीम् ॥१॥
एतस्मिन्नन्तरे शम्भुस्त्यक्त्वा पूर्वाश्रमं मुने ।
हिमाद्रेः प्रययौ प्रस्थं तपस्तप्तुं सुदुश्चरम् ॥२॥
यत्र गङ्गा निपतिता ब्रह्मलोकात्स्वयं पुरा ।
तत्र विश्वेश्वरः पूर्णब्रह्मध्यानपरायणः ॥३॥
संस्थितः परमो योगी ध्यानानन्दसमुत्सुकः ।
एवं ध्यानपरे तस्मिन्हरे प्रमथपुङ्गवाः ॥४॥
केचिद्ध्यानपरास्तत्र केचित्सेवापरायणाः ।
अन्ये सहचरास्तस्य किञ्चिद्दूरे व्यवस्थिताः ॥५॥
फलपुष्पाणि चिन्वन्तो गीतनृत्यपरायणाः ।
क्रीडन्ते गैरिकैर्नित्यं विभज्य च समुत्सुकाः ॥६॥
दृष्ट्वा शिवं समायातं गन्धर्वाः किन्नरास्तथा ।
एकदा कथयामासुर्गिरीन्द्राय महात्मने ॥७॥
प्रभो गिरीन्द्र भगवांस्तव प्रस्थे महेश्वरः ।
समायातस्तपस्तप्तुं समस्तैः प्रमथैः सह ॥८॥
उषसि प्रस्थनगरमदूरे स स्वयं स्थितः ।
महात्मा जटिलो योगी चन्द्रार्धाङ्कितमस्तकः ॥९॥

प्रमथाश्चापि बहवो निकटे तस्य संस्थिताः ।
ध्याननिष्ठास्तथा चान्ये शुश्रूषणपरायणाः ॥१०॥

अन्ये च कोटिशस्तस्य कियद्दूरे व्यवस्थिताः ।
नृत्यन्ति चैव क्रीडन्ति गायन्ति च हसन्ति च ॥११॥

केचिद्दिगम्बरास्तेषां केचिद्व्याघ्राजिनाम्बराः ।
विभूतिधवलाः सर्वे जटामुकुटमस्तकाः ॥१२॥

ऐश्वर्यं भूतनाथस्य विचित्रं पर्वतर्षभ ।
गत्वैकदा महाराज स्वयं पश्य यथेप्सितम् ॥१३॥

इति श्रुत्वा वचस्तेषां हिमवान्पर्वताधिपः ।
प्रययौ यत्र विश्वेशस्तपश्चरति दुश्चरम् ॥१४॥

ततः स पूजयामास विश्वेशं भक्तिसंयुतः ।
सोऽपि तस्यार्चनं शम्भुः प्रतिजग्राह सादरम् ॥१५॥

ततः सम्पूजितो देवो गिरीन्द्रं प्राह हर्षयन् ।
महाराज तव प्रस्थे निर्जनेऽहं समागतः ॥१६॥

तपः कर्तुं महापुण्ये समस्तैः प्रमथैः सह ।
त्वमत्र राज्ये पुण्यात्मन् गिरिराज तथा कुरु ॥१७॥

यथा मन्निकटे कोऽपि नैवायाति जनः कदा ।
तपोहानिर्भवेत्सङ्गात्तेन सङ्गो भवेन्नहि ॥१८॥

निर्जने क्रियते वासो योगिभिः किल भूधर ।
त्वमाश्रयो मुनीन्द्राणां यक्षाणां किन्नरस्य च ॥१९॥

देवानां राक्षसानां च द्विजातीनां च भूधर ।
सर्वेषां व्यवहारान्वै ज्ञातवानसि धर्मवित् ॥२०॥

किं तुभ्यमधिकं वच्मि धर्मज्ञोऽसि महामते ।
इत्युक्तो गिरिराजं स तूष्णींभूय महेश्वरः ॥२१॥

स्थितस्तं प्रणयेनाह गिरीन्द्रो विनयान्वितः ।
देवदेव जगन्नाथ मद्भाग्यात्समुपस्थितः ॥२२॥

मम प्रस्थे तपः कर्तुं ब्रह्माद्यैरपि दुर्लभः ।
तपस्तप्तुं निर्जनेऽस्मिन्यथेष्टं जगदीश्वरः ॥२३॥

न मयास्ति समः कश्चिदपि साक्षात्पुरन्दरः ।
यथा त्वं मामनुप्राप्तः सगणः काममोहितः ॥२४॥

धन्योऽहं कृतकृत्यश्च न मत्तोऽस्तीह पुण्यवान् ॥२५॥
भगवन्मम प्रस्थेऽस्मिंस्तपसे यदुपस्थितः ।
नात्र यास्यति वै कश्चिज्जनस्त्वन्निकटे प्रभो ॥२६॥
तपस्व त्वं महादेव रहस्यत्र यथेप्सितम् ।
इत्येवमुक्त्वा गिरिराट् प्रययौ निजमालयम् ॥२७॥
आज्ञापयामास तदा सर्वाञ्जनपदान् गिरिः ।
स्वकीयानपि चाहूय सन्नियम्य मुहुर्मुहुः ॥२८॥
गङ्गावतरणप्रस्थं तत्र माहेश्वरं स्थलम् ।
न ममाज्ञां विना केन गन्तव्यं महतापि च ॥२९॥
यदि मद्वाक्यमुल्लङ्घ्य कश्चिद्गच्छति तत्स्थलम् ।
स मे दण्ड्यश्च वध्यश्च भविष्यति न संशयः ॥३०॥
इति तस्याज्ञया भीता देवगन्धर्वकिन्नराः ।
पिशाचा राक्षसा वापि मानवाः पशवस्तथा ॥३१॥
नो यान्ति हिमवत्प्रस्थं यत्रास्ते चन्द्रशेखरः ।
निर्जने स महायोगी चचारोग्रं महत्तपः ॥३२॥
पार्वत्यपि पितुर्गेहे वर्धमाना दिने दिने ।
पाणिग्रहणयोग्याभूच्चार्वङ्गी रुचिराननना ॥३३॥
गिरीन्द्रो नारदोक्तं तद्वाक्यं सञ्चिन्त्य कुत्रचित् ।
न चेष्टयति पार्वत्या विवाहार्थं महामतिः ॥३४॥
तथैकदा जगद्धात्री पार्वती स्वयमेव हि ।
पितरौ प्राह यास्यामि तपः कर्तुं शिवान्तिकम् ॥३५॥
यदा ब्रह्मा स्वतनयां सन्ध्यां कामविमोहितः ।
संधर्षितुं समुद्यातो गगनस्थो हरस्तदा ॥३६॥
निनिन्द तं मुहुर्देवं ब्रह्माणं जगतः पतिम् ।
तदा स लज्जयोपेतो विवर्णवदनो विधिः ॥३७॥
तपसाराधयामास मां जगन्मोहिनीं शिवाम् ।
ततो मयि प्रसन्नायां स वव्रे वाञ्छितं वरम् ॥३८॥
तत्रैवोवाच मां मातस्त्वं भूत्वा चारुरूपिणी ।
मोहयस्व महादेवं संसारविमुखं प्रभुम् ॥३९॥
त्वामृते तस्य नो काचिद् भविष्यति मनोरमा ।
तस्मात्त्वं जन्म सम्प्राप्य भवस्य हरमोहिनी ॥४०॥

कान्ताभिलाषमात्रं मे दृष्ट्वाऽनिन्दन्महेश्वरः ।
तेन सम्प्राप्तलज्जोऽहं दुःखी त्वां समुपाश्रितः ॥४१॥

अनुगृह्णीष्व तन्मे त्वं मोहयस्व महेश्वरम् ।
यदा स वै त्यक्तसङ्गो हरः स्थास्यति निर्जने ॥४२॥

तदैव कामरूपेण मोहयिष्यसि तं शिवम् ।
इत्येवं भाषितं तेन याचितं परमेष्ठिना ॥४३॥

मयाप्यङ्गीकृतं पूर्वं तुष्टया तपसा विधेः ।
तेन दक्षगृहे जाता मोहयेऽहं सकृच्च तम् ॥४४॥

प्राकृतं पुरुषं यादृक् प्राकृता हि वराङ्गना ।
दक्षस्य सुकृते क्षीणे युवाभ्यां समुपासिता ॥४४॥

तद्गृहाद्युवयोर्गेहे जातास्मि हरमोहिनी ।
सोऽपि मामेव संलब्धुं तपश्चरति शङ्करः ॥४६॥

सतीविरहदुःखार्तः सुचिरं परमेश्वरः ।
तस्मै प्रतिश्रुतमतः पुनः प्राप्स्यामि तं पतिम् ॥४७॥

तेनानुमन्यास्यामि यत्रास्ते चन्द्रशेखरः ।
समस्तैः प्रमथैः सार्धं तपोनिष्ठः सुनिर्जने ॥४८॥

तत्र स्थित्वा महादेवं मोहयिष्याम्यहं तथा ।
यथा योगं परित्यज्य भार्यार्थे मां ग्रहीष्यति ॥४९॥

इति तस्या वचः श्रुत्वा स्मृत्वा नारदभाषितम् ।
गिरीन्द्रस्तनयां नेतुं प्रार्थितः शिवसन्निधिम् ॥५०॥

मनश्चक्रे मुनिश्रेष्ठ सहसैव महामतिः ।
मेनाशु पार्वतीं कृत्वा स्वाङ्के साश्रुविलोचना ॥५१॥

रुरोद मुक्तकण्ठी सा सुतामाह मुनीश्वर ।
हा मातः प्राणतुल्यासि कमनीयकलेवरा ॥५२॥

मां विहाय कथं तीव्रं काननं गन्तुमर्हसि ।
ततस्तां पार्वती प्राह सान्त्वयित्वा मुहुर्मुहुः ॥५३॥

विमृज्य नयने तस्याश्चारुहस्ताम्बुजेन वै ।
मातस्त्वं सुमतिर्मेऽर्थे नानुशोचितुमर्हसि ॥५४॥

अशोच्याहं तव सुता ज्ञात्वा किमिति मुह्यसि ।
अहं प्रकृतिराद्यास्मि नित्यानन्दमयी स्वयम् ॥५५॥

न मेऽस्ति दुःखं कुत्रापि काननेऽपि गृहेऽपि वा ।
अहं श्मशानसंवासा महाकाली शवासना ॥५६॥
न मेऽस्ति निर्जने भीतिर्मातस्त्वं सुस्थिरा भव ।
विमोह्य तं महादेवं पुनरायामि निश्चितम् ॥५७॥
अहं प्राप्य पतिं शम्भुं यास्यामि शिवसन्निधिम् ।
श्रुत्वैतद्वचनं मेना पार्वत्या भयदं महत् ॥५८॥
उमेति विस्मिता प्राह तेनोमाख्यां जगाम सा ।
ततः प्राह गिरिं मेना कन्या मे हरसन्निधिम् ॥५९॥
यदि यास्यति तर्ह्येते सख्यौ यातां तया सह ।
साहाय्यं कुरुतामस्याः फलपुष्पादिभिः सदा ॥६०॥
श्रुत्वैतद्वचनं गिरीन्द्रदुहितुस्ताभ्यां समं तां सुताम्-
आत्मीयां गिरिपुङ्गवः समनयच्छ्रीविश्वनाथान्तिकम् ।
सर्वे देवगणाः समीक्ष्य चरितं हर्षेण युक्तास्तदा
वृष्टिं पुष्पमयीं महेशविपिने चक्रुः समस्ता मुने ॥६१॥

श्रीमहाभागवते उपपुराणे श्रीमहादेवनारदसंवादे शिवतपोवर्णनं नामैकविंशतितमोऽध्यायः

द्वाविंशोऽध्यायः

श्रीमहादेव उवाच—

ततो गिरीन्द्रः प्रोवाच महादेवं महामतिः ।
प्रणिपत्याग्रतः स्थित्वा विनयेन महामुने ॥१॥

हिमालय उवाच—

भगवन्मम पुत्रीयं स्थित्वा त्वत्सन्निधौ शिव ।
करिष्यति यथाभीष्टं शुश्रूषणपरायणा ॥२॥
सखीभ्यां सहिता नित्यं फलपुष्पजलादिभिः ॥३॥

श्रीमहादेव उवाच—

ततः शम्भुर्महायोगी तां ज्ञात्वा ज्ञानचक्षुषा ।
भद्रमाह गिरिश्रेष्ठं प्रहृष्टात्मा महामतिः ॥४॥

ततो गिरीन्द्रः प्रययौ पुनः स्वस्थानमुत्तमम् ।
संस्थाप्यैवं महायोगी महेशनिकटे मुने ॥५॥

इत्येवं प्रार्थिता देवी हरेण तपसा स्वयम् ।
संस्थिता विपिने तत्र भक्तानुग्रहतत्परा ॥६॥

शिवस्तु स्वान्तरस्थां तां ध्यायमानः समुत्सुकः ।
जग्राह सहसा नैव भार्यार्थेन महेश्वरीम् ॥७॥

आत्मेच्छाभून्महादेव्या महादेवविमोहने ।
अतो देवाश्च यच्चक्रुस्तच्छृणुष्व महामुने ॥८॥

तारकेणार्दिता देवाः प्रययुर्ब्रह्मसन्निधिम् ।
प्रणिपत्याथ तं प्राहुर्ब्रह्माणं जगतः पतिम् ॥९॥

शृणु ब्रह्मन् त्रिलोकेश कारकोऽसुरपुङ्गवः ।
निर्जित्यास्मान् रणे सर्वान् स्वयमिन्द्रो बभूव ह ॥१०॥

त्वदुत्तवरदर्पिष्ठः सर्वानेव दिवौकसः ।
भ्रष्टराज्यान्भ्रष्टदारान् स चक्रे तारकोऽसुरः ॥११॥

इन्द्रश्चन्द्रश्च वरुणो यमोऽग्निर्निर्ऋतिस्तथा ।
वायुः कुबेर एतस्य सदाज्ञापरिपालकाः ॥१२॥

यत्र यत्र वयं यामस्तत्र तत्र महासुरः ।
पातालमपि संगम्य प्रजाः सम्बाधतेऽनिशम् ॥१३॥

एवं तेन हृतं सर्वं त्रैलोक्यं बलशालिना ।
उपायं नहि पश्यामस्त्वामृते त्रिजगत्पते ॥१४॥

वधो वा चिन्त्यतां तस्य स्थानं वा कल्प्यतां च नः ।
विधीयतां विधेयं यत्त्वं कर्ता त्रिजगत्पते ॥१५॥

ब्रह्मोवाच—

ममैव वरदानेन वर्धितस्तारकासुरः ।
न तस्य मरणे चेष्टा युज्यते समरे मम ॥१६॥

प्रतीकारस्तु युष्माकं कर्तव्यः सर्वथा मया ।
किन्तु सम्यङ्न शक्नोमि तपसा तोषितो यतः ॥१७॥

उपदेशं ब्रवीम्येकं शृणुध्वं सुरसत्तमाः ।
न हरिर्न हरो नाहं न यूयं तस्य घातकाः ॥१८॥

ऋते महेशतनयं न हन्ता तस्य विद्यते ।
ततो यथा महादेवः शीघ्रं दारपरिग्रहम् ॥१९॥

करोति संत्यजन्योगं चिन्तां तत्कुरुत द्रुतम् ।
हिमालयगृहे जाता लीलया प्रकृतिः स्वयम् ॥२०॥

सापि तिष्ठति देवस्य महेशस्याग्रतो मुने ।
तां ग्रहीष्यति सोऽवश्यं भार्यात्वेन महेश्वरः ॥२१॥

ततोऽचिरान्महेशस्य ध्यानभङ्गो यथा भवेत् ।
तथा यतध्वं त्रिदशा महादेवविमोहने ॥२२॥

श्रीमहादेव उवाच—

इति श्रुत्वा वचस्तस्य ब्रह्मणः परमात्मनः ।
प्रययुस्त्रिदशाः सर्वे स्वस्वस्थानं महामुने ॥२३॥

ब्रह्मापि त्रिदशानेवमुक्त्वैव सहसाभ्ययात् ।
तारकस्यालयं तं च वचनं सोऽब्रवीदिदम् ॥२४॥

ब्रह्मोवाच—

भोस्तारक समस्तानि जगन्ति परिशाधि च ।
तदर्थं हि तपस्तप्तं मया चोक्तं तथैव हि ॥२५॥

स्वर्लोके चाधिवसतिः प्रार्थिता नापि वै त्वया ।
न मयापि च ते स्वर्गो वासमुक्तश्चिरं क्वचित् ॥२६॥

तस्मात्स्वर्गं परित्यज्य स्थित्वा मर्त्ये महासुर ।
प्रशाधि सकलं राज्यं ममाज्ञां मा मृषां कुरु ॥२७॥

महादेव उवाच—

इत्युक्तो ब्रह्मणा सोऽपि महाबलपराक्रमः ।
स्वर्गं त्यक्त्वा क्षितौ प्रायात्तारको देवकण्टकः ॥२८॥

तत्रैवेन्द्रमुखा देवाः समागत्य महामुने ।
ददत्युपायनं द्रव्यं प्रत्यहं तु तदार्दिताः ॥२९॥

एवं क्षितौ स्थितो दैत्यः समस्तांस्त्रिदिवौकसः ।
तोषयामास दुर्धर्षमहाबलपराक्रमः ॥३०॥

ततस्ते त्रिदशाः सर्वे सहिता निर्जने स्थले ।
महादेवविमोहार्थं मन्त्राय समुपाविशन् ॥३१॥

इन्द्रः सुरगुरुं प्राज्ञं सम्बोध्य विनयान्वितः ।
प्रोवाच वचनं देवसभायां क्षेमकारणम् ॥३२॥

इन्द्र उवाच—

भगवन् दानवेन्द्रस्य तारकस्य दुरात्मनः ।
विधिना कल्पितो मृत्युर्महादेवात्मजाद्गुरो ॥३३॥
स तु विश्वेश्वरो योगी संसारविमुखः स्वयम् ।
कस्तस्याग्रे वदेद्भार्यां गृहाण परमेश्वर ॥३४॥
ब्रह्मणा कथितं यत्नं कर्तुं तस्य विमोहने ।
तत्रोपायं न पश्यामि कस्तं सम्मोहयिष्यति ॥३५॥

बृहस्पतिरुवाच—

उपायोऽस्ति महाराज महादेवविमोहने ।
भविष्यत्यचिरेणैव ध्यानभङ्गो महेशितुः ॥३६॥
या दक्षतनया देवी महेशगृहिणी स्वयम् ।
सा जाता मेनकागर्भे हिमालयसुताधुना ॥३७॥
तामेव पत्नीं संलब्धुं विश्वेशस्तपसि स्थितः ।
संध्याय परमं रूपं तस्या एव महामते ॥३८॥
अन्यथा देवदेवस्य सर्वथा विजितात्मनः ।
किं कार्यं तपसोग्रेण योगिध्येयस्य विद्यते ॥३९॥
सापि तुष्टा महेशस्य निकटं समुपागता ।
स्थिता चाऽविरतं शम्भोरन्तिके भक्तवत्सला ॥४०॥
कामादयो महेशस्य चिरं योगविचिन्तनात् ।
विनष्टास्तेन शम्भुस्तां न गृह्णाति कदाचन ॥४१॥
तस्मात्कुसुमधन्वानं सर्वलोकविमोहनम् ।
समाहूय महेशस्य ध्यानभङ्गे नियोजय ॥४२॥
तस्येषुणा हि विद्धस्तु योगचिन्तापराङ्मुखः ।
ग्रहीष्यति पुनः पत्नीं पार्वतीमचिरेण वै ॥४३॥

श्रीमहादेव उवाच—

इत्युक्तो गुरुणा तेन देवराजो महामतिः ।
आहूय पुष्पधन्वानं वचनं चेदमब्रवीत् ॥४४॥

इन्द्र उवाच—

काम त्वं देवगन्धर्वनरकिन्नररक्षसाम् ।
तथान्येषां च जन्तूनां सदा प्रीतिविवर्धकः ॥४५॥

त्वमेकं मे महाकार्यं त्रैलोक्यप्रीतिवर्धनम् ।
कृत्वा जगदिदं सर्वं परिरक्ष ममाज्ञया ॥४६॥

कामदेव उवाच—

त्वदाज्ञापालकाः सर्वे वयं देवगणाधिप ।
किं कार्यं भवतो भीमं करिष्येऽपि सुदारुणम् ॥४७॥
यस्य वक्षसि ते वज्रं विष्णुचक्रं च शीर्यते ।
तं भिन्दन्ति शराः पञ्च मम पुष्पमयाः क्षणात् ॥४८॥
इमे च तादृशाः पञ्च बाणा मेऽव्यर्थसंज्ञकाः ।
तथा पुष्पमयं चापं ब्रह्माण्डक्षोभकारकम् ॥४९॥
मन्त्री वसन्तः पवनो यन्ता मलयसम्भवः ।
मित्रं शशाङ्कः पत्नी मे रतिस्त्रैलोक्यमोहिनी ॥५०॥
एतान्सहायान्सम्प्राप्य कस्य किं कर्तुमक्षमः ।
अपि विश्वेश्वरं देवं योगचिन्तापरायणम् ॥५१॥
जितेन्द्रियं मोहयेयं क्षणार्धे यदि मन्यसे ॥५२॥

इन्द्र उवाच—

यदर्थं त्वं समानीतस्तत्त्वं हि स्वयमुक्तवान् ।
प्राज्ञेषु वचनापेक्षा प्रायशो नैव विद्यते ॥५३॥
तारकः सकलान्देवान्बाधतेऽहर्निशं बलात् ।
ज्ञायते तत्त्वया चापि तत्किं ते प्रवदाम्यहम् ॥५४॥
ब्रह्मणा कल्पितो मृत्युस्तस्य नूनं महात्मनः ।
महेशतनयस्यैव हस्तान्नान्यस्य कस्यचित् ॥५५॥
श्रूयते हिमवत्प्रस्थे तपश्चरति शङ्करः ।
जितेन्द्रियो महायोगी संसारविमुखः सदा ॥५६॥
आद्या सनातनी शक्तिः पूर्वं या दक्षकन्यका ।
महेशवनिता सैव जाता हिमवतः सुता ॥५७॥
सापि तस्यान्तिके तस्मिन्प्रस्थे तिष्ठति साम्प्रतम् ।
आरूढयौवना देवी स्त्रीरत्नमतिसुन्दरी ॥५८॥
तां नेहते महादेवो मनसापि कदाचन ।
योगचिन्तापरं तत्त्वं मोहयाशु ममाज्ञया ॥५९॥
यथा सत्यां सानुरागो रेमे स वृषभध्वजः ।
तथा गिरिजया सार्धं रमेत योगमुत्सृजन् ॥६०॥

तथा विधत्स्व लोकानां हिताय कुसुमायुध ।
त्वत्प्रसादादिमे देवा भवन्तु विगतज्वराः ॥६१॥
सुस्थानि सन्तु लोकानि स्थावराणि चराणि च ॥६२॥

श्रीमहादेव उवाच—

इत्याकर्ण्य वचः कामो देवराजस्य विस्मृतम् ।
सस्मार ब्रह्मणा दत्तमपि शापं सुदारुणम् ॥६३॥
यदा शस्त्रपरीक्षार्थं सन्ध्यां प्रति विधावतः ।
अताडयम् पुष्पबाणैस्तदा मामशपद्विधिः ॥६४॥
हरनेत्राग्निनिर्दग्धो भविष्यसि मनोभव ।
क्षिप्त्वा तदङ्गे बाणांस्तु देवकार्यानुरोधतः ॥६५॥
सोऽयं मे समयः प्राप्तः शापकालोऽनिवारितः ।
दैवं न पुरुषः कोऽपि शक्तो लङ्घयितुं क्वचित् ॥६६॥
इति स्मृत्वा विधेः शापं विषण्णोऽपि मनोभवः ।
अङ्गीकारवशात्तत्र नान्यथा व्याहरन्मुने ॥६७॥
उवाच देवराजाहं करिष्ये यत्त्वयोदितम् ।
मोहयिष्ये यतात्मानं शिवं परमयोगिनम् ॥६८॥
किन्तु क्रुद्धो महादेवो यदि मां नाशयेत्प्रभो ।
तदा देवगणैः सार्धं मदर्थे संयतिष्यसि ॥६९॥
इन्द्रोऽपि तमुवाचाथ समाश्वस्य पुनः पुनः ।
त्वदर्थेऽहं यतिष्यामि सर्वैः सुरगणैः सह ॥७०॥
ततः कामो ययौ शीघ्रं महेशस्य तपोवनम् ।
सरतिर्मधुना सार्धं महेन्द्राज्ञाप्रमाणतः ॥७१॥
तत्र आज्ञापयामास सर्वानेव दिवौकसः ।
त्रिदशाधिपतिर्यूयं गच्छताशु ममाज्ञया ॥७२॥
कामोऽयं देवकार्यार्थं करिष्यति सुदारुणम् ।
हरसंमोहनं कार्यं मम वाक्यप्रचोदिताः ॥७३॥
यूयं कुरुध्वं साहाय्यं यत्र यत्र व्रजेत्स्मरः ।
अनुगम्य च तत्रैनं प्रबोधयत मां तदा ॥७४॥
यदा तु पुष्पधन्वैनं महारुद्रं महौजसम् ।
सम्मोहनेन बाणेन सम्मोहयितुमारभेत् ॥७५॥

आगमिष्याम्यहं तत्र रक्षार्थं पुष्पधन्वनः ।
इत्युक्ता देवराजेन त्रिदशाः सर्व एव ते ॥७६॥

अनुजग्मुः कामदेवरक्षार्थं सुसमाहिताः ।
कामः प्रविश्य सहसा महादेवाश्रमं मुने ॥७७॥

संस्थितो मधुना सार्धं कियत्कालं सह स्त्रिया ।
न ददर्श महेशस्य छिद्रं किमपि येन सः ॥७८॥

प्रविश्यति शरीरेऽस्य कामः सर्वविमोहकः ॥७९॥

वसन्तागमनात्सर्वे किंशुकाः केसरादयः ।
पुष्पिता बहवश्चान्ये तरवो मुनिसत्तम ॥८०॥

मल्लिका मालती जाती पुष्पिता मालतीलता ।
सरांसि च सपद्मानि बभूवुस्तु समागमात् ॥८१॥

गुञ्जायमानाः कामेन प्रमत्ता मधुरस्वनाः ।
द्विरेफमालाः पुष्पेषु विहरन्त्यः परस्परम् ॥८२॥

ववौ वायुर्मलयजः शैत्यसौगन्ध्यमान्द्यवान् ।
सुप्रभोऽभून्निशानाथो देहिनः स्युः समुत्सुकाः ॥८३॥

तपश्चरन्तः सिद्धाश्च कामेन परिमोहिताः ।
शृङ्गारभावमापन्नाः किन्नराद्यास्तथाभवन् ॥८४॥

ये चान्ये तद्वनस्थाश्च जन्तवो मुनिसत्तम ।
ते सर्वे विकला आसन् कामेन परिमोहिताः ॥८५॥

सविकारा गणाश्चासन्महेशस्य महात्मनः ।
नासीत्तथापि रुद्रस्य ध्यानभङ्गो मनागपि ॥८६॥

निश्चलं शङ्करं वीक्ष्य विषण्णश्चापमुद्वहन् ।
अग्रेसरोऽभवत्कामस्तदा रत्या निवारितः ॥८७॥

ज्वलत्कालाग्निसंकाशं कोटिसूर्यसमप्रभम् ।
योगचिन्तापरं देवं कः समासादितुं क्षमः ॥८८॥

एवमिन्द्रवचः श्रुत्वा स्वयमङ्गीकृतं स्मरन् ।
सम्मोहनं महेशस्य बाणं धनुषि सन्दधे ॥८९॥

तदैव वीक्ष्य तं रुद्रं पुनः पश्चाज्जगाम ह ॥९०॥

एवं निरीक्ष्य तं कामं शिवमोहपराङ्मुखम् ।
स्मित्वा महेशमोहार्थं समुत्तस्थौ महेश्वरी ॥९१॥

महामाया ययेदं हि मोह्यते सकलं जगत् ।
सा सखीभ्यां समुत्थाय सम्मुखे संस्थिता यदा ॥९२॥

तदा ध्यानं परित्यज्य महादेवस्त्रिलोचनः ।
उन्मील्य चारुनेत्राणि पार्वतीं स व्यलोकयत् ॥९३॥

निरीक्ष्य तन्मुखाम्भोजं सुचारुनयनोज्ज्वलम् ।
निश्चलाक्षः स्थितः शम्भुः प्रहृष्टात्मा महामनाः ॥९४॥

एतस्मिन्नेव काले तु दृष्ट्वैवं चन्द्रशेखरम् ।
पुष्पधन्वा पुष्पबाणं समुद्यम्य हरं ययौ ॥९५॥

इन्द्रोऽपि समयं श्रुत्वा देववक्त्रात्समागतः ।
समस्तैस्त्रिदशैः सार्धं गगने संस्थितो रथे ॥९६॥

प्रथमं प्राहिणोद्बाणं हर्षणं शङ्करोरसि ।
ततः प्रहृष्टचेताः स पार्वतीं समलोकयत् ॥९७॥

एतस्मिन्नेव काले तु कामसाहाय्यकारणात् ।
मनोज्ञः प्रववौ वायुः शृङ्गारः प्राविशद्धरम् ॥९८॥

ततः पुनः समादाय पुष्पमालाविभूषणम् ।
बाणं सम्मोहनं नाम पौष्पे धनुषि सन्दधे ॥९९॥

तदाभूद्दक्षिणे तस्य रतिः परमसुन्दरी ।
वामे प्रीतिरभूत्पृष्ठे वसन्तः परमः सुखम् ॥१००॥

कामस्तु प्राहिणोद्बाणं जगन्मोहनकारणम् ।
महेशहृदये हृष्टः सर्वदेवस्य पश्यतः ॥१०१॥

मोहितस्तेन बाणेन जगन्मोहनकारिणा ।
जितेन्द्रियोऽविकारः सन्नुत्सुकः सङ्गमेऽभवत् ॥१०२॥

प्रशशंसुस्ततो देवाः कामदेवं मुहुर्मुहुः ।
असाध्यं विद्यते नास्य कामस्यात्र जगत्त्रये ॥१०३॥

ततः संस्मृत्य विश्वेशस्त्विन्द्रियाणां विनिग्रहम् ।
विधाय चिन्तयामास विकारस्यास्य कारणम् ॥१०४॥

एतस्मिन्नन्तरे ब्रह्मा समागत्य मनोभवम् ।
पौष्पं बाणं धनुः शक्तिं प्राणमाकृष्य तत्क्षणात् ॥१०५॥

समुत्सार्य वसन्तं च पुनः स्वस्थानमाययौ ।
हरः सञ्चिन्त्य मनसा कामो मामतिवर्तते ॥१०६॥

प्रजज्वाल स च क्रोधात्कालानलनिभेक्षणः ।
रुषा प्रज्वलितस्यास्य तृतीयनयनात्ततः ॥१०७॥
निःससार महानग्निर्दिधक्षुर्जगतीमिव ।
तमग्निं वीक्ष्य सम्भूतं भीताः सर्वे दिवौकसः ॥१०८॥
उच्चैरूचुर्महादेवं कामरक्षणकारणात् ।
प्रभो शिव जगन्नाथ रक्ष रक्ष मनोभवम् ॥१०९॥
त्वया यथा नियुक्तोऽयं तथैवासौ समाचरत् ।
प्रसीदात्मन्महादेव रक्षास्माकं हितैषिणम् ॥११०॥
इत्येवं वदतां तेषां हरनेत्रोद्भवोऽनलः ।
चकार भस्मसात्कामं सहसा मुनिसत्तम ॥१११॥
श्री महाभागवते उपपुराणे कामदाह वर्णनं नाम द्वाविंशोऽध्यायः ।

त्रयोविंशोध्यायः

श्रीमहादेव उवाच—
हरनेत्रसमुद्भूतः स वह्निर्नं महेश्वरम् ।
पुनर्गन्तुं शशाकाथ कदाचिदपि नारद ॥१॥
बभूव वडवारूपस्तापयामास मेदिनीम् ।
ततो ब्रह्मा समागत्य वडवारूपिणं च तम् ॥२॥
नीत्वा समुद्रं सम्प्रार्थ्य तत्तोये स्थापयन्मुने ।
ययुर्देवा निजं स्थानं कामशोकेन मोहिताः ॥३॥
समाश्वस्य रतिं स्वामी पुनस्ते जीवितो भवेत् ॥४॥
अथ प्राह महादेवं पार्वती रुचिरानना ।
त्रिजगज्जननी स्मित्वा निर्जने तत्र काननें ॥५॥
श्रीदेव्युवाच—
मामाद्यां प्रकृतिं देव लब्धुं पत्नीं महत्तपः ।
चिरं करोषि तत्कस्मात्कामोऽयं नाशितस्त्वया ॥६॥
कामे विनष्टे पत्न्याः किं विद्यते ते प्रयोजनम् ।
योगिनामेष धर्मो वै यत्कामस्य विनाशनम् ॥७॥
श्रीमहादेव उवाच—
इति श्रुत्वा वचस्तस्याः शङ्करश्चकितस्तदा ।
सन्ध्यायन् ज्ञातवानाद्यां प्रकृतिं पर्वतात्मजाम् ॥८॥

ततो निमील्य नेत्राणि प्रहर्षपुलकान्वितः ।
निरीक्ष्य पार्वतीं प्राह सर्वलोकैकसुन्दरीम् ॥९॥
जाने त्वां प्रकृतिं पूर्णामाविर्भूतां स्वलीलया ।
त्वामेव लब्धुं ध्यानस्थश्चिरं तिष्ठामि कानने ॥१०॥
अद्याहं कृतकृत्योऽस्मि यत्त्वां साक्षात्परात्पराम् ।
पुरः पश्यामि चार्वङ्गीं सतीमिव मम प्रियाम् ॥११॥

श्रीदेव्युवाच—

तव भावेन तुष्टाहं सम्भूय हिमवद्गृहे ।
त्वामेव च पतिं लब्धुं समायाता तवान्तिकम् ॥१२॥
यो मां यादृशभावेन सम्प्रार्थयति भक्तितः ।
तस्य तेनैव भावेन पूरयामि मनोरथान् ॥१३॥
अहं सैव सती शम्भो दक्षस्य च महाध्वरे ।
विहाय त्वां गता काली भीमा त्रैलोक्यमोहिनी ॥१४॥

शिव उवाच—

यदि मे प्राणतुल्यासि सती त्वं चारुलोचना ।
तदा यथा महामेघप्रभा सा भीमरूपिणी ॥१५॥
बभूव दक्षयज्ञस्य विनाशाय दिगम्बरी ।
काली तथा स्वरूपेण चात्मानं दर्शयस्व माम् ॥१६॥

श्रीमहादेव उवाच—

इत्युक्ता सा हिमसुता शम्भुना मुनिसत्तम ।
बभूव पूर्ववत्काली स्निग्धाञ्जनचयप्रभा ॥१७॥
दिगम्बरी क्षरद्रक्ता भीमायतविलोचना ।
पीनोन्नतकुचद्वन्द्वचारुशोभितवक्षसा ॥१८॥
गलदापादसंलम्बिकेशपुञ्जभयानका ।
ललज्जिह्वाज्वलद्दन्तनखरैरुपशोभिता ॥१९॥
उद्यच्छशाङ्कनिचयैर्मेघपङ्क्तिरिवाम्बरे ।
आजानुलम्बिमुण्डालिमालयातिविशालया ॥२०॥
राजमाना महामेघपङ्क्तिश्चञ्चलया यथा ।
भुजैश्चतुर्भिर्भूयोच्चैः शोभमाना महाप्रभा ॥२१॥
विचित्ररत्नविभ्राजन्मुकुटोज्ज्वलमस्तका ।
तां विलोक्य महादेवः प्राह गद्गदया गिरा ॥२२॥

रोमाञ्चिततनुर्भक्त्या प्रहृष्टात्मा महामुने ।
चिरं त्वद्विरहेनेदं निर्दग्धं हृदयं मम ॥२३॥
त्वमन्तर्यामिनी शक्तिर्हृदयस्था महेश्वरी ।
आराध्य त्वत्पदाम्भोजं धृत्वा हृदयपङ्कजे ॥२४॥
त्वद्विच्छेदसमुत्तप्तं हृत्करोमि सुशीतलम् ॥२५॥
इत्युक्त्वा स महादेवो योगं परममास्थितः ।
शयितस्तत्पदाम्भोजं दधार हृदये तदा ॥२६॥
ध्यानानन्देन निष्पन्दशवरूपधरः स्थितः ।
व्याघूर्णमाननेत्रस्तां ददर्श परमादरः ॥२७॥
अंशतः पुरतः स्थित्वा पञ्चवक्त्रः कृताञ्जलिः ।
सहस्रनामभिः कालीं तुष्टाव परमेश्वरीम् ॥२८॥

शिव उवाच—

अनाद्या परमा विद्या प्रधाना प्रकृतिः परा ।
प्रधानपुरुषाराध्या प्रधानपुरुषेश्वरी ॥२९॥
प्राणात्मिका प्राणशक्तिः सर्वप्राणहितैषिणी ।
उमा चोत्तमकेशिन्युत्तमा चोन्मत्तभैरवी ॥३०॥
उर्वशी चोन्नता चोग्रा महोग्रा चोन्नतस्तनी ।
उग्रचण्डोग्रनयना महोग्रदैत्यनाशिनी ॥३१॥
उग्रप्रभावती चोग्रवेगानुग्रप्रमर्दिनी ।
उग्रतारोग्रनयना चोर्ध्वस्थाननिवासिनी ॥३२॥
उन्मत्तनयनात्युग्रदन्तोत्तुङ्गस्थलालया ।
उल्लासिन्युल्लासचित्ता चोत्फुल्लनयनोज्ज्वला ॥३३॥
उत्फुल्लकमलारूढा कमला कामिनी कला ।
काली करालवदना कामिनीमुखकामिनी ॥३४॥
कोमलाङ्गी कृशाङ्गी च कैटभासुरमर्दिनी ।
कालिन्दी कमलस्था च कान्ता काननवासिनी ॥३५॥
कुलीना निष्कला कृष्णा कालरात्रिस्वरूपिणी ।
कुमारी कामरूपा च कामिनी कृष्णपिङ्गला ॥३६॥
कपिला शान्तिदा शुद्धा शङ्करार्धशरीरिणी ।
कौमारी कार्त्तिकी दुर्गा कौशिकी कुण्डलोज्ज्वला ॥३७॥

कुलेश्वरी कुलश्रेष्ठा कुन्तलोज्ज्वलमस्तका ।
भवानी भाविनी वाणी शिवा च शिवमोहिनी ॥३८॥

शिवप्रिया शिवाराध्या शिवप्राणैकवल्लभा ।
शिवपत्नी शिवस्तुत्या शिवानन्दप्रदायिनी ॥३९॥

नित्यानन्दमयी नित्या सच्चिदानन्दविग्रहा ।
त्रैलोक्यजननी शम्भुहृदयस्था सनातनी ॥४०॥

सदया निर्दया माया शिवा त्रैलोक्यमोहिनी ।
ब्रह्मादित्रिदशाराध्या सर्वाभीष्टप्रदायिनी ॥४१॥

ब्रह्माणी ब्रह्मगायत्री सावित्री ब्रह्मसंस्तुता ।
ब्रह्मोपास्या ब्रह्मशक्तिर्ब्रह्मसृष्टिविधायिनी ॥४२॥

कमण्डलुकरा सृष्टिकर्त्री ब्रह्मस्वरूपिणी ।
चतुर्भुजात्मिका यज्ञसूत्ररूपा दृढव्रता ॥४३॥

हंसारूढा चतुर्वक्त्रा चतुर्वेदाभिसंस्तुता ।
वैष्णवी पालनकरी महालक्ष्मीर्हरिप्रिया ॥४४॥

शङ्खचक्रधरा विष्णुशक्तिर्विष्णुस्वरूपिणी ।
विष्णुप्रिया विष्णुमाया विष्णुप्राणैकवल्लभा ॥४५॥

योगनिद्राक्षरा विष्णुमोहिनी विष्णुसंस्तुता ।
विष्णुसंमोहनकरी त्रैलोक्यपरिपालिनी ॥४६॥

शङ्खिनी चक्रिणी पद्मा पद्मिनी मुसलायुधा ।
पद्मालया पद्महस्ता पद्ममालादिभूषिता ॥४७॥

गरुडस्था चारुरूपा लम्पट्रूपा सरस्वती ।
विष्णुपार्श्वस्थिता विष्णुपरमाह्लाददायिनी ॥४८॥

सम्पत्तिः सम्पदाधारा सर्वसम्पत्प्रदायिनी ।
श्रीविद्या सुखदा सौख्यदायिनी दुःखनाशिनी ॥४९॥

दुःखहन्त्री सुखकरी सुखासीना सुखप्रदा ।
सुखप्रसन्नवदना नारायणमनोरमा ॥५०॥

नारायणी जगद्धात्री नारायणविमोहिनी ।
नारायणशरीरस्था वनमालाविभूषिता ॥५१॥

दैत्यघ्नी पीतवसना सर्वदैत्यप्रमर्दिनी ।
वाराही नारसिंही च रामचन्द्रस्वरूपिणी ॥५२॥

रक्षोघ्नी काननावासा चाहल्याशापमोचिनी ।
सेतुबन्धकरी सर्वरक्षःकुलविनाशिनी ॥५३॥
सीता पतिव्रता साध्वी रामप्राणैकवल्लभा ।
अशोककाननावासा लङ्केश्वरविनाशिनी ॥५४॥
नीतिः सुनीतिः सुकृतिः कीर्तिर्मेधा वसुन्धरा ।
दिव्यमाल्यधरा दिव्या दिव्यगन्धानुलेपना ॥५५॥
दिव्यवस्त्रपरीधाना दिव्यस्थाननिवासिनी ।
माहेश्वरी प्रेतसंस्था प्रेतभूमिनिवासिनी ॥५६॥
निर्जनस्था श्मशानस्था भैरवी भीमलोचना ।
सुघोरनयना घोरा घोररूपा घनप्रभा ॥५७॥
घनस्तनी वरा श्यामा प्रेतभूमिकृतालया ।
खट्वाङ्गधारिणी द्वीपिचर्माम्बरसुशोभना ॥५८॥
महाकाली चण्डवक्त्रा चण्डमुण्डविनाशिनी ।
उद्यानकाननावासा पुष्पोद्यानवनप्रिया ॥५९॥
बलिप्रिया मांसभक्ष्या रुधिरासवभक्षिणी ।
भीमरावा साट्टहासा रणनृत्यपरायणा ॥६०॥
असुरासृक्प्रिया तुष्टा दैत्यदानवमर्दिनी ।
दैत्यविद्राविणी दैत्यमथनी दैत्यसूदनी ॥६१॥
दैत्यघ्नी दैत्यहन्त्री च महिषासुरमर्दिनी ।
रक्तबीजनिहन्त्री च शुम्भासुरविनाशिनी ॥६२॥
निशुम्भहन्त्री धूम्राक्षमर्दिनी दुर्गहारिणी ।
दुर्गासुरनिहन्त्री च शिवदूती महाबला ॥६३॥
महाबलवती चित्रवस्त्रा रक्ताम्बरामला ।
विमला ललिता चारुहासा चारुत्रिलोचना ॥६४॥
अजेया जयदा ज्येष्ठा जयशीला पराजिता ।
विजया जाह्नवी दुष्टजृम्भिणी जयदायिनी ॥६५॥
जगद्रक्षाकरी सर्वजगच्चैतन्यकारिणी ।
जया जयन्ती जननी जनभक्षणतत्परा ॥६६॥
जलरूपा जलस्था च जप्यजापकवत्सला ।
जाज्वल्यमाना यज्ञाशा जन्मनाशविवर्जिता ॥६७॥

जरातीता जगन्माता जगद्रूपा जगन्मयी ।
जङ्गमा ज्वालिनी जृम्भास्तम्भिनी दुष्टतापिनी ॥६८॥
त्रिपुरघ्नी त्रिनयना महात्रिपुरतापिनी ।
तृष्णाजातिः पिपासा च बुभुक्षा त्रिपुरप्रभा ॥६९॥
त्वरिता त्रिपुटा त्र्यक्षा तन्वी तापविवर्जिता ।
त्रिलोकेशी तीव्रवेगा तीव्रा तीव्रबलालया ॥७०॥
निःशङ्का निर्मलाभा च निरातङ्काऽमलप्रभा ।
विनीता विनयाभिज्ञा विशेषज्ञा विलक्षणा ॥७१॥
वरदा वल्लभा विद्युत्प्रभा विनयशालिनी ।
बिम्बोष्ठी विधुवक्त्रा च विवस्त्रा विनयप्रभा ॥७२॥
विश्वेशपत्नी विश्वात्मा विश्वरूपा बलोत्कटा ।
विश्वेशी विश्ववनिता विश्वमाता विचक्षणा ॥७३॥
विदुषी विश्वविदिता विश्वमोहनकारिणी ।
विश्वमूर्तिर्विश्वधरा विश्वेशपरिपालिनी ॥७४॥
विश्वकर्त्री विश्वहर्त्री विश्वपालनतत्परा ।
विश्वेशहृदयावासा विश्वेश्वरमनोरमा ॥७५॥
विश्वहा विश्वनिलया विश्वमाया विभूतिदा ।
विश्वविश्वोपकारा च विश्वप्राणात्मिकापि च ॥७६॥
विश्वप्रिया विश्वमयी विश्वदुष्टविनाशिनी ।
दाक्षायणी दक्षकन्या दक्षयज्ञविनाशिनी ॥७७॥
विश्वम्भरी वसुमती वसुधा विश्वपावनी ।
सर्वातिशायिनी सर्वदुःखदारिद्र्यहारिणी ॥७८॥
महाविभूतिरव्यक्ता शाश्वती सर्वसिद्धिदा ।
अचिन्त्याऽचिन्त्यरूपा च केवला परमात्मिका ॥७९॥
सर्वज्ञा सर्वविषया सर्वोपरिपरायणा ।
सर्वस्यार्तिहरा सर्वमङ्गला मङ्गलप्रदा ॥८०॥
मङ्गलार्हा महादेवी सर्वमङ्गलदायिका ।
सर्वान्तरस्था सर्वार्थरूपिणी च निरञ्जना ॥८१॥
चिच्छक्तिश्चिन्मयी सर्वविद्या सर्वविधायिनी ।
शान्तिः शान्तिकरी सौम्या सर्वसर्वप्रदायिनी ॥८२॥

शान्तिः क्षमा क्षेमकरी क्षेत्रज्ञा क्षेत्रवासिनी ।
क्षणात्मिका क्षीणतनुः क्षीणाङ्गी क्षीणमध्यमा ॥८३॥

क्षिप्रगा क्षेमदा क्षिप्ता क्षणदा क्षणवासिनी ।
वृत्तिर्निवृत्तिर्भूतानां प्रवृत्तिर्वृत्तलोचना ॥८४॥

व्योममूर्तिर्व्योमसंस्था व्योमालयकृताश्रया ।
चन्द्रानना चन्द्रकान्तिश्चन्द्रार्धाङ्कितमस्तका ॥८५॥

चन्द्रप्रभा चन्द्रकला शरच्चन्द्रनिभानना ।
चन्द्रात्मिका चन्द्रमुखी चन्द्रशेखरवल्लभा ॥८६॥

चन्द्रशेखरवक्षःस्था चन्द्रलोकनिवासिनी ।
चन्द्रशेखरशैलस्था चञ्चला चञ्चलेक्षणा ॥८७॥

छिन्नमस्ता छागमांसप्रिया छागबलिप्रिया ।
ज्योत्स्ना ज्योतिर्मयी सर्वज्यायसी जीवनात्मिका ॥८८॥

सर्वकार्यनियन्त्री च सर्वभूतहितैषिणी ।
गुणातीता गुणमयी त्रिगुणा गुणशालिनी ॥८९॥

गुणैकनिलया गौरी गुह्यगोपकुलोद्भवा ।
गरीयसी गुरुरता गुह्यस्थाननिवासिनी ॥९०॥

गुणज्ञा निर्गुणा सर्वगुणार्हा गुह्यकाम्बिका ।
गलज्जटा गलत्केशा गलद्रुधिरचर्चिता ॥९१॥

गजेन्द्रगमना गन्त्री गीतनृत्यपरायणा ।
गमनस्था गयाध्यक्षा गणेशजननी तथा ॥९२॥

गानप्रिया गानरता गृहस्था गृहिणी परा ।
गजसंस्था गजारूढा ग्रसन्ती गरुडासना ॥९३॥

योगस्था योगिनीगम्या योगचिन्तापरायणा ।
योगिध्येया योगिवन्द्या योगलभ्या युगात्मिका ॥९४॥

योगिज्ञेया योगयुक्ता महायोगेश्वरेश्वरी ।
योगानुरक्ता युगदा युगान्तजलदप्रभा ॥९५॥

युगानुकारिणी यज्ञरूपा सूर्यसमप्रभा ।
युगान्तानिलवेगा च सर्वयज्ञफलप्रदा ॥९६॥

संसारयोनिः संसारव्यापिनी सकलास्पदा ।
संसारतरुनिःसेव्या संसारार्णवतारिणी ॥९७॥

सर्वार्थसाधिका सर्वा संसारव्यापिनी तथा ।
संसारबन्धकर्त्री च संसारपरिवर्जिता ॥९८॥

दुर्निरीक्ष्या सुदुष्प्राप्या भूतिर्भूतिमतीत्यपि ।
अत्यन्तविभवारूपा महाविभवरूपिणी ॥९९॥

शब्दब्रह्मस्वरूपा च शब्दयोनिः परात्परा ।
भूतिदा भूतिमाता च भूतिस्तन्द्री विभूतिदा ॥१००॥

भूतान्तरस्था कूटस्था भूतनाथप्रियाङ्गना ।
भूतमाता भूतनाथा भूतालयनिवासिनी ॥१०१॥

भूतनृत्यप्रिया भूतसङ्गिनी भूतलाश्रया ।
जन्ममृत्युजरातीता महापुरुषसङ्गता ॥१०२॥

भुजगा तामसी व्यक्ता तमोगुणवती तथा ।
त्रितत्त्वतत्त्वरूपा च तत्त्वज्ञा तत्त्वकप्रिया ॥१०३॥

त्र्यम्बका त्र्यम्बकरता शुक्ला त्र्यम्बकरूपिणी ।
त्रिकालज्ञा जन्महीना रक्ताङ्गी ज्ञानरूपिणी ॥१०४॥

अकार्या कार्यजननी ब्रह्माख्या ब्रह्मसंस्थिता ।
वैराग्ययुक्ता विज्ञानगम्या धर्मस्वरूपिणी ॥१०५॥

सर्वधर्मविधानज्ञा धर्मिष्ठा धर्मतत्परा ।
धर्मिष्ठपालनकरी धर्मशास्त्रपरायणा ॥१०६॥

धर्माधर्मविहीना च धर्मजन्यफलप्रदा ।
धर्मिणी धर्मनिरता धर्मिणामिष्टदायिनी ॥१०७॥

धन्या धीर्धारणा धीरा धन्वनी धनदायिनी ।
धनुष्मती धरासंस्था धरणिस्थितिकारिणी ॥१०८॥

सर्वयोनिर्विश्वयोनिरपाम्योनिरयोनिजा ।
रुद्राणी रुद्रवनिता रुद्रैकादशरूपिणी ॥१०९॥

रुद्राक्षमालिनी रौद्री भुक्तिमुक्तिफलप्रदा ।
ब्रह्मोपेन्द्रप्रवन्द्या च नित्यं मुदितमानसा ॥११०॥

इन्द्राणी वासवी चेन्द्री विचित्रैरावतस्थिता ।
सहस्रनेत्रा दिव्याङ्गा दिव्यकेशविलासिनी ॥१११॥

दिव्याङ्गना दिव्यनेत्रा दिव्यचन्दनचर्चिता ।
दिव्यालङ्करणा दिव्यश्वेतचामरवीजिता ॥११२॥

दिव्यहारा दिव्यपदा दिव्यनूपुरशोभिता ।
केयूरशोभिता हृष्टा हृष्टचित्तप्रहर्षिणी ॥११३॥

सम्प्रहृष्टमना हर्षप्रसन्नवदना तथा ।
देवेन्द्रवन्द्यपादाब्जा देवेन्द्रपरिपूजिता ॥११४॥

रजसा रक्तनयना रक्तपुष्पप्रिया सदा ।
रक्ताङ्गी रक्तनेत्रा च रक्तोत्पलविलोचना ॥११५॥

रक्ताभा रक्तवस्त्रा च रक्तचन्दनचर्चिता ।
रक्तेक्षणा रक्तभक्ष्या रक्तमत्तोरगाश्रया ॥११६॥

रक्तदन्ता रक्तजिह्वा रक्तभक्षणतत्परा ।
रक्तप्रिया रक्ततुष्टा रक्तपानसुतत्परा ॥११७॥

बन्धूककुसुमाभा च रक्तमाल्यानुलेपना ।
स्फुरद्रक्ताञ्चिततनुः स्फुरत्सूर्यशतप्रभा ॥११८॥

स्फुरन्नेत्रा पिङ्गजटा पिङ्गला पिङ्गलेक्षणा ।
बगला पीतवस्त्रा च पीतपुष्पप्रिया सदा ॥११९॥

पीताम्बरा पिबद्रक्ता पीतपुष्पोपशोभिता ।
शत्रुघ्नी शत्रुसम्मोहजननी शत्रुतापिनी ॥१२०॥

शत्रुप्रमर्दिनी शत्रुवाक्यस्तम्भनकारिणी ।
उच्चाटनकरी सर्वदुष्टोत्सारणकारिणी ॥१२१॥

शत्रुविद्राविणी शत्रुसम्मोहनकरी तथा ।
विपक्षमर्दनकरी शत्रुपक्षक्षयङ्करी ॥१२२॥

सर्वदुष्टघातिनी च सर्वदुष्टविनाशिनी ।
द्विभुजा शूलहस्ता च त्रिशूलवरधारिणी ॥१२३॥

दुष्टसन्तापजननी दुष्टक्षोभप्रवर्धनी ।
दुष्टानां क्षोभसम्बद्धा भक्तक्षोभनिवारिणी ॥१२४॥

दुष्टसन्तापिनी दुष्टसन्तापपरिमर्दिनी ।
सन्तापरहिता भक्तसन्तापपरिनाशिनी ॥१२५॥

अद्वैता द्वैतरहिता निष्कला ब्रह्मरूपिणी ।
त्रिदशेशी त्रिलोकेशी सर्वेशी जगदीश्वरी ॥१२६॥

ब्रह्मेशसेवितपदा सर्ववन्द्यपदाम्बुजा ।
अचिन्त्यरूपचरिता चाचिन्त्यबलविक्रमा ॥१२७॥

सर्वाचिन्त्यप्रभावा च स्वप्रभावप्रदर्शिनी ।
अचिन्त्यमहिमाचिन्त्यरूपसौन्दर्यशालिनी ॥१२८॥

अचिन्त्यवेशशोभा च लोकाचिन्त्यगुणान्विता ।
अचिन्त्यशक्तिर्दृश्चिन्त्यप्रभावा चिन्त्यरूपिणी ॥१२९॥

योगचिन्त्या महाचिन्तानाशिनी चेतनात्मिका ।
गिरिजा दक्षजा विश्वजनयित्री जगत्प्रसूः ॥१३०॥

संनम्याप्रणता सर्वप्रणतार्तिहरा तथा ।
प्रणतैश्वर्यदा सर्वप्रणताशुभनाशिनी ॥१३१॥

प्रणतापन्नाशकरी प्रणताशुभमोचनी ।
सिद्धेश्वरी सिद्धसेव्या सिद्धचारणसेविता ॥१३२॥

सिद्धिप्रदा सिद्धिकरी सर्वसिद्धगणेश्वरी ।
अष्टसिद्धिप्रदा सिद्धगणसेव्यपदाम्बुजा ॥१३३॥

कात्यायनी स्वधा स्वाहा वषड्वौषट्स्वरूपिणी ।
पितृणां तृप्तिजननी कव्यरूपा सुरेश्वरी ॥१३४॥

हव्यभोक्त्री हव्यतुष्टा पितृरूपाऽसितप्रिया ।
कृष्णपक्षप्रपूज्या च प्रेतपक्षसमर्पिता ॥१३५॥

अष्टहस्ता दशभुजा चाष्टादशभुजान्विता ।
चतुर्दशभुजाऽसंख्यभुजवल्लीविराजिता ॥१३६॥

सिंहपृष्ठसमारूढा सहस्रभुजराजिता ।
भुवनेशी चान्नपूर्णा महात्रिपुरसुन्दरी ॥१३७॥

त्रिपुरा सुन्दरी सौम्यमुखी सुन्दरलोचना ।
सुन्दरास्या शुभदंष्ट्रा सुभ्रूः पर्वतनन्दिनी ॥१३८॥

नीलोत्पलदलश्यामा स्मेरोत्फुल्लमुखाम्बुजा ।
सत्यसंधा पद्मवक्त्रा भ्रूकुटीकुटिलानना ॥१३९॥

विद्याधरी वरारोहा महासन्ध्यास्वरूपिणी ।
अरुन्धती हिरण्याक्षी सुधूम्राक्षी शुभेक्षणा ॥१४०॥

श्रुतिः स्मृतिः कृतिर्योगमाया पुण्या पुरातनी ।
वाग्देवता वेदविद्या ब्रह्मविद्यास्वरूपिणी ॥१४१॥

वेदशक्तिर्वेदमाता वेदाद्या परमा गतिः ।
आन्वीक्षिकी तर्कविद्या योगशास्त्रप्रकाशिनी ॥१४२॥

धूमावती वियन्मूर्तिर्विद्युन्मालाविलासिनी ।
महाव्रता सदानन्दनन्दिनी नगनन्दिनी ॥१४३॥

सुनन्दा यमुना चण्डी रुद्रचण्डी प्रभावती ।
पारिजातवनावासा पारिजातवनप्रिया ॥१४४॥

सुपुष्पगन्धसन्तुष्टा दिव्यपुष्पोपशोभिता ।
पुष्पकाननसद्वासा पुष्पमालाविलासिनी ॥१४५॥

पुष्पमाल्यधरा पुष्पतुच्छालङ्कृतदेहिका ।
प्रतप्तकाञ्चनाभासा शुद्धकाञ्चनमण्डिता ॥१४६॥

सुवर्णकुण्डलवती स्वर्णपुष्पप्रिया सदा ।
नर्मदासिन्धुनिलया समुद्रतनया तथा ॥१४७॥

षोडशी षोडशभुजा महाभुजगमण्डिता ।
पातालवासिनी नागी नागेन्द्रकृतभूषणा ॥१४८॥

नागिनी नागकन्या च नागमाता नगालया ।
दुर्गापत्तारिणी दुर्गदुष्टग्रहनिवारिणी ॥१४९॥

अभयापन्निहन्त्री च सर्वापत्परिनाशिनी ।
ब्रह्मण्या श्रुतिशास्त्रज्ञा जगतां कारणात्मिका ॥१५०॥

निष्कारणा जन्महीना मृत्युञ्जयमनोरमा ।
मृत्युञ्जयहृदावासा मूलाधारनिवासिनी ॥१५१॥

षट्चक्रसंस्था महती महोत्सवविलासिनी ।
रोहिणी सुन्दरमुखी सर्वविद्याविशारदा ॥१५२॥

सदसद्वस्तुरूपा च निष्कामा कामपीडिता ।
कामातुरा काममत्ता काममानससन्तनुः ॥१५३॥

कामरूपा च कालिन्दी कचालम्बितविग्रहा ।
अतसीकुसुमाभासा सिंहपृष्ठनिषेदुषी ॥१५४॥

युवती यौवनोद्रिक्ता यौवनोद्रिक्तमानसा ।
अदितिर्देवजननी त्रिदशार्तिविनाशिनी ॥१५५॥

दक्षिणाऽपूर्ववसना पूर्वकालविवर्जिता ।
अशोका शोकरहिता सर्वशोकनिवारिणी ॥१५६॥

अशोककुसुमाभासा शोकदुःखक्षयङ्करी ।
सर्वयोषित्स्वरूपा च सर्वप्राणिमनोरमा ॥१५७॥

महाश्चर्या मदाश्चर्या महामोहस्वरूपिणी ।
महामोक्षकरी मोहकारिणी मोहदायिनी ॥१५८॥

अशोच्या पूर्णकामा च पूर्णापूर्णा मनोरथा ।
पूर्णाभिलषिता पूर्णनिशानाथसमानना ॥३५९॥

द्वादशार्कस्वरूपा च सहस्रार्कसमप्रभा ।
तेजस्विनी सिद्धमात्रा चन्द्रानयनरक्षणा ॥१६०॥

अपरापारमाहात्म्या नित्यविज्ञानशालिनी ।
विवस्वती हव्यवाहा जातवेदःस्वरूपिणी ॥१६१॥

स्वैरिणी स्वेच्छविहरा निर्बीजा बीजरूपिणी ।
अनन्तवर्णाऽनन्ताख्याऽनन्तसंस्था महोदरी ॥१६२॥

दुष्टभूतापहन्त्री च सद्वृत्तपरिपालिका ।
कपालिनी पानमत्ता मत्तवारणगामिनी ॥१६३॥

विन्ध्यस्था विन्ध्यनिलया विन्ध्यपर्वतवासिनी ।
बन्धुप्रिया जगद्बन्धुः पवित्रा सपवित्रिणी ॥१६४॥

परामृताऽमृतकला चापमृत्युविनाशिनी ।
महारजतसङ्काशा रजताद्रिनिरासिनी ॥१६५॥

काशीविलासिनी काशीक्षेत्ररक्षणतत्परा ।
योनिरूपा योनिपीठस्थिता योनिस्वरूपिणी ॥१६६॥

कामालसितचार्वङ्गी कटाक्षक्षेपमोहिनी ।
कटाक्षक्षेपनिरता कल्पवृक्षस्वरूपिणी १६७॥

पाशाङ्कुशधरा शक्तिर्धारिणी खेटकायुधा ।
बाणायुधाऽमोघशस्त्रा दिव्यशस्त्रास्त्रवर्षिणी ॥१६८॥

महास्त्रजालविक्षेपविपक्षक्षयकारिणी ।
घण्टिनी पाशिनी पाशहस्ता पाशाङ्कुशायुधा ॥१६९॥

चित्रासिंहासनगता महासिंहासनस्थिता ।
मन्त्रात्मिका मन्त्रबीजा मन्त्राधिष्ठातृदेवता ॥१७०॥

सुरूपाऽनेकरूपा च विरूपा बहुरूपिणी ।
विरूपाक्षप्रियतमा विरूपाक्षमनोरमा ॥१७१॥

विरूपाक्षा कोटराक्षी कूटस्था कूटरूपिणी ।
करालास्या विशालास्या धर्मशास्त्रार्थपारगा ॥१७२॥

अध्यात्मविद्या शास्त्रार्थकुशला शैलनन्दिनी ।
नागाधिराजपुत्री च नगपुत्री नगोद्भवा ॥१७३॥
गिरीन्द्रबाला गिरिशप्राणतुल्या मनोरमा ।
प्रसन्ना चारुवदना प्रसन्नास्या प्रसन्नदा ॥१७४॥
शिवप्राणा पतिप्राणा पतिसम्मोहकारिणी ।
मृगाक्षी चञ्चलापाङ्गी सुदृष्टिर्हंसगामिनी ॥१७५॥
नित्यं कुतूहलपरा नित्यानन्दाभिनन्दिता ।
सत्यविज्ञानरूपा च तत्त्वज्ञानैककारिणी ॥१७६॥
त्रैलोक्यसाक्षिणी लोकधर्माधर्मप्रदर्शिनी ।
धर्माधर्मविधात्री च शम्भुप्राणात्मिका परा ॥१७७॥
मेनकागर्भसम्भूता मैनाकभगिनी तथा ।
श्रीकण्ठाकण्ठहारा च श्रीकण्ठहृदयस्थिता ॥१७८॥
श्रीकण्ठकण्ठजप्या च नीलकण्ठमनोरमा ।
कालकूटात्मिका कालकूटभक्षणकारिणी ॥१७९॥
महाकालप्रिया कालकलनैकविधायिनी ।
अक्षोभ्यपत्नी संक्षोभनाशिनी ते नमो नमः ॥१८०॥

श्रीमहादेव उवाच—

एवं नामसहस्रेण सस्तुता पर्वतात्मजा ।
वाक्यमेतन्महेशानमुवाच मुनिसत्तम ॥१८१॥

श्रीदेव्युवाच—

अहं त्वदर्थे शैलेन्द्रतनयात्वमुपागता ।
त्वं मे प्राणसमो भर्ता त्वदनन्याहमङ्गना ॥१८२॥
त्वं मदर्थे तपस्तीव्रं सुचिरं कृतवानसि ।
अहं च तपसाराध्या त्वां लप्स्यामि पुनः पतिम् ॥१८३॥

श्रीमहादेव उवाच—

त्वमाराध्यतमा सर्वजननी प्रकृतिः परा ।
तवाराध्यो जगत्यत्र विद्यते नैव कोऽपि हि ॥१८४॥
अहं त्वया निजगुणैरनुग्राह्यो महेश्वरि ।
प्रार्थनीयस्त्वयि शिवे एष एव वरो मम ॥१८५॥
यत्र यत्र तवेदं हि कालीरूपं मनोहरम् ।
आविर्भवति तत्रैव शिवरूपस्य मे हृदि ॥१८६॥

संस्थातव्यं त्वया लोके ख्याता च शववाहना ।
भविष्यसि महाकाली प्रसीद जगदम्बिके ॥१८७॥

श्रीमहादेव उवाच—

इत्युक्त्वा शम्भुना काली कालमेघसमप्रभा ।
तथेत्युक्त्वा समभवत्पुनर्गौरी यथा पुरा ॥१८८॥
य इदं पठते देव्या नाम्नां भक्त्या सहस्रकम् ।
स्तोत्रं श्रीशम्भुना प्रोक्तं स देव्याः समतामियात् ॥१८९॥
अभ्यर्च्य गन्धपुष्पैश्च धूपदीपैर्महेश्वरीम् ।
यः पठेत्स्तोत्रमेतच्च स लभेत्परमं पदम् ॥१९०॥
अनन्यमनसा देवीं स्तोत्रेणानेन यो नरः ।
संस्तौति प्रत्यहं तस्य सर्वसिद्धिः प्रजायते ॥१९१॥
राजानो वशगास्तस्य नश्यन्ति रिपवस्तथा ।
सिंहव्याघ्रमुखाः सर्वे हिंसका दस्यवस्तथा ॥१९२॥
दूरादेव पलायन्ते तस्य दर्शनमात्रतः ।
अव्याहताज्ञः सर्वत्र लभते मङ्गलं महत् ॥१९३॥
अन्ते दुर्गास्मृतिं लब्ध्वा स्वयं देवीकलामियात् ॥१९४॥

श्रीमहाभागवते उपपुराणे ललितासहस्रनामस्तोत्रं नाम
त्रयोविंशतितमोऽध्यायः ।

चतुर्विंशोऽध्यायः

श्रीमहादेव उवाच—

ततः शम्भुः समादाय कामदेवशरीरजम् ।
भस्म सर्वेषु देहेषु भूतिलेपं विधाय च ॥१॥
पुनस्तपसि शैलेन्द्रशृङ्गे भूतगणैः सह ।
पार्वत्यपि च शैलेन्द्रे तपसे समुपाविशत् ॥२॥
शम्भुः सन्ध्याय तां देवीं देवी तमपि शङ्करम् ।
सन्ध्याय मनसा वर्षसहस्रत्रयमानयत् ॥३॥
ततः शम्भुः सुदुःखार्तः कामेन भस्मरूपिणा ।
पार्वतीनिकटं गत्वा कृताञ्जलिरिदं वचः ॥४॥

प्राब्रवीत्परमेशानि तपस्त्यज सुदुश्चरम् ।
ध्यानेन परिजप्येन मौनेन महता त्वया ॥५॥
क्रीतस्तवैव दासोऽहं मां सेवायै नियोजय ।
त्वदङ्गमार्जने हारकेयूरपरिधापने ॥६॥
त्वदङ्गपरिसंस्कारेऽलक्तकादिभिरादरात् ।
नियुङ्क्ष्व पर्वतसुते प्रसन्ना यदि मे शिवे ॥७॥
निर्दग्धोऽस्मि भृशं मस्मरूपिणा मदनेन च ।
देहस्थेन महादेवि मामुद्धर मनोभवात् ॥८॥
त्वं सर्वदुर्गातिहरा दुर्गाऽभीष्टफलप्रदा ।
त्वामाश्रयन्ति ये तेषां दुःखं सञ्जायते नहि ॥९॥
अहं त्वां सर्वथा भक्तिभावेन समुपाश्रितः ।
मामुद्धर महादुर्गे कामसागरमध्यतः ॥१०॥
यथा त्वं संस्मृतिजुषां मोक्षदासि दयामयि ।
तथा मां कृपया कामसागराच्च समुद्धर ॥११॥
एवं सम्प्रार्थिता शम्भुं प्रोवाच हिमदेहजा ।
सखीं सम्बोध्य लज्जाभिनतवक्त्रा स्मिताननाः ॥१२॥
असम्प्रदत्ता पित्राहं कथमेनमुपागता ।
भविष्यामि ततः पाणिं गृह्णातु विधिवद्धरः ॥१३॥
पितरं मे गिरिश्रेष्ठं केनविन्मतिशालिना ।
स्वाभिप्रायं ज्ञापयतु विवाहार्थं महेश्वरः ॥१४॥
इत्युक्तः सोऽपि भगवान्महादेवस्त्रिलोचनः ।
तथ्यं मेने गिरिसुतावचनं कामुकोऽपि सन् ॥१५॥
ततः सा प्रययौ शीघ्रं सखीभिः परिवारिता ।
पितुर्गेहं भगवती प्रफुल्लकमलानना ॥१६॥
पार्वतीमागतां श्रुत्वा गिरीन्द्रः सहसोत्थितः ।
आगत्याङ्के समारोप्य पुरमध्यं समानयत् ॥१७॥
आगत्य मेनका पुत्रीमालिङ्ग्य निजपाणिना ।
अश्रुपूर्णेक्षणा वक्त्रं चुचुम्ब परमादरात् ॥१८॥
उवाच मातस्त्वं पुत्री मम प्राणसमा ह्यसि ।
त्वद्विच्छेदमृतामद्य मां कुरुष्व सुजीवितम् ॥१९॥
मैनाक प्रमुखाः सर्वे पार्वत्या भ्रातरस्तथा ।
बान्धवाश्च तथैवान्ये दृष्ट्वा हर्षं प्रपेदिरे ॥२०॥

तस्याः सखीभ्यां शैलेन्द्रश्रेष्ठायापि निवेदितम् ।
यथा दृष्टं वने शम्भोः पार्वत्यामभिचेष्टितम् ॥२१॥
गिरीन्द्रस्तत्समाकर्ण्य हर्षेण महता युतः ।
प्रतीक्ष्यमाणो वार्तां स गिरिशस्य तदा स्थितः ॥२२॥
विवाहेषु सुतायास्तु पार्वत्या मुनिपुङ्गव ।
शम्भुश्च तत्र शैलाग्रे संस्थितः प्रमथैः सह ॥२३॥
उवास पर्वते पाणिग्रहणे कृतनिश्चयः ।
ततः सस्मार गिरिशो मरीच्यादीन्महामुनीन् ॥२४॥
अभिप्रायं गिरीन्द्राय विज्ञापयितुमात्मनः ।
ततस्ते समुपायाता मरीच्याद्या महर्षयः ॥२५॥
तत्क्षणाच्छ्वसान्निध्यं वातोद्भूतघना इव ।
ते प्रणम्य महादेवं पप्रच्छुस्त्रिदशेश्वरम् ॥२६॥
किमर्थमस्मान्भगवन् स्मृतवानसि तद्वद ।
ततः प्राह महादेवो मरीच्यादीन्पृथक् पृथक् ॥२७॥
सम्बोध्य नामनिर्दग्धहृदयो मुनिपुङ्गव ।
हिताय सर्वजगतां तथा सन्तानवृद्धये ॥२८॥
दारग्रहे मतिर्मेऽद्य जायते मुनिसत्तमाः ।
यावत्सती मां संत्यज्य गतासीन्निजमायया ॥२९॥
तावत्तामेव हृदये सन्ध्याय तपसे स्थितः ।
सा तेन तपसा तुष्टा स्वयं हिमगिरेः सुता ॥३०॥
भूत्वा मां पतिमात्रेण स्वीचकार निजेच्छया ।
किन्तु तस्याः पिता शैलराजेन्द्रो हिमवान् यदि ॥३१॥
आहूय मां ददात्येनां पाणिग्रहणकर्मणि ।
तदा सा मम पत्नी स्याच्चार्वङ्गी रुचिरानना ॥३२॥
भस्मीभूतेन कामेन दह्यहं दिनरात्रकम् ।
न शान्तिमभिलप्स्यामि विना तां पर्वतात्मजाम् ॥३३॥
यदि कृत्वा तु साहाय्यं तां मत्प्राणैकवल्लभाम् ।
मह्यं दापयितुं शक्तास्तदाहं स्थातुमुत्सहे ॥३४॥

ऋषय ऊचुः—

यथाभिचेष्टितं देव त्वमाज्ञापयसि प्रभो ।
तथास्माभिश्चेष्टितव्यं किं नु कार्यमतः परम् ॥३५॥

आद्या हि परमा विद्या पूर्णा प्रकृतिरुत्तमा ।
जाता हिमवतः पुत्री तत्रैव पूर्वगेहिनी ॥३६॥
अवश्यं हिमवांस्तुभ्यं दास्यत्येवाचिरेण वै ।
निमित्तमात्रमत्रैव भविष्यामो वयं शिव ॥३७॥

श्रीमहादेव उवाच—

इत्युक्त्वा वचनं तं वै शम्भुं ते हि महर्षयः ।
प्रययुर्गिरिराजस्य पुरं परमहर्षिताः ॥३८॥
विवाहार्थं महेशस्य संयोजयितुमम्बिकाम् ॥
तान्दृष्ट्वा समुपायातान् गिरीन्द्रोऽपि यथाविधि ॥३९॥
पूजयित्वा यथान्यायमासनेषूपवेशयत् ।
अथ प्रोचुर्गिरिश्रेष्ठमृषयस्ते हिमालयम् ॥४०॥
शृणु राजंस्तव हितं यच्छिवेनाभिभाषितम् ।
तस्यैव वनिता दक्षतनया सा सती पुरा ॥४१॥
सैव ते तनया जाता पार्वती साम्प्रतं शिवा ।
तां त्वं प्रयच्छ देवाय शिवाय परमात्मने ॥४२॥
सम्प्राप्तदारः स सुखी त्वत्प्रसादाद्भविष्यति ।
प्रभावं देवदेवस्य सर्वं त्वं ज्ञातवानसि ॥४३॥
तस्मै देया निजसुता किंवा कार्यमतः परम् ।
नारदः पुनराहेदं शैलराजं हिमालयम् ॥४४॥
स्मित्वा स्मित्वा महाबुद्धिर्भूतभव्यभविष्यवित् ।
महाराज मया पूर्वमेतत्सर्वं निवेदितम् ॥४५॥
अनादिपुरुषेशाय पूर्णाय परमात्मने ।
तनयां परमामाद्यां देहि भाग्यस्य गौरवात् ॥४६॥
ततः प्राह गिरीन्द्रस्तान्हर्षनिर्भरमानसः ।
कृतकृत्योऽस्मि पूतोऽस्मि युष्माकं हि समागमात् ॥४७॥
यच्चन्द्रशेखरं सर्वे देवदेवं वदन्ति वै ।
जगतां सृष्टिसंहारकरणे पालने क्षमः ॥४८॥
तस्मै देया सुतेत्यत्रानुपपत्तिश्च का मम ।
तस्येच्छावशगोऽहं हि तत्तत्सर्वमिदं जगत् ॥४९॥
यदेच्छा समभूत्तस्य तदैवेच्छा ममाप्यभूत् ।
गच्छध्वं शम्भुनिकटं कथयध्वं वचो मम ॥५०॥

शुभं निश्चित्य समयं मयि वार्तां ददातु सः ।
दास्यामि तनयां तस्मै यथाशक्तिविभूषिताम् ॥५१॥

इति श्रीमहाभागवते महापुराणे पार्वतीविवाहोपक्रमो नाम
चतुर्विंशतितमोऽध्यायः

पञ्चविंशोऽध्यायः

श्रीमहादेव उवाच—

निशम्य गिरिराजस्य वचनं ते महर्षयः ।
पुनर्महेशसान्निध्यं प्रययुर्हृष्टचेतसः ॥१॥
तान् समीक्ष्यागताञ्छम्भुर्महात्रस्त इवाब्रवीत् ।
किमाह भगवानद्रिर्युष्मान्वदत मा चिरम् ॥२॥
स्वेच्छया स्वसुता मह्यं दातव्या किं न वेति च ।
कथयित्वा मनः शान्तं सुस्थिरं कुरुत द्विजाः ॥३॥

ऋषय ऊचुः—

दातव्या भक्तिभावेन गिरीन्द्रेण निजात्मजा ।
मा चिन्तां कुरु देवेश साम्प्रतं सुस्थिरो भव ॥४॥
उक्तं तेन गिरीन्द्रेण समयं वीक्ष्य शोभनम् ।
तस्मै देया यदा वार्ता तदोद्वाहो भविष्यति ॥५॥

श्रीमहादेव उवाच—

अथ प्राह पुनः शम्भुस्तांस्ततो मुनिसत्तमान् ।
द्रुतं निरीक्ष्य समयं शोभनं दोषवर्जितम् ॥६॥
गिरीन्द्राय द्रुतं ब्रूत सुव्रताय महात्मने ।
इति श्रुत्वा वचस्तस्य मरीच्याद्यास्तपोधनाः ॥७॥
विवाहसमयं तस्य निश्चित्योचुर्महेश्वरम् ।
वैशाखे मासि या शुक्लपञ्चमी सा गुरोर्दिने ॥८॥
तस्यामुद्वाहकर्म त्वं कुरु संतानवृद्धये ।
सर्वदोषविहीनं हि दिनमेतत्सुशोभनम् ॥९॥
विज्ञापय गिरीन्द्राय महावर महात्मने ।
अथ प्राह महादेवो यूयं यात नगाधिपम् ॥१०॥

कथयध्वं निजसुता तेन तस्मिञ्छुभेऽहनि ।
दातव्या विधिवन्मह्यं तत्राहं च सुरोत्तमैः ॥११॥

आगमिष्ये पुरं तस्य महोत्सवपुरःसरम् ।
तच्छ्रुत्वा वचनं शम्भोः पुनस्तेऽपि महर्षयः ॥१२॥

गत्वा हिमाद्रिं व्याजह्रुर्महेशेनाभिभाषितम् ।
तच्छ्रुत्वा गिरिराजोऽपि भद्रमाह मुदान्वितः ॥१३॥

विससर्ज च संपूज्य महर्षीस्तान्यथाविधि ।
तेऽपि भूयो ययुर्यत्र संस्थितश्चन्द्रशेखरः ॥१४॥

प्रोचुश्चापि महादेवं गिरिराजेन भाषितम् ।
तानुवाच ततः शम्भुर्यूयं तत्र शुभेऽहनि ॥१५॥

आगत्य वै मया सार्धं गमिष्यथ गिरेः पुरम् ।
नारदं प्राह तात त्वमव्याहतगतिः स्वयम् ॥१६॥

एकं कुरुष्व मत्कार्यं यत्ते वक्ष्यामि साम्प्रतम् ।
ब्रह्माणे विष्णवे तद्वदिन्द्रादिभ्यः पृथक् पृथक् ॥१७॥

कथयस्व ममोद्वाहवार्तां हर्षविधायिनीम् ।
विज्ञापयत मद्वाक्यं तेष्विदं मुनिपुङ्गव ॥१८॥

मदुद्वाहदिने सर्वैर्देवगन्धर्वकिन्नरैः ।
युष्माभिः समुपागम्य कर्तव्यं शोभनं मम ॥१९॥

ततः स नारदोऽप्याह यथाज्ञापयसि प्रभो ।
तथैव हि विधातव्यं मयाज्ञावशवर्तिना ॥२०॥

ततः प्रणम्य ते देवं मरीच्याद्या महर्षयः ।
स्वस्थानं गन्तुमुद्युक्ताः प्रार्थयामासुरीश्वरम् ॥२१॥

आज्ञां विधेहि गच्छामो निजस्थानं तु साम्प्रतम् ।
त्वदुद्वाहदिने सर्वे आयास्यामः सुरैः सह ॥२२॥

ततः प्राह महादेवः साश्रुनेत्रो महामुनीन् ।
पत्नीविरह दुःखार्तो भृशं कामप्रपीडितः ॥२३॥

यावद्धिमाद्रितनयां मम प्राणैकवल्लभाम् ।
न पत्नीमभिलप्स्यामि तावत्कष्टेन जीवनम् ॥२४॥

धारयिष्ये भृशं कामनिर्दग्धोऽपि महर्षयः ।
प्रतिज्ञाय ब्रवीम्येतद्युष्माकं सम्मुखे ध्रुवम् ॥२५॥

यदा तां समवाप्स्यामि पार्वतीं प्राणवल्लभाम् ।
तदा सर्वात्मना देवीं सेविष्ये तां निरन्तरम् ॥२६॥
न विप्रियं करिष्यामि कदाचिदपि मोहितः ।
यत्र यास्यति सा देवी गमिष्येऽहं च तत्र वै ॥२७॥
न त्यक्ष्यामि कदाचित्तां क्षणार्धमपि सुव्रताम् ।
यूयं च साम्प्रतं यात निजस्थानं तपोधनाः ॥२८॥
तिष्ठाम्यहं काननेऽस्मिन्ध्यायंस्तां पर्वतात्मजाम् ।
इत्येवमुक्त्वा गिरिशो विससर्ज महामुनीन् ॥२९॥
तेऽपि नत्वा ययुः सर्वे स्वस्वस्थानं महामते ।
नारदस्तु ययौ तूर्णं ब्रह्मणो निकटं तदा ॥३०॥
शिवस्योद्वाहवार्तां च तस्मै सर्वं न्यवेदयत् ।
तथैव विष्णवे प्राह गत्वा वैकुण्ठमुत्तमम् ॥३१॥
श्रुत्वा तु हर्षसम्पूर्णौ बभूवतुरतीव तौ ।
तावूचतुर्मुनिश्रेष्ठं गमिष्यावो महेशितुः ॥३२॥
विवाहदर्शनार्थाय परिवारगणैः सह ।
त्वं तु स्वर्गपुरं गत्वा महेन्द्राय वद द्रुतम् ॥३३॥
स यातु त्रिदशैः सर्वैः सिद्धचारणकिन्नरैः ।
महेशस्य विवाहेऽस्मिन्कर्तुं साहाय्यमुत्तमम् ॥३४॥
ततः स नारदो गत्वा महेन्द्राय न्यवेदयत् ।
शिवस्योद्वाहसंवादं ताभ्यां यच्चाभिभाषितम् ॥३५॥
तच्छ्रुत्वा सुरराजोऽपि हर्षनिर्भरमानसः ।
मेने मृत्युं तारकस्य भविष्यति सुनिश्चितम् ॥३६॥
उद्योगं चाकरोद् गन्तुं विवाहे स महेशितुः ।
नारदोऽपि ययौ स्वीयं स्थानमिन्द्रेण पूजितः ॥३७॥

इति श्रीमहाभागवते उपपुराणे श्रीमहादेवनारदसंवादे शिवविवाहे पञ्चविंशतितमोऽध्यायः

षड्विंशतितमोऽध्यायः

श्रीमहादेव उवाच—

अथाद्रिराजनगरे पार्वत्युद्वाहमङ्गलम् ।
प्रावर्तत मुनिश्रेष्ठ जगतां हर्षवर्धनम् ॥१॥

भेरीमृदङ्गपणवतूर्यगोमुखनिःस्वनैः ।
पूरितं सर्वतो भूमिनभोमध्यं महामते ॥२॥

गन्धर्वाः शोभनं गानं चक्रुः परमहर्षिताः ।
तथैवाप्सरसां नृत्यं प्रावर्तत मनोहरम् ॥३॥

आयाता देवकन्याश्च तथैव गिरिकन्यकाः ।
पुरे नगाधिराजस्य पार्वत्युद्वाहमीक्षितुम् ॥४॥

ताः सर्वास्तोषितास्तेन नानालङ्करणादिभिः ।
वस्त्रैश्च विविधैर्गौरीविवाहे मुनिपुङ्गव ॥५॥

एवमासीद्गिरिपुरे मङ्गलं सुमहोत्सवम् ।
वायुर्ववौ पुण्यगन्धयुतस्तत्र शनैः शनैः ॥६॥

प्रसन्नमानसाः सर्वे तत्रासन् प्राणिनस्तदा ।
दिशः प्रसन्नाः सर्वाश्च सुस्थमासीत्तथा जगत्॥७॥

अथेन्द्रस्त्रिदशैः सर्वैस्तथा गन्धर्वकिन्नरैः ।
गन्तुं महेशसान्निध्यं प्रस्थानमकरोत्तदा ॥८॥

एतस्मिन्नन्तरे श्रीमान् नारदो मुनिसत्तमः ।
रतिं प्राह महादेवपार्वत्युद्वाहमङ्गलम् ॥९॥

तत्र यान्ति सुराः सर्वे गन्धर्वैः किन्नरोरगैः ।
त्वं याहि देवराजस्य सान्निध्यं मा चिरं कुरु ॥१०॥

विवाहहर्षयुक्तस्य महेशस्यान्तिके यदि ।
त्वद्भर्तुर्जीवनार्थं ते कथयन्त्यमराः सति ॥११॥

तदावश्यं शिवः कामदेहं सम्प्रापयिष्यति ।
इत्युक्त्वा स मुनिः प्रायान्महेशस्यान्तिकं द्रुतम् ॥१२॥

रतिश्चापि समुद्युक्ता समभूद्भर्तृजीवने ।
आगतं नारदं वीक्ष्य महेशः प्राब्रवीद्वचः ॥१३॥

स्वागतं तात चेदानीं कर्तव्यं च विधीयताम् ।
स आह त्रिदशाः सर्वे समायान्ति महेश्वर ॥१४॥
सिद्धचारणगन्धर्वाः किन्नराश्च महर्षयः ।
ततो रजन्यां वृत्तायां शुभे लग्ने सुरैः सह ॥१५॥
गन्तव्यं गिरिराजस्य पुरं शम्भो त्वया प्रभो ।
भविष्यति त्वदुद्वाहो महोत्सवपुरःसरम् ॥१६॥
एतस्मिन्नन्तरे सर्वैर्देवगन्धर्वकिन्नरैः ।
देवराजः समायातो महेशस्यान्तिकं तदा ॥१७॥
ते प्रणम्य महादेवं सर्वलोकस्य कारणम् ।
ऊचुर्देवाः प्रभो किं त्वमाज्ञापयसि साम्प्रतम् ॥१८॥
स आह मद्विवाहेऽस्मिन्यथायोग्यं विधीयताम् ।
ततः प्रावर्तयच्छम्भोर्विवाहे मङ्गलं महत् ॥१९॥
देवराजः प्रीतिमनाः शम्भोस्तत्र तपोवने ।
भेर्यादिनिःस्वनैः सर्वाः पूरिताश्च दिशो दश ॥२०॥
अभवन्मुनिशार्दूल गन्धर्वा ललितं जगुः ।
समभूत्पुष्पवृष्टिश्च ननृतुश्चाप्सरोगणाः ॥२१॥
प्रफुल्लचारुपुष्पौघनतशाखाश्च शाखिनः ।
समासन्देवदेवस्य कानने मुनिपुङ्गव ॥२२॥
कोकिला रुचिरं शब्दं भ्रमराश्च सहस्रशः ।
चक्रिरे कानने तस्मिन्वायुर्मलयजो ववौ ॥२३॥
अथ तत्र समायातो ब्रह्मा लोकपितामहः ।
सहैव मानसैः पुत्रैर्वसिष्ठाद्यैर्महर्षिभिः ॥२४॥
तथा नारायणश्चापि समायातः शिवान्तिकम् ।
सार्धं लक्ष्म्या सरस्वत्या द्रष्टुमुद्वाहमङ्गलम् ॥२५॥
इत्येवमागतांस्तांश्च दृष्ट्वा विश्वेश्वरस्तदा ।
प्रहृष्टचेताः समभूत्सुप्रसन्नमुखाम्बुजः ॥२६॥

इति श्रीमहाभागवते उपपुराणे श्रीमहादेवनारदसंवादे देवतासमागमो नाम षड्विंशतितमोऽध्यायः

सप्तविंशतितमोऽध्यायः

श्रीमहादेव उवाच—

समायाता कामपत्नी रतिः सर्वाङ्गसुन्दरी ।
पतिशोकसुदुःखार्ता कृशाङ्गी साश्रुलोचना ॥१॥
पुरन्दरमिदं प्राह सन्मुखे संस्थिता सती ॥२॥

रतिरुवाच—

पूर्वं तवाज्ञया भर्ता मम प्राणैकवल्लभः ।
प्राक्षिप्य शम्भवे बाणं भस्मतां प्राप तत्क्षणात् ॥३॥
तदा रुदन्तीं दुःखेन मामवोचद्भवानिदम् ।
मा शोकं कुरु ते भर्ता पुनर्देहमवाप्स्यति ॥४॥
परिगृह्णाति दारांस्तु साम्प्रतं शङ्करोऽपि च ।
तेन बाणेन मुग्धः सन् यूयं पूर्णमनोरथाः ॥५॥
पतिर्मम गतस्तस्य न चेष्टयसि जीवने ॥६॥

श्रीमहादेव उवाच—

एवमाभाष्य बहुधा रतिः पतिवियोगिनी ।
रुरोद देवराजस्य पुरतो ब्रह्मणोऽपि च ॥७॥
तच्छ्रुत्वा भगवान् ब्रह्मा देवराजस्तु शङ्करम् ।
सम्प्रार्थ्योवाच वचनं विवाहोत्सुकमानसम् ॥८॥
तावूचतुः प्रभो देव प्रणतानां कृपाकर ।
देवानामुपकाराय कार्यमेकं कुरुष्व वै ॥९॥
यदाऽस्मद्वचनात्कामस्त्वयि बाणं विमोचयन् ।
विनिर्ययौ तदोवाच देवानिन्द्रपुरोगमान् ॥१०॥
यदि क्रुद्धो महादेवो मां नाशयति मत्कृते ।
तदा भवद्भिस्त्रिदशा यतितव्यं यथोचितम् ॥११॥
तैश्च प्रतिश्रुतं तस्मै एवमेवेति शङ्कर ।
स तद्वत्क्रोधसम्भूतवह्निना ज्वलितस्तदा ॥१२॥
भस्मतां प्राप तत्पत्नी रतिस्तस्मादुपागता ।
शोकसन्तप्तहृदया याचते पतिमात्मनः ॥१३॥

यदि त्वं कृपया कामदेहं प्रापयसि प्रभो ।
तदा देवाः सत्यवाक्या भवन्ति त्रिदशेश्वर ॥१४॥
रतिः प्राप्नोति भर्तारं जगन्मोहनकारणम् ।

श्रीमहादेव उवाच—

इत्याकर्ण्य महादेवः प्रणतानां कृपाकरः ॥१५॥
कामस्य प्रापयामास पुनर्देहं महामुने ।
सम्प्राप्य देहं कामस्तं प्रणिपत्य महेश्वरम् ॥१६॥
सर्वान् देवांश्चाभिवाद्य रत्याः पार्श्वं जगाम ह ।
रतिः पतिं समासाद्य हर्षनिर्भरमानसा ॥१७॥
बभूव मुनिशार्दूल देवाश्च हर्षसंयुताः ।
अथ प्रवृत्ता रजनी शशाङ्कश्च सुनिर्मलः ॥१८॥
प्रवृद्धतेजा विबभौ देवाश्चक्रुर्महोत्सवम् ।
एतस्मिन्नन्तरे ब्रह्मा प्राह देवं सदाशिवम् ॥१९॥
विभूतिभूषणं पिङ्गजटामौलिं चतुर्भुजम् ।

ब्रह्मोवाच—

शम्भो तवेदं परमं रूपं देवादिदुर्लभम् ॥२०॥
योगिनां मानसोत्साहजनकं प्रीतिवर्धनम् ।
इदं संहृत्य रूपं वै धेहि सौम्यसमं प्रभो ॥२१॥
यथातिहर्षमाप्नोति श्वशुरस्ते नगाधिपः ।
विलोक्य मेनका चापि श्वश्रूस्त्वामतिसुन्दरम् ॥२२॥
सर्वाङ्गसुन्दरी गौरी तुभ्यं देया महाद्रिणा ।
यथा तस्यं भवेत्प्रीतिस्तथा कुरु महेश्वर ॥२३॥
यथा बिभेति काचिन्न वीक्ष्य त्वां भीमरूपिणम् ।
तथा चारुतरं रूपं द्विभुजैकाननं शिवम् ॥२४॥
देव देव विधेहि त्वं विवाहे स्मरसूदन ॥

श्रीमहादेव उवाच—

इत्युक्तो ब्रह्मणा शम्भुस्तत्क्षणान्मुनिपुङ्गव ॥२५॥
बभूव द्विभुजः सौम्यरूपश्चैकाननः क्षणात् ।
जटा स्वर्णकिरीटत्वं प्राप त्वग्निः सुचित्रताम् ॥२६॥
भस्मासीच्चन्दनं गात्रे शेषः स्वर्णविभूषणम् ।
अथ तं त्रिदशेशानं सम्प्राप्यातिशुभे क्षणे ॥२७॥
वृषपृष्ठे समारोप्य देवगन्धर्वकिन्नराः ।
गिरीन्द्रस्य पुरं गन्तुं मनश्चक्रुर्महामते ॥२८॥

प्रयाणकाले त्रिदशेश्वरस्य बभूव वृष्टिः कुसुमावलीनाम् ।
स्ववासिनां दुन्दुभिनिःस्वनौर्घैर्दिगन्तमासीत्परिपूरितं मुने ॥२९॥
वायुर्ववौ शैत्यसुगन्धयुक्तः शनैः शनैर्वै चुक्रुशुः पतत्रिणः ।
सुशोभितं ते प्रमथा अपि ध्वनिं चक्रुः सुघोरं वदनेन हर्षिताः ॥३०॥
एवं प्रवृत्ते वृषभध्वजस्तदा सार्धं समस्तैस्त्रिदशैर्मुनीश्वरैः ।
प्रायाद्गिरीन्द्रस्य पुरं महामते सकिन्नरश्चारुशशाङ्कशेखरः ॥३१॥
इति श्रीमहाभागवते उपपुराणे महादेवनारदसंवादे श्रीशिवस्य
हिमालयपुर आगमनं नाम सप्तविंशतितमोऽध्यायः

अष्टाविंशतितमोऽध्यायः

श्रीमहादेव उवाच—

अथाद्रिराजो ज्ञात्वा तु समायान्तं महेश्वरम् ।
आगत्याभ्यर्च्य विधिवत्पुरमावेशयत्स्वयम् ॥१॥
ब्रह्माणं च तथा विष्णुं तथेन्द्रादिसुरोत्तमान् ।
पूजयित्वा यथान्यायं पुरमावेशयद्गिरिः ॥२॥
मरीच्यादीन्महर्षींश्च पूजयित्वा यथोचितम् ।
स्वपुरं प्रापयामास गिरीन्द्रो हृष्टमानसः ॥३॥
विलोक्य पार्वतीनाथं शान्तं सुरुचिराननम् ।
द्विभुजं रत्नभूषाढ्यं दिव्यस्वर्णकिरीटिनम् ॥४॥
शशाङ्काङ्कितमूर्धानं शतसूर्यसमप्रभम् ।
मुमोद मेनका तद्वद्गिरीन्द्रोऽपि हिमालयः ॥५॥
तदान्ये ये समायाता देवगन्धर्वकिन्नराः ।
ते वीक्ष्य पार्वतीनाथं चक्षुरन्यत्र नाक्षिपन् ॥६॥
ऊचुः परस्परं सर्वे यथा गौरी सुरूपिणी ।
तथैव रूपसम्पन्नो महादेवो जगत्पतिः ॥७॥
अथाद्रिनाथः सम्प्राप्ते काले चातिसुलक्षणे ।
पार्वतीं देवदेवाय समभ्यर्च्य ददौ स्वयम् ॥८॥

यथोक्तविधिना शम्भुस्तां जग्राह हिमात्मजाम् ।
भार्यात्वेन प्रहृष्टात्मा सृष्टिस्थित्यन्तकारिणीम् ॥९॥
तदा गिरीन्द्रनगरे महानासीन्महोत्सवः ।
यथा न भूतः कुत्रापि भविता वा न कुत्रचित् ॥१०॥
प्रहृष्टमानसाः सर्वे देवा आसन्महामते ।
हरे गृहीतदारे तु देवाः पूर्णमनोरथाः ॥११॥
प्रशशंसुर्मुहुः कामं महादेवविमोहनम् ।
विलोक्य शङ्करं तत्र पार्वत्या सहितं सुराः ॥१२॥
ऊचुः परस्परं सर्वे गन्धर्वाश्च महर्षयः ।
अहो बहुतरं भाग्यं गिरिराजस्य धीमतः ॥१३॥
यतः स्वयं जगन्माता कन्यात्वं समुपागता ।
या सूते सकलं विश्वं स्वेच्छया प्रकृतिः परा ॥१४॥
सा प्राप यद्गृहे जन्म कन्यारूपेण लीलया ।
तत्फलं नाल्पतपस एतस्य गिरिभूपतेः ॥१५॥
किं वाच्यमतुलं भाग्यं मेनायाः पूर्वसञ्चितम् ।
एतस्यास्त्रिजगन्मातुरपि माताऽभवद्यतः ॥१६॥
प्रभावं को महेशस्य लोके वक्तुं क्षमो भवेत् ।
रूपं वा विभवं वापि वाचातीतं मनोतिगम् ॥१७॥
एवमन्यद्बहुविधं प्रोचुः सर्वे परस्परम् ।
विलोक्य रूपसम्पन्नौ पार्वतीपरमेश्वरौ ॥१८॥
ब्रह्मा विष्णुश्च भगवान् भगवन्तं महेश्वरम् ।
पार्वत्या सहितं प्राह शान्तं हर्षसमाकुलम् ॥१९॥

ब्रह्मविष्णू ऊचतुः—
प्रभो देव सतीयं सा पार्वती तव गेहिनी ।
यस्या वियोगदुःखार्तस्तपस्तप्तुं भवान्पुरा ॥२०॥
सेयं भगवती देवी जगदाद्या सनातनी ।

श्रीमहादेव उवाच—
ततो हिमालयः शम्भुं तुष्टाव भक्तिसंयुतः ॥२१॥

हिमालय उवाच—
देवदेव महादेव भक्तवत्सल शङ्कर ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥२२॥
अद्य मे सफलं जन्म जीवितं च सुजीवितम् ।
पश्यामि यज्जगन्नाथं जगन्मात्रा समं दृशा ॥२३॥

श्रीमहादेव उवाच—

एवं स्तुवन्तं सद्भक्त्या गिरिराजं महामुने ।
उवाच भगवाञ्छम्भुः प्रीणयन्वचनामृतैः ॥२४॥
गिरीन्द्र त्वं महाप्राज्ञ मम मूर्त्यन्तरं स्वयम् ।
भाग्यवानसि देवानां सम्मान्यश्च विशेषतः ॥२५॥
अद्यारभ्याध्वरे भागो मया ते परिकल्पितः ।
न त्वां विना करिष्यन्ति मर्त्ये यज्ञं गिरीश्वर ॥२६॥
यथा हविर्भुजः सर्वे देवा यज्ञोत्सवे गिरे ।
तथा त्वमपि यज्ञानां भोक्ता मर्त्ये भविष्यसि ॥२७॥

हिमालय उवाच—

प्रभो त्वद्वरदानेन कृतार्थोऽस्मि जगद्गुरो ।
अन्यदस्ति वरं शम्भो प्रार्थनीयं कृपानिधे ॥२८॥
अनया सह पार्वत्या रमस्वात्र महेश्वर ।
पवित्रं कुरु मां देव शरणागतवत्सल ॥२९॥

श्रीमहादेव उवाच—

करिष्ये त्वत्पुरस्याहमदूरे पर्वताधिप ।
तवैव शिखरे देव्या पार्वत्या प्रीतमानसः ॥३०॥
पश्यन्ति मां गिरे लोका गिरीशं तेन हेतुना ॥३१॥

श्रीमहादेव उवाच—

इति तस्मै वरं दत्त्वा तस्मिन्नेव नगोत्तमे ।
निर्माय नगरं रम्यं तत्रोवास सहोमया ॥३२॥
ब्रह्माद्या देवताः सर्वाः स्वस्वस्थानं तदा ययुः ।
अध्यायमेनं पार्वत्या विवाहोत्सवमङ्गलम् ॥३३॥
यः शृणोति पठेद्वापि स देव्याः पदमाप्नुयात् ।
न तस्य विद्यते भीतिः शत्रुतो राजतोऽपि वा ॥३४॥
प्राप्नोति च मनोभीष्टं सकृदाकर्ण्य मानवः ।
मुच्यते सर्वपापेभ्यो महादेव्याः प्रसादतः ॥३५॥
इत्युक्तं ते मुनिश्रेष्ठ यथा प्राप महेश्वरः ।
भूयस्तां प्रकृतिं पूर्णां या सती दक्षकन्यका ॥३६॥
इदानीं शृणु पुत्रोऽभूद्यथा तारकसूदनः ।
कार्तिकेयो महाबाहुर्देवानां परिरक्षकः ॥३७॥
न येन सदृशः कश्चिन्महाबलपराक्रमः ।
धनुर्धरस्त्रिलोकेषु विद्यते भवितापि न ॥३८॥

इति श्रीमहाभागवते उपपुराणे पार्वतीविवाहमङ्गलं नामाष्टाविंशतितमोऽध्यायः

एकोनत्रिंशत्तमोऽध्यायः

श्रीमहादेव उवाच—

अहर्निशमनुस्मृत्य पार्वतीलाभकारणम् ।
तपःक्लेशं महादेवस्तस्यां प्रीतिकरोऽभवत् ॥१॥
तद्वाक्यश्रवणे कर्णौ लोचनं रूपदर्शने ।
तन्मनोरञ्जने चेतः संनियोज्य निरन्तरम् ॥२॥
प्रीतिं संजनयामास पार्वत्याः प्रीतिसंयुतः ।
एकदा वन्यपुष्पाणि समानीय महेश्वरः ॥३॥
निर्माय मालां रुचिरां कर्पूरागरुचर्चिताम् ।
पार्वत्याः सम्प्रदायाङ्गे प्रेम्णालिङ्ग्य स्मरातुरः ॥४॥
रम्यं मनो दधे पुत्रमुत्पादयितुमाहृतः ।
नन्दिनं प्राह भगवान्न ममाज्ञां विनात्र वै ॥५॥
समानीयो जनः कोऽपि देवो वा देववन्दितः ।
तथा रक्ष पुरद्वारं समस्तैः प्रमथैर्वृतः ॥६॥
तच्छ्रुत्वा सोऽपि तच्चक्रे पुरद्वाराभिरक्षणम् ।
सहितैः प्रमथैः सर्वं देवदेवस्य शासनात् ॥७॥
ततो रहसि पार्वत्या दश वर्षाणि पञ्च च ।
रेमे स भगवान् शम्भुः कामेन परिमोहितः ॥८॥
दिवा वा रजनीं वापि न प्रजज्ञे तदा हरः ।
प्रेमानन्दनिमग्नः सन् कामव्यापृतमानसः ॥९॥
एवं हि रममाणस्य महेशस्य कदाचन ।
रेतः पपात नो वापि नो वा शान्तिर्बभूव ह ॥१०॥
तस्य पादप्रहारेण वसुधा परिपीडिता ।
सूर्यस्यान्तिकमभ्यागाद्गोरूपा मुनिपुङ्गव ॥११॥
तस्मै सा कथयामास रुदती साश्रुलोचना ।
महेशपादसंघातजनितोत्पातमात्मनः ॥१२॥
दिवाकर हिमप्रस्थे पार्वत्या भगवान्हरः ।
रमते सुचिरं काममोहितात्मा जगत्प्रभुः ॥१३॥
शिवशक्त्योः स्वभारेण पीडिताहमहर्निशम् ।
न स्थातुमभिशक्नोमि ममोपायं वद द्रुतम् ॥१४॥
स तु तां पार्वतीं प्राप्य कामविह्वलमानसः ।
न रात्रिं प्रतिजानाति दिनं वापि जगत्पतिः ॥१५॥

न क्षणं विरतिस्तस्य जायते वा महेशितुः ।
रेतः पतति नो वापि न शान्तिरपि जायते ॥१६॥

श्रीमहादेव उवाच—

एवं वचनमाकर्ण्य पृथिव्याः स दिवाकरः ।
तया सार्धं ययौ यत्र देवा इन्द्रपुरोगमाः ॥१७॥
तानुवाच यथावृत्तं पृथिव्याः परिभाषितम् ।
तच्छ्रुत्वा प्रययुः सर्वे ब्रह्मणो निकटं तदा ॥१८॥
त्रिदशा धरया सार्धं सहसैव महामुने ।
ते प्राहुरथ तं देवा ब्रह्माणं जगतः पतिम् ॥१९॥
सम्मुखे पृथिवीं कृत्वा गोरूपां मुनिसत्तम ।
शृणु ब्रह्मञ्जगद्धात्र्या पार्वत्या सहितो हरः ॥२०॥
रमते हिमवत्प्रस्थे दश वर्षाणि पञ्च च ।
न तस्य रेतः पतति न वा शान्तिः प्रजायते ॥२१॥
न धैर्यं वा समाधत्ते स कदाचिन्महेश्वरः ।
नैवं श्रुतं न दृष्टं वा कदाचित्केनचित्क्वचित् ॥२२॥
शिवशक्त्यो रतेर्भारपीडितेयं वसुन्धरा ।
रसातलं जिगमिषुरस्मदन्तिकमागता ॥२३॥
तदत्र किं विधेयं तदुच्यतां त्रिजगत्पते ॥२४॥
इति तेषां वचः श्रुत्वा ब्रह्मा लोकपितामहः ।
उवाच त्रिदशान्ब्रह्मा आश्वास्य च मुहुर्मुहुः ॥२५॥
देवकार्यस्य सिद्धयर्थं रमते स महेश्वरः ।
एतस्मात्क्षरिताद्रेतः सङ्घादुत्पत्स्यते तु यः ॥२६॥
स हन्ता तारकस्यास्य भविष्यति न संशयः ।
किन्तु शम्भो सुतो देव्यां यदि संजायते तदा ।
स भविष्यति देवानामसुराणां च मर्दनः ॥२७॥
पराक्रमं च तस्येमं जगन्नापि सहिष्यति ।
तस्मादन्यत्र कुत्रापि शम्भोरेतेन रेतसा ॥२८॥
यथा भवेदेकसुतश्चेष्टयध्वं तथा सुराः ।
अहं समागमिष्यामि यत्रास्तेऽसौ महेश्वरः ॥२९॥
रमते सह पार्वत्या कामविह्वलमानसः ।
यूयं च तत्र सर्वेऽपि मया यास्यथ सत्वरम् ॥३०॥
शम्भोः सङ्गनिवृत्त्यर्थं प्रार्थयन्तो महेश्वरीम् ॥३१॥

इत्युक्त्वा त्रिदशान्ब्रह्मा सहितो तत्र नारद ।
प्रययौ यत्र देवेशो रमते च सहोमया ॥३२॥
देवाः सर्वे तु तत्पश्चाद्ययुस्तत्र महामते ।
ददृशुस्तौ च रमतः पार्वतीचन्द्रशेखरौ ॥३३॥
तेष्वागतेष्वपि शिवः कामुको मुग्धमानसः ।
न विश्रान्तिं रतौ चक्रे नापि लज्जान्वितोऽभवत् ॥३४॥
न वा सा पार्वती देवी लज्जां प्रत्युद्ययौ तथा ।
न तत्याज महेशानं रममाणमहर्निशम् ॥३५॥

श्रीमहाभागवते उपपुराणे श्रीशिवपार्वतीविहारवर्णनं नाम
एकोनत्रिंशत्तमोऽध्यायः

त्रिंशत्तमोऽध्यायः

श्रीमहादेव उवाच—

ततो देवाः परं प्राप्य विस्मयं प्रावदन्मुने ।
स्तुवन्ति जगतां लज्जारूपिणीं जगदम्बिकाम् ॥१॥

ब्रह्मादय ऊचुः—

त्वं माता जगतां पितापि च हरः सर्वे इमे बालका-
स्तस्मात्त्वच्छिशुभावतः सुरगणे नास्त्येव ते संभ्रमः ।
मातस्त्वं शिवसुन्दरि त्रिजगतां लज्जास्वरूपा यत-
स्तस्मात्त्वं जय देवि रक्ष धरणीं गौरि प्रसीदस्व नः ॥२॥
त्वमात्मा त्वं ब्रह्म त्रिगुणरहितं विश्वजननि
स्वयं भूत्वा योषित्पुरुषविषयाहो जगति च ।
करोष्येवं क्रीडां स्वगुणवशतस्ते च जननीं
वदन्ति त्वां लोकाः स्मरहरवरस्वामिरमणीम् ॥३॥
त्वं स्वेच्छावशतः कदा प्रतिभवस्यंशेन शम्भुः पुमान्
स्त्रीरूपेण शिवे स्वयं विहरसि त्रैलोक्यसम्मोहिनि ।
सैव त्वं निजलीलया प्रतिभवं कृष्णः कदाचित्पुमान्
शम्भुं सम्परिकल्प्य चात्ममहिषीं राधां रमस्यम्बिके ॥४॥

प्रसीद मातर्देवेशि जगद्रक्षणकारिणि ।
विरम त्वमिदानीं तु धरणीरक्षणाय वै ॥५॥

श्रीमहादेव उवाच—

एवं स्तुता भगवती त्रिदशैः पर्वतात्मजा ।
उत्तस्थौ संपरित्यज्य सङ्गं लज्जान्विता मुने ॥६॥
ततस्तस्याः स्ववीर्येण जात एकः परः पुमान् ।
भैरवो भीमसेनश्च महाबलपराक्रमः ॥७॥
तं जातं पुरुषं प्राह देवी भगवती तदा ।
वसस्व मत्पुरद्वारि रक्ष द्वारं सदा सुत ॥८॥
इत्युक्त्वा त्रिजगन्माता लज्जयावनतानना ।
मन्दिरं प्राविशद्रम्यं रत्नप्राकारतोरणम् ॥९॥
शम्भुश्चापि परित्यक्तं सुरेतो मुनिसत्तम ।
मनश्चक्रे सुराणां वै हिताय जगतोऽस्य च ॥१०॥
तं रेतस्त्यक्तुकामं च ज्ञात्वा कमलसम्भवः ।
उवाच वायुं देवानां कार्यसंसिद्धये ततः ॥११॥

ब्रह्मोवाच—

वायो त्वमेकं कार्यं तु कर्तव्यं जगतां हितम् ।
तारकस्य वधार्थाय शम्भोः पुत्राभिजन्मने ॥१२॥
यदा त्यक्ष्यति रेतश्च महेशः पृथिवीतले ।
तदाब्जयोषितां योनिं प्रापयस्व च वेगतः ॥१३॥

श्रीमहादेव उवाच—

इति तस्य वचः श्रुत्वा वायुर्वेगवतांवरः ।
प्रववावतिवेगेन तुमुलं मुनिसत्तम ॥१४॥
ततः शम्भुश्च तत्याज रेतो वह्नेः शिरस्यलम् ।
रजताद्रिसमं वह्नेर्दुस्सहं तदभूत्तदा ॥१५॥
ततः स परितत्याज सहसा शरकानने ।
निवासे देवदेवस्य तेजोराशिं महौजसम् ॥१६॥
तस्यार्धं तु बलाद्वायुः संविभज्य पृथक् पृथक् ।
कृत्तिकानां तु षण्णां वै योनिमध्ये न्यवेशयत् ॥१७॥
योनिवक्त्रेण तत्तेजः प्रविष्टं मुनिसत्तम ।
अवाप शोणितं तासां ततो जठरमागमत् ॥१८॥

वह्नौ यच्चापतद्रेतस्तच्च स्वर्णं बभूव ह ।
यत्स्थितं तु शरारण्ये तच्चाद्यापि च दृश्यते ॥१९॥
वायुनीतं तु तद्रेतोभागं तस्याभिधारणे ।
कृत्तिकाद्या मुनिश्रेष्ठ न समर्थास्तदाभवन् ॥२०॥
तत्यजुश्च मुनिश्रेष्ठ सर्वा एव महामते ।
ततस्ताः सहितं कृत्वा तद्रेतः शोणितोक्षितम् ॥२१॥
संस्थाप्य काष्ठकोशे तु चिक्षिपुर्भीममानसाः ।
गङ्गायां मुनिशार्दूल तद्दर्श प्रजापतिः ॥२२॥
ततस्तत्काष्ठकोशं च स गृहीत्वा पितामहः ।
स्वस्थानमगमद्भूयः प्रहृष्टात्मा प्रसन्नधीः ॥२३॥
तत्काष्ठकोशमध्ये तु व्यजायत परः पुमान् ।
द्वादशैर्बाहुभिर्युक्तो द्वादशाक्षः षडाननः ॥२४॥
स्वर्णगौरतनुः श्रीमान् प्रसन्नमुखपङ्कजः ।
उद्यच्छशाङ्कतुल्याभो नीलोत्पलदलेक्षणः ॥२५॥
एवं विज्ञाय तं जातं देव्याः पुत्रं महौजसम् ।
मथ्यतः काष्ठकोशस्य तत्कोशं स प्रजापतिः ॥२६॥
प्रबिभेद मुनिश्रेष्ठ ततस्तं ददृशे सुतम् ।
आश्विन्यां पौर्णमास्यां तु एवं शिवकुमारकः ॥२७॥
जातवान्ब्रह्मलोकेऽसौ तारकारिर्महाबलः ।
तस्मिञ्जाते शिवसुते ब्रह्मा लोकपितामहः ॥२८॥
सम्प्राप्य परमामोदं महोत्सवमकारयत् ।
शिरसस्तारकाख्यस्य किरीटं कुण्डलोज्ज्वलम् ॥२९॥
पपात धरणीपृष्ठे चकम्पे च शरीरकम् ।
सञ्जाते पार्वतीपुत्रे महाबलपराक्रमे ॥३०॥
विशः सुनिर्मला आसन् देवाश्चोत्फुल्लमानसाः ।
ज्ञात्वा तु पार्वतीपुत्रं सञ्जातं ब्रह्मणः पुरे ॥३१॥
नारायणः समागत्य ददृशे परमादरात् ।
आयातास्त्रिदशाश्चान्ये महेन्द्रप्रमुखास्तथा ॥३२॥
महर्षयश्च सर्वेऽपि श्रुत्वा जातमुमासुतम् ।
तथाकरोच्च नामानि ब्रह्मा सर्वसुरैः सह ॥३३॥
पार्वतीबालकस्यास्य प्रसन्नात्मा महामुने ॥३४॥

ब्रह्मोवाच—

कृत्तिकागर्भजातत्वात्कार्त्तिकेयेति चाख्यया ।
विख्यातस्त्रिषु लोकेषु भविष्यति शिवात्मजः ॥३५॥
तथा षाण्मातुरश्चास्य नाम लोके भविष्यति ।
यतस्ताः कृतिकाद्याश्च संख्यया परिकीर्तिताः ॥३६॥
ताभिश्च स्कन्दितात्रेतःसंघाज्जातो ह्ययं यतः ।
ततः स्कन्दोऽपि नाम्नाभिख्यातो लोके भविष्यति ॥३७॥
तारकस्य निहन्तारं समरे भविता यतः ।
ततस्तारकवैरीति लोके नाम भविष्यति ॥३८॥

श्रीमहादेव उवाच—

एवं नामानि कृत्वाऽसौ ब्रह्मा लोकपितामहः ।
सर्वदेवगणैः सार्धं महोत्सवमथाकरोत् ॥३९॥
ततः प्राहुः पद्मयोनिं स्वस्वकार्यप्रसिद्धये ।
तारकेणार्दिताः सर्वे त्रिदशा मुनिसत्तम ॥४०॥

देवा ऊचुः—

प्रभो त्रिजगतां नाथ यावच्छंकरनन्दनः ।
संग्रामे तारकं दैत्यं न जघानैष हि स्वयम् ॥४१॥
तावत्परिचयं नास्य पितृभ्यां कारयिष्यसि ।
यदि स्नेहाद्भगवती भगवान्वा सदाशिवः ॥४२॥
न यच्छति रणे पुत्रं किं करिष्यामहे तदा ॥४३॥
तस्माच्छीघ्रं हते दैत्ये समरे तारकाह्वये ।
तयोः पुत्रस्य जन्मास्य वक्तव्यं वै त्वया प्रभो ॥४४॥

श्रीमहादेव उवाच—

एवं देव्याः समुद्भूतः पुत्रो ज्येष्ठः षडाननः ।
स्थितो ब्रह्मपुरे देवाः स्वस्थानं च समागमन् ॥४५॥
इत्युक्तं मुनिशार्दूल कार्त्तिकेयो यथाभवत् ।
देव्याः पुत्रो महाबाहुस्तारकासुरमर्दनः ॥४६॥
अध्यायमेतं गिरिजासुतस्य जन्मप्रसङ्गं परिपाठयन्ति ये ।
पठन्ति शृण्वन्ति च ये च भक्त्या तेषां न विद्येत भयं हि किल्बिषात् ॥४७॥

न विद्यते यस्य सुतः समाहितः श्रुत्वा स एनं गिरिजासुतोद्भवम् ।
उत्पादयेत्पुत्रमशेषसद्गुणं गुणान्वितं तद्गिरिजासुतोपमम् ॥४८॥

इति श्रीमहाभागवते उपपुराणे श्रीमहादेवनारदसंवादे कार्तिकेयजन्मवर्णनं नाम त्रिंशत्तमोऽध्यायः

———

एकत्रिंशत्तमोऽध्यायः

नारद उवाच—

कथय त्वं महादेव संग्रामे पार्वतीसुतः ।
कथं संपातयामास तारकं देवकण्टकम् ॥१॥
कथं परिचयश्चाभूत्पितृभ्यां तस्य वा प्रभो ।
सुतं प्राप्य च सा देवी किं चकार महेश्वरः ॥२॥

श्रीमहादेव उवाच—

शृणु वत्स प्रवक्ष्यामि संग्रामे तारकासुरम् ।
यथा संपातयामास संग्रामे पार्वतीसुतः ॥३॥
यथामवत्परिचयः पितृभ्यामपि तस्य च ।
तच्च वक्ष्यामि ते तत्त्वं शृणुष्वावहितो मम ॥४४॥
एकदा त्रिदशाः सर्वे तारकेण समर्दिताः ।
ब्रह्मणोन्तिकमागत्य प्रणम्योचुर्महामतिम् ॥५॥

देवा ऊचुः—

प्रभो ब्रह्मन् तारकस्तु यथास्मान्बाधते सदा ।
तत्त्वं किं नाभिजानासि किंवा ब्रूमस्तवाग्रतः ॥६॥
इदानीं तस्य नाशाय महादेवसुतं रणे ।
प्रेषयाशु महादेवं कार्तिकेयं महाबलम् ॥७॥

श्रीमहादेव उवाच—

इति तेषां वचः श्रुत्वा ब्रह्मा लोकपितामहः ।
कार्त्तिकेयं वचः प्राह सर्वदेवस्य पश्यतः ॥८॥

ब्रह्मोवाच—

तात त्वं सर्वलोकानां रक्षकोऽसि शिवात्मज ।
इदानीं त्रिदशान्रक्ष हत्वा दैत्यं तु तारकम् ॥९॥
त्वां समाश्रित्य देवास्तु तारकासुरपीडिताः ।
निस्तारं समुपायान्तु जहि तं देवकण्टकम् ॥१०॥

श्रीमहादेव उवाच—

ततस्तं वेधसं प्राह कार्त्तिकेयो महाबलः ।
स्निग्धगम्भीरया वाचा देवानामग्रतः स्थितः ॥११॥

कार्तिकेय उवाच—

पातयिष्यामि तं दुष्टं समरे भीमविक्रमम् ।
तारकं दैत्यराजं तु वाहनं परिकल्पय ॥१२॥

श्रीमहादेव उवाच—

इत्युक्त्वा भगवान्ब्रह्मा तस्मै शिवसुताय वै ।
मयूरवाहनं प्रादाद्वायुवेगं महामुने ॥१३॥
तारकस्य वधार्थाय शक्तिं हेमपरिष्कृताम् ।
कोटिसूर्यसमाभासां ददौ तस्मै महौजसे ॥१४॥
न तादृशा महाशक्तिर्विद्यते भुवनत्रये ।
तेन शक्तिधरेत्याख्यामवाप्स्यति शिवात्मजः ॥१५॥
ततस्तु सर्वसेनानां रक्षणार्थं नियोज्य तम् ।
समरे प्रेषयामास ब्रह्मा लोकपितामहः ॥१६॥
सोऽपि तं प्रणिपत्यैव मयूरं प्रारुरोह च ।
प्रगृह्य शक्तिं तां भीमां महाबलपराक्रमः ॥१७॥
ततस्तमग्रतः कृत्वा त्रिदशाः समुपागमन् ।
युद्धार्थं दैत्यराजस्य तारकस्य पुरीं मुने ॥१८॥
तेषामापततां श्रुत्वा सुघोरं निःस्वनं ततः ।
समसज्जत दैत्येन्द्रः समरायासुरैः सह ॥१९॥

अनन्तहयपादातैर्गजवाजिसहस्रकैः ।
वृतः समरदुर्द्धर्षः समरार्थं व्यवस्थितः ॥२०॥
आयान्तं वीक्ष्य सेनान्यं मयूरवरवाहनम् ।
उद्यच्छक्तिकरं सर्वैस्त्रिदशैः परिवारितम् ॥२१॥
तारको रथमारुह्य शुद्धहेमपरिष्कृतम् ।
सिंहवाहध्वजैश्चित्रैः पताकाभिरलङ्कृतम् ॥२२॥
प्रययौ नेमिशब्देन कम्पयन्धरणीतलम् ।
स ददर्श निमित्तानि सुघोराणि महामते ॥२३॥
पेतुरुल्काश्च निर्भिद्य सूर्यं रथसमीपतः ।
वाजिनां चक्षुषः पेतुरश्रुधारास्तथा मुने ॥२४॥
अप्रसन्नहृदश्चासन् योद्धारः सर्व एव हि ।
भयानकरवं कुर्वन् पतन्ति घोरपक्षिणः ॥२५॥

एवंविधानि विविधानि भयानकानि
दृष्ट्वापि स त्रिदशतापददैत्यराजः ।
आदाय चारुविपुलं धनुरुग्रमूर्त्तिः
सम्प्राप शङ्करसुतं युधि जेतुकामः ॥२६॥

माता स्वयं भगवती गिरिराजकन्या
या सर्वदैत्यवरनाशकरी रणेषु ।
तातश्च यस्य गिरिशो जगदन्तकारी
कस्तं विजेतुमिह शक्तियुतो मुने स्यात् ॥२७॥

श्रीमहाभागवते उपपुराणे तारकासुरसंग्रामे कुमारागमनवर्णनं
नामैकत्रिंशत्तमोऽध्यायः

द्वात्रिंशोऽध्यायः

श्रीमहादेव उवाच—

ततस्तूर्यनिनादैश्च भेरीपणवनिःस्वनैः ।
उभयोः सेनयोश्चापि सिंहनादैः समन्ततः ॥१॥

नेमिघोषेण घोरेण पूर्णमासीन्नभोन्तरम् ।
चकम्पे वसुधा चापि ततो युद्धमवर्तत ॥२॥

एतस्मिन्नन्तरे ब्रह्मा सह सर्वैर्महर्षिभिः ।
अपूर्वं रथमारुह्य गगने समुपागमत् ॥३॥

द्रष्टुं घोरतरं युद्धं तुमुलं लोमहर्षणम् ।
देवानां दानवानां च विनिघ्नन्नितरेतरम् ॥४॥

इन्द्रस्तु वज्रं निःक्षिप्य शतशोऽथ सहस्रशः ।
जघान समरे दैत्यान्महाबलपराक्रमान् ॥५॥

तथैव वरुणः क्रुद्धः पाशेनासुरपुङ्गवान् ।
बद्ध्वा प्रहृत्य चास्त्रेण प्रापयद्यमसादनम् ॥६॥

अन्येऽपि त्रिदशाः सर्वे क्षिप्त्वा बाणाननेकशः ।
समरे पातयामासुर्दनुजेन्द्रस्य सैनिकान् ॥७॥

कार्तिकेयस्तु समरे युद्ध्वा तेन दुरात्मना ॥
जघानान्यान्महादैत्यान्महाबलपराक्रमान् ॥८॥

एवं शस्त्रास्त्रपातैस्तु देवानां दानवास्तथा ।
त्यक्तप्राणाः समभवंस्तारकस्य समीपतः ॥९॥

तेषां रथाश्वनागैश्च प्रभग्नैश्च वसुन्धरा ।
अगम्या समभूत्तत्र निहतैरसुरैरपि ॥१०॥

हतानां दैत्यसङ्घानां शोणितैर्मुनिसत्तम ।
प्रावर्तत नदी घोरा सेनयोरन्तरे ततः ॥११॥

एवं विनष्टे सैन्ये तु तारको दैत्यपुङ्गवः ।
अकरोत्तुमुलं युद्धं सेनान्या सह नारद ॥१२॥

शस्त्राणि तेन क्षिप्तानि शतशोऽथ सहस्रशः ।
चिच्छेद समरे गौरीतनयः प्रहसन्निव ॥१३॥

तथा सोऽपि महास्त्राणि सेनान्या प्रहितानि च ।
बभञ्ज तारकः संख्ये शतशोऽथ सहस्रशः ॥१४॥

एवं तयोः प्रहरतोः शरव्रातैः परस्परम् ।
दृष्ट्वा युद्धं परं प्रापुर्विस्मयं देवकिन्नराः ॥१५॥

ततः क्रुद्धो रणे दैत्यः स्वर्णपुङ्खशरान्बहून् ।
यमदण्डोपमान्घोरान्सेनान्ये प्राहिणोद्रुषा ॥१६॥

सेनानीः प्राक्षिपद्बाणमर्कचन्द्रं सुदारुणम् ।
तं प्रत्यच्छेदयत्सोऽपि निमेषार्धेन नारद ॥१७॥
ततस्तमाशुगैर्घोरैः सेनानीर्दैत्यपुङ्गवान् ।
पुनर्विव्याध संक्रुद्धो दशभिर्नतपर्वभिः ॥१८॥
स दैत्यराजस्तैर्बाणैः पीडितो मुनिसत्तम ।
मूर्च्छितः पतितस्तस्मिन् रथोपस्थ उपाविशत् ॥१९॥
ततः समुत्थितो भूयः सिंहवन्निननदन्मुहुः ।
अमर्षवशमापन्नः शूलं जग्राह दानवः ॥२०॥
तमुद्यतमहाशूलं दृष्ट्वा सोऽपि षडाननः ।
चिक्षेप निजशूलं तु महौजसमरिन्दमः ॥२१॥
तेन शूलेन दैत्यस्य तच्छूलं करसंस्थितम् ।
तत्क्षणाद् भस्मसान्नीतं तदद्भुतमिवाभवत् ॥२२॥
ततः क्रुद्धो रणे दैत्यः सृक्किणीः परिसंलिहन् ।
सेनान्यं प्रति चिक्षेप गदां शक्त्यायसीं मुने ॥२३॥
सेनानीस्तां गदां भीमां गदया सहसैव हि ।
पातयामास तद्वस्ताद्भुङ्क्त्वा पाणौ व्यताडयत् ॥२४॥
ततश्चान्यामपि गदां प्रगृह्य दनुजाधिपः ।
अभ्यपद्यत सेनान्यं सिंहनादं नदन्मुहुः ॥२५॥
तमापतन्तं संवीक्ष्य गदापाणिं महासुरम् ।
सेनानीस्ताडयामास क्षुरप्रेण भुजद्वये ॥२६॥
तेनास्त्रेण प्रविद्धस्तु समरे दैत्यपुङ्गवः ।
ननाद सुमहानादं युगान्ते जलदो यथा ॥२७॥

श्रीमहाभागवते उपपुराणे कार्त्तिकेयतारकासुरसंग्रामवर्णनं नाम द्वात्रिंशत्तमोऽध्यायः

त्रयस्त्रिंशोऽध्यायः

श्रीमहादेव उवाच—

अथ तं दैत्यराजं तु नदन्तं घोरनिःस्वनैः ।
अताडयच्छरैर्घोरैर्यमदण्डोपमै रणे ॥१॥
ततः शक्तिं समादाय रत्नदण्डां सुदारुणाम् ।
सेनान्यं प्रति चिक्षेप तारकः क्रोधमूर्च्छितः ॥२॥

तामापतन्तीं संवीक्ष्य शक्तिं देवसुदुःसहाम् ।
त्रिदशाः समकम्पन्त भयेन परिमोहिताः ॥३॥

ब्रह्मा स्वस्त्ययनं चक्रे सह दिव्यैर्महर्षिभिः ।
सेनानीः प्रहसंस्तां तु शक्तिं श्रीपार्वतीसुतः ॥४॥

स्वशक्त्या भस्मसाच्चक्रे सर्वलोकस्य पश्यतः ।
ततो देवाः सुसंहृष्टाः पुष्पवृष्टिमवाकिरन् ॥५॥

कार्त्तिकेयोपरि ब्रह्मा प्रशशंस च तं मुहुः ।
विस्मयं सिद्धगन्धर्वा जग्मुर्दृष्ट्वा पराक्रमम् ॥६॥

महादेवसुतस्यामुं कार्त्तिकेयस्य नारद ।
ततः क्रुद्धः स दैत्येन्द्रो धनुरादाय सत्वरम् ॥७॥

निःक्षिप्य शरजालानि स्कन्दं समरदुर्जयम् ।
छादयामास समरे मयूरं च व्यताडयत् ॥८॥

ततः स शरजालानि छित्त्वा शिवसुतोऽपि च ।
विबभौ मुनिशार्दूल कोटिसूर्यसमप्रभः ॥९॥

एतस्मिन्नेव काले तु वृत्रहापि महासुरान् ।
भित्त्वान्यान्पार्वतीपुत्रनिकटं समुपागमत् ॥१०॥

चित्रे मरकताद्रीशसदृशे शिखिनि स्थितः ।
पार्वतीतनयः संख्ये वृत्रहापि गजोपरि ॥११॥

ऐरावताख्ये विबभावतीव मुनिसत्तम ।
तौ युद्धसंस्थितौ दृष्ट्वा तारको भीमविक्रमः ॥१२॥

शरवर्षैः कुमारेन्द्रौ ताडयामास नारद ।
तस्य तांस्तु शरव्रातान्छित्त्वा तस्मिन्महाहवे ॥१३॥

चक्राते सिंहनादांश्च कुमारेन्द्रौ महाबलौ ।
शस्त्रैश्च विविधैर्घोरैस्ताडयामासतुस्तदा ॥१४॥

इन्द्रस्तं प्रतिचिक्षेप वज्रं वेगेन नारद ।
तदाभूच्छतधा तस्य वक्षः प्राप्य क्षणार्धतः ॥१५॥

ततः खड्गं समुद्यम्य क्रोधसंरक्तलोचनः ।
कुमारं परिसंत्यज्य देवराजमधावत ॥१६॥

ततः क्रुद्धस्तु भगवान्पार्वतीतनयः क्षणात् ।
चालयन्वाहनं तस्य सखड्गं करमच्छिनत् ॥१७॥

ततः सव्येतरे पाणौ क्रोधेन दितिजाधिपः ।
आदाय परिघं घोरं सेनान्यं प्रत्यधावत ॥१८॥
ततः शक्तिं समादाय ब्रह्मदत्तां सुदारुणाम् ।
आयान्तं दैत्यराजं तु ताडयामास संयुगे ॥१९॥
तया विद्धः स दैत्येन्द्रो नीलाचलसमो बली ।
पपात धरणीपृष्ठे धरणीमनुनादयन् ॥२०॥
हते तस्मिन्महादैत्ये देवगन्धर्वकिन्नराः ।
प्रहर्षं परमं प्रापुर्दिशश्चासन् सुनिर्मलाः ॥२१॥
सुप्रभोऽभूद्दिनेशश्च सुस्थिरं जगदप्यभूत् ॥२२॥

श्रीमहाभागवते उपपुराणे तारकासुरवधो नाम त्रयस्त्रिंशत्तमोऽध्यायः

चतुस्त्रिंशोऽध्यायः

देव उवाच—

ततः प्रहृष्टास्त्रिदशाः प्रसाद्य गिरिजासुतम् ।
गन्धपुष्पार्घ्यधूपैश्च नानास्तुतिभिरादरात् ॥१॥
ब्रह्मा विमानमारुह्य हंसवाहं प्रजेश्वरः ।
ययौ कुमारमादाय कार्त्तिकेयं षडाननम् ॥२॥
महेशसन्निधिं नीत्वा बभाषे मुनिसत्तम ।

ब्रह्मोवाच—

वत्स ते जननीयं हि जगद्वन्द्या सुरेश्वरी ॥३॥
पिता तेऽयं महादेवो जगद्वन्द्यः शुभप्रदः ।
एतयोस्तनयस्त्वं तु पितरौ ते नमस्कुरु ॥४॥
स्थित्वात्र सकलं विश्वं पालयस्व महामते ॥५॥

श्रीमहादेव उवाच—

इति ब्रह्ममुखाच्छ्रुत्वा पार्वतीपरमेश्वरौ ।
विभाव्य चेतसा पुत्रं जज्ञाते मुनिसत्तम ॥६॥

ततो नमन्तं पुत्रं तु पार्वती प्रीतिसंयुता ।
कृत्वाङ्के परमानन्दयुता देवी बभूव ह ॥७॥
महेशोऽपि सुतं प्राप्य हर्षनिर्भरमानसः ।
प्रकरोत्सुमहोत्साहं सर्वानाहूय दैवतान् ॥८॥
तत्रागतस्तु भगवान् विष्णुर्नारायणोऽव्ययः ।
ददर्श कार्त्तिकेयं तु दिव्याङ्गं चारुविग्रहम् ॥९॥
देव्या वीक्षितसर्वाङ्गं परमस्नेहभावतः ।
देव्या अङ्कं समारुह्य मोदते बहुभाग्यतः ॥१०॥
तथाहमपि चैतस्याः पुत्रतां प्राप्य वै ध्रुवम् ।
अङ्कमारुह्य प्राश्नामि स्तन्यं परमभावतः ॥११॥
एवं विचिन्त्य भगवान् विष्णुः परमपूरुषः ।
आध्यायन् चेतसा देवीं प्रणिपत्य ययौ यदा ॥१२॥
तदा तस्याभिलाषं तु विज्ञाय परमेश्वरी ।
तस्मै ददौ वरं विष्णो मत्पुत्रस्त्वं भविष्यसि ॥१३॥
ततोऽन्येपि ययुः सर्वे स्वं स्वं स्थानं सुरोत्तमाः ।
प्रणिपत्य महादेवीं देवदेवं च नारद ॥१४॥
इत्युक्त्वा कार्त्तिकेयोऽसौ तारकं देवकण्टकम् ।
गदया पातयामास समरे भीमविक्रमम् ॥१५॥
यथा परिचयश्चाभूत्पितृभ्यां सह तस्य च ॥१६॥
इदानीं शृणु विष्णुः स यथा जातो गणेश्वरः ।
भवानीतनयो देवः पूज्यः करिवराननः ॥१७॥

श्रीमहाभागवते उपपुराणे कार्तिकेयकैलासगमनं नाम चतुस्त्रिंशोऽध्यायः

———

पञ्चत्रिंशोऽध्यायः

श्रीमहादेव उवाच—

अथैकदा विहारार्थं भवान्या सहितो भवः ।
जगाम धरणीपृष्ठं पुत्रं संस्थाप्य मन्दिरे ॥१॥

ततः प्राप्य परं रम्यं काननं धरणीतले ।
निर्माय नगरीं रम्यां तत्रोवास सहोमया ॥२॥

तत्रैकदा महादेवो देवीं संस्थाप्य मन्दिरे ।
आहर्तुं वन्यपुष्पाणि प्रययौ प्रमथैः सह ॥३॥

ततः प्राप्य च पुष्पाणि सुबहूनि महेश्वरः ।
चक्रे कालविलम्बं तु कानने बहुरम्यके ॥४॥

एतस्मिन्नन्तरे गौरी गात्रं लिप्त्वा हरिद्रया ।
स्नानप्रयाणं उद्युक्ता बभूव मुनिपुङ्गव ॥५॥

तदा हि साभिरक्षार्थं मन्दिरस्य महेश्वरी ।
चिन्तयामास विश्वेषामपि रक्षणकारिणी ॥६॥

तत्र विष्णोश्च संस्मृत्य प्रार्थितं निजगात्रतः ।
हरिद्रालेपमानीय पुत्रमेकं ससर्ज च ॥७॥

लम्बोदरं महाबाहुं चारुवक्त्रं मनोहरम् ।
त्रिनेत्रं रक्तवर्णं च मध्याह्नार्कसमप्रभम् ॥८॥

नारायणं तं च देवं पुत्रं सर्वगणेश्वरम् ।
ततस्तस्मै भगवती स्तन्यं दत्वा शुचिस्मिता ॥९॥

उवाच वचनं पुत्र रक्षस्वैनां पुरीं मम ।
त्वं यावदागमिष्यामि स्नात्वा भूयः पुरीमिमाम् ॥१०॥

इत्युक्त्वा तं सुतं देवी स्नातुमभ्याययौ द्रुतम् ।
स्थितस्तु बालकस्तत्र पुरद्वारं प्रपालयन् ॥११॥

एतस्मिन्नन्तरे सोऽपि देवदेवो वनान्तरात् ।
आयातस्तत्पुरद्वारं तं च बालो ददर्श ह ॥१२॥

ततस्तं वारयामास देवदेवमुमासुतः ।
पुरःप्रवेशकाले तु शूलमुद्यम्य वेगतः ॥१३॥

तं दृष्ट्वा शूलिनं शूलपाणिनेत्रैरपश्यत ।
चिक्षेप सहसा शूलमविज्ञानन्तुमासुतम् ॥१४॥

सुघोरं तं महाशूलं निक्षिप्तं शूलपाणिना ।
सहसा भस्मसाच्चक्रे शिरस्तस्य सुतस्य वै ॥१५॥
विशीर्षः पार्वतीसूनुर्न च प्राणान्मुमोच ह ।
न वा शूलं महेशस्य तत्प्राणान् जगृहे तदा ॥१६॥
एतस्मिन्नेव काले तु स्नात्वा सर्वसखीवृता ।
आयाता गिरिराजस्य सुतापि त्रिदशेश्वरी ॥१७॥
सा दृष्ट्वा च सुतं द्वारि विशीर्षं पतितं भुवि ।
पप्रच्छ देवदेवेशं संत्रस्ता मुनिसत्तम ॥१८॥

देव्युवाच—

किमेतत्त्रिदशश्रेष्ठ बालकस्य तु मे शिरः ।
केन भस्मीकृतं ब्रूहि पुरद्वारस्थितस्य वै ॥१९॥

शिव उवाच—

नाहं जाने तव सुतमेनं पर्वतनन्दिनि ।
वर्त्मावरोधकं ज्ञात्वा भस्म्यकार्षं शिरोस्य वै ॥२०॥

श्रीमहादेव उवाच—

ततः प्राह महादेवं पार्वती क्रोधसंयुता ।
शिरो मे देहि पुत्रस्य मा चिरं कुरु तत्र वै ॥२१॥
तच्छ्रुत्वा भगवांस्तत्र सहसा प्रययौ मुने ।
शिरोन्वेष्टुं महादेवो दातुं पुत्रस्य चात्मनः ॥२२॥
ततोऽरण्ये समालोक्य गजराजं महाबलम् ।
उदक्शिरसमेकत्र शयानं स महेश्वरः ॥२३॥
तच्छिरश्छेदने पापरहितत्वात्तदच्छिनत् ।
तत्र तच्छिर आनीय पुत्राय प्रददौ हरः ॥२४॥
गजाननो भवत्वेष देवीपुत्रो गणाधिपः ।
देवदेवोऽपि तं ज्ञात्वा जातं नारायणं मुने ॥२५॥
स्नेहं प्रकटयामास क्रोडे कृत्वा गजाननम् ।
तदेवं तमुवाचेदं पुत्रं नारायणं हरः ॥२६॥
प्रीणयन् प्रियवाक्येन सापराध इव प्रभुः ॥२७॥

श्रीशिव उवाच—

अज्ञात्वा ते शिरश्छिन्नं शूलेनानेन यन्मया ।
तेनाहं सापराधोऽस्मि सत्यं सत्यं जनार्दन ॥२८॥

द्वापरस्य तु शेषे त्वं वसुदेवगृहे यदा ।
सम्भविष्यसि देवक्यां मूर्त्यन्तरमुपास्थितः ॥२९॥
तदा त्वया समं तात पुरे शोणितसंज्ञके ।
संग्रामः सुमहानेव भविष्यति सुनिश्चितम् ॥३०॥
तत्राहं सर्वलोकस्य पश्यतस्तद्रणाजिरे ।
सशूलस्तम्भितोऽवश्यं भविष्यामि त्वयैव हि ॥३१॥

श्रीमहादेव उवाच—

ततः स देवः पार्वत्या संस्थितस्तत्र कानने ।
विहृत्य कतिचिन्मासान् भूयस्तत्पुरमभ्यगात् ॥३२॥
यत्रासौ संस्थितो ज्येष्ठः पुत्रस्तारकसूदनः ।
तत्र ताभ्यां कुमाराभ्यां नित्यं संप्रीतमानसः ॥३३॥
उवाच देवदेवेन सार्धं ब्रह्ममयी शिवा ।
गत्वा कदाचित्कैलासं कदा वाराणसीं पुरीम् ॥३४॥
अन्यत्र कुत्रचिद्वापि संविहृत्य यथेप्सितम् ।
भूयस्तस्मिन् समागत्य वासं चक्रे यथेप्सितम् ॥३५॥
सार्धं श्रीदेवदेवेन सुताभ्यां प्रमथैरपि ।
ततस्तस्माच्च कैलासे वासं चक्रे तु सर्वदा ॥३६॥
प्रीत्या परमया युक्ता क्वचित्तस्मिन्नगोत्तमे ॥३७॥
इति ते कथितं सर्वं यत्पृष्टं मुनिसत्तम ।
प्रकृतिः पूर्वभावेन यथोद्वाहादिमङ्गलम् ॥३८॥
य इदं प्रपठेद्भक्त्या देव्याश्चरितमुत्तमम् ।
तस्य प्रसन्ना शर्वाणी ब्रह्माद्यैरपि दुर्लभा ॥३९॥
कुरुते च मनोभीष्टं परिपूर्णं न संशयः ।
नश्यन्ति रिपवस्तस्य अपि संख्ये सुदुर्जयाः ॥४०॥
अकाले वार्षिकीं पूजां यां चकार रघूद्वहः ।
रावणस्य वधार्थाय भक्त्या परमया युतः ॥४१॥
तत्र कृष्णनवम्यां तु समारभ्य दिने दिने ।
यावन्महानवम्येतत्पञ्चस्तावद्दिने दिने ॥४२॥
असाध्यं साधयेच्चैव नरो देव्याः प्रसादतः ।
यथैव निहतः शत्रुः संग्रामे देवदुर्जयः ॥४३॥

श्रीरामेण महाबाहू रावणो राक्षसेश्वरः ।
तथैव पातयेच्छत्रून् सत्यं सत्यं न संशयः ॥४४॥
अश्वमेधफलं प्राप्य मोदते च चिरं दिवि ।
शृणुयाद्य इदं भक्त्या देवीमाहात्म्यमुत्तमम् ॥४५॥
तस्य पुण्ययशोवृद्धिर्जायते मुनिसत्तम ।
न च व्याघ्रादयः सर्वे हिंसका अपि जन्तवः ॥४६॥
तं पश्यन्ति भयाच्चापि पलायन्ते सुदूरतः ।
पुत्रपौत्रादिभिर्युक्तः सुखं भुक्त्वा चिरं भुवि ॥४७॥
अन्ते देव्याः पदं प्राप्य रमते मुनिसत्तम ।
बहुना किमिहोक्तेन सत्यं सत्यं मुनीश्वर ॥४८॥
शृण्वतां पठतामेतत्प्रसन्ना स्यान्महेश्वरी ।
तस्यां तु सुप्रसन्नायां यत्फलं जायते मुने ॥४९॥
तद्वक्तुं न समर्थोऽस्मि कल्पकोटिशतैरपि ।
न प्रकाश्यमिदं वत्स तत्त्वं देव्यास्तु यन्महत् ॥५०॥
यस्मै कस्मै न दातव्यं दातव्यं भक्तिशालिने ।
त्वं देव्याः परमो भक्तः शुद्धज्ञानी दृढव्रतः ॥५१॥
इत्यस्मात्कथितं तुभ्यं न प्रकाश्यं त्वया पुनः ।
न तुभ्यं विद्यते किञ्चिदप्रकाश्यं कदाचन ॥५२॥
किमिच्छस्यपरं श्रोतुं वद तच्च वदामि तत् ॥५३॥

व्यास उवाच—

इत्येवं त्रिदशेश्वरस्य वचनं श्रुत्वा मुनीन्द्रस्ततो
नत्वा तं त्रिदशेन्द्रवन्दितपदं पञ्चाननं भक्तितः ।
भूयोऽपि त्रिदशोत्तमासुचरितं संश्रोतुकामस्तदा
पप्रच्छेदमपूर्वमुत्तममतिर्देव्या महत्पूजनम् ॥५४॥
यत्कृत्वा रघुनन्दनः समवधीद्रक्षोधिपं रावणं
देवानां च गणार्दकं सहसुतं सामात्यवर्गं रणे ।
यत्कृत्वा भुवि मानवाः सुरपुरे देवा महेन्द्रादयो
ब्रह्माद्यास्त्रिदशाश्च तद्धि परमं प्रापुर्मनोवाञ्छितम् ॥५५॥

श्रीमहाभागवते उपपुराणे गणपतिजन्मकथावर्णनं नाम पञ्चत्रिंशत्तमोऽध्यायः

षट्त्रिंशोऽध्यायः

नारद उवाच—

शारदीया महापूजा या देव्याः प्रीतिदायिका ।
वार्षिकीति त्वया प्रोक्ता यां चकार रघूत्तमः ॥१॥
रावणस्य वधार्थाय भक्त्या परमया युतः ।
तां ब्रूहि मे महादेव विस्तरेण जगत्प्रभो ॥२॥
यथा स भगवान् विष्णुः सम्भूय मनुजाकृतिः ।
पूजयामास विश्वेशीमकालेऽपि महामते ॥३॥
त्वत्तः कश्चिन्न विद्येत वक्ता लोकत्रये प्रभो ।
पवित्रं कुरु मां देव दासं ते शरणागतम् ॥४॥

श्रीमहादेव उवाच—

देवीं त्रैलोक्यजननीं सम्प्रार्थ्य दशकन्धरः ।
तस्याः प्रसादात्त्रैलोक्यविजयी समभूत्पुरा ॥५॥
तस्या भावेन सन्तुष्टा शर्वाणी भक्तवत्सला ।
उवास नगरे तस्य रावणस्य महात्मनः ॥६॥
संस्थिता तपसः पुण्यं न यावत्क्षीणतामगात् ।
नित्यं विजयदा भूत्वा सहिता योगिनीगणैः ॥७॥
क्षीणे तु तपसः पुण्ये जगत्पीडनकारणात् ।
त्यक्त्वा तस्य पुरीं देवी चण्डिका चण्डविक्रमा ॥८॥
पूजिता रामचन्द्रेण तं जघान सबान्धवम् ।
कैलासशिखरमद्देवी परिवारगणान्विता ॥९॥
स रावणः पुरा दर्पाद्विजित्येन्द्रादिदेवताः ।
विष्णुं च जगतां नाथं त्रिलोकं बाधते स वै ॥१०॥
न हविर्बुभुजुर्देवास्तद्भयान्मुनिपुङ्गव ।
न यज्ञं मुनयश्चक्रुर्न तपो देवपूजनम् ॥११॥
भयाद्राक्षसराजस्य रावणस्य दुरात्मनः ॥१२॥
भयादिन्द्रः प्रतिदिनं गृहीत्वोपायनानि च ।
तत्कृतानुग्रहापेक्षी संस्थितः सम्मुखं मुने ॥१३॥

तथान्ये ये च दिक्पालाश्चन्द्रसूर्यादयः सुराः ।
ते सर्वे तेन दुष्टेन कृताश्चाज्ञानुसारिणः ॥१४॥
ततस्तेनार्दिता देवाः पृथिव्या सहिता मुने ।
ब्रह्मणोऽन्तिकमासाद्य प्रोचुः प्राञ्जलयः सुराः ॥१५॥
प्रभो विधे जगन्नाथ पौलस्त्यतनयो महान् ।
रावणो बलदर्पाच्च त्रिलोकीं बाधते स्वयम् ॥१६॥
तस्य भारासहा पृथ्वी तवान्तिकमुपागता ।
वधोपायं चिन्तयस्व तस्य देव दुरात्मनः ॥१७॥
इत्युक्तस्त्रिदशैर्ब्रह्मा समाश्वास्य वसुन्धराम् ।
वैकुण्ठं समुपागम्य वैकुण्ठेशमुवाच ह ॥१८॥
प्रभो त्रिजगतां नाथ विश्वपालनतत्पर ।
लङ्कायामतिदुर्धर्षो जायते दशकन्धरः ॥१९॥
तं हन्तुं मानुषं देहं समाश्रय जगत्पते ॥२०॥
अथ त्वं मानुषो भूत्वा रावणं देवकण्टकम् ।
सपुत्रबान्धवं दुष्टं जहि त्वं विश्वपालक ॥२१॥
इत्युक्तो ब्रह्मणा विष्णुस्तमुवाच महामतिम् ।
आश्वास्य त्रिदशान् सर्वान् रावणेन समर्दितान् ॥२२॥

श्रीभगवानुवाच—

आश्रित्य मानुषं देहं भूत्वा दाशरथिः स्वयम् ।
पातयिष्यामि तं दुष्टं सपुत्रगणबान्धवम् ॥२३॥
किन्तु देवाः सहायार्थमृक्षवानररूपिणः ।
भवन्तु पृथिवीपृष्ठे भूमारहरणाय तु ॥२४॥
अन्यद्वक्ष्यामि ते ब्रह्मन्यदेकमतिदुष्करम् ।
तत्रोपायं चिन्तयस्व वधार्थं दुष्टचेतसः ॥२५॥
पूज्यते त्रिजगन्माता देवी कात्यायनी परा ।
सद्भक्त्या तेन दुष्टेन रावणेन दुरात्मना ॥२६॥
सापि कात्यायनी तुष्टा नित्यं तस्य जयप्रदा ।
लङ्कायां कुरुते वासं सहिता योगिनीगणैः ॥२७॥
सा संत्यजति चेल्लङ्कां सुप्रसन्ना भवेन्मयि ।
तदा शक्नोमि तं हन्तुं न चेन्नैवास्म्यहं क्षमः ॥२८॥

तदत्र यद्विधेयं तत्कुरुष्व कमलासन ।
न विनानुग्रहं तस्याः शत्रुं जेतुं क्षमो भवेत् ।।२९।।
अप्यत्पवीर्यं सुमहान्महाबलपराक्रमः ।
सानुकूला जगन्माता यावत्कात्यायनी विधे ।।३०।।
तावज्जगदिदं सर्वं नाशयेद्यदि रावणः ।
तथापि तस्य किं कर्तुं क्षमोऽहं विश्वपालकः ।।३१।।

ब्रह्मोवाच—

सत्यमेव जगन्नाथ दुर्गाभक्तिपरायणः ।
नावसीदति दुष्टोऽपि कदाचिदपि भूतले ।।३२।।
तथाप्युपायो भगवन् विद्यते तस्य नाशने ।
तस्या एव जगत्सर्वं चराचरमिदं प्रभो ।।३३।।
तयैव सृष्टं काले तु तयैव परिपाल्यते ।
नाकाले जायते तस्या विनाशेच्छा जगत्पते ।।३४।।
त्वमहं वा महेशानः सृष्टिस्थितिलयेषु च ।
निमित्तमात्रं सैवैका कारणं तेषु वस्तुतः ।।३५।।
तस्या मूर्त्यन्तराः सर्वे वयं देवा जगत्पते ।
अस्मान् विद्विषतो रक्षां शाश्वतीं न करोति सा ।।३६।।

श्रीभगवानुवाच—

गच्छामि च त्वया सार्धं कैलासशिखरं विधे ।
प्रार्थयिष्यामि विश्वेशीं वधार्थं दुष्टचेतसः ।।३७।।
पौलस्त्यतनयस्यास्य रावणस्य दुरात्मनः ।।३८।।

श्रीमहादेव उवाच—

ततस्ते जग्मतुः शीघ्रं कैलासं मुनिसत्तम ।
यत्रास्ते सा जगद्धात्री शङ्करेण महात्मना ।।३९।।
तौ दृष्ट्वा तु समायातौ ब्रह्मविष्णू महेश्वरः ।
अभ्यर्च्यागमने हेतुं पप्रच्छ मुनिसत्तम ।।४०।।
ततस्तावूचतुः शीघ्रं वृत्तान्तं सकलं विभुम् ।
चेष्टितं राक्षसेन्द्रस्य चात्मनश्चाभिचेष्टितम् ।।४१।।
ततस्ते सहिता देवा ब्रह्मविष्णुमहेश्वराः ।
उपतस्थुर्महादेवीं पार्वतीं मुनिसत्तम ।।४२।।
दृष्ट्वा तां परमेशानीं सुप्रसन्नमुखाम्बुजाम् ।
प्रणेमुस्त्रिदशश्रेष्ठा दण्डवत्पतिता भुवि ।।४३।।

प्रणतान्वीक्ष्य सा देवी ब्रह्मादीन्कृपया क्षणात् ।
भूत्वा परा महादेवी रत्नसिंहासनस्थिता ॥४४॥

अष्टादशभुजा चारुहारशोभिकुचस्थला ।
प्रसन्नवदना चारुचन्द्रार्धकृतशेखरा ॥४५॥

सुचारुदशना स्मेररुचिरास्या त्रिलोचना ।
भूमेरुत्थाय भगवान् विष्णुस्तां जगदम्बिकाम् ॥४६॥

प्राञ्जलिः प्राह सद्भक्त्या रोमाञ्चितकलेवरः ॥४७॥

श्रीभगवानुवाच—

मातः पौलस्त्यतनयो रावणो राक्षसाधिपः ।
त्वदनुग्रहदर्पेण बाधते सकलं जगत् ॥४८॥

तेन देवाः सगन्धर्वा ब्रह्माणं शरणं गताः ।
ब्रह्मापि मां वधार्थाय तस्य देवि दुरात्मनः ॥४९॥

अवोचन्मानुषं देहं पृथिव्यां धारय प्रभो ।
मया प्रतिश्रुतं चैव तथैव जगदीश्वरि ॥५०॥

भूत्वा दाशरथिर्भूमौ हनिष्ये तं दुरासदम् ।
किन्तु त्वं सेवितानेन प्रत्यहं सुमहात्मना ॥५१॥

आराधितश्च भगवान्परमात्मा महेश्वरः ।
त्वं चापि परमप्रीत्या तस्य रक्षणकारणात् ॥५२॥

करोषि वसतिं तस्य पुरे त्रिदशवन्दिते ॥
समरे तु निहन्ता वा कथं त्रिदशकण्टकम् ॥५३॥

यस्य संरक्षणकरी त्वं तथासौ महेश्वरः ।
विशेषतस्त्वमेवासि स्वयं लङ्केश्वरी शिवे ॥५४॥

अतस्त्वं रक्षणार्थाय जगतोऽस्य जगन्मयि ।
यथा विधेयं तद्ब्रूहि नमस्ते जगदम्बिके ॥५५॥

श्रीदेव्युवाच—

पूजिता रावणेनाहं सुचिरं मधुसूदन ।
सत्यं वसामि लङ्कायां तस्य रक्षणकारणात् ॥५६॥

यथा मामर्चयेद्भक्त्या रावणः स महाबलः ।
महेशमपि सद्भक्त्या तथा प्राप्य च सम्पदः ॥५७॥

नचावशिष्टं विद्येत तस्य प्राप्यं सुदुर्लभम् ।
मनोरथश्च सम्पूर्णः सम्पूर्णतपसः फलम् ॥५८॥
आत्मनः स विनाशाय साम्प्रतं बलदर्पितः ।
बाधते सकलं विश्वं चराचरमिदं बलात् ॥५९॥
अहं हि निधने तस्य साम्प्रतं चिन्तये स्वयम् ।
निमित्तं यदि चाप्नोमि तदाहमपि पातये ॥६०॥
तं दुष्टं किन्तु नो साक्षात्स्वयं वा हन्तुमुत्सहे ।
भद्रं तु ब्रह्मणा प्रोक्तं याहि मानुषतां स्वयम् ॥६१॥
यतस्व तद्वधे चापि साहाय्यं ते करिष्यति ।
त्वयि मानुषतां जाते कमलापि मदंशजा ॥६२॥
मानुषं देहमाश्रित्य सम्भविष्यति भूतले ।
तां दृष्ट्वा चातिलोभेन हरिष्यति सुदुर्मतिः ॥६३॥
वीरः सुरतमोहेन मम मूर्त्यन्तरं बलात् ।
तस्यां लङ्कां प्रविष्टायां शिवस्यानुमते ध्रुवम् ॥६४॥
त्यक्ष्यामि लङ्कानगरीं विनाशाय दुरात्मनः ॥६५॥
मम मूर्त्यन्तर लक्ष्मीमवमंस्यति तां यदा ।
तदैव मम कोपेन स नाशं समवाप्स्यति ॥६६॥
त्यक्तायां तु मया तस्यां लङ्कायां मधुसूदन ।
वधार्थं तस्य दुष्टस्य रावणस्य दुरात्मनः ॥६७॥
त्वयि मानुषता याते सूर्यवंशे रघोः कुले ।
ब्रह्मपुत्रो वसिष्ठस्त्वां मन्त्रं प्रग्राहयिष्यति ॥६८॥
तन्मन्त्रं समरे तात स्मरिष्यसि सुगोपितम् ।
रक्षार्थमात्मनश्चापि रावणस्य वधाय च ॥६९॥
न तदा तेन निःक्षिप्ता अपि बाणाः सुदारुणाः ।
त्वां भेत्स्यन्ति रणे घोरे कदाचिन्मधुसूदन ॥७०॥
तस्मिन्बाणप्रहरणे स्मर्तव्याहं महामते ।
संहारकारिणी नित्यं ततस्ते विजयो भवेत् ॥७१॥
मत्प्रसादात्सुदुर्लङ्घ्यं समुद्रमपि हेलया ।
उत्तीर्य वानरैः सार्धं लङ्कामेष्यसि निश्चितम् ॥७२॥
ब्रह्मोपदेशतस्तात शरत्काले विधानतः ।
समुद्रतीरे कृत्वा तु मृण्मयीं प्रतिमां शुभाम् ॥७३॥

मां प्रपूज्य विधानेन वेदोक्तेन जनार्दन ।
पातयिष्यसि दुर्धर्षं रथाद्धेमपरिष्कृतात् ॥७४॥
तं हत्वा समरे वीरं सपुत्रगणबान्धवम् ।
लङ्काजयीति सुख्यातिं मत्प्रसादादवाप्स्यसि ॥७५॥
तस्मान्मानुषतां याहि द्रुतं त्वं मधुसूदन ।
वधाय राक्षसेन्द्रस्य रावणस्य दुरात्मनः ॥७६॥

श्रीभगवानुवाच—

त्वयि तस्य दृढा भक्तिस्त्वां च स्मरति भक्तितः ।
कथं त्यक्ष्यसि तं लङ्कामातस्त्वं करुणामयि ॥७७॥
संकटेऽपि स दुर्धर्षस्त्वां स्मरिष्यति भक्तितः ।
तत्कथं तं हनिष्यामि तन्मे वद सुरेश्वरि ॥७८॥
ये त्वां स्मरन्ति ताञ्शंभुस्तथाहं शमनोऽपि च ।
सायुधाश्चानुसंगम्य संरक्षामो महाभये ॥७९॥
तत्कथं संस्मरन्तं त्वां समरे रावणं शिवे ।
स्वरक्ष्यं संहनिष्यामि त्वद्भूक्तं परमेश्वरि ॥८०॥

श्रीपार्वती उवाच—

सत्यमेव महाबाहो समरे मां स्मरिष्यति ।
तथापि स यथा मृत्युं समवाप्स्यति तच्छृणु ॥८१॥
ममैवैतज्जगत्सर्वं जगद्रूपाहमेव हि ।
एतस्य पीडनेनैव जायते मम पीडनम् ॥८२॥
एतत्प्रपीडयन्भक्त्या यो मां स्मरति सङ्कटे ।
नैहिकं हि फलं तस्य किन्तु पारत्रिकं भवेत् ॥८३॥
अविद्विषन् जगत्सर्वं यो मां स्मरति भावतः ।
तस्याहं रक्षणकरी परत्रेह च सर्वदा ॥८४॥
यूयं च तस्य रक्षायै यतिष्यथ महामते ।
स तु यन्मां महाभीमः संस्मरिष्यति सङ्कटे ॥८५॥
तस्मै तद्विफलं विद्धि यन्मोक्षं समवाप्स्यति ।
इह भुक्त्वा परं भोगं यथाभिलषितं चिरम् ॥८६॥
परत्र मोक्षं परमं समेष्यति सुदुर्लभम्
किमितो देहिनामस्ति फलं वा मधुसूदन ॥८७॥

मयि लङ्कापुरे तस्य स्थितायां न दुरासदः ।
समेष्यति रणे मृत्युं तेन त्यक्ष्यामि तां पुरीम् ॥८८॥
रक्षिष्यामि न वै युद्धे जगत्पीडनकारणात् ।
तस्मान्मानुषतां याहि महेशं प्रणिपत्य च ॥८९॥

श्रीमहाभागवते उपपुराणे श्रीभगवतीनारायण संवादवर्णनं नाम षट्त्रिंशत्तमोऽध्यायः

सप्तत्रिंशत्तमोऽध्यायः

श्रीमहादेव उवाच—

इति देव्या वचः श्रुत्वा भगवान्मधुसूदनः ।
प्रणिपत्य मुहुर्भक्त्या हर्षोत्फुल्लविलोचनः ॥१॥
महेशं वचनं प्राह सार्धं कमलयोनिना ॥२॥

श्रीभगवानुवाच—

देवदेव जगन्नाथ देवी भगवती स्वयम् ।
यथा प्राह समक्षं ते तत्सर्वं श्रुतवानसि ॥३॥
इदानीं यत्त्वया कार्यं साहाय्यं मम शङ्कर ।
तद्ब्रूहि त्वं महेशान वधार्थं तस्य दुर्मतेः ॥४॥

शिव उवाच—

अहं वानररूपेण सम्भूय पवनात्मजः ।
साहाय्यं ते करिष्यामि यथोचितमरिन्दम ॥५॥
उल्लङ्घ्य सागरं घोरं समन्विष्य च तेऽङ्गनाम् ।
प्रीतिं ते जनयिष्यामि सर्वदा मधुसूदन ॥६॥
अन्यच्चापि महत्कर्म करिष्यामि सुदारुणम् ।
त्रैलोक्यदुष्करं विष्णो तव प्रीतिविवर्धनम् ॥७॥
मयि लङ्कां प्रविष्टे तु सूक्ष्मवानररूपिणि ।
लङ्केश्वरी स्वयं लङ्कां परित्यक्ष्यति निश्चितम् ॥८॥
इति ते यन्मया कार्यं साहाय्यं तत्प्रतिश्रुतम् ।
ब्रह्मणे भवतः प्रीत्यै किं करिष्यति याच तत् ॥९॥

श्रीमहादेव उवाच—

इत्युक्तः शम्भुना विष्णुः स्मृत्वा कमलसम्भवम् ।
अवैक्षत महाबाहुर्हर्षनिर्भरमानसः ॥१०॥
ततो ब्रह्मापि विज्ञाय विष्णोरीप्सितमेव हि ।
प्रहस्य वचनं प्राह नारायणमनामयम् ॥११॥

ब्रह्मोवाच—

अहं तव सहायार्थमृक्षयोनौ निजांशतः ।
सम्भूतोस्मि पुरा देव महाबलपराक्रमः ॥१२॥
दास्यामि मन्त्रणां तुभ्यं शुभां तव हिते रतः ॥१३॥
धर्मः स्वयं तु सञ्जातो लङ्कायां हि विभीषणः ।
भ्राता राक्षसराजस्य रावणस्य दुरात्मनः ॥१४॥
सोऽपि तं सम्परित्यज्य त्वत्सहायो भविष्यति ।
गच्छ मानुषतां देव रक्ष विश्वं चराचरम् ॥१५॥

श्रीमहादेव उवाच—

एवं स भगवान्विष्णुः सम्प्रार्थ्य परमेश्वरीम् ।
पृथिव्यां जन्म सम्प्राप्तो राज्ञो गेहे महात्मनः ॥१६॥
स्वयं दशरथस्यैकश्चतुर्धा मुनिसत्तम ।
रामश्च लक्ष्मणश्चैव भरतश्च महाबलः ॥१७॥
शत्रुघ्नो रूपसौन्दर्यशालिनस्ते महाबलाः ।
श्रीरामभरतौ तत्र श्यामौ दूर्वादलप्रभौ ॥१८॥
लसत्कनकगौराङ्गौ द्वौ तदन्यौ महामते ।
रामस्यानुगतो नित्यं लक्ष्मणो लक्षणान्वितः ॥१९॥
भरतस्य तु शत्रुघ्नो बाल्यावधि महामुने ।
लक्ष्मीश्चापि समुद्भूय क्षितौ परमसुन्दरी ॥२०॥
स्थित्वा जनकराजस्य गेहे कन्यास्वरूपिणी ।
तथा ब्रह्मा निजांशेन बभूव पृथिवीतले ॥२१॥
ऋक्षयोनौ महाबुद्धिर्जाम्बवानिति विश्रुतः ।
महेशश्च तथांशेन भूत्वा पवननन्दनः ॥२२॥
हनुमानिति विख्यातो महाबलपराक्रमः ।
किष्किन्धायां स्थितो वीरो मन्त्री वानरभूपतेः ॥२३॥

तथैवान्ये च त्रिदशा ऋक्षवानररूपतः ।
संस्थिताः कानने विष्णुं प्रतीक्षन्तो महामते ॥२४॥

श्रीमहाभागवते उपपुराणे श्रीरामावतारचरित्र-
वर्णनं नाम सप्तत्रिंशत्तमोऽध्यायः

अष्टत्रिंशत्तमोऽध्यायः

श्रीमहादेव उवाच—

अथ तं रामचन्द्रं च भरतं लक्ष्मणं तथा ।
शत्रुघ्नं च महाबाहुं वसिष्ठो मुनिसत्तमः ॥१॥
सर्वान्वै दीक्षयामास देव्या मन्त्रेण नारद ।
बभूवुस्तेऽपि चत्वारः सर्वशास्त्रार्थपारगाः ॥२॥
अथैकदा समागत्य विश्वामित्रो महामुनिः ।
मखसंरक्षणार्थाय श्रीरामं सहलक्ष्मणम् ॥३॥
आनयत्स तपोरण्ये सम्प्रार्थ्य पितरं तयोः ।
तत्र गत्वा महाबाहुस्ताडकां घोरराक्षसीम् ॥४॥
निहत्य च मुनेस्तुष्टादस्त्राणि समवाप ह ।
ततो गत्वा महारण्ये मखविघ्नकरं मुने ॥५॥
सुबाहुमदहत्क्षिप्त्वा बाणमेकं महाबलः ।
अपरेणैकबाणेन मारीचं युद्धदुर्मदम् ॥६॥
सागरे प्राक्षिपद्रामः स्वबाहुबलदर्पितः ।
ततस्तेन मुनीन्द्रेण सार्धं स रघुनन्दनः ॥७॥
मिथिलां प्रययौ क्षिप्रं विमोच्य ब्रह्मणः सुताम् ।
ततो जनकराजस्य पुरीं गत्वा महाबलः ॥८॥
बभञ्ज धनुरत्युग्रं महेशस्य महामुने ।
ततः स राजा सन्तुष्टो वृद्धं दशरथं नृपम् ॥९॥
सपुत्रं पुरमानीय महोत्सवपुरःसरम् ।
तत्सुतेभ्यश्चतुर्भ्यश्च चतस्रः कन्यका ददौ ॥१०॥

रामाय प्रददौ सीतां लक्ष्मणायोर्मिलां ददौ ।
भरताय सुतां प्रादान्माण्डवीं मुनिपुङ्गव ॥११॥
शत्रुघ्नाय ददौ कन्यां श्रुतकीर्तिं शुभाननाम् ।
तासां सीता तु सम्प्राप्ता यज्ञभूमिविशोधने ॥१२॥
ऊर्मिलौरससम्भूता द्वे परे भ्रातृकन्यके ॥१३॥
अथातः परिसङ्गृह्य चत्वारो भ्रातरश्च ते ।
पित्रा सह ययुः शीघ्रं पुरं प्रति महामते ॥१४॥
पथि तत्र समायातो भार्गवो बलदर्पितः ।
तस्य सञ्चूर्णयामास महादर्पं महाबलः ॥१५॥
ततः पुरं समागत्य रामराज्याभिषेचने ।
उद्योगमकरोद्राजा सहामात्यैर्महामते ॥१६॥
अत्राभवन्मुनिश्रेष्ठ त्रिदशा विघ्नकारिणः ।
ययाचे केकयी तं वै राज्यं पुत्रस्य कारणात् ॥१७॥
रामस्य वनवासं च चतुर्दशसमा इति ।
सत्यसन्धो दशरथस्तस्यै तं च वरं ददौ ॥१८॥
तेन राज्यं परित्यज्य सीतया लक्ष्मणेन च ।
प्रतस्थे दण्डकारण्यं रामः सत्यपराक्रमः ॥१९॥
प्रणम्य पितरौ भक्त्या वसिष्ठं च गुरुं मुने ।
संध्याय चेतसा देवीं प्रणिपत्य पुनः पुनः ॥२०॥
रावणस्य वधार्थाय यात्रां चक्रे रघूद्वहः ।
दशम्यां शुक्लपक्षस्य इषस्य मुनिसत्तम ॥२१॥
राजा पुत्रवियोगार्तो मुक्तकण्ठो रुरोद ह ।
सुमन्त्रेणान्वितो रामो रथमारुह्य नारद ॥२२॥
सानुजः सीतया सार्धं स्वपुरान्निर्जगाम सः ।
पौराश्च शोकदुःखार्ता अनुजग्मुस्तमेव हि ॥२३॥
तांस्त्यक्त्वा तु समागत्य शृङ्गवेरपुरं ततः ।
सुमन्त्रं सरथं रामो विससर्ज महामतिः ॥२४॥
तत्र कृत्वा जटा रामो लक्ष्मणेन समन्वितः ।
सीतया नावमारुह्य गङ्गामुत्तीर्य नारद ॥२५॥
भरद्वाजाश्रमं प्रायाच्चित्रकूटं ततो ययौ ।
राजा दशरथः श्रुत्वा सुमन्त्रस्य मुखान्मुने ॥२६॥

वनप्रवेशं रामस्य दुःखात्प्राणान्मुमोच ह ।
भरतस्तु समागत्य मातुलस्य गृहात्ततः ॥२७॥
कृत्वोर्ध्वदैहिकं राज्ञो मातरं भर्त्सयन्मुहुः ।
सामात्यः सानुजः प्रायाद्रामचन्द्रस्य सन्निधिम् ॥२८॥
स तन्निवर्तने यत्नमकरोद्भूरतस्तदा ।
तदनादृत्य रामोऽगाद्देवकार्यस्य सिद्धये ॥२९॥
सुघोरं दण्डकारण्यं सान्त्वयन्भरतं मुहुः ।
ततस्तदाज्ञया सोऽपि भरतो विनिवर्तितः ॥३०॥
सानुजः संस्थितो नन्दिग्रामे परिजनैर्वृतः ।
भूमिशायी जटाधारी राजभोगविवर्जितः ॥३१॥
चिन्तयन् चेतसा रामं चतुर्दशसमा मुने ।
प्रतीक्ष्य रामचन्द्रस्य राज्ये प्रत्यागमं पुनः ॥३२॥
रामस्तु दण्डकारण्ये विराधं घोररूपिणम् ।
हत्वा राक्षसनाशाय कियत्कालमुवास ह ॥३३॥
निर्माय पर्णशालां तु पञ्चवट्यां महामते ॥३४॥
तत्र शूर्पणखानाम्नी राक्षसी कामरूपिणी ।
समेत्य राघवं कर्तुं पतिमैच्छत्स्मरातुरा ॥३५॥
तां ज्ञात्वा राक्षसीं दुष्टां लक्ष्मणो भ्रातृशासनात् ।
चिच्छेद कर्णौ नासां च खड्गेन मुनिपुङ्गव ॥३६॥
ततः सा रुदती गत्वा भ्रातरौ खरदूषणौ ।
उवाच वचनं क्रुद्धा राक्षसी भीमरूपिणी ॥३७॥

शूर्पणखोवाच—

अयोध्याधिपतिः श्रीमान् रामो भ्रात्रा सह स्वयम् ।
आगतो दण्डकारण्ये श्यामो दूर्वादलप्रभः ॥३८॥
तस्याङ्गनापि तेनैव सार्धं तत्र समागता ।
सा यथा रूपसौन्दर्यशालिनी न तथा क्वचित् ॥३९॥
स्वर्गे मर्त्ये च पाताले कैश्चिद्दृष्टं न च श्रुतम् ।
त्वदर्थं तामानयन्त्या भ्राता तस्यानुजो मम ॥४०॥
चिच्छेद कर्णौ नासां च तेन याता त्वदन्तिकम् ॥४१॥

श्रीमहादेव उवाच—

इति तस्या वचः श्रुत्वा राक्षसौ खरदूषणौ ।
राक्षसानां परिवृतौ चतुर्दशसहस्रकैः ॥४२॥
जग्मतुः कानने तत्र यत्रास्ते रघुनन्दनः ।
तान् जघान शरव्रातै रामचन्द्रः समागतान् ॥४३॥
ततः शूर्पणखा गत्वा लङ्कायां शोकविह्वला ।
वृत्तान्तं कथयामास रावणाय महामते ॥४४॥
स तस्या वचनं श्रुत्वा सीताया रूपमुत्तमम् ।
गुण्ठितः कालपाशेन तां हर्तुं मतिमादधे ॥४५॥
ततः सहायं कृत्वा तु मारीचं ताडकासुतम् ।
तां हर्तुकामः प्रययौ काननं तं स रावणः ॥४६॥
मारीचस्तु विनिश्चित्य श्रीरामान्मृत्युमात्मनः ।
मायास्वर्णमृगो भूत्वाऽनयद्रामं सुदूरतः ॥४७॥
रामस्तं प्राहिणोद्बाणं तेन विद्धः स राक्षसः ।
पपात धरणीपृष्ठे लक्ष्मणेति वदन्मुने ॥४८॥
तन्मत्वा रामचन्द्रस्य भाषितं जनकात्मजा ।
सद्यः प्रस्थापयामास रामं प्रति च लक्ष्मणम् ॥४९॥
एतस्मिन्नन्तरे सोऽपि समागत्य दशाननः ।
जहार जानकीं लक्ष्मीदेव्या मूर्त्यन्तरं बलात् ॥५०॥
तदैव भस्मसात्कर्तुं समर्थापि सुरेश्वरी ।
नाकरोत्प्रार्थिता यस्माद्देवीरूपेण सा सदा ॥५१॥
रक्षसा नीयमानां तां जटायुः पक्षिपुङ्गवः ।
त्रातुकामोऽकरोद्युद्धं रावणेन दुरात्मना ॥५२॥
स तस्य पक्षौ छित्त्वा तां बलाद्राक्षसपुङ्गवः ।
गृहीत्वा प्रययौ लङ्कां रात्रौ देवर्षिसत्तम ॥५३॥
अशोककानने रम्ये स्थापयामास तां सतीम् ।
न धर्षितुमभूच्छक्तो ज्वलदग्निसमप्रभाम् ॥५४॥
एवं भगवती देवी भवकाले शुभप्रदा ।
स्वयं लङ्केश्वरी देवी ह्यन्तर्धातुं मनो दधे ॥५५॥

श्रीमहाभागवते उपपुराणे श्रीजानकीहरणं नामाष्टत्रिंशत्तमोऽध्यायः

एकोनचत्वारिंशत्तमोऽध्यायः

श्रीमहादेव उवाच—

रामस्तु हत्वा मारीचं लक्ष्मणेन समन्वितः ।
आगत्य पर्णशालायां नापश्यत्तत्र जानकीम् ॥१॥
बभ्राम कानने तत्र रुदन् सीतामनुस्मरन् ।
तत्र दृष्ट्वा पतङ्गेशं जटायुं छिन्नपक्षतिम् ॥२॥
सीतापहारिणं मत्वा हन्तुकामोऽन्तिकं ययौ ।
ततस्तमपि विज्ञाय सखायं पितुरात्मनः ॥३॥
न प्राहिणोच्छरं तत्र रामः सत्यपराक्रमः ।
ततः स उक्त्वा रामाय रावणेन हृतां प्रियाम् ॥४॥
परित्यज्य दिवं प्रायात्प्राणान् रामस्य पश्यतः ।
ततस्तमपि दग्ध्वा च कानने तत्र राघवः ॥५॥
हत्वा कबन्धं प्रययावृष्यमूकं महामते ।
यत्र वालीभयादास्ते सुग्रीवः सूर्यनन्दनः ॥६॥
हनुमत्प्रमुखैर्वीरैश्चतुर्भिर्मन्त्रिसत्तमैः ।
तत्र सख्यं स कृत्वा तु सुग्रीवेण महात्मना ॥७॥
निहत्य समरे वीरं वालिनं भीमविक्रमम् ।
राज्याभिषेचनं चक्रे सुग्रीवस्य महामते ॥८॥
ततो व्यतीत्य वर्षां स स्थित्वा माल्यवति प्रभुः ।
आनाय्य वानरं सैन्यं विपुलं मुनिसत्तम ॥९॥
सीतान्वेषणकार्यार्थं दूतान् प्रास्थापयद्भुवि ।
चतुर्दिक्षु ययुस्तेऽपि सीतान्वेषणतत्पराः ॥१०॥
तत्र याता दिशं यामीं हनूमदङ्गदादयः ।
जाम्बवत्प्रमुखाश्चापि महाबलपराक्रमाः ॥११॥
ते सम्पातिमुखाच्छ्रुत्वा सविशेषं महामते ।
समुद्रलङ्घनायाशु मन्त्रयामासुरेव हि ॥१२॥
अथर्क्षाधिपतेर्वाक्याद्धनुमान्भीमविक्रमः ।
उल्लङ्घ्य सागरं घोरं शतयोजनविस्तृतम् ॥१३॥
सायं प्रविश्य लङ्कायां रात्रौ च व्यचरत्पुरीम् ।
अन्वेषयञ्जनकजां सप्तरात्राणि मारुतिः ॥१४॥

अशोकवनिकामध्ये तां ददर्श शुभाननाम् ।
ततश्चिकीर्षुरत्यन्तं दुष्करं कर्म मारुतिः ॥१५॥
सस्मार पूर्ववृत्तान्तं देव्या युद्धं कृतं पुरा ।
तत आरुह्य वृक्षाग्रं देव्या मन्दिरमद्भुतम् ॥१६॥
दिदृक्षुर्दिक्षु सर्वत्र स दृष्टि प्राहिणोत्तदा ।
तथापश्यत्स ऐशान्यां मन्दिरं सुमनोहरम् ॥१७॥
मणिमाणिक्यरचितं शुद्धहेमपरिष्कृतम् ।
सिंहध्वजं च तस्याग्रे दृष्ट्वा पवननन्दनः ॥१८॥
चकार निश्चयं देव्या मन्दिरं चैतदेव हि ।
ततस्तन्मन्दिरद्वारं गत्वाऽपश्यत्सुरेश्वरीम् ॥१९॥
नृत्यन्तीं प्रहसन्तीं च सहितां योगिनीगणैः ।
तां प्रणम्य महादेवीं प्रावृत्य पवनात्मजः ॥२०॥
उवाच त्रिजगद्वन्द्यां भक्त्या परमया युतः ॥२१॥

हनुमानुवाच—

देवि प्रसीद विश्वेशि रामस्यानुचरोऽस्म्यहम् ।
अन्वेष्टुं जानकीं लक्ष्मीं लङ्कायां समुपागतः ॥२२॥
त्वयैव प्रेरितो विष्णुर्मनुजत्वमुपागमत् ।
वधार्थं राक्षसेन्द्रस्य रावणस्य दुरात्मनः ॥२३॥
शिवोऽहमपि सम्भूय वानरोऽत्र समागतः ।
कर्तुं रामस्य साहाय्यं तवाज्ञावशतः शिवे ॥२४॥
त्वयैवैतत्पुरा प्रोक्तं लङ्कायामागते त्वयि ।
संत्यज्य नगरीमेनां प्रस्थास्ये स्वनिवेशनम् ॥२५॥
तस्मात्त्यज पुरीमेनां रावणं सुदुरासदम् ।
पातयस्व महादेवि रक्ष विश्वं चराचरम् ॥२६॥

श्रीदेव्युवाच—

सीतावमाननेनापि रुष्टाहं वानरर्षभ ।
लङ्कात्यागमतिं पूर्वमकार्षं पुरुषर्षभ ॥२७॥
त्वद्वाक्यापेक्षयाद्यापि स्थिताहं रावणालये ।
त्यजाम्येतां पुरीं लङ्कां त्वयोक्ता कपिपुङ्गव ॥२८॥

श्रीमहादेव उवाच—

इत्युक्त्वा सा महादेवी लङ्कां त्यक्त्वा महेश्वरी ।
अन्तर्दधे मुनिश्रेष्ठ सहसा तस्य पश्यतः ॥२९॥

ततो बभञ्ज गहनं राक्षसेन्द्रेण पालितम् ।
अशोकवृक्षसङ्घातं मारुतिः क्रोधमूर्च्छितः ॥३०॥

तच्छ्रुत्वा रावणः क्रोधाद्राक्षसान्सुबहूंस्तदा ।
अक्षाह्वं तनयं चापि प्रेषयामास नारद ॥३१॥

तं जघान महाबाहुर्हनुमान् सुमहाबलः ।
वृक्षैराताड्य समरे स्वयमुत्पाटितैर्बलात् ॥३२॥

ततो विरूपं तं कर्तुं रावणो राक्षसाधिपः ।
लाङ्गूलं वाससा बद्ध्वा दत्त्वा वह्निं स दीपयत् ॥३३॥

ततः स मारुतिर्वीरो वह्निना तेन नारद ।
लङ्कां दग्ध्वा समुल्लङ्घ्य पुनस्तं सरितां पतिम् ॥३४॥

सम्प्राप तीरं यत्रैव सन्ति तेऽप्यङ्गदादयः ।
ततश्च समुपागम्य जाम्बुवत्प्रमुखैर्वृतः ॥३५॥

भुक्त्वा मधुवनं राज्ञो ययौ रामस्य सन्निधिम् ।
तं दृष्ट्वा रामचन्द्रस्तु दूरतो मुनिसत्तम ॥३६॥

पप्रच्छ जानकीं चाथ हनुमांस्तुष्टमानसः ।
ततः सर्वं यथावृत्तं राघवाय न्यवेदयत् ॥३७॥

ततः स राघवश्चापि समस्तैर्वानरैर्वृतः ।
दशम्यां शुक्लपक्षस्य श्रावणे मासि निर्ययौ ॥३८॥

वधार्थं राक्षसेन्द्रस्य रावणस्य महामते ।
स्थितः परिवृतः सर्वैः ससैन्यैर्वानरर्षभैः ॥३९॥

एतस्मिन्नेव काले तु रावणो राक्षसाधिपः ।
आहूय मन्त्रिणः सर्वान्मन्त्राय समुपाविशत् ॥४०॥

तत्रोवाच महाबुद्धिः सर्वमन्त्रविदां वरः ।
बिभीषणो दशास्यं तु वारयन् सर्वतो रणे ॥४१॥

सीतां त्यक्तुं मुहुः प्राह राघवस्य पराक्रमम् ।
तच्छ्रुत्वा रावणः क्रुद्धस्तं पदाऽताडयन्मुने ॥४२॥

ततः क्रुद्धः स्वयं धर्मस्वरूपोऽयं बिभीषणः ।
चतुर्भिर्मन्त्रिभिः प्रायाद्रामचन्द्रस्य सन्निधिम् ॥४३॥

श्रीमहाभागवते उपपुराणे रावणमन्त्रणावर्णनं नामैकोनचत्वारिंशत्तमोऽध्यायः

चत्वारिंशत्तमोऽध्यायः

श्रीमहादेव उवाच—

विभीषणमशेषेण ज्ञात्वा तु शरणार्थिनम् ।
सख्यं कृत्वा महाबाहुर्लङ्काराज्येऽभ्यषेचयत् ॥१॥

ततस्तितीर्षुर्जलधिं रामस्तं वानराधिपम् ।
सुग्रीवं वचनं प्राह जिज्ञासुर्बलविक्रमम् ॥२॥

स आह भगवंस्त्वं तु मा चिन्तां कर्तुमर्हसि ।
समुद्रं शोषयिष्यामि सेतुं चोत्पाट्य भूधरान् ॥३॥

रचयिष्ये महासिन्धौ तेन पारं गमिष्यसि ।
तच्छ्रुत्वा सम्प्रहृष्टात्मा रामः सत्यपराक्रमः ॥४॥

चक्रे जलनिधिं घोरं स्वयंस्वीकृतबन्धनम् ।
ततः सुग्रीववचनादुत्पाट्योत्पाट्य भूधरान् ॥५॥

रचयामास जलधौ सेतुं मयसुतो नलः ।
आरभ्य पौर्णमास्यां तु श्रावण्यां मुनिसत्तम ॥६॥

यामद्वयेन वै सेतुं सागरे वानरर्षभः ।
बबन्ध मुनिशार्दूल सर्वलोकसुदुष्करम् ॥७॥

ततस्तु रावणः श्रुत्वा सेतुबन्धं महाम्बुधौ ।
भयं मोहं च सम्प्राप्य चकम्पे च मुहुर्मुहुः ॥८॥

ततः परिवृतो रामो वानरैश्च महाबलैः ।
कोटिलक्षैर्महाबाहुर्लक्ष्मणेन समन्वितः ॥९॥

त्रयोदश्यां तु कृष्णायां लङ्कां प्राप महामते ।
वेष्टिता वानरैर्लङ्का समन्ताद्भीमविक्रमैः ॥१०॥

जले स्थले च प्राकारे वृक्षेषु गृहमध्यतः ।
चत्वरेषु गोपुरेषु वनेषूपवनेषु च ॥११॥

नासीद्वानरशून्यं तु स्थलं किञ्चिन्महामते ।
ततो युयुत्सुर्भगवान् चिन्तयामास चेतसा ॥१२॥

पूजार्थं भगवत्यास्तु लङ्काविजयहेतवे ।
अकालेऽहं महादेवीं पूजयामि सुरेश्वरीम् ॥१३॥

निद्रिता त्रिजगन्माता साम्प्रतं दक्षिणायने ।
एवं विचिन्त्य भगवान् रामो नारायणोऽव्ययः ॥१४॥

चकार बुद्धिं तां यष्टुं पितॄरूपां सनातनीम् ।
सैव देवी महामाया पक्षेऽस्मिन् पितॄरूपिणी ॥१५॥

प्रवृत्तोऽपरपक्षश्च प्रतिपत्तिथिरप्यतः ।
अद्यारभ्य महादेवीं पितॄरूपां जयप्रदाम् ॥१६॥

पार्वणेनैव विधिना यावद्दर्शदिने दिने ।
सम्पूज्य समरे योत्स्ये शत्रूणां निधनाय वै ॥१७॥

एवं निश्चित्य मनसा लङ्कायां प्राह सादरः ।
करिष्ये पार्वणश्राद्धमपराह्णेऽद्य भक्तितः ॥१८॥

ततस्तु प्रतियोत्स्यामि समरे राक्षसाधिपम् ।
तच्छ्रुत्वा सर्व एवाहुर्वानरा रघुवंशजम् ॥१९॥

भक्त्या पूजय सद्भावैः पितॄन् विधिविदां वर ।
जयार्थं समरे देव विधानज्ञस्त्वमेव हि ॥२०॥

ततः प्रवृत्ते काले तु रामः सत्यपराक्रमः ।
चकार पार्वणश्राद्धं देवीं सम्भाव्य चेतसा ॥२१॥

तस्मिन्नेव दिने युद्धमारब्धं राक्षसैः सह ।
पश्चिमां दिशमाक्रम्य तमसाप्ते दिवाकरे ॥२२॥

उद्योगो रामचन्द्रस्य रावणस्य च संयुगे ।
यादृशोऽभूत्तथा कश्चिन्न दृष्टो न श्रुतोऽपि वा ॥२३॥

रावणः प्रेषयामास चतुरङ्गबलान्वितम् ।
अकम्पनं महावीरमक्षौहिण्या तु सेनया ॥२४॥

प्रथमेऽहनि युद्धार्थं तं तस्मिन् दिवसे मुने ।
मारुतिः समरे क्रुद्धः प्राहिणोद्यमसादनम् ॥२५॥

एवं भक्त्या राघवस्तु श्राद्धं कृत्वा दिने दिने ।
प्रीणयन्परमेशानीं पातयामास राक्षसान् ॥२६॥

निहते कम्पनाख्ये तु धूम्राक्षः सेनया वृतः ।
दशाननाज्ञयाऽऽगत्य प्राकरोद्युद्धमुल्बणम् ॥२७॥

तं जघान रणे वीरं द्वितीयेऽहनि राघवः ।
तथान्येषु सुघोरेषु निहतेषु महाहवे ॥२८॥
मातुलो राक्षसेन्द्रस्य प्रहस्तो युद्धमाययौ ।
रात्रौ समभवद्युद्धं तेन सार्धं दुरासदम् ॥२९॥
सुरासुरनराणां च दैत्यानां भयदायकम् ।
तस्य नादेन घोरेण कम्पितास्त्रिदशेश्वराः ॥३०॥
युद्धसंदर्शनं त्यक्त्वा दिगन्तं समुपागमन् ।
एवं तमपि दुर्धर्षं तस्मिन् रात्रौ महाबलम् ॥३१॥
समरे पातयामास शेषयामे महामतिः ।
तच्छ्रुत्वा राक्षसेन्द्रोऽपि रुरोद बहुदुःखितः ॥३२॥
तं सान्त्वयन्ययौ युद्धे मेघनादः प्रतापवान् ।
अतर्कितः समागत्य रात्रौ गगनमास्थितः ॥३३॥
घोरेण नागपाशेन स बबन्ध रघूत्तमौ ।
समस्तैर्वानरैः सार्धं भल्लूकैश्च महामते ॥३४॥
मोहयन्मायया वीरो राक्षसेन्द्रसमो बली ।
बिभीषणः समागत्य ततस्तु रघुनन्दनम् ॥३५॥
बोधयामास रात्रौ स तस्मिन्नेव क्षणे पुनः ।
ततः प्रबुद्धो भगवान्प्रीतः परमभक्तितः ॥३६॥
सस्मार देवीं शर्वाणीं महाभयविनाशिनीम् ।
तत आगत्य गरुडो मोचयामास बन्धनात् ॥३७॥
भक्षन् पाशं महाघोरं राघवौ सह सैनिकैः ॥३८॥
ततः प्रभाते तच्छ्रुत्वा रावणः स्वयमागतः ।
अकरोत्तुमुलं युद्धं सर्वलोकभयावहम् ॥३९॥
रावणं समरे वीक्ष्य कालान्तकयमोपमम् ।
समकम्पन्त सर्वे तु वानरा भयमोहिताः ॥४०॥
अभवत्तुमहद्युद्धं रामेण च महात्मना ।
तस्मिन्निपातिता वीरा दशकोटिसहस्रशः ॥४१॥
अथ तं समरे क्रुद्धो रामो राजीवलोचनः ।
निक्षिप्य शरजालानि छादयामास वै मुने ॥४२॥
आनीय गिरिशृङ्गाणि कोटयो वानरा अपि ।
चिक्षिपुः समरे तस्य रथोपरि दुरात्मनः ॥४३॥

वृक्षैः शालप्रियालाद्यैस्तथान्यैर्वनजैरपि ।
ताडितः समरे वीरो महापर्वतसन्निभः ॥४४॥
हनूमदङ्गदाद्यैश्च महाबलवलीमुखैः ।
प्रक्षिप्तैः पर्वतैश्चापि शतशोऽथ सहस्रशः ॥४५॥
बभूव रावणो युद्धे विरथो मुनिपुङ्गव ॥४६॥
प्रहसन्तौ रणे वीरौ चन्द्रसूर्यसमप्रभौ ।
भ्रातरौ राघवौ सङ्ख्ये महाबलपराक्रमौ ॥४७॥
धनुरुद्यम्य वेगेन यमदण्डोपमैः शरैः ।
छादयामासतुर्वीरौ रावणं युद्धदुर्मदम् ॥४८॥
कपीनां किलकिलाशब्दैर्धनुषां च विनिःस्वनैः ।
रक्षसां घोरशब्दैश्च रथनेमिस्वनैरपि ॥४९॥
गजानां बृंहितैस्तद्वद्वाजिनामपि हेषितैः ।
अकालप्रलयं सर्वे मेनिरे प्राणिनो मुने ॥५०॥
आच्छादितश्च समभूत्समरे राक्षसाधिपः ।
प्रक्षिप्तैर्बाणसङ्घैश्च पर्वतैश्च महत्तरैः ॥५१॥
ततः सन्त्यज्य समरं रावणो भयविह्वलः ।
प्रविवेश पुरीं रम्यां सङ्ग्रामे क्षतविक्षतः ॥५२॥

इति श्रीमहाभागवते उपपुराणे रावणयुद्धभङ्गवर्णनं नाम चत्वारिंशत्तमोऽध्यायः

एकचत्वारिंशत्तमोऽध्यायः

श्रीमहादेव उवाच—

एवं पराजितः सङ्ख्ये रावणो राक्षसाधिपः ।
बोधयामास युद्धार्थं कुम्भकर्णं महाबलम् ॥१॥
कोटीनां पञ्चभिर्लक्षै राक्षसैः परिवारितः ।
स कुम्भकर्णः समरे समसज्जत दुर्जयः ॥२॥
एतस्मिन्नन्तरे देवा भीताः सर्वे महामते ।
मन्त्रणार्थं महाबुद्धिः सर्वलोकेश्वरः प्रभुः ॥३॥

ब्रह्माणमागतं वीक्ष्य सहितं सर्वदेवतैः ।
सम्पूज्य वचनं प्राह भगवान्पुरुषोऽव्ययः ॥४॥

श्रीराम उवाच—

कथं जयेऽहं सङ्ग्रामे राक्षसान्युद्धदुर्मदान् ।
रावणप्रमुखान्वीरान्महाबलपराक्रमात् ॥५॥
तन्मे वद सुरश्रेष्ठ भयं मे जायते महत् ।
रावणस्य यथा सङ्ख्ये तं बाहुबलविक्रमम् ॥६॥
अनुभूतोऽस्मि बहुधा जगत्प्लवनकारणम् ।
तथा कस्यापि नो मन्ये विद्यते भुवनत्रये ॥७॥
साम्प्रतं श्रूयते तस्य भ्राता राक्षसपुङ्गवः ।
समायास्यति सङ्ग्रामे महाबलपराक्रमः ॥८॥
कोटीनां पञ्चभिर्लक्षैः राक्षसैः परिवारितः ।
स योत्स्यति मया सार्धं भ्रातुः साहाय्यकारणात् ॥९॥
विभीषणमुखाच्छ्रुत्वा तस्यापि च पराक्रमम् ।
भीतोऽस्मि साम्प्रतं ब्रूहि यथैतान् समरे जये ॥१०॥

श्रीमहादेव उवाच—

इत्युक्तो रामचन्द्रेण ब्रह्मा लोकपितामहः ।
उवाच सान्त्वयन् रामं सर्वलोकस्य पश्यतः ॥११॥

ब्रह्मोवाच—

सर्वं जानासि राजेन्द्र तथापि कमलापते ।
यत्पृच्छसि जगन्नाथ जयार्थं समरे शृणु ॥१२॥
त्रैलोक्यजननी देवी ब्रह्मरूपा सनातनी ।
कात्यायनी तवोपास्या महाभयनिवारिणी ॥१३॥
जयदा सर्वलोकानां या स्वयं चापराजिता ।
तां प्रार्थय महाबाहो दुर्गां सङ्कटतारिणीम् ॥१४॥
विना प्रसन्नतां तस्याः समरे शत्रुसूदन ।
न विजेतुं समर्थोऽसि रावणादीन्महाबलान् ॥१५॥
यन्नाम संस्मरन् शम्भुः पिबन् हालाहलं परम् ।
विजित्य मृत्युं लोकेऽस्मिन्नाम्ना मृत्युञ्जयोऽभवत् ॥१६॥
तां प्रसाद्य रघुश्रेष्ठ जय लङ्कां महामते ।
दुष्टप्रणाशिनी देवसभापि च जयप्रदा ॥१७॥

स्मर्तव्या पूजितव्या च साम्प्रतं सा त्वया ध्रुवम् ।
सङ्ग्रामे जयलाभाय जगतो रक्षणाय च ॥१८॥

चण्डिकायां परा भक्तिर्विद्यते रावणस्य हि ।
कस्तं विजेतुं शक्तोऽत्र देव्या दृष्टिं विना प्रभो ॥१९॥

उक्तं चापि तयैवैतत्पुरा तुभ्यं महात्मने ।
समक्षं देवदेवस्य मम चापि महामते ॥२०॥

अपि जानासि तत्सर्वं स्वयं त्वं मधुसूदन ।
तथापि तव वक्ष्यामि यत्पृष्टो जयकारणम् ॥२१॥

श्रीमहाभागवते उपपुराणे ब्रह्मरामचन्द्रयोर्मन्त्रवर्णनं
नामैकचत्वारिंशत्तमोऽध्यायः

द्विचत्वारिंशत्तमोऽध्यायः

श्रीमहादेव उवाच—

ततः स भगवान्ब्रह्मा श्रीरामाय महात्मने ।
संक्षेपात्पूर्ववृत्तान्तं कथितुं सम्प्रचक्रमे ॥१॥

ब्रह्मोवाच —

भगवन्नस्य दुष्टस्य वधार्थं प्रार्थितो यदा ।
मया त्वं भगवन् विष्णो नृषु जन्मपरिग्रहे ॥२॥

तदा त्वमस्य रक्षायै देवीं ज्ञात्वा व्यवस्थिताम् ।
तस्याः सम्प्रार्थनार्थाय कैलासमगमः स्वयम् ॥३॥

अहं तथा महेशश्च सहितौ चागतौ ततः ।
एतस्यैव वधार्थाय त्वदनुग्रहहेतवे ॥४॥

ततस्त्वया महादेवी प्रणिपत्य मुहुर्मुहुः ।
उक्तमेतद्वचो देवि प्रसन्ना भव मे शिवे ॥५॥

रावणस्य वधार्थाय मानुषत्वं व्रजाम्यहम् ।
प्रार्थितस्त्रिदशैः सर्वैर्ब्रह्मणा च विशेषतः ॥६॥

त्वं तस्य वरदा नित्यं भक्तिस्तस्य दृढा त्वयि ।
तत्कथं पातयिष्यामि समरे तं महाबलम् ॥७॥

इति वाक्यं तथान्यच्च त्वयोक्तं विस्तरं तदा ।
तच्छ्रुत्वा सा यथा प्राह तच्च राम निबोध मे ॥८॥

श्रीदेव्युवाच—

त्वयाहं स्मरणीया तु सङ्ग्रामे सर्वदा तदा ।
यदा योत्स्यसि लङ्केशं त्वं मायामनुजाकृतिः ॥९॥
ततस्त्वां नैव भेत्स्यन्ति बाणा अपि सुदारुणाः ।
न भीतिर्भविता वापि दृष्ट्वा तेषां पराक्रमम् ॥१०॥
कृत्वा च विधिवत्पूजामकाले मम तत्र वै ।
विजेष्यसि रणे वीर रावणं मत्प्रसादतः ॥११॥

ब्रह्मोवाच—

तस्माद्राम महाबाहो जेतुकामस्तु रावणम् ।
स्मरन्युध्यस्व सङ्ग्रामे देवीं तां जयदायिनीम् ॥१२॥
गुरुस्ते मम पुत्रस्तु वसिष्ठो मुनिसत्तम ।
यं मन्त्रं दत्तवांस्तस्यास्तं संस्मृत्य महारणे ॥१३॥
कृत्वा युद्धं राक्षसेन्द्रं सबन्धुं जहि राघव ।
पूजायै च महादेव्या यतस्व रघुनन्दन ॥१४॥
तस्या विना प्रसादेन न जेष्यसि कथञ्चन ।
प्रवृत्ते शुक्लपक्षे तु रावणस्तां सुरेश्वरीम् ॥१५॥
पूजयेद्यदि नो मृत्युस्तदा तस्य भविष्यति ।
तस्मादस्मिन्नकालेऽपि तस्यास्तु परिपूजने ॥१६॥
यतस्वैषां राक्षसानां नाशनाय रघूद्वह ॥१७॥

श्रीमहादेव उवाच—

इति तस्य वचः श्रुत्वा श्रीरामः प्रत्युवाच तम् ।
विजानन्नपि तत्सर्वं लोकानामुपकारकम् ॥१८॥

श्रीराम उवाच—

सत्यं जयप्रदा देवी सैव साक्षात्परात्परा ।
स्मर्तव्या पूजितव्या च सङ्ग्रामे जयमिच्छता ॥१९॥
किन्तु नायं स कालो हि यत्र देवार्चनाविधिः ।
निद्रिता च महादेवी सम्प्राप्तं त्रिदशेश्वरी ॥२०॥
विशेषतः कृष्णपक्षो नायं शुक्लः पितामह ।
कथमत्र महादेवीमप्रबुद्धां प्रपूजये ॥२१॥

ब्रह्मोवाच—

अहं तां बोधयिष्यामि युद्धे तव जयाय वै ।
वधाय राक्षसेन्द्रस्यामङ्गलस्य दुरात्मनः ॥२२॥
अकालेऽपि महादेवीं पूजयिष्यसि राघव ।
विजेष्यसि रणे शत्रून् मा चिन्तां कर्तुमर्हसि ॥२३॥

श्रीराम उवाच—

भद्रं ब्रह्मन् वसिष्ठस्ते तनयो मे गुरुः स्वयम् ।
पिता तस्य भवानेव जगतां च पितामहः ॥२४॥
अतस्त्वं मे गुरुर्देव पूजयिष्यामि चण्डिकाम् ।
अहं तु समराशक्तो न स्वयं जेतुमुत्सहे ॥२५॥
किन्तु देव्याः प्रसादेन रावणं जेतुमुत्सहे ।
सोऽपि चेत्पूजयेद्देवं शुक्लपक्षे सुरेश्वरीम् ॥२६॥
ददाति यदि तस्मै वा सुप्रसन्ना वरं स्वयम् ।
तत्कथं पातयिष्यामि संग्रामे भीमविक्रमम् ॥२७॥

ब्रह्मोवाच—

तयोक्तं पूर्वमेवैतदवश्यं तव हस्ततः ।
भविष्यति रणे मृत्युस्तस्य तत्र न संशयः ॥२८॥
त्वया सम्पूजिता देवी यदि भूयोऽपि तद्वरम् ।
ददाति समरे राम ततस्ते विजयो ध्रुवम् ॥२९॥
स पापात्मा यदा सीतां साक्षाल्लक्ष्मीं पतिव्रताम् ।
रिरंसुरानयामास तस्या मूर्त्यन्तरं बलात् ॥३०॥
तदा सैव विनाशाय तस्य दुष्टविचेतसः ।
रुष्टा विपत्स्वरूपेण प्रविवेश पुरीं स्वयम् ॥३१॥
यत्र धर्ममतिः शान्तिस्तत्र श्रीः कान्तिरेव च ।
अधर्मो यत्र सा तत्र विपद्रूपा स्वयं शिवा ॥३२॥
अहंकृतिवशाद्यो हि कुरुते धर्महेलनम् ।
दर्पोपशमनी तस्य सैव देवी महामते ॥३३॥
अत्रैतच्छृणु वक्ष्यामि सेतिहासं रघूद्वह ।
यथा संभाषितं देव्या स्वयमेव ममाग्रतः ॥३४॥
यथा महेश्वरो देवः पञ्चवक्त्रो महामतिः ।
यथाहमपि पञ्चास्यः पूर्वमासं रघूत्तम ॥३५॥

तत्रैकदा त्वहंकारवशाच्छंभुमहं पुरा ।
अवोचमपि संक्रोधसम्भूतं रघुनन्दन ॥३६॥
तच्छ्रुत्वा स महादेवः पञ्चमं मे शिरस्ततः ।
प्रचिच्छेद महाक्रोधात्तत्क्षणादेव पश्यतः ॥३७॥
ततोऽहं चतुरास्यः सन्नेकदा तां सुरोत्तमाम् ।
प्रणन्तुं तां पुरं पूर्वमगमं सह विष्णुना ॥३८॥
महारुद्रस्तु तत्रैव प्रणन्तुं तां महामते ।
महादुर्गां समायातस्तस्मिन्नेव क्षणे प्रभुः ॥३९॥
एवं तत्र त्वहं ब्रह्मा महाविष्णुर्महेश्वरः ।
समवेतास्त्रयो राम महादुर्गासमीपतः ॥४०॥
एतस्मिन्नेव कालेऽहं तां प्रणम्य महामते ।
अवोचं त्रिदशेशानीं तस्य शम्भोः समीपतः ॥४१॥
त्वदनुग्रहदर्पेण मातः शम्भुरयं मम ।
चिच्छेद पञ्चमं वक्त्रं निगृह्णन् सुरसंसदि ॥४२॥
मया किमपराद्धं वा कथं वा मच्छिरः शिवः ।
प्रचिच्छेद जगन्मातस्त्रिदशेश्वरवन्दिते ॥४३॥
इति मे वचनं श्रुत्वा ततः सा जगदम्बिका ।
मामाह वचनं चेदं सुचारुमुखपङ्कजा ॥४४॥

श्रीदेव्युवाच—

वत्स जानीहि कर्माणि शुभसंसूचकानि च ।
तथैवाशुभभोगानां सूचकानि च तानि वै ॥४५॥
शुभानामशुभानां हि कर्मणां पद्मसम्भव ।
फलप्रदाहमेवैका स्वतन्त्रास्मि न चापरः ॥४६॥
यो यथा कुरुते कर्म शुभं वाप्यशुभं तथा ।
तथा फलं भवेत्तस्य नान्यथा तु कदाचन ॥४७॥
न तत्र विद्यते कश्चिदप्रियो वा प्रियोऽथ वा ।
अवश्यं स्वकृतं कर्म भुङ्क्ते तत्र न संशयः ॥४८॥
रन्तुं सन्ध्यां स्वतनयां दृष्ट्वा कामेन मोहितः ।
अकरोद्यदभिप्रायं तस्मात्तत्फलमाप्तवान् ॥४९॥
शम्भोः क्रोधस्तथान्यच्च निमित्तं केवलं विधे ।
वस्तुतः कर्मणस्तस्य फलमेतत्सुनिश्चितम् ॥५०॥

यस्तु स्वतनयां दृष्ट्वा क्रियते कामचिन्तनम् ।
शिरश्छिन्नं भवेत्तस्य मदिच्छावशतो विधे ॥५१॥

तस्मात्तु ते मयैवैतच्छिरश्छिन्नं महामते ।
अधिष्ठाय त्रिशूलं को दोषस्तत्र शिवस्य तु ॥५२॥

ध्रुवमेतद्विजानीहि धर्माधर्मविरोधिनाम् ।
अहमेव नियन्त्री च नान्योऽस्तीह जगत्त्रये ॥५३॥

ब्रह्मंस्ते पञ्चमं वक्त्रं कल्पितो हव्यवाहनः ।
तस्मिन्हुते सुराः सर्वे तृप्तिमायान्ति शाश्वतीम् ॥५४॥

ब्रह्मोवाच—

ततस्तु त्रिजगद्धात्रीं त्रय एव सुरोत्तमाः ।
प्रणम्य दण्डवद्भूमौ तुष्टुवुर्भक्तिसंयुताः ॥५५॥

ब्रह्मविष्णुशिवा ऊचुः—

उत्पन्नाः पुरुषास्त्रयस्तव सुता ब्रह्मेशनारायणा
जानीमो महिमानमेव नहि ते प्राचीनमत्यद्भुतम् ।
भूयोऽप्येतदचिन्त्यरूपमहिमैश्वर्यादिभिः प्रोज्झिताः
स्तोष्यामः कथमेव देवि जगतां धात्रि प्रसीदेश्वरि ॥५६॥

शिव उवाच—

संधतुं शिरसा सुरेशि पदयो रेणूनहं भक्तितो
गङ्गायां न्यपतन् कियन्त इति ते सालोक्यसम्पादिनीम् ।
यस्यास्ते पदपद्मरेणुमहिमाप्येतादृशस्तां कथं
स्तोष्ये त्वां स्वगुणैः प्रपाहि जगतां धात्रि प्रसीदाम्बिके ॥५७॥

देवि त्वत्पदपङ्कजं हृदि हृतं तेनैव दत्तेन वै
जित्वा मृत्युमशेषलोकभयदं तत्कालकूटं बलात् ।
पीतं यन्नवनीतवत्स हि गले चाद्यापि संराजते
दीप्ताजम्बुनिभं सुरेशि जगतां धात्रि प्रसीदाम्बिके ॥५८॥

विष्णुरुवाच—

यत्राब्धौ भुजगेश्वरस्य शिरसि शश्वच्छयिष्येम्बिके
लक्ष्मीवाण्यनुमोदितास्तनुघटस्यन्दैकबिन्दूद्भवः ।
सोऽप्यन्तर्न विदंस्तवापि सुतरां त्वां वा शिवे यत्नतः
स्तोष्येऽहं स्वगुणेन पाहि जगतां धात्रि प्रसीदाम्बिके ॥५९॥

त्वं सूक्ष्मा प्रकृतिः परात्परतरा विश्वैकहेतुः शिवे
त्वां जानन्ति परेण कोऽपि जगतां सृष्ट्यादिशक्त्या अपि ।
त्वं माता जगतां त्रयो ह्यपि सुताः कारुण्यदृष्ट्या कृपाम्
अस्मांस्तु प्रविधाय पाहि जगतां धात्रि प्रसीदाम्बिके ॥६०॥

ब्रह्मोवाच—

स्तोत्रं ते न च वेद्मि नापि च परं रूपं न शीलं गुणान्
सम्यग्यच्च कियच्छ्रुतीरितमहं जाने तथान्येऽपि वा ।
तद् वक्त्रैरपि कोटिभिर्बहुयुगं वक्तुं न शक्तः शिवे
पाहि त्वं निजसद्गुणेन जगतां धात्रि प्रसीदाम्बिके ॥६१॥

श्रीमहादेव उवाच—

इत्यादिस्तुतिवाक्यैस्तां स्तुत्वा नत्वा च भक्तितः ।
प्रययुस्ते निजं स्थानं ब्रह्माद्या रघुनन्दन ॥६२॥
तयैतदुक्तं राजेन्द्र स्वयमेव ममाग्रतः ।
अयं चापि सुदुष्टात्मा नैनं सा परिरक्षति ॥६३॥
सीता मन्दोदरीगर्भे सम्भूता चारुरूपिणी ।
क्षेत्रजा तनयाप्यस्य रावणस्य रघूत्तम ॥६४॥
तां लोभादपहृत्यैव रिरंसुः काममोहितः ।
यदा लङ्कां समायातस्तदा लङ्का गताभवत् ॥६५॥
जयदा धर्मनिष्ठानां पापिनां नाशकारिणी ।
एकैव सा श्रेष्ठतमा भवानी भुवनेश्वरी ॥६६॥
तामभ्यर्चयतां नित्यं सत्यं सत्यं रघूत्तम ।
न विद्यते क्वचिद्धानिः स्वर्गे मर्त्ये रसातले ॥६७॥
तस्मात्त्यक्त्वा भयं राम विविधैरुपचारकैः ।
शत्रूणां निधनाकाङ्क्षी समरे शत्रुसूदन ॥६८॥
अकालेऽपि महादेवीं परिपूज्य विधानतः ।
विजेष्यसि रणे शत्रून्मा चिन्तां कर्तुमर्हसि ॥६९॥
धर्मो विजयदस्तत्र देवी यत्र प्रपूजिता ।
अधर्मो यत्र तत्रैषा विपद्रूपा रघूत्तम ॥७०॥
त्वं शुद्धप्रकृतिः सर्वजगतां हितकारकः ।
न्यायवर्त्मप्रवृत्तश्च ततस्ते विजयो ध्रुवम् ॥७१॥
येन यच्च कृतं कर्म शुभं तस्य च यत्फलम् ।
तद्भुक्तं नावशिष्टं तत्किञ्चित्तस्य तु वर्तते ॥७२॥

इदानीं कृतदुष्कर्मफलं तु समुपस्थितम् ।
तवैव बाणजालेन निहतः सम्पतिष्यति ॥७३॥
तस्माद्राम स्थिरो भूत्वा देवीं सम्पूज्य भक्तितः ।
घातयिष्यसि लङ्केशं मा चिन्तां कर्तुमर्हसि ॥७४॥
श्रीमहाभागवते उपपुराणे रामब्रह्मणोर्मन्त्रणावर्णनं
नाम द्विचत्वारिंशत्तमोऽध्यायः

त्रिचत्वारिंशोऽध्यायः

श्रीमहादेव उवाच—
इत्याकर्ण्य रघुश्रेष्ठो ब्रह्मवक्त्रान्महामुने ।
पुनस्तं परिपप्रच्छ प्रसन्नात्मा प्रसन्नधीः ॥१॥
श्रीराम उवाच—
ब्रह्मन् विजयदा देवी सैव सत्यं महामते ।
पूजयिष्यामि तां भक्त्या जयकामो महारणे ॥२॥
इदानीं तु हि सा देवी जयदुर्गा महेश्वरी ।
कुत्रास्ति कीदृशं रम्यं रूपं तस्या वद प्रभो ॥३॥
ब्रह्मोवाच—
शृणु राजन् प्रवक्ष्यामि स्वयं जानासि यद्यपि ।
तथापि पावनं पुण्यं श्रोतृणां भावतां यतः ॥४॥
सर्वगा सर्वसंस्था च विश्वेषां पीठवासिनी ।
ब्रह्माण्डमध्यसंस्था च तद्बहिर्वासिनी तथा ॥५॥
स्वर्गे मर्त्ये हिमाद्रौ च कैलासे शिवसन्निधौ ।
या मूर्तिर्भगवत्यास्तु सैव पौराणिकी मता ॥६॥
ब्रह्माण्डबाह्यसंस्था च या मूर्तिस्तान्त्रिकी परा ।
सुगोप्या सा महादुर्गा नित्यानन्दमयी तथा ॥७॥
तस्याः स्थानं तु यादृक् च केन वक्तुं प्रशस्यते ।
किञ्चिद्वक्ष्यामि तद्राम शृणुष्वावहितो मम ॥८॥
पातालभूतलस्वर्गब्रह्मलोकाश्च राघव ।
ब्रह्माण्डान्तःस्थिताः सर्वे क्रमादूर्ध्वं सुदूरतः ॥९॥
ब्रह्माण्डबाह्याद्रुचिरादब्रह्मलोकात्समुत्थितः ।
लक्षयोजनमात्रं तु शिवलोको निरामयः ॥१०॥

यत्र प्रमोदते नित्यं प्रमथैः प्रमथेश्वरः ।
आद्योऽनिर्वचनीयोऽसौ नित्योत्सवसुसंवृतः ॥११॥

शिवभक्ताश्च ये लोकास्ते तं प्राप्य मनोहरम् ।
मोदन्ते देवदेवस्य प्रसादात्करुणानिधेः ॥१२॥

लक्षयोजनमात्रं तु तदूर्ध्वं विष्णुलोककः ।
सार्धं कमलया शङ्खचक्रपद्मगदाधरः ॥१३॥

सोऽप्यनिर्वचनीयो वै लोकः श्रीकमलापतेः ।
शुद्धज्योतिर्मयो नानारत्नजालविचित्रितः ॥१४॥

विष्णुभक्तिरता ये च देवगन्धर्वकिन्नरैः ।
सालोक्यं समनुप्राप्तास्ते तु विष्णुप्रभावतः ॥१५॥

मोदन्ते नगरे तत्र नित्यं मुदितमानसाः ।
द्वारसंरक्षको यत्र गरुडः पतगाधिपः ॥१६॥

शम्भुलोकस्य वामे तु गौरीलोको मनोरमः ।
विचित्रमणिमाणिक्यसमूहैरतिशोभितः ॥१७॥

तत्र या वैदिकी मूर्तिर्देव्या दशभुजापरा ।
अतसीकुसुमाभासा सिंहपृष्ठनिषेदुषी ॥१८॥

समास्ते मन्दिरे रम्ये षोडशद्वारशोभिते ।
विचित्ररत्नवत्स्तम्भे पताकाभिरलङ्कृते ॥१९॥

स्तुवद्भिः सर्वदा देवमुनीन्द्रैरतिशोभिते ।
अनन्तचेटिकावृन्दैर्भैरवैश्चैव रक्षिते ॥२०॥

ब्रह्माण्डवासिभिः सर्वैर्ब्रह्माद्यैर्जगदम्बिका ।
पूज्यते समुपागत्य शम्भुना विष्णुना तथा ॥२१॥

सर्वैर्वैकुण्ठलोकैश्च शुद्धज्योतिर्मयप्रभे ।
गोलोके राधया यत्र कृष्णो विहरते प्रभुः ॥२२॥

विचित्ररत्नसन्नद्धपुरे कल्पद्रुमावृते ।
ब्रह्मर्षिवेदध्वनिभिः परितः प्रतिनादिते ॥२३॥

रत्नस्तम्भसमुद्दीप्ते मन्दिरे भगवान् स्वयम् ।
आत्मेच्छां रमते देव्या राधया द्विभुजो हरिः ॥२४॥

तत ऊर्ध्वं रघुश्रेष्ठ पञ्चाशत्कोटियोजनम् ।
स्थानमस्ति महादेव्या यत्र देवी सुगोपिता ॥२५॥

यत्कलाकोटिकोट्यंशा राधा कृष्णस्य गेहिनी ।
स्वयं विहरते ब्रह्मविष्णुरुद्रादिदुर्लभा ॥२६॥

वेदागमस्मृतिषु यत्परिपूर्णमेकं वेदान्तकादिविविधेषु च दर्शनेषु ।
ब्रह्मेतिनिश्चितमनेकविधप्रमाणैः साक्षात्तु तद्भगवती खलु सैव नित्या ॥२७

नित्यातिसौख्यविरहाखिलनित्यदेहा
विश्वाश्रया रघुपते परमापि सैव ।
तस्याः पदाम्बुजनखद्युतिमेव सर्वे
नानाकठोरतपसा परिलोकयन्ति ॥२८॥
ध्यायन्ति चानिशमहोऽखिलयोगवन्द्या
तद्ब्रह्म वाकृतिविहीनमपि ब्रुवन्ति ।
तस्या निजांशजनितस्य महेश्वरस्य
विष्णुश्च यत्परिहितं श्रुतिभिश्च तत्त्वम् ॥२९॥
तत्स्वांशजत्वविषया खलु तद्विराजन्
पारं परं रघुपते न पुनस्तु साक्षात् ॥३०॥
यथाब्धिसंगता गङ्गा भिद्यते न समुद्रतः ।
तथा ब्रह्मांशजातास्ते भिद्यन्ते ब्रह्मणोऽपि न ॥३१॥
सैव सञ्जायते विश्वं सैव सम्पालयत्यपि ।
सैव संहरते प्रान्ते नान्यत्तत्र तु कारणम् ॥३२॥
यथा कृत्रिमहस्त्यादिः परिस्पन्दादिहेतुना ।
प्राधान्यात्कुहकस्यैव तथा तस्याश्च हेतुता ॥३३॥
ये तु तामतिदुर्गम्यां सर्वेषां मूलकारणम् ।
न जानन्ति महामोहात्तत्तद्ब्रह्मादिदेवताम् ॥३४॥
सृष्ट्यादिहेतुं जानन्ति प्राधान्याद्रघुनन्दन ।
यथा घटस्य हेतुं तं कुलालमपहाय वै ॥३५॥
प्राधान्यात्कल्प्यते दोषाद्घटादिषु विमूढधीः ।
तथैवान्यत्र सृष्ट्यादिहेतुतायाश्च कल्पना ॥३६॥
प्राधान्येन रघुश्रेष्ठ मुग्धानामिह मायया ।
जगदाधारभूता या सर्वरक्षणकारिणी ॥३७॥
परमा मोक्षदा सैव मोहबन्धप्रवर्तिनी ।
सैव सिन्धौ निमग्नस्य विष्णोः संरक्षणाय वै ॥३८॥
वटपत्रमयी भूत्वा तं दधार महाम्भसि ।
सैव चैतन्यरूपा च तया च रहितं जगत् ॥३९॥

विभाति शववत्सर्वं तद्युक्तं चैव रघूद्वह ।
चैतन्यं समवाप्नोति स्वयन्त्रं यन्त्रिणा यथा ॥४०॥
सैव कृतेच्छया नित्यं लीलया परमं शिवम् ।
स्वमूर्त्यन्तरमेवैका स्वस्मिन् विहरते सदा ॥४१॥
सैव दुर्गतिमापन्नान्निस्तारयति दुर्गतान् ।
तस्मात्सा प्रोच्यते लोके दुर्गा दुर्गतिनाशिनी ॥४२॥
मन्दभाग्योऽपि संस्मृत्य तस्या नामवराक्षरम् ।
सौभाग्यं समवाप्नोति तस्मात्सा परमेश्वरी ॥४३॥
मन्दभाग्यपरित्रात्री प्रोच्यते वेदवादिभिः ।
सैव देवी परा विद्या लोकानां रघुनन्दन ॥४४॥
चतुर्वर्गप्रदा सर्वविपक्षक्षयकारिणी ।
शृणु संकीर्तये वत्स स्थानं तस्यास्तु यादृशम् ॥४५॥
रत्नद्वीपं महाबाहो सुधासागरवेष्टितम् ।
कल्पद्रुमसमाकीर्णललितं चारुहाटकैः ॥४६॥
वसन्तः सर्वदा तत्र नानर्तुर्वर्तते सदा ।
नदी त्रिपथगा तत्र सुखाम्बुरूपधारिणी ॥४७॥
नानामणिनिभास्तत्र पक्षिणश्चारुनिःस्वनाः ।
देवांशा असुरास्ते तु पुण्यात्मानो महामते ॥४८॥
गायन्ति सर्वदा देवीगुणभेदाभिभाषितम् ।
कालोचितेन रागेण मधुरध्वनिमिर्मदा ॥४९॥
सुगन्धः संवदा वाति वायुर्दक्षिणसम्भवः ।
मन्दं मन्दं रघुश्रेष्ठ परमाह्लाददायकः ॥५०॥
भवानीलोकसंस्थानमेतत्पुण्यानुसारिणः ।
सालोक्यं समनुप्राप्ताः सन्ति ते तत्र देहिनः ॥५१॥
नित्यानन्दमयास्ते तु नित्यविज्ञानशालिनः ।
तेषां देवीसमा नार्यः पुमांसो भैरवोपमाः ॥५२॥
सर्वेषां मन्दिरं चारुरत्नहेमपरिष्कृतम् ।
सुरम्यरत्नजालैस्तु रचितैस्तोरणैरलम् ॥५३॥
यैर्गीतनृत्यवाद्यैश्च तोषिता जगदम्बिका ।
ते तत्स्थानमनुप्राप्य नित्यं मुदितमानसाः ॥५४॥
गायन्ति चैव नृत्यन्ति वादयन्ति समुत्सुकाः ।
एवमानन्दसन्दोहमयं तद्रघुनन्दन ॥५५॥

भगवन् भगवत्यास्तु वाचातीतं रघूद्वह ।
तत्र देव्या पुरं चित्रं रत्नप्राकारतोरणम् ॥५६॥
दीप्तं हि चन्द्रकान्त्यादिमणिभिः कौस्तुभैरलम् ।
चतुर्दिक्षु चतुर्द्वारं भैरवैरुपलक्षितम् ॥५७॥
रत्नदण्डधरैः शूलधारिभिर्भीमलोचनैः ।
भैरव्यः शतशस्तत्र द्वाररक्षणतत्पराः ॥५८॥
कुर्वन्त्यो गल्लवाद्यानि धावन्त्यो दण्डपाणयः ।
दोधूयमाना विविधाः पताकास्तत्र राघव ॥५९॥
ध्वजाश्चापि मनोज्ञाश्च विराजन्ते सुनिर्मलाः ।
तन्मध्ये सन्ति चित्राणि चत्वराणि बहूनि च ॥६०॥
प्रासादैर्वेष्टितान्येव तत्रापि द्वारपालवाः ।
मध्ये त्वन्तःपुरं देव्यास्तत्र द्वारी गणाधिपः ॥६१॥
षडाननश्च देव्यास्तौ पुत्रौ रघुकुलोद्भव ।
इच्छन्तौ दर्शनं देव्यास्तत्र ध्यानपरायणौ ॥६२॥
ब्रह्माण्डकोटिकोटिस्था ब्रह्माणः कोटिकोटयः ।
कोटयो हलहस्ताश्च कोटयो हरयः शिवाः ॥६३॥
सन्ति राम महाबाहो किमन्यच्च ब्रवीमि ते ।
तस्मिन्नन्तःपुरे रम्ये विचित्रमणिमण्डपे ॥६४॥
ज्वलद्रत्नमये स्तम्भे तोरणे मौक्तिकोज्ज्वले ।
रत्नप्रदीपावलिभिः प्रसन्नेऽपि दिगन्तरे ॥६५॥
रत्नसिंहासने रम्ये विद्युत्पुञ्जसमप्रभे ।
तप्तकाञ्चनसंकाशे भ्राजत्सूर्यसमप्रभे ॥६६॥
भास्वच्छरन्निशानाथकोटिकान्तिशुभानना ।
समास्ते त्रिजगन्माता महादुर्गा रघूद्वह ॥६७॥
भास्वत्स्वर्णसुसंनद्धस्यमन्तकसहस्रकैः ।
अनल्पकौस्तुभैश्चापि राजमाना किरीटिनी ॥६८॥
महामाणिक्यहारौघरुचिशोभितवक्षसी ।
सुचारुदशनस्मेररुचिरा श्यामलोचना ॥६९॥
कर्णालङ्करणैश्चित्रैर्नासिकाभरणैस्तथा ।
शशाङ्ककलयातीव राजमानमुखाम्बुजा ॥७०॥
शुद्धरत्नमयैर्नानाभूषणैरभिशोभिता ।
चतुर्भिर्बाहुभिर्युक्ता महासिंहोपरि स्थिता ॥७१॥

रक्तवस्त्रपरीधाना क्वणत्काञ्चीसुमध्यमा ।
ब्रह्मेशविष्णुसम्बन्धसुचारुपदपङ्कजा ॥७२॥
पुरस्तात्स्तुतिवाक्यैस्तु महाब्रह्मा महेश्वरः ।
महाविष्णुश्च संस्तौति प्राञ्जलिस्तां महामते ॥७३॥
चामरेणाभिशुक्लेन जया च विजया सदा ।
सञ्वीजयन्त्यौ तिष्ठन्त्यौ तत्पार्श्वे सव्यदक्षतः ॥७४॥
चित्रव्यजनहस्ता च लक्ष्मीर्दक्षिणमास्थिता ।
कुङ्कुमारुणगन्धादिसौगन्ध्यं प्रतियच्छति ॥७५॥
वीणया तु स्वयं वाणी संस्थिता वामपार्श्वतः ।
संगायति गुणं देव्या वेदागमसुसम्मतम् ॥७६॥
शुद्धरत्नमये पात्रे सुधामादाय राघव ।
अथ वाणीप्रभृतयो यच्छन्ति प्रियकाम्यया ॥७७॥
नारदाद्यैर्मुनिगणैरर्चितं वेदगोपितम् ।
गीयते पुरतो देव्या भक्त्या गद्गदया गिरा ॥७८॥
योगिन्याद्यास्तु संगृह्य महामाणिक्यनिर्मितम् ।
सताम्बूलं तदाधारं ददुर्देव्यै प्रयत्नतः ॥७९॥
भैरवप्रमुखा देवा रत्नदण्डासिपाणयः ।
सन्त्यनेकविधास्तत्र द्वारिणः कतिकोटयः ॥८०॥
एवं तदतुलं देव्या ऐश्वर्यं रघुनन्दन ।
किमहं ते प्रवक्ष्यामि चतुर्भिर्वदनैः प्रभो ॥८१॥
अलं वर्षसहस्राणां कोटिभिस्त्र्यम्बकः प्रभुः ।
श्रुतयश्च प्रयच्छन्ति तस्या वाक्यमया गुणाः ॥८२॥
सावित्री चैव गायत्री प्रत्यक्षं चांशसम्भवाः ।
इन्द्रादयो लोकपाला नानाब्रह्माण्डवासिनः ॥८३॥
इच्छन्तो दर्शनं देव्याः पुरबाह्यसमागताः ।
भक्त्यार्चनरता ये तु ते त्वरान्वितदर्शनाः ॥८४॥
अन्योन्यदुर्गमं राम दर्शनं तत्र पुण्यदम् ।
नाधिपत्यविचारोऽस्ति न वा वर्णविवेचनम् ॥८५॥
तस्यां यस्य मतिः पुण्या तस्यैव सुलभा तु सा ।
इत्युक्ता सा रघुश्रेष्ठ मूर्तिस्तस्याः सुतान्त्रिकी ॥८६॥
उक्तं च नगरं रम्यं यथा पृष्टस्त्वया प्रभो ।
पौराणिकी तु या मूर्तिर्देवी दशभुजापरा ॥८७॥

तां च मूर्तिं विनिर्माय मृण्मयीं सिंहवाहिनीम् ।
पूजयिष्यामि संग्रामे जयलाभाय ते ध्रुवम् ॥८८॥
बोधयिष्यामि चैतस्यां नवम्यां परिपूज्य च ।
बिल्ववृक्षे महादेवीं महाभयनिवारिणीम् ॥८९॥
अत्र त्वया वृतो राम भगवत्यास्तु पूजने ।
अद्यारभ्य नवम्यां तु कृष्णायामार्द्रयोगतः ॥९०॥
प्रबोध्य प्रत्यहं यावद्राक्षसेन्द्रं हनिष्यसि ।
तावत्प्रपूजयिष्यामि युद्धे ते जयकाम्यया ॥९१॥
ईप्स्व राम शुचिर्भूत्वा स्तुत्वा देवीं समाहितः ।
युध्यस्व राक्षसैः सार्धं जयं प्राप्स्यसि राघव ॥९२॥

श्रीमहादेव उवाच—

एवमुक्तः स भगवान् देव्याः सम्बोधनाय वै ।
समुद्रस्योत्तरे तीरे बिल्ववृक्षस्य सन्निधिम् ॥९३॥
प्रययौ त्रिदशैः सार्धं सर्वलोकपितामहः ।
रामस्तु प्राञ्जलिर्भूत्वा चोत्तराभिमुखस्ततः ।
तुष्टाव जयलाभाय संग्रामे जयदायिनीम् ॥९४॥

श्रीमहाभागवते उपपुराणे दुर्गालोकवर्णनं नाम त्रिचत्वारिंशोऽध्यायः

चतुश्चत्वारिंशोऽध्यायः

श्रीराम उवाच—

नमस्ते त्रिजगद्वन्द्ये संग्रामे जयदायिनि ।
प्रसीद विजयं देहि कात्यायनि नमोऽस्तु ते ॥१॥
सर्वशक्तिमये दुष्टरिपुनिग्रहकारिणि ।
दुष्टजृम्भिणि संग्रामे जयं देहि नमोऽस्तु ते ॥२॥
त्वमेका परमा शक्तिः सर्वभूतेष्ववस्थिता ।
दुष्टं संहर संग्रामे जयं देहि नमोऽस्तु ते ॥३॥
रणप्रिये रक्तभक्षे मांसभक्षणकारिणि ।
प्रपन्नार्तिहरे युद्धे जयं देहि नमोऽस्तु ते ॥४॥
खट्वाङ्गासिकरे मुण्डमालाद्योतितविग्रहे ।
ये त्वां स्मरन्ति दुर्गेषु तेषां दुःखहरा भव ॥५॥

त्वत्पादपङ्कजाद्दैन्यं नमस्ते शरणप्रिये ।
विनाशय रणे शत्रून् जयं देहि नमोऽस्तु ते ॥६॥

अचिन्त्यविक्रमेऽचिन्त्यरूपसौन्दर्यशालिनि ।
अचिन्त्यचरितेऽचिन्त्ये जयं देहि नमोऽस्तु ते ॥७॥

ये त्वां स्मरन्ति दुर्गेषु देवीं दुर्गविनाशिनीम् ।
नावसीदन्ति दुर्गेषु जयं देहि नमोऽस्तु ते ॥८॥

महिषासृक्प्रिये संख्ये महिषासुरमर्दिनि ।
शरण्ये गिरिकन्ये मे जयं देहि नमोऽस्तु ते ॥९॥

प्रसन्नवदने चण्डि चण्डासुरविमर्दिनि ।
संग्रामे विजयं देहि शत्रूञ्जहि नमोऽस्तु ते ॥१०॥

रक्ताक्षि रक्तदशने रक्तचर्चितगात्रके ।
रक्तबीजनिहन्त्री त्वं जयं देहि नमोऽस्तु ते ॥११॥

निशुम्भशुम्भसंहन्त्रि विश्वकर्त्रि सुरेश्वरि ।
जहि शत्रून् रणे नित्यं जयं देहि नमोऽस्तु ते ॥१२॥

भवान्येतज्जगत्सर्वं त्वं पालयसि सर्वदा ।
रक्ष विश्वमिदं मातर्हत्वैतान् दुष्टराक्षसान् ॥१३॥

त्वं हि सर्वगता शक्तिर्दुष्टमर्दनकारिणि ।
प्रसीद जगतां मातर्जयं देहि नमोऽस्तु ते ॥१४॥

दुर्वृत्तवृन्ददमनि सद्वृत्तपरिपालिनि ।
निपातय रणे शत्रूञ्जयं देहि नमोस्तु ते ॥१५॥

कात्यायनि जगन्मातः प्रपन्नार्तिहरे शिवे ।
संग्रामे विजयं देहि भयेभ्यः पाहि सर्वदा ॥१६॥

श्रीमहादेव उवाच—

एवं संस्तुवतस्तस्य श्रीरामस्य महात्मनः ।
बभूवाकाशतो वाक्यं सहसा मुनिसत्तम ॥१७॥

मा भैस्त्वं रघुशार्दूल महाबलपराक्रमान् ।
विजेष्यस्यचिरेणैव लङ्कां हत्वा निशाचरान् ॥१८॥

अहं संपूजिता बिल्वे ब्रह्मणा लोककर्तृणा ।
दास्यामि त्वां मनोभीष्टं वरं शत्रुनिबर्हण ॥१९॥

इति श्रुत्वा रघुश्रेष्ठो वाक्यमाकाशसम्भवम् ।
असंशयं मुनिश्रेष्ठ मेने विजयमात्मनः ॥२०॥

एवं चिन्तयतः काले समरे भीमविक्रमः ।
आयातः कुम्भकर्णो वै राक्षसैः परिवेष्टितः ॥२१॥

तस्य नादेन घोरेण सशैलवनकाननम् ।
चकम्पे धरणिः क्षुब्धो बभूव सरितां पतिः ॥२२॥

रथाश्वकुञ्जराणां च सुघोरैरपि बृंहितैः ।
चकम्पे वसुधा वीरबलात्कारेण वायुना ॥२३॥

चुक्षुभुर्वानराः सर्वे भीता दिक्षु विदिक्षु च ।
दृष्ट्वा तमतिदुर्धर्षमुद्यतास्त्रं महाबलम् ॥२४॥

अथ रामस्तमायान्तं समालोक्य भयप्रदम् ।
देवीं प्रणम्य कोदण्डं वामेनादाय पाणिना ॥२५॥

सोऽपि पादावघातेन करघातेन वानरान् ।
विमर्द्य भक्षयंश्चान्यानाससाद रघूत्तमम् ॥२६॥

स संप्रेक्ष्य रघुश्रेष्ठं श्यामं दूर्वादलप्रभम् ।
उद्यतास्त्रं महाबाहुं रक्षसामन्तकारिणम् ॥२७॥

सानुजं समरेऽक्षोभं नीलोत्पलदलेक्षणम् ।
ननाद बलवान् घोरो युगान्तजलदो यथा ॥२८॥

राघवोऽपि महानादं ब्रह्माण्डक्षोभकारकम् ।
चक्रे मुदा मुनिश्रेष्ठ ततो युद्धमवर्तत ॥२९॥

ब्रह्मास्त्रजालैः संक्षिप्तैः परस्परजिगीषया ।
तयोरासीन्महायुद्धं सुरासुरदुरासदम् ॥३०॥

सैन्यैश्च राक्षसश्रेष्ठैर्वानराणां महात्मनाम् ।
आसीत्सुतुमुलं युद्धं संग्रामे जयमिच्छताम् ॥३१॥

श्रीमहाभागवते महापुराणे श्रीरामकुम्भकर्णयोर्युद्धवर्णनं
नाम चतुश्चत्वारिंशोऽध्यायः

पञ्चचत्वारिंशोऽध्यायः

श्रीमहादेव उवाच—

ब्रह्मापि बिल्ववृक्षे तां देवीं सम्पूज्य भक्तितः ।
बोधयामास रामस्य जयार्थं जगदम्बिकाम् ॥१॥

स्तोत्रेण देवीसूक्तेन प्रणिपत्य पुनः पुनः ।
वेदोक्तेन सुरश्रेष्ठोऽकालेऽपि च सुरेश्वरीम् ॥२॥

ब्रह्मोवाच—

ॐनमो विमलवदनायै भूर्भुवःस्वःपरमकमलायै,
केवलपरमानन्दसन्दोहरूपायै लोकत्रयतिमिरापहारकपरमज्योतीरूपायै,
असदभिलाषयुक्तसन्दूषितदोषापसारणपरमामृतरूपायै, मूर्तिमत्कोटिचन्द्रवदनायै
दुर्गादेव्यै सर्ववेदोद्भवनारायण्यै जनशरीरे, परमात्मरूपायै प्रसीद ते नमो
नमः ॥३॥

ॐकरालरूपे प्रणवस्वाहास्वरूपे ह्रींस्वरूपिणि ।
अम्बिके भगवत्यम्ब त्रिगुणप्रसूते नमो नमः ॥४॥

सिद्धिकरे स्फ्रें स्फ्रों स्वाहारूपिणि स्वधारूपे ।
विमलमुखे चन्द्रमुखे कोलाहलमुखे शर्वे प्रसीद ॥५॥

जगन्मादकरीं मृदुदृशीं क्रीडास्थाने स्वागतां
भुवनेशीं शत्रुस्त्वं मित्ररूपा च दुर्गा
दुर्गस्य त्वं योगिनामन्तरेऽपि एकाऽनेका ।
सूक्ष्मरूपाविकारा ब्रह्माण्डानां कोटिकोटिप्रसूतम् ॥६॥

एकोऽहं विष्णुः कः परो वा शिवाख्यो देवाश्चान्ये स्तोतुमीशा भवामः
त्वं स्वाहा त्वं स्वधा त्वं च वौषट् ।
त्वं चोंकारस्त्वं च लज्जादिबीजं त्वं च स्त्री त्वं च
पुमान् सर्वरूपा त्वां नमामि बोधये नः प्रसीद ॥७॥

त्वं वै देवर्षिर्देवता कालरूपा त्वं वै मासस्त्वमृतुश्चायने द्वे ।
कव्यं भुङ्क्ष्व त्वं यथा स्वधा तद्वत् ।
स्वाहा हव्यभोक्त्री स्वयं देवि ॥८॥

त्वं वै देवाः शुक्लपक्षे प्रपूज्यास्त्वं पित्राद्याः कृष्णपक्षे प्रपूज्याः ।
त्वं वै सत्यं निष्कलं च स्वरूपं त्वां वै नत्वा बोधयामि प्रसीद ॥९॥

चन्द्रार्काग्निविलोचने नीचं नीचमुच्चं नत्वा याति मुक्तिं त्वत्पादध्यानयोगात् ।
त्वत्पादाब्जं चार्चयित्वा तु मुक्तिं को वा न प्राप्नोत्युत्तमां देवि सूक्ष्मम् ॥१०॥
स्थूलमुच्चं नीचं नीचमुच्चं कर्तुं समर्था त्वं तु काले
शक्तिरूपा भवानि त्वां नत्वाहं बोधये नः प्रसीद ।
त्वं वै शक्तौ राघवे रावणे च रुद्रादौ वापीहास्ति या त्वम् ।
सा त्वं शुद्धं वामकेन प्रवर्धं त्वां नत्वाहं बोधये नः प्रसीद ॥११॥

ॐतत् सत् ब्रह्मणे नमः—

श्रीमहादेव उवाच—
अनेन वेदसूक्तेन स्तोत्रेण मुनिसत्तम ।
संस्तुता ब्रह्मणा देवी प्रबोधं प्राप चण्डिका ॥१२॥
प्रबुद्धायां च देव्यां स ब्रह्मा लोकपितामहः ।
प्राञ्जलिर्देवतैः सार्धं प्रार्थयामास वाञ्छितम् ॥१३॥

ब्रह्मोवाच—
देवि त्वं बोधिताऽस्माभिरकालेऽपि सुरोत्तमे ।
हिताय सर्वभूतानां राक्षसानां वधाय च ॥१४॥
जयाय रामचन्द्रस्य संग्रामेऽतिसुदारुणे ।
यावद्दशाननो युद्धे सपुत्रगणबान्धवः ॥१५॥
पतिष्यति जगच्छत्रुस्तावत्त्वां जगदम्बिकाम् ।
पूजयामो महादेवि राघवस्य जयार्थिनः ॥१६॥
त्वं प्रसन्ना यदि शिवे तदा पूजां प्रगृह्य च ।
निपातय महाशत्रुकुलं देवि दिने दिने ॥१७॥

श्रीदेव्युवाच—
पतिष्यत्यद्य संग्रामे कुम्भकर्णो महाबलः ।
सहितः सैनकैर्भीमैर्महाबलपराक्रमः ॥१८॥
एवमेनां समारभ्य नवमीमासितां शुभम् ।
यावच्छुक्ला तु नवमी तावदेव दिने दिने ॥१९॥
पतिष्यन्ति न सन्देहो राक्षसा रणमूर्धनि ।
अमावस्यानिशायां तु मेघनादे हते सति ।
रावणोऽपि च सन्तप्तहृदयो राममेष्यति ॥२०॥
सन्दोहरूपायै लोकत्रयतिमिरापहारकपरमज्योतीरूपायै
असदभिलाषयुक्तसन्दूषितदोषापसारणपरमामृतरूपायै
मूर्तिमत्कोटिचन्द्रवदनायै दुर्गादेव्यै सर्ववेदोद्भवनारायै
जन्यशरीरे परमात्मरूपायै प्रसीद ते नमो नमः ॥२१॥

ॐकरालरूपे प्रणवस्वाहास्वरूपे ह्रींस्वरूपिणि
अम्बिके भगवत्यम्ब त्रिगुणप्रसूते नमो नमः ।
सिद्धिकरे स्फ्रें अमर्षवशमापन्नो युद्धार्थं समराजिरे ॥२२॥

देवान्तकप्रभृतिभिर्महाबलपराक्रमैः ।
ततस्तेषु हतेष्वेवं वीरेषु रणमूर्धनि ॥२३॥

देवान्तकादिषु तथा क्रोधसंरक्तलोचनः ।
स योत्स्यति महावीरो रावणो लोककण्टकः ॥२४॥

तयोस्तु दारुणं युद्धं रामरावणयोस्तदा ।
भविष्यति यथा कैश्चिन्न दृष्टं न श्रुतं क्वचित् ॥२५॥

तत्रापि शुक्लसप्तम्यामारभ्य नवमीदिनम् ।
यावद्घोरतरं युद्धं भविष्यति तयोर्महत् ॥२६॥

तस्यामारभ्य सप्तम्यां नवमीं यावदेव हि ।
मृण्मय्यां प्रतिमायां तु पूज्याहं विधिवत्पुरा ॥२७॥

भवद्भिः समरे रामचन्द्रस्य जयकाङ्क्षिभिः ।
अनघैरुपचारैस्तु यथार्हैर्बलिभिस्तथा ॥२८॥

स्तोत्रैर्वेदपुराणोक्तैः स्तोतव्या भक्तिभावतः ।
सप्तम्यां पत्रिकायां तु वेशनं मूलयोगतः ॥२९॥

कर्तव्यं विधिवद्देवास्ततो रामधनुःसरम् ।
अष्टम्यां पूजिताहं तु प्रतिमायां सुशोभने ॥३०॥

अष्टमीनवमीसन्धौ वत्स्यामि शिरसो रणे ।
रावणस्य सुदुष्टस्य भूयो भूयो दुरात्मनः ॥३१॥

ततः सन्धौ क्षणेऽहं तु पूजितव्या विधानतः ।
विपुलैरुपचारैस्तु मांसशोणितकर्दमैः ॥३२॥

ततः शत्रुं बलिं दद्यात्कृत्वा पिष्टमयं मम ।
नवम्यां पूजिताहं तु बलिभिर्विविधैरपि ॥३३॥

अपराह्णे रणे वीरं पातयिष्यामि रावणम् ।
दशम्यां मां प्रपूज्याथ प्रातरेव सुरोत्तमाः ॥३४॥

मूर्तिविसर्जनीया तु स्रोतःसु सुमहोत्सवैः ॥३५॥

एवं पञ्चदशाहेषु कृत्वा च सुमहोत्सवम् ।
निवृत्तिं प्राप्स्यथ सुरा हते तस्मिन्दुरात्मनि ॥३६॥

श्रीमहाभागवते उपपुराणे ब्रह्मणा देवीस्तुतिवर्णनं नाम पञ्चचत्वारिंशोऽध्यायः

षट्चत्वारिंशोऽध्यायः

श्रीदेव्युवाच—

एवं महोत्सवो देव्या अकालेऽस्मिन्समागते ।
त्रैलोक्यवासिभिः कार्यो मत्तृप्त्यै प्रतिवत्सरम् ॥१॥
नवम्यामार्द्रयुक्तायां बिल्वे मां परिपूज्य च ।
सम्बोध्य भक्तितः शुक्लां नवमीं यावदेव हि ॥२॥
प्रत्यहं पूजयिष्यन्ति ये तु लोकत्रये सुराः ।
तेषां प्रसन्ना नित्यं तु पूरयिष्ये मनोरथान् ॥३॥
न शत्रुः प्रभवेत्तस्य न वा बन्धुवियोजनम् ।
न दुःखं न च दारिद्र्यं मत्प्रसादाद्भविष्यति ॥४॥
ऐहिकं यन्मनोभीष्टं यच्च पारत्रिकं तथा ।
सम्पदं लभते सर्वां मत्प्रसादात्सुरोत्तमाः ॥५॥
पुत्रायुर्धनधान्यादिवृद्धिस्तेषां दिने दिने ।
भविष्यत्यचला लक्ष्मीर्मां भक्त्या यजतामपि ॥६॥
न व्याधयो भविष्यन्ति न च तान् ग्रहपीडकाः ।
पीडयन्ति न तेषां तु तापमृत्युर्भविष्यति ॥७॥
न भीती राजतो वापि दस्युतो वा भविष्यति ।
सिंहव्याघ्रादिजन्तुभ्यो न वा भीतिर्भविष्यति ॥८॥
यास्यन्ति वशतां भूयो ह्रासयिष्यन्ति शत्रवः ।
विजयश्च रणे नित्यं भविष्यति न संशयः ॥९॥
न तेषां दुष्कृतं किञ्चित्संस्थास्यति सुरोत्तमाः ।
नापदश्च तथा तेषां प्रभवन्ति कदाचन ॥१०॥
सम्प्राप्नोति नरः सौख्यं मत्प्रसादान्मदर्चकः ।
अन्ते प्राप्स्यति मल्लोकं सत्यं सत्यं न संशयः ॥११॥
अश्वमेधादियज्ञानां कोटीनामपि यत्फलम् ।
तत्फलं समवाप्नोति कृत्वार्चां वार्षिकीमिमाम् ॥१२॥
मोहाद्वा द्वेषतो वापि यो मामस्मिन्महोत्सवे ।
न पूजयति मूढात्मा स भवेद्योगिनीपशुः ॥१३॥
पूजयिष्यन्ति ये मर्त्ये स्वर्गे वापि रसातले ।
तेषां परं हि तुष्टाहं वाञ्छितानि दिने दिने ॥१४॥

संविधास्यामि सर्वाणि सत्यमेव सुरोत्तमाः ।
सात्त्विकं भावमाश्रित्य येऽर्चयिष्यन्ति मां जनाः ॥१५॥

न तैर्बलिः प्रदातव्यो न देयं सामिषान्नकम् ।
कर्तव्या मे महापूजा मम प्रीतिमभीप्सुभिः ॥१६॥

निरामिषैस्तु नैवेद्यैः स्तोत्रैर्वेदाङ्गसम्भवैः
विपुलैर्जपयज्ञैश्च विप्राणां भोजनैस्तथा ॥१७॥

सुसमाहितचित्तैस्तु हिंसादिपरिवर्जितैः ।
राजसं भावमापन्नैर्मम सम्प्राप्तये तु वै ॥१८॥

कर्तव्येयं महापूजा नानाबलिभिरादरात् ।
छागमेषादिमहिषैः सामिषान्नैस्तथैव च ॥१९॥

स्तोत्रैस्तु जपयज्ञार्थैर्विप्राणामपि भोजनैः ।
दुष्टशत्रुविनाशादिधनधान्यादिवर्धनम् ॥२०॥

संग्रामे विजयं पुत्रदाराद्यैहिकमुत्तमम् ।
परत्र च परं सौख्यं संप्राप्य च परं पदम् ॥२१॥

तामसी तु ममार्चा या नैतयोस्तुल्यता तु सा ।
अतः सा तु न कर्तव्या शान्तैश्च ज्ञानशालिभिः ॥२२॥

यजध्वं रामचन्द्रस्य संग्रामे जयहेतवे ।
रिपोर्निधनमिच्छन्तो महिषैश्छागमेषकैः ॥२३॥

पूजयध्वं प्रतिदिनं शुक्ला सा नवमी सुराः ।
महानवम्यां छागादिबलिभिर्विपुलैरहम् ॥२४॥

युष्माभिः पूजितव्या वै शत्रुविध्वंसकारिणी ।
ततस्तुष्टा महावीरं रावणं लोककण्टकम् ॥२५॥

अजेयं शत्रुभिः संख्ये पातयिष्यामि निश्चितम् ।
नवम्यां बलिदानेन प्रीतिर्मे महती भवेत् ॥२६॥

अतो देयो बलिस्तत्र मम प्रीतिमभीप्सुभिः ।
भक्त्या वाप्यथ वाभक्त्या जानता वाप्यजानता ॥२७॥

कर्तव्या वार्षिकी पूजाऽवश्यं लोकत्रये मम ।
बलिश्चापि प्रदातव्यः प्रत्यहं सुरसत्तमाः ॥२८॥

असमर्थैरपि सदा नवम्यां देय एव हि ।
यथाष्टम्यां बलिर्देवा महायज्ञफलप्रदः ॥२९॥

महाष्टम्यां मम प्रीत्यै उपवासः सुरोत्तमाः ।
कर्तव्यः पुत्रकामैस्तु लोकैस्त्रैलोक्यवासिभिः ॥३०॥
अवश्यं भविता पुत्रस्तेषां सर्वगुणान्वितः ।
पुत्रवद्भिर्न कर्तव्य उपवासस्तु तद्दिने ॥३१॥
अष्टम्यामुपवासात्तु नवम्यां बलिदानतः ।
फलं महत्तरं ज्ञेयमश्वमेधादियागतः ॥३२॥

श्रीमहादेव उवाच—

एवं निशम्य वचनं जगदम्बिकाया
ब्रह्मादयः सुरगणा जगदीश्वरीं ताम् ।
शत्रोर्जयाय बलिभिर्विविधैर्विधाना-
द्भक्त्यार्चयन्ननुदिनं नवमीदिनान्तम् ॥३३॥

श्रीमहाभागवते उपपुराणे शारदीयपूजाविधानकथनं नाम षट्चत्वारिंशोऽध्यायः ।

सप्तचत्वारिंशोऽध्यायः

श्रीमहादेव उवाच—

इन्द्राद्यास्त्रिदशाः स्वर्गे मर्त्ये च परमेश्वरः ।
पूजयित्वा महादेवीं सर्वलोकमहेश्वरीम् ॥१॥
संग्रामे पातयामास विशिखै रावणानुजम् ।
हताश्च वानरैर्घोरा राक्षसा लक्षकोटयः ॥२॥
राक्षसैश्च हताः सङ्ख्ये वानरा बहुकोटयः ।
प्रावर्तयन्नदीं घोरां शोणितौघतरङ्गिणीम् ॥३॥
मुण्डमाला च विपुला बभासे तत्र नारद ।
श्रुत्वा तु रावणो युद्धे निहतं भ्रातरं बहु ॥४॥
रुरोद शोकसंतप्तहृदयोऽथ मुमोह च ।
ततोऽतिकायो बलवाँस्तमाश्वास्य महारणे ॥५॥
चकार यात्रां कृष्णायां दशम्यां भीमविक्रमः ।
रामस्तु समरे हत्वा कुम्भकर्णं महाबलम् ॥६॥
प्रययौ भगवान् ब्रह्मा देवीं यत्रार्चयन्मुने ।
प्रणम्य च महात्मानं ब्रह्माणं जगतः पतिम् ॥७॥

कथयामास संग्रामे निहतं रावणानुजम् ।
ब्रह्मापि कथयामास देव्या यत्कथितं पुरा ॥८॥
पूजाविधानं शत्रूणां निधनं च दिनेदिने ।
तच्छ्रुत्वा वानरैर्नानाविधिं पूजोपहारकम् ॥९॥
आनाय्य भगवान् रामो दशम्यां प्रातरेव हि ।
पूजां प्रवर्तयन्भक्त्या बलिभिर्विपुलैरपि ॥१०॥
प्रणिपत्य महादेवीं पुनर्युद्धाय निर्ययौ ।
प्रतिकायस्तु दुर्धर्षः कम्पयन्धरणीतलम् ॥११॥
चालयन् सकलां पृथ्वीं रथनेमिस्वनेन च ।
समायातोऽपि विपुलैः सैनिकैः परिवारितः ॥१२॥
तस्मिन् समागते घोरं राक्षसानां दुरात्मनाम् ।
प्रावर्तत महायुद्धं वानरैर्भयदायकम् ॥१३॥
गदाभिः परिघैर्वृक्षैः पाषाणैर्वानरर्षभाः ।
राक्षसान् पातयामासुः शतशोऽथ सहस्रशः ॥१४॥
शस्त्रास्त्रैर्विविधैस्तद्वद्वानरानपि राक्षसाः ।
संग्रामे पातयामासुर्महाबलपराक्रमाः ॥१५॥
ततो धनुः समादाय भ्रातरौ रामलक्ष्मणौ ।
पातयामासतुः सङ्ख्ये राक्षसान् भीमविक्रमान् ॥१६॥
स चापि राक्षसश्रेष्ठो निनदन् समराजिरे ।
वानरान्पातयामास शतशोऽथ सहस्रशः ॥१७॥
ततः समभवद्युद्धमतुलं लोमहर्षणम् ।
रामलक्ष्मणयोस्तेन राक्षसेन दुरात्मना ॥१८॥
प्रहस्तप्रमुखाश्चान्ये ये च वीरा महाबलाः ।
तैः सार्धं वानरेन्द्रेण युद्धं चासीत्सुदारुणम् ॥१९॥
यथा प्रवृत्तं तेषां तु युद्धं घोरतरं महत् ।
दिवारात्रं मुनिश्रेष्ठ पश्यतां भयदायकम् ॥२०॥
यथा नालोकितं कैश्चिद्देवैर्वा यक्षकिन्नरैः ।
कदाचिदन्तरिक्षे च कदाचिद्धरणीतले ॥२१॥
महास्त्रशस्त्रविक्षेपैर्गदासिपरिघोत्तमैः ।
त्रिशूलैः पट्टिशैर्वापि बभूव तुमुलं महत् ॥२२॥

दिनेऽपि समभूद्रात्रिर्निशीथेऽप्यभवद्दिनम् ।
अनभ्रेऽप्यभवद्वृष्टिर्वायुश्च तुमुलो ववौ ॥२३॥

वज्रावपातः शतशो बभूव समराङ्गणे ।
एवं समभवद्युद्धं दिनत्रयमनुत्तमम् ॥२४॥

ततो रात्रौ त्रयोदश्यां चतुर्थेऽहनि लक्ष्मणः ।
जघान तं महावीरमतिकायं महेषुभिः ॥२५॥

अन्ये च राक्षसश्रेष्ठा राघवेण महात्मना ।
निहताः समरे केचिद्वानरैरपि चापरे ॥२६॥

हनुमदङ्गदाद्यैश्च निहता बहवो रणे ।
दुद्रुवुश्च भयात्केचिद्रामो हृष्टमना बभौ ॥२७॥

वानराः स्युर्महाहर्षाश्चक्रुर्जयजयध्वनिम् ।
बभूव नभसः पुष्पवृष्टिश्च महती ततः ॥२८॥

रामोऽपि भ्रातरं दोर्भ्यामालिङ्ग्य परमाहतः ।
मूर्ध्न्यवघ्राय हृष्टात्मा ब्रह्मणोऽन्तिकमन्वगात् ॥२९॥

प्रातः सम्पूजयामास देवीं बिल्वे सुरेश्वरीम् ।
ततः प्रणम्य भूयोऽगाद्युद्धाय रणमूर्धनि ॥३०॥

रावणोऽथ समाकर्ण्य निहतं तं महाबलम् ।
रक्षायै विनियोज्यैव पुरस्य तनयं मुने ॥३१॥

मेघनादं महावीरं स्वयं युद्धाय निर्ययौ ।
तदाऽऽसीन्सुमहद्युद्धं भयदं ह्यतुलं मुने ॥३२॥

रक्षसा वानराणां च यमराष्ट्रविवर्धनम् ।
रामेण लक्ष्मणेनापि युद्धं तस्याभवन्महत् ॥३३॥

तत्र वीक्ष्य समीपे तु विभीषणममर्षतः ॥३४॥

मयदत्तां महाशक्तिं जग्राह स निशाचरः ।
जाज्वल्यमानां तां शक्तिं विभीषणवधोद्यताम् ॥३५॥

लक्ष्मणस्त्रातुकामस्तं सम्मुखे तस्य संस्थितः ।
सा शक्तिस्तेन निःक्षिप्ता प्रबिभेद रसातलम् ॥३६॥

लक्ष्मणो मूर्छितश्चापि पपात धरणीतले ।
तं समादातुकामः स लक्ष्मणं राक्षसेश्वरः ॥३७॥

पस्पर्श बाहुभिः क्षिप्रं क्रुद्धस्तं पवनात्मजः ।
मुष्टिना ताडयामास सुदृढं विपुलोरसि ॥३८॥

स तेन ताडितो वीरः पपात रुधिरं वमन् ।
मूर्च्छितो घूर्णनयनो निश्चेताः स्वरथोपरि ॥३९॥

ततः संज्ञामनुप्राप्य धनुरुद्यम्य वेगतः ।
मारुतिं हन्तुकामोऽसावभ्यधावत रावणः ॥४०॥

ततः सम्वीक्ष्य दुर्धर्षं मारुतेरन्तकोपमम् ।
श्रीरामो धनुरुद्यम्य रावणं चेदमब्रवीत् ॥४१॥

अद्य राक्षसराज त्वां निशितैः सायकोत्तमैः ।
पातयिष्यामि दुष्टात्मन्यदि नोत्सृजसे रणम् ॥४२॥

इत्युक्त्वा स महाबाहुर्बाणं धनुषि सन्दधे ।
ततो भयाद्रणं त्यक्त्वा रावणः पुरमाययौ ॥४३॥

तमाश्वास्य रणे प्रायादिन्द्रजिद्भीमविक्रमः ।
तेनाभवन्महद्युद्धं लक्ष्मणस्य महात्मनः ॥४४॥

सुघोरं भयदं सर्वलोकसम्मोहकारकम् ।
ततो रात्रावमोघास्त्रैर्लक्ष्मणस्तं दुरासदम् ॥४५॥

पातयामास संग्रामे त्वमायां मुनिपुङ्गव ।
ततो विलप्य बहुधा देवान्तकमुखैर्वृतः ॥४६॥

स्वयं पुनः समायातः संग्रामे राक्षसेश्वरः ।
प्रतिपत्तिथिमारभ्य यावच्च नवमीतिथिम् ॥४७॥

बभूव तुमुलं युद्धं रामरावणयोर्महत् ।
अतुल्यं वचनातीतं सर्वलोकभयङ्करम् ॥४८॥

तत्र षष्ठीतिथिर्यावत्तावत्सैन्यं दिने दिने ।
विनष्टं राक्षसेन्द्रस्य विपुलं संख्ययोज्झितम् ॥४९॥

तस्यां षष्ठ्यां विनिर्माय मृण्मयीं प्रतिमां शुभाम् ।
सायं कृत्वाधिवासं तु ब्रह्मा लोकपितामहः ॥५०॥

पत्रीं प्रवेष्टां सप्तम्यां देवीं तां समपूजयत् ।
पत्रीप्रवेशमात्रेण सर्वसंहारकारिणी ॥५१॥

रावणस्य वधार्थाय श्रीरामधनुराविशत् ।
महाष्टम्यां ततो देवीं प्रातरेव जगत्पिता ॥५२॥

भक्त्या सम्पूजयामास विपुलैरुपहारकैः ।
ततः प्रसन्ना तस्मिन् स दिनसन्धौ महेश्वरी ॥५३॥

प्रविष्टा रामचन्द्रेषुं रावणस्य शिरांसि च ।
प्रचिच्छेद मुनिश्रेष्ठ शतधा स रणाजिरे ॥५४॥

सोऽपि भीतो भगवतीं सस्मार दशकन्धरः ।
यदा तत्याज बाणान्स राघवो निधनेच्छया ॥५५॥

तस्माद्भूयो बभूवुश्च देहमात्राच्छिरांसि च ।
न जहौ समरे प्राणान् छेदितोऽपि महेषुभिः ॥५६॥

चकार तुमुलं युद्धं पूर्वाह्णे नवमीदिने ।
अतीव भयदं सर्वदेवानां दिवि पश्यताम् ॥५७॥

महानवम्यां तस्यां तु ब्रह्मा लोकपितामहः ।
देवीं सम्पूजयामास नानाबलिभिरादरात् ॥५८॥

सुरम्यैर्धूपदीपाद्यैर्नैवेद्यैर्विविधैरपि ।
ततो देवी भगवती या विद्या मुक्तिदा स्वयम् ॥५९॥

सैवाविद्यास्वरूपेण रावणं समुपागमत् ।
ततो न देवीं सस्मार न वा भक्तिश्च तत्र वै ॥६०॥

तस्यासीन्मुनिशार्दूल मोहितस्य च मायया ।
अमर्षवशमापन्नो युयुधे राघवेण वै ॥६१॥

ब्रह्मास्त्रजालसंघैः स दर्शयन् शक्तिमात्मनः ।
तथैव राघवश्चापि ब्रह्मास्त्रनिवहैर्मुने ॥६२॥

ताडयामास दुर्धर्षं रक्षसामधिपं रणे ।
एवं प्रहरतोः क्रोधात्परस्परजयैषिणोः ॥६३॥

व्यतीतमभवन्मध्यंदिनं श्रीरामरक्षसोः ।
ततोऽपराह्णे रामस्तु सन्ध्याय परमेश्वरीम् ॥६४॥

प्रणम्य प्रार्थयामास वधार्थं तस्य रक्षसः ।
ब्रह्मापि प्रणिपत्यैनां देवीं भक्त्या पुनः पुनः ॥६५॥

प्रार्थयामास नाशाय रावणस्य दुरात्मनः ।
ततो देवी स्वयं प्रादादमोघं शस्त्रमुत्तमम् ॥६६॥

वधार्थं राक्षसेन्द्रस्य ज्वलत्कालाग्नितेजसम् ।
ब्रह्मा तदस्त्रमानीय प्रीत्या परमया युतः ॥६७॥

श्रीरामाय ददौ शीघ्रं रावणस्य विघातिने ।
सर्वशक्तिमयं चारुवेगं कालान्तकोपमम् ॥६८॥

ज्वलन्तं तेजसा वीक्ष्य मुमुदे रघुनन्दनः ।
ततः संस्मृत्य तां देवीं तदस्त्रं राघवो मुने ॥६९॥

सन्धायाकर्णकोदण्डं तूर्णं चिक्षेप तं प्रति ।
ततस्तदस्त्रं निर्भिद्य हृदयं दुष्टचेतसः ॥७०॥

प्राणान् जग्राह वेगेन विवेश च धरातलम् ।
ततः पपात सङ्ग्रामे रथाद्धेमपरिष्कृतात् ॥७१॥

पश्यतां सर्वदेवानां रावणो देवकण्टकः ।
चालयन्वसुधां सर्वां क्षोभयन् सरितां पतिम् ॥७२॥

त्रासयन् सर्वभूतानि राक्षसांश्च विषादयन् ।
वानरा हर्षसम्पन्नाश्चक्रुर्जयजयध्वनिम् ॥७३॥

त्रैलोक्यवासिनश्चान्ये हते तस्मिन्दुरात्मनि ।
बभूव पुष्पवृष्टिश्च रामोपरि सुगन्धिदा ॥७४॥

रामाज्ञया तु देवेन्द्रो ववर्षाप्यमृतं यदा ।
तदा सञ्जीविता भूयो वानरा ये हता रणे ॥७५॥

बिभीषणस्तु बहुधा भ्रातृशोकेन दुःखितः ।
रुरोद सान्त्वयामास तं रामो भगवान् स्वयम् ॥७६॥

रावणस्य च संस्कारं कृतवान् स बिभीषणः ।
ततः सीतां समानीय लक्ष्मणेन समन्वितः ॥७७॥

श्रीरामो हर्षमापन्नो वानरैश्च समन्वितः ।
प्रायात्सम्पूजिता यत्र ब्रह्मणा जगदीश्वरी ॥७८॥

श्रीमहाभागवते उपपुराणे श्रीरामरावणयोः संग्रामे रावणवधो
नाम सप्तचत्वारिंशोऽध्यायः

अष्टचत्वारिंशोऽध्यायः

श्रीमहादेव उवाच—

श्रीरामस्तु ततो देवीं भक्त्या परमया युतः ।
प्रणम्य दण्डवद्भूमौ तुष्टाव प्रीतमानसः ॥१॥
अन्ये च त्रिदशश्रेष्ठास्तत्रागत्य महामुने ।
तुष्टुवुश्च महादेवीं सृष्टिस्थित्यन्तकारिणीम् ॥२॥
तैः संस्तुता महादेवी पूजिता भक्तिभावतः ।
विपुलैर्बलिभिः प्रीता बभूव जगदम्बिका ॥३॥
प्रहर्षश्च महानासीन्मुने त्रैलोक्यवासिनाम् ।
तत्र देव्या महोत्साहे स्वर्गे मर्त्ये रसातले ॥४॥
ननृतुर्वानराः सर्वे जगुर्गीतं मनोहरम् ।
श्रीरामो मुमुदे देव्याः प्रसादात्पूर्णमानसः ॥५॥
एवं महामहोत्साहे गते तु नवमीतिथौ ।
श्रीरामस्य तथान्येषां देवानामपि नारद ॥६॥
दशम्यां पूजयित्वा तु प्रातरेव पितामहः ।
व्यसृजज्जलधौ मूर्तिं ततः स्वगृहमाययौ ॥७॥
लङ्केश्वरं ततश्चक्रे रामचन्द्रो विभीषणम् ।
ततः श्रीमान् रघुश्रेष्ठः सीतया लक्ष्मणेन च ॥८॥
पुष्पकं रथमारुह्य वानरेश्वरसंयुतः ।
सहितो वानरैः सर्वैः राक्षसेशसमन्वितः ॥९॥
वेष्टितैस्त्रिदशैश्चापि भल्लूकैः कोटिकोटिशः ।
पुरःप्रवेशने यात्रां चक्रे नत्वा महेश्वरीम् ॥१०॥
इत्येवं मुनिशार्दूल भगवान्पुरुषोऽव्ययः ।
स्वयमाराधयामास शरत्काले विधानतः ॥११॥
अन्येषां का कथा वत्स देवानां यक्षरक्षसाम् ।
नराणां सिद्धगन्धर्वपन्नगानां महामते ॥१२॥
नास्ति देव्या समो लोके समाराध्यतमो मुने ।
यस्तां मोहान्न सेवेत स पापात्मा न संशयः ॥१३॥
न तस्य विद्यते स्थानं कुत्रापि मुनिसत्तम ।
यस्तत्सपर्यालोपं वै करोति च स पापकृत् ॥१४॥

तस्माच्छाक्तोऽथ वा शैवः सौरो वा वैष्णवोऽथ वा ।
अवश्यं पूजयेद्देवीं शारदीये महोत्सवे ॥१५॥

बलिभिर्मत्स्यमांसाद्यैश्छागकासरमेषकैः ।
प्रीतये जगदीश्वर्यास्तथान्यैरुपचारकैः ॥१६॥

वित्तशाठ्यं न कर्तव्यं कर्तव्यं सर्वथादृतैः ।
अवश्यं यजनं देव्याः शारदीये महोत्सवे ॥१७॥

गृह्णाति चण्डिका यस्माद् दुष्टान् वै पशुरूपकान् ।
तस्मात्पशुबलिर्देयो देवीभक्तिपरायणैः ॥१८॥

अन्यैरपि महायज्ञे देव्याः प्रीतिमभीप्सुभिः ।
देव्यर्चनरता ये च प्रतिसंवत्सरं मुने ॥१९॥

तदाज्ञावशगाः सर्वे देवा इन्द्रपुरोगमाः ।
किमन्यद्बहुनोक्तेन सत्यमेव महामुने ॥२०॥

नास्ति लोकत्रये पुण्यं देव्या अर्चनसम्भवात् ।
य इदं शृणुयाद्भक्त्या रामायणमनुत्तमम् ॥२१॥

देव्या विस्तृतमाहात्म्यं महापातकनाशनम् ।
स देव्याः पदवीं याति ब्रह्मादीनां सुदुर्लभाम् ॥२२॥

इत्युक्तं ते मुनिश्रेष्ठ यथा स भगवान् हरिः ।
सम्भूय मानुषं देहं समाश्रित्य धरातले ॥२३॥

शत्रोर्निधनमन्विच्छन्नकालेऽपि विधानतः ।
देवीं सम्पूजयामास भूयः किं श्रोतुमिच्छसि ॥२४॥

श्रीमहाभागवते उपपुराणे देव्याः शारदीयपूजानुष्ठाने श्रीमद्रामायणवर्णन नाम अष्टचत्वारिंशोऽध्यायः ॥४८॥

एकोनपञ्चाशोऽध्यायः

श्रीनारद उवाच—

वदन्त्यनेकतत्त्वज्ञाः काली विद्या परात्परा ।
या सैव कृष्णरूपेण क्षिताववातरत्स्वयम् ॥१॥

वसुदेवगृहे देव्यां देवक्यां निजलीलया ।
कंसादिदुष्टभूभारनिवृत्त्यै जगदीश्वरः ॥२॥

अभवच्छ्रोतुमिच्छामि कस्माद्देवी महेश्वरी ।
पुंरूपेणावतीर्णाभूत्क्षितौ तन्मे वद प्रभो ॥३॥

श्रीमहादेव उवाच—

शृणु गुह्यतमं वत्स सत्यं ते कथयामि तत् ।
अवतीर्णाभवत्पृथ्व्यां देवक्यां वसुदेवतः ॥४॥

शम्भोरिच्छानुसारेण मायापुरुषरूपधृक् ।
दुष्टभूभारसंहृत्यै द्वापरान्ते महीतले ॥५॥

श्रीनारद उवाच—

यथेच्छा समभूच्छम्भोर्यथा चावातरत्क्षितौ ।
काली श्रीकृष्णरूपेण वसुदेवगृहे स्वयम् ॥६॥

देवक्यां परमेशान तदेतद्विस्तरेण मे ।
त्वं मे शंस जगन्नाथ सर्वज्ञोऽसि दयापरः ॥७॥

श्रीमहादेव उवाच—

वत्स वक्ष्याम्यशेषेण तवाहं मुनिसत्तम ।
यथेच्छाभून्महेशस्य यथा जाता च सा क्षितौ ॥८॥

काली श्रीकृष्णरूपेण द्वापरान्ते महीतले ।
शृणु सावहितो भूत्वा भक्तिमानसि नारद ॥९॥

एकदा मन्दिरे रम्ये कैलासे च सुनिर्जने ।
पार्वत्या विहरञ्छम्भुः स्थितः परमकौतुकी ॥१०॥

तत्र शम्भुर्निरीक्ष्यैव पार्वत्या रूपमुत्तमम् ।
चेतसा चिन्तयामास नारीजन्मातिशोभनम् ॥११॥

ततः प्राह महादेवो देवीं सर्वाङ्गसुन्दरीम् ।
प्रीणयन् प्रियवाक्येन विमृजन् पाणिना मुखम् ॥१२॥

श्रीशिव उवाच—

कृपया परमेशानि सर्व एव मनोरथाः ।
परिपूर्णीकृताः किञ्चिदवशिष्टं न विद्यते ॥१३॥

अन्यत्किमपि शर्वाणि विद्यते वाञ्छितं मम ।
तत्सम्पूर्णं कुरु शिवे यदि ते मय्यनुग्रहः ॥१४॥

श्रीदेव्युवाच—

किमन्यद्विद्यते शम्भो वाच्छितं तद्वद प्रभो ।
करिष्ये तच्च सम्पूर्णं भवतः प्रियकाम्यया ॥१५॥

श्रीशिव उवाच—

यदि मे त्वं प्रसन्नासि तदा पुंस्त्वमवाप्नुहि ।
कुत्रचित्पृथिवीपृष्ठे यास्येऽहं स्त्रीस्वरूपताम् ॥१६॥
यथाहं ते प्रियो भर्ता त्वं वै प्राणसमाङ्गना ।
एतदेव मनोभीष्टं विद्यते प्रार्थ्यमुत्तमम् ॥१७॥
कुरुष्व परिपूर्णं मे भक्ताभीष्टफलप्रदे ।

श्रीदेव्युवाच—

भविष्येऽहं त्वत्प्रियार्थं निश्चितं धरणीतले ॥१८॥
पुंरूपेण महादेव वसुदेवगृहे प्रभो ।
कृष्णोऽहं मत्प्रियार्थं स्त्री भव त्वं हि त्रिलोचन ॥१९॥

श्रीशिव उवाच—

पुंरूपेण जगद्धात्रि प्राप्तायां कृष्णतां त्वयि ।
वृषभानोः सुता राधास्वरूपाहं स्वयं शिवे ॥२०॥
तव प्राणसमा भूत्वा विहरिष्ये त्वया सह ।
मूर्तयोऽष्टौ तथा मर्त्ये भविष्यन्त्युत योषितः ॥२१॥
रुक्मिणीसत्यभामाद्या महिष्यश्चारुलोचनाः ॥

श्रीदेव्युवाच—

तव मूर्तिभिरेताभिर्विहरिष्ये यथोचितम् ॥२२॥
यथा नापि कृतं कैश्चिन्न श्रुतं वापि कुत्रचित् ।
अपूर्वं तदुपाख्यानं लोकानां पापनाशनम् ॥२३॥
भविष्यति महादेव महापुण्यकरं तथा ।
विजया च जया चैव प्रियसख्यौ मम प्रभो ॥२४॥
श्रीदामवसुदामाख्यौ पुरुषौ सम्भविष्यतः ।
विष्णुना समयः पूर्वमासीन्मम महेश्वर ॥२५॥
स मेऽग्रजः प्रियो भ्राता भविष्यति हलायुधः ।
मम प्रीतिकरो नित्यं रामाख्यः सुमहाबलः ॥२६॥
देवकार्यं [करिष्यामि सम्भविष्यामि च क्षितौ ।
संस्थाप्य महतीं कीर्तिं पुनरेष्यामि भूतलात् ॥२७॥

श्रीमहादेव उवाच—

एवं प्रतिश्रुतं देव्या शम्भवे प्रेमभावतः ।
तस्माद्बभूव सा कृष्णः श्यामो नवघनद्युतिः ॥२८॥

एतदेव मुनिश्रेष्ठ कारणं मूलमीरितम् ।
कृष्णावतारे शर्वाण्या अन्यच्चापि निशामय ॥२९॥

निहताः समरे दैत्याः पूर्वं देव्या च विष्णुना ।
द्वापरान्ते महीपाला बभूवुर्मुनिसत्तम ॥३०॥

कंसस्तत्रातिदुर्धर्षस्तथा दुर्योधनादयः ।
अनेकदेशसम्भूतास्तथान्ये क्षत्रियर्षभाः ॥३१॥

तेषां भारासहा पृथ्वी गोरूपा ब्रह्मणोऽन्तिकम् ।
प्रययौ त्रिदशैः सर्वैः समन्तात्परिवारिता ॥३२॥

तां दृष्ट्वा धरणीं ब्रह्मा गोरूपामतिदुःखिताम् ।
उवाच मातः कस्मात्त्वं मदन्तिकमुपागता ॥३३॥

धरण्युवाच—

निहताः समरे ये ये पूर्वं दानवपुङ्गवाः ।
त एव साम्प्रतम् ब्रह्मन् राजानो दुष्टचेतसः ॥३४॥

तान्वोढुमसमर्थाहं तवान्तिकमुपागता ।
उपायः कल्प्यतां तेषां निधने कमलासन ॥३५॥

श्रीमहादेव उवाच—

इत्याकर्ण्य वचो ब्रह्मा धरण्या मुनिपुङ्गव ।
आश्वास्य तां स्वयं प्रागात्कैलासं त्रिदशैर्वृतः ॥३६॥

तत्र वीक्ष्य जगद्धात्रीं प्रणिपत्य पुनः पुनः ।
कृताञ्जलिपुटो ब्रह्मा वचनं चेदमब्रवीत् ॥३७॥

ब्रह्मोवाच—

मातस्त्वया हता ये ये दैत्यदानवराक्षसाः ।
विष्णुनापि च ते सर्वे साम्प्रतं क्षत्रियर्षभाः ॥३८॥

तैर्व्याप्ता सकला पृथ्वी राजभिर्दुष्टचेष्टितैः ।
न तान् विसहते पृथ्वी मृत्युस्तेषां विचिन्त्यताम् ॥३९॥

त्वं मातर्विग्रहं कृत्वा छलेन धरणीभुजः ।
निपातय च तेषां तु मृत्युरूपा त्वमम्बिके ॥४०॥

श्रीदेव्युवाच—

नाहं योत्स्यामि संग्रामे स्त्रीरूपा क्षत्रियर्षभैः ।
यतस्ते स्त्रीस्वरूपेण मां भक्त्या समुपाश्रिताः ॥४१॥

किन्तु मे भद्रकाली या मूर्तिर्नवघनद्युतिः ।
वसुदेवगृहे ब्रह्मन् पुंरूपेण भविष्यति ॥४२॥

देवक्यां द्विभुजः सौम्यो वनमालाविराजितः ।
श्रीवत्सलाञ्छनधरः सुचारुमुखपङ्कजः ॥४३॥

आत्मसंगोपनार्थाय विष्णुलक्षणलक्षितः ।
सर्वाङ्गसुन्दरः श्यामः शङ्खचक्रविराजितः ॥४४॥

भविष्यति महामायो दुष्टक्षत्रियमर्दनः ।
पातयिष्यति कंसादीन् विविधान् क्षत्रियर्षभान् ॥४५॥

विष्णुश्चापि निजांशेन पाण्डवो भीमविक्रमः ।
अर्जुनेतिसमाख्यातो भविष्यति महाबलः ॥४६॥

तस्य भ्राता स्वयं धर्मो ज्येष्ठो नाम्ना युधिष्ठिरः ।
उत्पन्नश्चापरस्तद्वद्भीमसेनो महाबलः ॥४७॥

पवनोऽपि निजांशेन महाबलपराक्रमः ।
उत्पत्स्यतस्तथा माद्रिपुत्रौ भीमपराक्रमौ ॥४८॥

अश्विनौ सहजौ वीरौ भ्रातरावतिदुर्जयौ ।
ते धर्मनिरताः सर्वे पाण्डवाः सत्यविक्रमाः ॥४९॥

मदंशसम्भवां कृष्णामवमंस्यति दुर्मतिः ।
दुर्योधनाह्वयः क्रूरः सर्वेषां कण्टकोपमः ॥५०॥

अन्यच्चापि स पापात्मा पाण्डवानां महात्मनाम् ।
संक्लेशजनकं कर्म करिष्यति दुरासदः ॥५१॥

अज्ञातवनवासादि दुःखदं सर्वदेहिनाम् ।
ततोऽहं पाण्डुपुत्राणां कृत्वा साहाय्यमुत्तमम् ॥५२॥

उद्योगं सुमहत्कृत्वा भविष्ये समरोत्सुकः ।
स चापि दुर्मतिः कर्णशकुन्योर्मतमास्थितः ॥५३॥

करिष्यति समुद्योगं युद्धे दुर्योधनः स्वयम् ।
तत्र सर्वे महीपाला नानादेशनिवासिनः ॥५४॥

समायास्यन्ति साहाय्यं कर्तुं भरतसिंहयोः ।
वितत्य महतीं मायां तत्राहं रणमूर्धनि ॥५५॥

पातयिष्यामि तान्वीरान्परस्परजिघांसतः ।
मयैव मोहिताः सर्वे राजानो दुष्टचेतसः ॥५६॥

पातयिष्यन्ति संग्रामे शस्त्रघातैः परस्परम् ।
शून्या राजर्षिभिः पृथ्वी बालवृद्धावशेषिता ॥५७॥

भविष्यति कुरुक्षेत्रे युद्धे जाते सुदारुणे ।
स्थास्यन्ति भ्रातरः पञ्च पाण्डवा धर्मतत्पराः ॥५८॥

पुण्यात्मानो महाभागा मयि भक्तिपरायणाः ।
एवमेवंविधे दुष्टान् राजन्यान् दुष्टचेतसः ॥५९॥

प्रायशो नाशयिष्यामि कुरुपाण्डुसमागमे ।
अन्यांस्तत्र विशिष्टांश्च क्षत्रियान् भीमविक्रमान् ॥६०॥

पातयिष्यामि संग्रामे छलेन कमलासन ।
तत्र स्थित्वा परां कीर्तिं संस्थाप्याहं महीतले ॥६१॥

उत्पाद्य सन्ततीश्चापि विनिपात्य छलेन च ।
निर्भरां वसुधां कृत्वा पुनरेष्यामि चात्र तु ॥६२॥

एवं लोकहितार्थाय करिष्यामि जगत्पते ।
त्वं च गत्वा जगन्नाथं प्रार्थयस्व सुरोत्तमम् ॥६३॥

स यथा मानुषं देहमाश्रित्य धरणीतले ।
अवतीर्णो भवेच्छीघ्रं पाण्डुपत्न्यां महाबलः ॥६४॥

तथा विधेहि यत्नेन मा चिरं कमलासन ।
त्वरितं गच्छ वैकुण्ठे वार्तां कथय तं विधे ॥६५॥

श्रीमहादेव उवाच—

इत्येवं स तया प्रोक्तो ब्रह्मा लोकपितामहः ।
प्रणिपत्य महादेवीं वैकुण्ठं प्रययौ त्वरन् ॥६६॥

तत्र सम्प्रार्थयामास विष्णुं कमलसम्भवः ।
पृथिव्यां जन्मने पाण्डोः पत्न्यां मानुषरूपतः ॥६७॥

तच्छ्रुत्वा भगवान् प्राह देहं मानुषमाश्रितः ।
सम्भविष्यामि भूपृष्ठे कुन्त्यां देवात्पुरन्दरात् ॥६८॥

तच्छ्रुत्वा भगवान्ब्रह्मा प्रहृष्टात्मा निजालयम् ।
प्रययौ मुनिशार्दूल प्रणिपत्य जगत्पतिम् ॥६९॥

श्रीमहाभागवते उपपुराणे श्रीमहादेवनारदसंवादे ब्रह्मभगवत्योः
कथोपकथनं नाम एकोनपञ्चाशोऽध्यायः

पञ्चाशोऽध्यायः

श्रीमहादेव उवाच—

विधिना प्रार्थिता देवी वसुदेवसुतः स्वयम् ।
निजांशेनाभवत्कृष्णो देवानां कार्यसिद्धये ॥१॥
विष्णुश्चापि द्विधा भूत्वा जन्म लेभे महीतले ।
वसुदेवगृहे रामो महाबलपराक्रमः ॥२॥
तथापरः पाण्डुसुतो धन्विश्रेष्ठो धनञ्जयः ।
इदानीं जन्मविस्तारं शृणु तेषां महामते ॥३॥
तत्रादौ शृणु ते वक्ष्ये जन्म श्रीरामकृष्णयोः ।
अदितिर्देवमाता च कश्यपोऽथ प्रजापतिः ॥४॥
देवीं सम्प्रार्थयामास सद्भक्त्या सुचिरं पुरा ।
निराहारो जले स्थित्वा शीते ग्रीष्मेऽग्निमध्यतः ॥५॥
दिव्यौ वर्षसहस्रौ द्वौ तेपाते भक्तिसंयुतौ ।
तयोः प्रसन्ना समभूत्प्रत्यक्षा जगदीश्वरी ॥६॥
उवाच युवयोः किंवा वाञ्छितं वृणुतं च तत् ।
ततस्तावूचतुर्देवीं प्रणिपत्य पुनः पुनः ॥७॥
मातस्त्वमावयोर्गेहे जन्म प्राप्नुहि लीलया ।
यथा दक्षगृहे जन्माभवत्तव पुरोत्तमे ॥८॥
प्रसूत्यामावयोर्गेहे जन्म द्वापरशेषतः ।
कुत्रचित्पृथिवीपृष्ठे तथा ते सम्भवस्तु ते ॥९॥

श्रीदेव्युवाच—

शम्भोरीप्सितसिद्धयर्थं स्त्रीरूपस्य निजेच्छया ।
पुंरूपः सम्भविष्यामि नवीनजलदद्युतिः ॥१०॥
तवेयं मुण्डमालाऽपि वनमाला भविष्यति ।
सौम्यरूपं वपुर्घोरं द्विनेत्रं द्विभुजान्वितम् ॥११॥
पीताम्बरधरं वंशीकरं गोपीमनोहरम् ।
भविष्यति सुसम्पन्नं विष्णुलक्षणलक्षितम् ॥१२॥

श्रीमहादेव उवाच—

इत्युक्त्वा सा महादेवी तयोरन्तर्हिताभवत् ।
तौ जग्मतुर्निजस्थानं प्रहृष्टौ मुनिसत्तम ॥१३॥

स कश्यपो यदुकुले जन्म प्राप्य प्रजापतिः ।
वसुदेवेति विख्यातः समभूद्धरणीतले ॥१४॥
अदितिश्च द्विधा जाता देवकी रोहिणी तथा ।
भगिनी दुष्टचेष्टस्य राज्ञः कंसस्य नारद ॥१५॥
तां तथा रोहिणीं चापि वसुदेवो विधानतः ।
उपयेमे मुनिश्रेष्ठ शरच्चन्द्रनिभाननाम् ॥१६॥
तत्रोद्वाहे तु देवक्या राज्ञा कंसो महासुरः ।
अतीव मङ्गलं चक्रे भगिनीस्नेहहेतुना ॥१७॥
ततः प्रयाणसमये देवकीवसुदेवयोः ।
आरुह्य रथमभ्यायात्ताभ्यां कंसोऽतिदुष्टधीः ॥१८॥
एतस्मिन् समये वाणी नभसः समभून्मुने ।
अशरीरसमुत्पन्ना सहसा देवभाषिता ॥१९॥
एतस्या अष्टमो गर्भो सम्भविष्यति यः पुमान् ।
स हन्ता भविता राजंस्तव नूनं महीपते ॥२०॥
तच्छ्रुत्वा सहसा सोऽपि खड्गमुद्यम्य वेगतः ।
देवकीं छेत्तुकामस्तां प्राभ्यधावत दुर्मतिः ॥२१॥
ततस्तं प्रणिपत्यासौ वसुदेवो महामतिः ।
दास्यामि सन्ततीः सर्वा एतस्या गर्भसम्भवाः ॥२२॥
तुभ्यं यथेष्टकरणे स्वीकृत्यैवं न्यवेदयत् ।
ततः सोऽपि नियोज्यैवं रक्षकान्मुनिसत्तम ॥२३॥
निवृत्तः समभूत्तस्या निधनादतिदुर्मतिः ।
रक्षकानाह दुष्टात्मा यदास्यास्तनयो भवेत् ॥२४॥
तदान्तिकं ममाभ्येत्य कथयध्वं हि रक्षकाः ।
सञ्जाते त्वष्टमे गर्भ कथयिष्यथ मां ध्रुवम् ॥२५॥
तदैनां घातयिष्यामि सगर्भां भगिनीं मम ।
इत्याज्ञाप्य स दुष्टात्मा देवक्याः परिरक्षकान् ॥२६॥
मन्त्रिभिः सहितो राजा निर्विण्णो गृहमाविशत् ।
ततस्तस्याज्ञया तस्या गर्भे जाते तु रक्षकाः ॥२७॥
राजानं कथयामासुस्तस्या जातान्सुतानपि ।
श्रुत्वा श्रुत्वा स पापात्मा जातमात्रान्प्रगृह्य च ॥२८॥

जघान सम्प्राताड्यैव शिलायां मुनिसत्तम ।
एवं निहत्य देवक्याः षड्वै गर्भसमुद्भवान् ॥२९॥
सम्भाव्यमाने गर्भे तु सप्तमे सोऽतिमूढधीः ।
अतिसावहितांश्चक्रे देवकीपरिरक्षकान् ॥३०॥
एतस्मिन्नन्तरे ब्रह्मा कैलासं समुपागमत् ।
समस्तैस्त्रिदशैः सार्धं मन्त्रणार्थं जगत्पतिः ॥३१॥
स प्रणम्य महादेवीं देवं चापि सदाशिवम् ।
देव्यग्रे प्राञ्जलिर्भूत्वा वचनं चेदमब्रवीत् ॥३२॥

ब्रह्मोवाच—

मातस्त्वयोक्तं देवक्यां जन्म प्राप्य महीतले ।
पुंरूपं पृथिवीभारं शमयिष्यामि निश्चितम् ॥३३॥
तस्यास्तु सन्ततीः सर्वा जातमात्राः शिलोपरि ।
प्रहृत्य नाशयत्येव राजा कंसोऽतिदुष्टधीः ॥३४॥
पूर्वं विवाहे देवक्याः कंसाय समभूद्वचः ।
आकाशोद्भवमत्युच्चैर्भयदं तस्य दुर्मतेः ॥३५॥
देवक्या अष्टमो गर्भो सम्भविष्यति यः पुमान् ।
स ते विनाशकारीति निश्चितं विद्धि दुर्मते ॥३६॥
तच्छ्रुत्वा स तदैवातिदुष्टस्तां देवकीं शिवे ।
संछेत्तुमुद्यमं चक्रे वसुदेवस्तु तं तदा ॥३७॥
आश्रुत्य वारयामास जातापत्यसमर्पणम् ।
ततः स निश्चयं चक्रे गर्भे जातेऽष्टमे ध्रुवम् ॥३८॥
देवकीं घातयिष्यामीत्येवं कंसोऽतिमूढधीः ।
तेन सञ्जातमात्रांस्तु देवकीगर्भसम्भवान् ॥३९॥
षट्सुतान् सञ्जघानोग्रप्रतापोऽपि सुदुर्जयः ।
इदानीं सप्तमे गर्भे यदि नाप्नोषि जन्म वै ॥४०॥
तत्कथं भावि ते जन्म देवक्यां परमेश्वरि ।
कथं वा पृथिवीभारं नाशयिष्यसि मां वद ॥४१॥

श्रीदेव्युवाच—

न दैवं वचनं ब्रह्मन् विफलं सम्भविष्यति ।
अवश्यं भावि वै जन्म तस्या गर्भेऽष्टमे मम ॥४२॥

उपायं ते प्रवक्ष्यामि तथा त्वमपि चेष्टय ।
मा चिरं कुरु गच्छाशु वैकुण्ठं कमलासन ॥४३॥

अंशेन विष्णुर्भूपृष्ठे सम्भविष्यति निश्चितम् ।
वसुदेवगृहे रामो भ्राता ज्येष्ठतमो मम ॥४४॥

इत्येवं समयश्चासीत्पूर्वमेतेन विष्णुना ।
तस्मात्कथय तं शीघ्रं स यातु धरणीतले ॥४५॥

अंशेन देवकीगर्भे वसुदेवाज्जगत्पतिः ।
अहं च वसुधापृष्ठे द्विधा भूत्वा निजांशतः ॥४६॥

प्रयामि रोहिणीगर्भं यशोदागर्भमप्युत ।
सम्प्राप्ते पञ्चमे मासि रोहिणीगर्भमध्यतः ॥४७॥

यास्यामि देवकीगर्भं विष्णुस्तद्गर्भतोऽपि च ।
समायास्यति रोहिण्या गर्भं कमलसम्भव ॥४८॥

तदेवाष्टमगर्भे मे जन्म सम्पत्स्यतेऽपि च ॥४९॥
न ज्ञास्यति स दुर्बुद्धिर्गर्भं चापि तमष्टमम् ॥५०॥

एवं सम्प्राप्य देवक्यां जन्म श्रीकृष्णरूपधृक् ।
काले सम्पातयिष्यामि तं दुष्टं सह सैनिकैः ॥५१॥

यावच्च पुण्यकर्मास्य क्षीणतां न च यास्यति ।
तावद्यथाविधेयं तु तथा मे त्वं निशामय ॥५२॥

जातायामपि देवक्यां यशोदायां तदैकदा ।
पुंरूपिण्यां तथा योषिद्रूपायां च स्वलीलया ॥५३॥

देवकीगर्भसम्भूतां वसुदेवश्च तत्क्षणात् ।
संस्थाप्य गोकुले क्रोडे यशोदायाः प्रजापतेः ॥५४॥

तद्गर्भसम्भवां योषिद्रूपां मामेव बालिकाम् ।
आनीय वसुदेवेन वाच्यं तस्मै दुरात्मने ॥५५॥

सम्भूता मम कन्येति रक्षैनां पृथिवीपते ।
ततः स निधने यत्नं करिष्यति यदाऽसुरः ॥५६॥

तदैव सहसा स्वर्गं मूर्तिमें प्रतियास्यति ।
उक्त्वा निधनकर्तारं पश्यतस्तस्य दुर्मतेः ॥५७॥

ततः सम्पातयिष्यामि समुपागत्य गोकुलात् ।
प्रारब्धकर्मणि क्षीणे तं दुष्टं कमलासन ॥५८॥

श्रीमहादेव उवाच—

देव्यैवमुक्तो भगवान्ब्रह्मा वैकुण्ठमन्वगात् ।
न्यवेदयच्च तत्सर्वं देव्या सम्भाषितं च यत् ॥५६॥

विष्णुश्चाथ तदाकर्ण्य निजांशेन महामते ।
प्रप्रयौ देवकीगर्भं रोहिण्यां जन्मलब्धये ॥६०॥

भगवत्यपि रोहिण्यां यशोदायामुपागमत् ।
द्विधा भूत्वा जगद्धात्री भूभारस्य निवृत्तये ॥६१॥

पञ्चमे मासि रोहिण्या गर्भतः सा समाविशत् ।
जन्मने देवकीगर्भं रोहिण्यां विष्णुरन्वगात् ॥६२॥

तदैव वसुदेवोऽपि भयात्कंसस्य दुर्मते ।
रोहिणीं स्थापयामास गोकुले नन्दवेश्मनि ॥६३॥

तत्र सञ्जातवान् रामो दिव्यलक्षणलक्षितः ।
सर्वाङ्गसुन्दरो गौरो रोहिण्यास्तनयो मुने ॥६४॥

ततः समभवद्देवी देवक्याः परमः पुमान् ।
अष्टम्यामर्धरात्रे तु रोहिण्यामसिते वृषे ॥६५॥

गर्जत्सु मेघवृन्देषु परितस्तमसावृते ।
निद्रितेष्वपि सर्वेषु रक्षकेष्वितरेषु च ॥६६॥

नवीनजलदश्यामो वनमालाविराजितः ।
श्रीवत्सलाञ्छनधरो नयनद्वितयोज्ज्वलः ॥६७॥

द्विभुजो दिव्यसर्वाङ्गो दीप्यमानः स्वतेजसा ।
तं दृष्ट्वा बालकं जातं देवकी रुदती भृशम् ॥६८॥

साक्षाद्ब्रह्ममयं पूर्णं ज्ञात्वेदं वाक्यमब्रवीत् ।
कस्त्वं जातोऽसि मे गर्भे दुर्भगायाः सुलोचन ॥६९॥

जानासि किं न राजानं भ्रातरं मम वैरिणम् ।
कंसं निधनकर्तारं सुतानां जातमात्रतः ॥७०॥

अद्यैव स समाकर्ण्य त्वां जातं मम बालकम् ।
निहनिष्यति दुष्टात्मा कृत्वा मां शोकविह्वलाम् ॥७१॥

श्रीमहादेव उवाच—

इत्याकर्ण्य वचस्तस्या जनन्याः स तु बालकः ।
उवाच तां सुदुःखार्तां प्रीणयन् वचनामृतैः ॥७२॥

बालक उवाच—

मातस्त्वं कुरु मा भीतिं न मे हन्तात्र विद्यते ।
लोकत्रयेऽसुरो वापि देवो वा मानुषोऽपि वा ॥७३॥

अहमाद्या परा विद्या जगत्संहारकारिणी ।
देवकार्यस्य सिद्धचर्थं त्वत्तो जातास्मि साम्प्रतम् ॥७४॥

शम्भोरनुज्ञया मायापुरुषाकृतिरुत्तमा ।
युवयोस्तपसा तुष्टा जन्मान्तरकृतेन वै ॥७५॥

देवक्युवाच—

वत्स ते वचनं श्रुत्वा विस्मिताहं सुलोचन ।
सन्दर्शयस्व रूपं ते देव्यात्मकमनुत्तमम् ॥७६॥

श्रीमहादेव उवाच—

देवक्यैवं निगदितः कृष्णः कमललोचनः ।
सहसा समभूत्कृष्णा भीमास्या शववाहना ॥७७॥

चतुर्भुजा त्रिनयना जिह्वाललनभीषणा ।
गलदायतकेशौघाच्छन्नपृष्ठा किरीटिनी ॥७८॥

तदाभवन्मुने सापि वनमाला मनोरमा ।
मुण्डालिरचिता माला लम्बमानातिशोभना ॥७९॥

तथा दृष्ट्वा तु तं बालं कालीरूपं भयानकम् ।
देवकी चाह्वयत्तत्र वसुदेवं त्वरान्विता ॥८०॥

स आगत्य निरीक्ष्यैवं श्रुत्वा जातं च बालकम् ।
विस्मयं परमं प्राप्य वचनं चेदमब्रवीत् ॥८१॥

वसुदेव उवाच—

बहुजन्मशतानेकतपसा मम भाग्यतः ।
जातासि यदि मद्गेहे मायाबालकरूपधृक् ॥८२॥

यथानुग्रहतो यत्तदेतत्परमदुर्लभम् ।
प्रदर्श्य कालिकारूपं मज्जन्म सफलं कृतम् ॥८३॥

तथान्यदपि ते चारु रूपं दशभुजान्वितम् ।
उद्यत्कोटिशशाङ्काभं सौम्यं मे प्रतिदर्शय ॥८४॥

श्रीमहादेव उवाच—

इति तस्य वचः श्रुत्वा तद्रूपं परिहृत्य च ।
बभूव सहसा देवी सौम्या दशभुजा ततः ॥८५॥
तथा विलोक्य रूपं स विस्मयं परमं गतः ।
प्राञ्जलिः परया भक्त्या तुष्टावानकदुन्दुभिः ॥८६॥

वसुदेव उवाच—

त्वं माता जगतामनादिपरमा विद्यातिसूक्ष्मात्मिका
त्वं तावज्जनकोऽप्यनादिपुरुषः पूर्णः स्वयं चिन्मयः ।
त्वं विश्वासि तथैव विश्ववनिता विश्वाश्रया विश्वगा
त्वत्तोऽन्यन्नहि किञ्चिदस्ति भुवने विश्वेशि तुभ्यं नमः ॥८७

त्वं सृष्टौ चतुरानना स्थितिविधौ विष्णुः परात्मा प्रभुः
संहृत्यामतिभीमरूपचरितो रुद्रः पिनाकास्त्रधृक् ।
तेषां सृष्टिविनाशपालनविधौ त्वं कालिकैका परा
नित्या ब्रह्ममयी प्रसीद परमे कृष्णे जगद्वन्दिते ॥८८॥

त्वं सूक्ष्मा प्रकृतिर्निराकृतिसुताख्याता जगद्व्यापिनी
स्त्रीपुंक्लीबविभेदतस्त्वयि पुनः स्त्रीत्वाद्यभावः सदा ।
तत्त्वं ते न विदन्ति केचन जगत्यत्राम्बिके तत्कथं
शक्तः स्तोतुमहं भवामि परमं ब्रह्म स्वयं मूढधीः ॥८९॥

नमोऽस्तु विश्वमोहिन्यै गौर्यै त्रिदशवन्दिते ।
नमस्ते कृष्णरूपिण्यै मायापुरुषरूपिणि ॥९०॥

श्रीमहादेव उवाच—

एवं संस्तुवतस्तस्य देवी दशभुजा क्षणात् ।
प्रत्यक्षं समभूद्बालः कृष्णः कमललोचनः ॥९१॥
तं वीक्ष्य बालकं कृष्णं वनमालाविराजितम् ।
वसुदेवः पुनः प्राह प्राञ्जलिर्मुनिसत्तम ॥९२॥

वसुदेव उवाच—

वत्स मत्तनयान् सर्वाञ्जातमात्रान्महाबलः ।
कंसो निहन्ति दुर्द्धर्षः शिलाया मस्तके क्षिपन् ॥९३॥
तदिदानीं न यावत्तु तस्यानुचररक्षकाः ।
चेतयन्ति विधेयं ते यत्कर्तव्यं मयाधुना ॥९४॥

तत्सर्वं त्वं च मां देव तावद्ब्रूहि जगत्पते ।
भूभारहरणार्थाय प्रादुर्भूतोऽसि वै यतः ॥९५॥

श्रीमहादेव उवाच—

इति तस्य वचः श्रुत्वा कृष्णा कृष्णस्वरूपिणी ।
यशोदानन्दयोः पूर्वं तपः स्मृत्वेदमब्रवीत् ॥९६॥

श्रीकृष्ण उवाच—

शृणु तात प्रवक्ष्यामि यत्कर्तव्यं त्वयाऽधुना ।
मयादतिसुदृष्टस्य मातुलस्य महामते ॥९७॥

अद्यैव हि व्यतीतायामष्टम्यां गोकुले मम ।
मूर्तिरेकाऽपरा जाता यशोदागर्भगेहतः ॥९८॥

न तां मन्मायया मुग्धा यशोदा निद्रयान्विता ।
जानाति चारुसर्वाङ्गीं गौरीं कमललोचनाम् ॥९९॥

त्वं तु मां तत्र संस्थाप्य तामानीय त्वराऽन्वितः ।
प्रवादं कुरु मे जाता कन्यैकेति वराङ्गना ॥१००॥

तस्यास्तु निधनार्थाय सम्प्रहर्तुं शिलोपरि ।
यदोर्ध्वं नेष्यति क्रोधात्स दुष्टो मम मातुलः ॥१०१॥

तदा यास्यति सा स्वर्गं देवकार्यस्य सिद्धये ।
उक्त्वा निधनकर्तारं पश्यतस्तस्य मां पितः ॥१०२॥

अहं तु गोकुले स्थित्वा कियत्कालं ततस्त्विह ।
समागत्य दुरात्मानं निहनिष्यामि मातुलम् ॥१०३॥

श्रीमहादेव उवाच—

इत्याकर्ण्य वचस्तस्य बालकस्य महामुने ।
वसुदेवस्तमादाय गोकुलं प्रति निर्ययौ ॥१०४॥

तदा प्रबोधं नो कश्चिदवाप मुनिसत्तम ।
मोहितो वासुदेवस्य माययाऽतिदुरत्यया ॥१०५॥

वसुदेवस्तु निर्गत्य स्वपुरादतिदुःखितः ।
रुरोद पुत्रमुद्वीक्ष्य दीप्यमानं स्वतेजसा ॥१०६॥

हा वत्स मद्गृहे कस्मादाविर्भूतोऽसि पापिनः ।
कथं त्वां गोकुले रक्षन्न यास्येहं गृहं पुनः ॥१०७॥

इत्येवं बहुधाऽऽमाष्य सिञ्चन्नेत्रजलेन तम् ।
उत्तीर्य यमुनां कृष्णप्रसादात् शिवया सह ॥१०८॥
प्रविश्य नन्दगोपस्य भवनं चाप्यतर्कितः ।
यशोदां ददृशे तत्र प्रसूतवरकन्यकाम् ॥१०९॥
अप्रबुद्धामजानन्तीं पुत्रीं स्वोदरसम्भवाम् ।
सखीभिः सहितां चापि निद्रिताभिरितस्ततः ॥११०॥
ततः संस्थाप्य तत्रैव कृष्णमानकदुन्दुभिः ।
प्रगृह्य तनयां तां च तूर्णं गेहाद्विनिर्ययौ ॥१११॥
देवी तु वसुदेवस्य क्रोडेऽतिविबभौ मुने ।
भुजैर्दशभिरुद्दीप्ता तेजोभिश्च मनोरमैः ॥११२॥
तां वीक्ष्य सर्वलोकैकजननीं ब्रह्मरूपिणीम् ।
आनन्दपरिपूर्णात्मा वसुदेवः पुरं ययौ ॥११३॥
प्रविश्य भवनं देवीं देवक्यै च समार्पयत् ।
उवाच जाता कन्येति रक्षकेभ्यो महामतिः ॥११४॥
तेऽपि प्राहुर्द्रुतं तस्मै कंसायातिदुरात्मने ।
देवक्या अष्टमे गर्भे जातैका कन्यका विभो ॥११५॥
स पापात्मापि तच्छ्रुत्वा तानुवाच महामुने ।
समानयत तां क्षिप्रं निहनिष्येऽविचारतः ॥११६॥
तच्छ्रुत्वा तां समानीय ददुस्तस्मै दुरात्मने ।
तां चातिसुदृढां दृष्ट्वा पाषाणैरिव निर्मिताम् ॥११७॥
देवीं भगवतीं बालां सृष्टिस्थित्यन्तकारिणीम् ।
स पापात्मा तु तां नैव ज्ञातवान्परमेश्वरीम् ॥११८॥
जगृहे निधनार्थं च सत्त्वेन दृढमुष्टिना ।
तत्रापि सुदृढां भत्वा शिलाभिरिव निर्मिताम् ॥११९॥
ऊर्ध्वं चिक्षेप पाषाणोपरि तां पातनेच्छया ।
ततो भगवती देवी गगनेऽतीवतेजसा ॥१२०॥
ज्वलन्ती सिंहपृष्ठस्था तमूचे पापचेतसम् ॥

श्रीदेव्युवाच—

दुरात्मंस्तव नाशाय देवक्यां वसुदेवतः ॥१२१॥
अहमेव समुद्भूय मायया पुरुषाकृतिः ।
तिष्ठामि गोकुले नन्दगोपगेहे निजांशतः ॥१२२॥

श्रीमहादेव उवाच—

इत्युक्त्वा सा भगवती पश्यतस्तस्य दुर्मते ।
स्वर्गं जगाम सिंहस्था देवकार्यस्य सिद्धये ॥१२३॥

इति श्रीमहाभागवते उपपुराणे श्रीकृष्णप्रादुर्भावोपाख्याने पञ्चाशत्तमोऽध्यायः ॥

एकपञ्चाशत्तमोऽध्यायः

श्रीमहादेव उवाच—

नन्दः प्रभाते विज्ञाय चक्रे पुत्रोद्भवोत्सवम् ।
विप्रेभ्यो गोसहस्राणि प्रददौ मुनिसत्तम ॥१॥
तथा वासांसि दिव्यानि धनानि सुबहूनि च ।
दत्त्वा राज्ञे करं दातुं मथुरायां द्रुतं ययौ ॥२॥
एतस्मिन्नन्तरे कंसो मन्त्रयित्वा च मन्त्रिभिः ।
पूतनां प्रेषयामास गोकुले बालघातिनीम् ॥३॥
सा तु तस्याज्ञया चारुरूपं संबिभ्रती मुने ।
गोकुले समुपागत्य नन्दवेश्म समाविशत् ॥४॥
आयान्तीं तां समालोक्य सर्वा एव व्रजाङ्गनाः ।
जगुः केयं समायाता चारुरूपा वराङ्गना ॥५॥
शची किं देवराजस्य पत्नी किं वा स्वयं रतिः ।
कामपत्नी समायाता द्रष्टुं नन्दस्य बालकम् ॥६॥
कृष्णस्तु तामभिज्ञाय राक्षसीं कामरूपिणीम् ।
निमील्य लोचने स्थित्वा पर्यङ्के तां ददर्श ह ॥७॥
सा वीक्ष्य बालकं तं तु पर्यङ्कस्थमिवानलम् ।
यशोदामाह सौम्येन वचसा क्रूरराक्षसी ॥८॥

पूतनोवाच—

यशोदे सखि ते भाग्यं मन्ये जन्मशतार्जितम् ।
यतस्तवायं तनयो जातः सर्वाङ्गसुन्दरः ॥९॥
अद्यैनं वीक्ष्य ते पुत्रं श्यामं सर्वाङ्गसुन्दरम् ।
हर्षं प्राप्तास्मि बालस्ते चिरं जीवतु सुन्दरः ॥१०॥

श्रीमहादेव उवाच—

इत्येवं स्नेहसम्बन्धि वाक्यमुक्त्वा तु राक्षसी ।
मदङ्के बालकं देहीत्येवमूचे च तां पुनः ॥११॥

ततो यशोदा तच्छ्रुत्वा तदङ्के प्रददौ सुतम् ।
सापि तस्य मुखे प्रादात्स्तनं विषमयं ततः ॥१२॥

कृष्णस्तु तामभिज्ञाय पूतनां क्रूरराक्षसीम् ।
स्तनमात्रस्य चौष्ठेन पपौ प्राणैः समं पयः ॥१३॥

ततः संत्यज्य तद्रूपं सौम्यं सा भीमरूपिणी ।
वदन्ती मुञ्च मुञ्चेति प्राणांस्तत्याज राक्षसी ॥१४॥

ततः पपात भूपृष्ठे वसुधामनुपीड्य सा ।
आच्छाद्य गोकुलं भीमा विकटास्या महाद्रिवत् ॥१५॥

तस्या वक्षसि कृष्णस्तु सहसा कालिकापरा ।
कृत्वा विरेजे भीमास्या मुण्डमालाविराजिता ॥१६॥

क्षणार्धेन वपुस्तस्या राक्षस्याः कालिका स्वयम् ।
मुक्त्वा भूयः समभवद्बालः श्यामतनुः परः ॥१७॥

दृष्ट्वा तु विस्मयं जग्मुः सर्वे ते व्रजवासिनः ।
मेनिरे च शिशुं कृष्णं शक्तिमाद्यां परात्पराम् ॥१८॥

यशोदा च समालिङ्ग्य स्वाङ्के चोत्थाय बालकम् ।
स्तनं ददौ मुखाम्भोजे संमार्ज्यौषधवारिणा ॥१९॥

एतस्मिन्नन्तरे सोऽपि नन्दगोपः समागतः ।
दत्त्वा राजकरं तस्मै राज्ञे कंसाय पापिने ॥२०॥

स श्रुत्वा चेष्टितं तस्य बालकस्य महामुने ।
देवीं संपूजयामास नानाबलिभिरादरात् ॥२१॥

अथ कंसः समाकर्ण्य पूतनानिधनं तथा ।
कृष्णस्य चेष्टितं चापि तं मेने मृत्युमात्मनः ॥२२॥

ततः प्रस्थापयामास तृणावर्तं महासुरम् ।
अपवृत्य समानेतुं कृष्णं गोकुलसंस्थितम् ॥२३॥

स आगतस्तृणावर्तो वीक्ष्य तं निर्जनस्थितम् ।
आश्लिष्य बाहुदण्डेन नीत्वा गगनमास्थितः ॥२४॥

कृष्णः स्मित्वा तु तस्याङ्के स्थित्वाऽभूद्ब्रह्मरूपिणी ।
काली व्याघ्राजिनधरा महाजलदनिःस्वना ॥२५॥

तस्यास्तु तेन नादेन मोहितः स महासुरः ।
पपात चालयन्पृथ्वीं सशैलवनकाननाम् ॥२६॥

ततस्तस्य शिरः काली खड्गेनाहृत्य वै पुनः ।
सम्भूय बालकस्तस्य स्थितो वक्षसि नारद ॥२७॥

यशोदा तु समागत्य दृष्ट्वा तं दानवं हतम् ।
महाद्रिसदृशं छिन्नशीर्षं शोणितसंप्लुतम् ॥२८॥

विस्मयं परमं प्राप्य पुत्रं तमनुसन्दधे ।
तत्र वीक्ष्य तृणावर्तं बलस्थं श्यामसुन्दरम् ॥२९॥

हसन्तं सुप्रसन्नास्यं विस्मयं परमं गता ।
वदन्ती वत्स वत्सेति सहसा स्वाङ्कमानयत् ॥३०॥

नन्दश्चापि समागत्य दृष्ट्वा तं घोररूपिणम् ।
पतितं विगतप्राणं शोणितौघपरिप्लुतम् ॥३१॥

श्रीकृष्णेन हतं मत्वा मुमुदे मुनिसत्तम ।
एवं भगवती देवी मायापुरुषरूपिणी ॥३२॥

तपसः फलदानाय यशोदानन्दगोपयोः ।
शैशवं भावमाश्रित्य संस्थिता गोकुले स्वयम् ॥३३॥

शम्भुस्तु जन्म संप्राप्य वृषभानुगृहे ततः ।
स्त्रीरूपं लीलयाऽऽस्थाय राधेत्याख्यामुपागमत् ॥३४॥

तां राधामुपसंयेमे कोऽपि गोपो महामुने ।
क्लीबत्वं सहसा प्राप शम्भोरिच्छानुसारतः ॥३५॥

सा राधाऽनुदिनं गत्वा कृष्णं कमललोचनम् ।
प्रेम्णा स्वाङ्के समारोप्य ददृशे परमादरात् ॥३६॥

कंसस्तु निहतं श्रुत्वा तृणावर्तं महासुरम् ।
नन्दनन्दनमाहर्तुं व्यचिन्तयदहर्निशम् ॥३७॥

रोहिणीतनयो रामः कृष्णेनामिततेजसा ।
चिक्रीडे परमानन्दपूर्णात्माऽहर्निशं मुने ॥३८॥

तथैव क्रीडितस्तेन श्रीदामवसुदामकौ ।
कुमारौ रूपसम्पन्नौ सुचारुमुखपङ्कजौ ॥३९॥

तेषां भावेन संप्रीतमनाः कृष्णस्तु गोकुले ।
उवास राधया सार्धं रन्तुकामो महामते ॥४०॥

इति श्रीमहाभागवते उपपुराणे पूतनावधानन्तरं तृणावर्त-
वधोपाख्याने एकपञ्चाशत्तमोऽध्यायः ॥

द्विपञ्चाशत्तमोऽध्यायः

नारद उवाच—

सम्भूता देवकीगर्भे देवी बालकरूपिणी ।
उवास गोकुले कस्मान्नन्दगोपगृहे स्वयम् ॥१॥
पुरासीदेष नन्दः को यशोदा का तदङ्गना ।
किं चकार तपः पूर्वं येन प्राप महेश्वरीम् ॥२॥
कालीं बालीकभावेन श्यामसुन्दररूपिणीम् ।
कस्माद्वापि निजांशेन यशोदागर्भसम्भवा ॥३॥
देवी भगवती दुर्गा जातमात्रा समभ्यगात् ।
ददृशे नैव तां माता ज्ञातवान्न पितापि च ॥४॥
यथोत्पन्ना यथा जाता किंहेतुकमिदं प्रभो ।
एतन्मे पार्वतीनाथ समाचक्ष्व जगत्पते ॥५॥

श्रीमहादेव उवाच—

वत्स वक्ष्यामि ते सर्वं यत्पृच्छसि महामते ।
शृणुष्वावहितो भूत्वा यथावन्मुनिपुङ्गव ॥६॥
दक्षः प्रजापतिः पूर्वं सतीविरहदुःखितः ।
चेतसा चिन्तयामास ज्ञात्वा तां प्रकृतीं पराम् ॥७॥
सम्प्राप्य तपसोग्रेण कन्यामाद्यां परात्पराम् ।
तयास्मि वञ्चितो मोहादज्ञात्वा शिवनिन्दनात् ॥८॥
अहं तथा यतिष्यामि भूयोऽपि तप आचरन् ।
यथा मत्तः समुत्पत्तिं भूयः सा समुपैति वै ॥९॥
इति कृत्वा मतिं दक्षो हिमाद्रेः प्रस्थमुत्तमम् ।
गत्वा वर्षशतं दिव्यं समाराधयदम्बिकाम् ।
प्रसूतिरपि तत्पत्नी सद्भक्त्या परमेश्वरीम् ॥१०॥

तथैव प्रार्थयामास सुचिरं मुनिसत्तम ।
तयोः प्रसन्ना समभूत्प्रत्यक्षं परमेश्वरी ॥११॥
अवोचदिति यत्प्रार्थ्यं युवयोर्वृणुतं च तत् ।
ततः प्रजापतिः प्राह मातस्त्वं कृपया पुनः ॥१२॥
मत्तो जन्माप्नुहि शिवे प्रार्थ्यमेतन्महेश्वरी ।
प्रसूतिः प्राह मातस्त्वामपत्यस्नेहतः शिवे ॥१३॥
पालयामीति मेऽभीष्टं प्रार्थनीयं तवाग्रतः ।

देव्युवाच—

प्रजापते भविष्यामि द्वापरान्ते धरातले ॥१४॥
त्वत्तो जन्म समासाद्य तनया ते न संशयः ।
न स्थास्यामि गृहे किन्तु तव कन्यास्वरूपिणी ॥१५॥
स्मृत्वा तच्चरितं पूर्वं शिवनिन्दाकरं परम् ।
द्रुतं स्वर्गपुरं यास्ये देवकार्यच्छलेन वै ॥१६॥
अजानतो जन्मवृत्तं मम तातस्य ते गृहात् ।
मातः प्रसूतिस्त्वं चेदं मतः प्रार्थयसीति यत् ॥१७॥
सम्पत्स्यते तदा नूनं तत्सत्यं नात्र संशयः ।
अदित्यै कश्यपायापि मया दत्तो वरः स्वयम् ॥१८॥
द्वापरान्ते भविष्यामि तयोर्गेहे सुतस्त्वहम् ।
तदा तव गृहेऽहं तु दिनानि कतिचिद्ध्रुवम् ॥१९॥
वसिष्ये फलदानाय तपसस्तस्य लीलया ।

श्रीमहादेव उवाच—

इत्युक्त्वा सा भगवती सृष्टिस्थित्यन्तकारिणी ॥२०॥
अन्तर्दधे मुनिश्रेष्ठ सहसा पश्यतोस्तयोः ।
स दक्ष एव नन्दस्तु यशोदापि तदङ्गना ॥२१॥
कारणादपि चैतस्माद्यशोदागर्भसम्भवा ।
देवी भगवती स्वर्गे जातमात्रा समभ्यगात् ॥२२॥
देवकीगर्भजातापि श्यामसुन्दररूपिणी ।
उवास गोकुले रम्ये कियत्कालं महामुने ॥२३॥

श्रीमहाभागवते उपपुराणे दक्षप्रसूतिनन्दयशोदाजन्मवर्णने
द्विपञ्चाशत्तमोऽध्यायः ॥

त्रिपञ्चाशत्तमोऽध्यायः

श्रीनारद उवाच—

संक्षेपेण समाशंस पार्वतीप्राणवल्लभ ।
देव्याः श्रीकृष्णरूपायाश्चरितं मे महेश्वर ॥१॥

यथा विहरणं चक्रे गोकुले सह राधया ।
निपातयच्चापि तथा भूमारान्सुबहून् रणे ॥२॥

अन्यत्रापि कुरुक्षेत्रे साक्षाद्वापि कुलेन वा ।
यथैवासीत्स्थितो सर्वैर्ऋषिभिर्यदुवंशजाः ॥३॥

आरुरोह पुनः स्वर्गं यथा तदभिशंस मे ।

श्रीमहादेव उवाच—

विहरन् गोकुले कृष्णः समस्तैर्गोपबालकैः ॥४॥

बाल्ये वयसि हत्वा तान्धेनुकादीन्महासुरान् ।
कालीयदमनं कृत्वा प्रभावमनुदर्शयन् ॥५॥

रेमे वृन्दावने रम्ये राधया मुनिसत्तम ।
अन्यैश्च गोपिकावृन्दैर्भैरवांशसमुद्भवैः ॥६॥

लावण्यं वर्धयन् रेमे कृष्णः कात्यात्मकः पुमान् ।
गोरक्षणकुलाद्गत्वा दिवा वृन्दावने शुभे ॥७॥

वेणुनिःस्वनसंवादैः सर्वाश्चानीय गोपिकाः ।
प्रधानमहिषीं कृत्वा राधां रेमे स्वलीलया ॥८॥

विविधैर्वन्यपुष्पैश्च मालां निर्माय गोपिकाः ।
कृष्णाङ्गे सम्प्रदायातिहृष्टा कृष्णं व्यलोकयन् ॥९॥

कृष्णोऽपि रुचिरां मालां दत्त्वा ताभ्यः स्मिताननः ।
व्यलोकयन्मुखाम्भोजं सुप्रसन्नं निरन्तरम् ॥१०॥

कदाचिदुपविष्टस्तु दिव्यसिंहासनोपरि ।
वामाङ्गे समुपाधाय राधां परमसुन्दरीम् ॥११॥

विमृज्य शशिकोटिभं वाससा तन्मुखाम्बुजम् ।
प्रेम्णा चुचुम्ब श्यामस्तां कामव्याकुलमानसः ॥१२॥

कदाचिद्यमुनातीरे कदाचिज्जलमध्यतः ।
सहितो गोपिकावृन्दैश्चिक्रीडे यदुनन्दनः ॥१३॥

रात्रौ संहृत्य चेतांसि गोपीनां वेणुनिःस्वनैः ।
आनीय कानने तत्र रेमे कृष्णः सकौतुकम् ॥१४॥

कदाचिद्राधिका शम्भुश्चारुपञ्चमुखाम्बुजः ।
कृष्णो भूत्वा स्वयं गौरीं चक्रे विहरणं मुने ॥१५॥

एवं संरममाणस्तु राधया गोकुले स्वयम् ।
कृष्ण आनन्दपूर्णात्मा समावात्सीन्महामुने ॥१६॥

एकदा सम्प्रवृत्ते तु शरत्काले महानिशि ।
विहरन्तुं मनः कृत्वा वृन्दावनमुपागमत् ॥१७॥

पुष्पितं मल्लिकाकुन्दजातीचम्पकरङ्गनैः ।
ललितं मन्दमन्दायमानैर्मधुरवायुभिः ॥१८॥

मधुपैर्मधुमत्तैश्च गुञ्जितैर्मधुरस्वनैः ।
कूजितं कोकिलैः क्रौञ्चैः कामविह्वलमानसैः ॥१९॥

सरांसि चातिरम्याणि कानने तत्र नारद ।
सुपुष्पितानि कह्लारकुमुदैः पङ्कजैरपि ॥२०॥

अथोदयमनुप्राप शशाङ्कोऽतिसुनिर्मलः ।
हर्षयन्नपि विश्वानि द्रावयन्कामिनोमनः ॥२१॥

एवं वनं प्रियं वीक्ष्य शशाङ्कं चातिनिर्मलम् ।
प्रहृष्टात्मा स्वयं कृष्णो वेणुमावादयन्मुने ॥२२॥

तच्छ्रुत्वा समुपायाताः सर्वा गोपवराङ्गनाः ।
सन्त्यज्य गृहकर्माणि कृष्णाकर्षितमानसाः ॥२३॥

राधा जगाम चार्वङ्गी तासामग्रे व्यवस्थिता ।
साक्षाच्छम्भुः पुमान्पूर्णो राधास्त्रीरूपमाश्रितः ॥२४॥

ताः सर्वा आगता वीक्ष्य कृष्णः कमललोचनः ।
महाविहार उद्योगं चक्रे स मुनिसत्तम ॥२५॥

आकृष्य बाहुभिः सर्वा गोपीः कृष्णः पृथक् पृथक् ।
रेमे रतिपतिं जित्वा नानाकौतुकमङ्गलैः ॥२६॥

अथाष्टधाऽभवत्कृष्णो नवीनजलदप्रभः ।
स्मितास्यः परमानन्दः पूर्णात्मा कामविह्वलः ॥२७॥

तद्वीक्ष्य रेजे राधापि भूत्वाष्टौ मूर्तयः क्षणात् ।
सहसेन्दुप्रभास्मेररुचिराः कामविह्वलाः ॥२८॥

ताभिर्मूर्तिभिरष्टाभिर्विहर्तुं हि महामुने ।
अष्टमूर्तिः प्रसन्नात्मा कृष्णः सोऽन्तर्दधे क्षणात् ॥२९॥

गतोन्तरिक्षे चक्रे स रासक्रीडां महामुने ।
अन्याः शूलेन सन्त्यज्य सर्वगोपवराङ्गनाः ॥३०॥

बाहुभ्यां बाहुमाकृष्य राधायाः कमलेक्षणः ।
वक्त्रेण घट्टयन्वक्त्रं मर्दयंश्च स्तनौ करैः ॥३१॥

क्वचिद्वस्त्रं तथाहृत्य प्रहसन्कौतुकान्वितः ।
रेमे चिरं परानन्दः पूर्णात्मा निजलीलया ॥३२॥

तत्रासीत्पुष्पवृष्टिश्च महती मुनिसत्तम ।
भेरीमृदङ्गतूर्यादिनिःस्वनैस्तुमुलैः सह ॥३३॥

तथा विहरमाणौ तु राधाकृष्णौ नभोन्तरे ।
नालोक्य रुरुदुस्त्वन्या गोपिका रम्यकानने ॥३४॥

तासां विलापमाकर्ण्य पुनः कृष्णस्तु राधया ।
प्रत्यक्षं समभूत्तत्र कानने मुनिपुङ्गव ॥३५॥

मनोभिलषितं तासां कृष्णः कर्तुमनेकधा ।
सम्भूय निजमाहात्म्याद्रेमे तस्मिन्महावने ॥३६॥

दृष्ट्वा तु देवगन्धर्वाः कृष्णक्रीडां महामुने ।
सम्प्रापुः परमामोदं चक्रुः पुष्पातिवर्षणम् ॥३७॥

एवं बहुदिनं रात्रौ गोपीभिः सह कानने ।
चकार रासक्रीडां वै पूर्णमारभ्य कार्त्तिकीम् ॥३८॥

अन्या अपि महाक्रीडाश्चकार परमेश्वरी ।
वस्त्रापहरणाद्यास्तु योषिद्रूपेण शम्भुना ॥३९॥

नन्दाद्या गोपवृन्दास्तु ज्ञात्वा ब्रह्मेति चेष्टितैः ।
स्नेहेन पालयामासुः कृष्णं दिव्यात्मकं मुने ॥४०॥

राधापि परिसंत्यज्य लज्जां तेन निरन्तरम् ।
लावण्यं वर्धयन्तीव रेमे कृष्णेन नारद ॥४१॥

अथ कंसेरितो दैत्यो वृषभाख्यो महाबलः ।
एकदा गोकुलं प्रायाद्रामकृष्णौ विहंसितुम् ॥४२॥

तामायान्तं दृशा वीक्ष्य रजताद्रिसमं मुने ।
बुबुधुः परितः सर्वे पशवो गोकुले स्थिताः ॥४३॥

दुदुवुश्चापरे लोकाः सिंहं दृष्ट्वा गजा इव ।
दिशश्च विदिशश्चैव भयात्तस्य दुरात्मनः ॥४४॥
एवं निरीक्ष्य संधावमाना गोकुलवासिनः ।
कृष्णस्तमाससादाथ वृषभाख्यं महासुरम् ॥४५॥
स चापि वृषभो वीक्ष्य कृष्णं सम्मुखमागतम् ।
खुरैः प्रचालयन्पृथ्वीं ननर्द मुनिसत्तम ॥४६॥
अथ कृष्णस्तमाकृष्य शृङ्गयोर्धरणीतले ।
प्रक्षिप्य पातयामास पृथ्व्यां प्राणानमोचयत् ॥४७॥
ततो गोपाः परं प्राप्य विस्मयं हृष्टमानसाः ।
अपूजयंस्ते कृष्णं तं नानास्तुतिभिरादरात् ॥४८॥

श्रीमहाभागवते उपपुराणे राधया सह रासक्रीडावर्णने
वृषभासुरवधो नाम त्रिपञ्चाशत्तमोऽध्यायः ॥५३॥

चतुःपञ्चाशत्तमोऽध्यायः

श्रीमहादेव उवाच—

अथैकदा मुनिः प्रायान्नारदो मथुरापुरम् ।
नमसा वादयन्वीणां गायन्हरिकथामृतम् ॥१॥
स प्राह कंसराजाय निर्जने मुनिसत्तम ।
वेदयन्सकलं वृत्तं सुगुप्तं दुष्टचेतसे ॥२॥

नारद उवाच—

शृणु गुह्यतमं राजन्वक्ष्ये तव हितं वचः ।
योऽसौ नन्दसुतः कृष्णो गोकुलेऽस्ति महाबलः ॥३॥
नवीननीरदश्यामो वनमालाविराजितः ।
स एव देवकीगर्भे सम्भूतश्चाष्टमे ध्रुवम् ॥४॥
रोहिणीगर्भसम्भूतो रामो भीमपराक्रमः ।
तौ न्यस्तौ वसुदेवेन विवृद्धौ नन्दवेश्मनि ॥५॥
ताभ्यां ते निहताः शूरास्तृणावर्तादयो बलात् ।
कन्या या गगनं प्रायात्सा तु नन्दतनूद्भवा ॥६॥
आनीता वसुदेवेन त्वां प्रतारयितुं ध्रुवम् ।

श्रीमहादेव उवाच—

तेनैवमुक्तो दुर्धर्षः क्रोधात्खड्गमुपाददे ॥७॥
संछेत्तुकामो देवक्या सहितं वृष्णिनन्दनम् ।
ततस्तं वारयामास स एव मुनिसत्तमः ॥८॥
उक्त्वा बहुविधं तस्मै राज्ञे कंसाय कोपिने ।
ततः स्वाश्रममभ्यागात्स मुनिर्देवदर्शनः ॥९॥
कंसः प्रस्थापयामासाक्रूरं निश्चित्य मन्त्रिभिः ।
अक्रूरमाह गत्वा त्वं गोकुले नन्दवेश्मनि ॥१०॥
वसुदेवसुतौ रामकृष्णौ तत्र स्थितौ छलात् ।
समानय पुरीमेनां मथुरां मम शासनात् ॥११॥
तत्र मुष्टिकचाणूरप्रमुखैर्मल्लयोधिभिः ।
मल्लयुद्धेन तौ वीरौ पातयिष्ये महाबलौ ॥१२॥
इत्याज्ञप्तो मुने तेन कंसेनातिदुरात्मना ।
अक्रूरो रथमारुह्य शीघ्रं गोकुलमाययौ ॥१३॥
ततो नन्दाश्रमं गत्वा रथात् क्षितिमुपेत्य च ।
प्रविश्य ददृशे वीरौ वासुदेवौ सुदुर्जयौ ॥१४॥
अक्रूरस्तौ प्रणम्याथ दण्डवत्पतितो भुवि ।
उवाचागमने हेतुं यत्कंसेनाभिभाषितम् ॥१५॥

अक्रूर उवाच—

प्रेषितः कंसराजेन दुष्टेनाहं समागतः ।
युवां मधुपुरीं नेतुं रामकृष्णौ महाबलौ ॥१६॥
स तु सम्मन्त्रयामास मन्त्रिभिर्दुष्टचेष्टिभिः ।
युवां मल्लेन युद्धेन मल्लैः सम्पातयिष्यति ॥१७॥
अहं तु प्रतिजानामि श्रुत्वा योगिमुखाम्बुजात् ।
न युवां प्राकृतौ नूनं मनुजौ भीमविक्रमौ ॥१८॥
कंसादिदुष्टभूभारनिवृत्त्यै निजलीलया ।
जातौ मायामयौ पृथ्व्यां पुंप्रकृत्यात्मकौ परौ ॥१९॥
नन्दस्य च यशोदायास्तत्र भाग्यातिरेकतः ।
संस्थितौ छलमाश्रित्य भयं कंसाद्दुरात्मनः ॥२०॥
तदेतयोः समभवज्जन्मान्तरकृतस्य च ।
सम्पूर्णं फलमेवेह तपसः पूर्वमुत्तमम् ॥२१॥

इदानीं समुपागत्य मथुरां यदुशासनात् ।
कंसादिदुष्टभूभारान्यापयैतान्महाबलान् ॥२२॥

श्रीमहादेव उवाच—

इत्याकर्ण्य वचस्तस्य रामकृष्णौ महाबलौ ।
गन्तुमिच्छू मधुपुरीं सर्वान्गोपान्समूचतुः ॥२३॥

यूयं विविधगव्यानि मधुराणि महामते ।
दातुं राज्ञे श्वः प्रभाते गृहीत्वा सम्प्रयास्यथ ॥२४॥

आवां तत्र गमिष्यावो द्रष्टुं क्षितिपतिं ध्रुवम् ।
तयोरिति वचः श्रुत्वा गोपाश्चकितमानसाः ॥२५॥

तथा चक्रुर्मुनिश्रेष्ठ सर्व एव महामते ।
ततः प्रभाते आरुह्य रथं तं चित्रमुत्तमम् ॥२६॥

अक्रूरेण सहोद्योगं चक्रतुर्मथुरागमे ।
ततस्तु रुरुदुः सर्वाः कृष्णं वीक्ष्य व्रजाङ्गनाः ॥२७॥

ताः समाश्वास्य तूर्णं स चालयन् रथमभ्यगात् ।
अनुजग्मुर्मुनिश्रेष्ठ नन्दाद्या गोपवृन्दकाः ॥२८॥

प्रगृह्य दधिदुग्धादिगव्यानि यदुनन्दनौ ।
अक्रूरस्तु समादाय रामकृष्णौ महाबलौ ॥२९॥

जगाम मधुपुर्यां वै नन्दगोपमुखैर्वृतः ।
आयातौ रामकृष्णौ स श्रुत्वा कंसोऽतिमूढधीः ॥३०॥

हस्तिनं स्थापयामास द्वारि भीमपराक्रमम् ।
रामकृष्णवधार्थाय दुष्टं कुवलयं मुने ॥३१॥

तं करे समुपादाय कृष्णः सम्पात्य भूतले ।
द्विधा चक्रे शिरस्तस्य करघातेन लीलया ॥३२॥

ततः पुरं विविशतू रामकृष्णौ महाबलौ ।
अक्रूरसहितौ वीरौ नन्दन्तौ सिंहवन्मुहुः ॥३३॥

अनुजग्मुर्भयत्रस्ता नन्दाद्या व्रजवासिनः ।
उपायनानि गव्यानि गृहीत्वा मुनिसत्तम ॥३४॥

ते तु गत्वा वृतं यत्र कंस आस्ते नराधिपः ।
उपायनानि प्रददुस्तस्मै नत्वा दुरात्मने ॥३५॥

मल्लक्षेत्रे स्थितौ रामकृष्णौ भीमपराक्रमौ ।
मल्लाः सम्बोधयामासुर्मुष्टिकाद्या महाबलाः ॥३६॥

तत्र सम्पातयामास मुष्टिघातेन मुष्टिकम् ।
रोहिणीतनयो रामो महाबलपराक्रमः ॥३७॥

कृष्णोऽप्यपातयद्वीरं चाणूरं पृथिवीतले ।
उत्क्षिप्य गगने भूयो निपात्य मुनिसत्तम ॥३८॥

अन्यांश्च शतशो मल्लान् रामकृष्णौ क्षणार्धतः ।
पातयामासतुः संख्ये दर्शयन्तौ पराक्रमम् ॥३९॥

ततः श्रुत्वा निपतितान्मल्लान्भीमपराक्रमान् ।
आरुरोह महद्युद्धं मञ्चं कंसो दिदृक्षया ॥४०॥

ततस्तु वीक्ष्य दुष्टात्मा रामकृष्णौ महाबलौ ।
दूतानाह भयत्रस्त एतौ दूरय दूरय ॥४१॥

व्रजस्थान्दण्डयिष्यामि गोपान्सर्वान्दुरात्मनः ।
नन्दं तु घातयिष्यामि सभार्यं दुष्टचेतसम् ॥४१॥

इत्येवं भाष्यमाणं तं वीक्ष्य कृष्णः क्षणार्धतः ।
दधार निजमूर्तिं तां ब्रह्माण्डक्षोभकारिणीम् ॥४३॥

ततः सा कालिका देवी वामेनाकृष्य पाणिना ।
केशेश्च धृत्वा दुरात्मानं खड्गेन शिर आच्छिनत् ॥४४॥

सा तु छित्त्वैव तद्दण्डं भूयः सम्भूय पूर्ववत् ।
ननर्त धरणीपृष्ठे रामेण मुनिसत्तम ॥४५॥

नन्दाद्या गोपवृद्धाश्च हर्षनिर्भरमानसाः ।
ननृतुर्वेणुवीणादीन्वादयन्तो रणाङ्गणे ॥४६॥

बभूव पुष्पवृष्टिश्च नभसो देवनिर्मिता ।
दिशः समभवन्सर्वा निर्मला विगतस्वनाः ॥४७॥

देवकीवसुदेवौ तु सम्बद्धौ निगडे स्थितौ ।
गत्वा प्रणम्य कृष्णोऽसौ मोचयामास बन्धनात् ॥४७॥

तौ दृष्ट्वा समुपायान्तौ पुत्रौ चारुमुखाम्बुजौ ।
हर्षाश्रुपूर्णनेत्रान्तौ निन्यतुश्चाङ्कमात्मनः ॥४९॥

रुरुदुस्तन्महिष्यस्तु भर्तृशोकेन मोहिताः ।
करेणाताडय वक्षांसि शिरांसि च महामुने ॥५०॥

ताः सर्वास्तु समाश्वास्य कृष्णः कमललोचनः ।
उग्रसेनं महाराजं तस्मिन्राज्येऽभ्यषेचयत् ॥५१॥

अथ नन्दं परिष्वज्य वसुदेवः समब्रवीत् ।
प्रीणयन्प्रियवाक्येन बाष्पाकुलितलोचनम् ॥५२॥

वसुदेव उवाच—

सखे तवालये त्वेतौ पुत्रौ मे संस्थितौ चिरम् ।
पितेव त्वं च धर्मज्ञ कृतवान्परिपालनम् ॥५३॥

यशोदाऽपि भवत्पत्नी मत्पुत्रौ सुतवत्सदा ।
पालयामास धर्मज्ञा तद्व्रां सुतयोर्मम ॥५४॥

पितरौ मम बन्धुश्च भवानपि दयापरः ।
इमाविदानीं संस्थाप्य मद्वेश्मनि कुमारकौ ॥५५॥

व्रजं व्रज व्रजपते सहितो व्रजवासिभिः ।
नात्र त्वया शोचनीयं ममैव प्रियकारणात् ॥५६॥
वक्तव्यं च यशोदायै ममेदं वचनं सखे ।

श्रीमहादेव उवाच —

इत्युक्तो वसुदेवेन नन्दः साश्रुविलोचनः ॥५७॥
निःश्वसन्दद्दशे रामकृष्णौ निश्चलितेक्षणः ।
ततश्चालुपरीताक्षौ रामकृष्णौ महामते ॥५८॥
नन्दं समूचतुर्वाक्यं बाष्पगद्गदया गिरा ।
तत्र सन्तोष्य पितरौ बहूनन्यांश्च दुःखितान् ॥५९॥
त्वामप्यभ्येत्य पितरं द्रक्ष्यावो मातरं तथा ।
इति ताभ्यां निगदितं श्रुत्वा नन्दोऽतिदुःखितः ॥६०॥
रुदन्स्वपुरमभ्यायात्सहितो व्रजवासिभिः ।
तस्मिन्समागते सर्वा रुरुदुर्गोपयोषितः ॥६१॥
अदृष्ट्वा रामकृष्णौ तौ सुचारुमुखपङ्कजौ ।
तासां शोकापनोदाय कृष्णस्तु मुनिसत्तम ॥६२॥
गोकुलं प्रेषयामासोद्धवं भक्तिपरायणम् ।
स गत्वा सान्त्वयामास समस्तान्व्रजवासिनः ॥६३॥
कृष्णशोकसुदुःखार्तानुक्त्वा कृष्णाभिभाषितम् ।
ततस्तयोः समकरोद्विधिना द्विजसंस्कृतिम् ॥६४॥
वसुदेवः समानीय गर्गाचार्यं महामुनिम् ।
स एव सर्वशास्त्राणि धनुर्वेदादिकानि च ॥६५॥

श्रीमहाभागवते उपपुराणे वसुदेवदेवकीदर्शनप्राप्तिर्नाम चतुःपञ्चाशत्तमोऽध्यायः ।

पञ्चञ्चपचाशत्तमोऽध्यायः

श्रीमहादेव उवाच—

एवं भगवती देवी श्यामसुन्दररूपिणी ।
छलेन विनिपात्यैतान्भूभारान् दुष्टचेतसः ॥१॥
तथान्येषां च दुष्टानां प्रतीक्षन् वधकारणम् ।
रम्ये मधुपुरेऽवात्सीद्ग्रामेण मुनिसत्तम ॥२॥
शम्भुश्च धरणीपृष्ठे स्त्रीरूपेणाष्टधाभवत् ।
स्थितः पितृगृहे देवीं प्रतीक्षन्कृष्णरूपिणीम् ॥३॥
तथा विष्णुश्च सम्भूय कुन्त्यां देवात्पुरन्दरात् ।
भ्रातृभिः सहितोऽवात्सीन्नगरे हस्तिनापुरे ॥४॥
अर्जुनेतिसमाख्यातो महाबलपराक्रमः ।
सर्वशास्त्रार्थतत्त्वज्ञो धनुर्विद्याविशारदः ॥५॥
तथा तद्भ्रातरश्चान्ये चत्वारो भीमविक्रमाः ।
धर्मपुत्रादयो वीरा महाबलपराक्रमाः ॥६॥
ते धर्मनिरताः पञ्च पाण्डवाः सत्यशालिनः ।
सम्प्राप्तयौवना राज्यमकार्षुर्मुनिसत्तम ॥७॥
अभ्यद्विषंस्तान् दुर्धर्षा धार्तराष्ट्रा महाबलाः ।
धार्तराष्ट्रश्च दुर्बुद्धिः कर्णश्च शकुनिस्तथा ॥८॥
दुर्योधनश्च सततं चिन्तयामास दुःसहः ।
उपायं पाण्डवानां च निधने मुनिसत्तम ॥९॥
विषदानादिकर्माणि कृत्वा तेषां वधेच्छया ।
व्यर्थंचेष्टोऽपि नो शान्तिमवाप क्रूरमानसः ॥१०॥
तस्य तां बुद्धिमाज्ञाय क्षत्रियाणां क्षयङ्करीम् ।
अक्रूरं प्रेषयायास हस्तिनायां स वृष्णिराट् ॥११॥
स गत्वा धार्तराष्ट्राणां सर्वं विज्ञाय चेष्टितम् ।
वैचित्र्यवीर्यराजानं रहस्येदं वचोऽब्रवीत् ॥१२॥

अक्रूर उवाच—

विचित्रवीर्यदायाद महाराज सुतांस्तव ।
निवार्य पाण्डवेयेषु स्नेहं प्रकटय प्रभो ॥१३॥

बाल्ये मृतः पिता तेषां त्वामृते नहि विद्यते ।
यस्तेषु कुरुते स्नेहमनाथेषु महामते ॥१४॥
तस्माद्विधाय समतां पाण्डवेषु सुतेषु च ।
भुङ्क्ष्व राज्यं महाराज प्रीत्या परमयान्वितः ॥१५॥

धृतराष्ट्र उवाच—

विद्वेषः पाण्डवेयेषु यद्यप्यस्ति क्षयङ्करः ।
तथापि पुत्रवात्सल्यान्न त्यक्तुं रोचते मनः ॥१६॥

श्रीमहादेव उवाच—

इति तन्मतमाज्ञाय सोऽक्रूरः समुपेक्ष्य च ।
श्रीकृष्णाय यथावृत्तं कथयामास नारद ॥१७॥
तच्छ्रुत्वा चिन्तयामास कृष्णः कमललोचनः ।
राजन्यानां कुरुक्षेत्रे निधनं सम्भविष्यति ॥१८॥
धार्तराष्ट्रस्य दुर्बुद्धेः शकुनेः सौबलस्य च ।
अवश्यमेव चैतस्माद्विद्वेषादिति नारद ॥१९॥
अथ कृष्णः पुरीं दिव्यां ब्रह्मणा परिकल्पिताम् ।
द्वारकां यदुभिः सार्धं संवासाय विवेश ह ॥२०॥
ततः शिवांशजाताया रुक्मिण्यास्तु स्वयंवरे ।
विदर्भराजेनाहूताः सर्व एव महीभुजः ॥२१॥
आजग्मुर्नगरं तस्य नानादेशनिवासिनः ।
रुक्मिनर्नाम सुतस्तस्य भीष्मकस्य च दुर्मतिः ॥२२॥
चैद्याय शिशुपालाय भगिनीं दातुमुत्सुकः ।
कृष्णं विद्विष्य पितरावनादृत्य न चाह्वयत् ॥२३॥
स चेदिराजो बलवान् रुक्मेर्विज्ञाय तन्मतम् ।
महता रथवंशेन सुचारुवररूपधृक् ॥२४॥
आजगाम मुनिश्रेष्ठ विदर्भाधिपतेः पुरम् ।
ततो नारदवक्त्रेण रुक्मिण्युद्वाहमङ्गलम् ॥२५॥
विदर्भराजनगरे नानोत्सवसमाकुले ।
भेरीमृदङ्गपणवानकदुन्दुभिनिःस्वनैः ॥२६॥
श्रुत्वा स्यन्दनमारुह्य कृष्णोऽपि प्रस्थितोऽभवत् ।
ततस्तत्र समागत्य नर्मसि स्यन्दनोपरि ॥२७॥

जहास कृष्णस्तान्दृष्ट्वा वरवेशधरान्नृपान् ।
ततः कमलपत्राक्षीं क्वणच्चलितनूपुराम् ॥२८॥

दुर्गामर्चयितुं नीयमानां नारीभिरादरात् ।
ध्यायन्तीं कृष्णमेकान्ते हंसीगतिविनिन्दिताम् ॥२९॥

काङ्क्षन्तीं वासुदेवस्यागमनं रुक्मिणीं तदा ।
जहार कृष्णो हाहेति पौराः सर्वे विचुक्रुशुः ॥३०॥

अभ्यधावंस्तु संक्रुद्धा राजानो व्यथितान्तराः ॥३१॥

कृष्णः समुद्यतवरायुधधारिणस्तान्विच्छिन्न-सर्ववरकार्मुकवाहनांश्च ।
लज्जाभरान्नतमुखाञ्शिशुपालमुख्यान्कृत्वा जगाम भवनं त्रिदिवेन तुल्यम् ॥३२॥

तथांशसम्भवाः शम्भोः सप्तकन्याश्च नारद ।
जाम्बवत्यादिकाः कृष्णो भार्यात्वेन समाग्रहीत् ॥३३॥

उवास कृष्णस्तस्यां स द्वारवत्यां यदूद्वहः ।
अन्याश्च विविधाः पाणिगृहीत्यश्च महामुने ॥३४॥

कृत्वा बहुतरं युद्धं जित्वा वीरांश्च संयुगे ।
आगत्य द्वारकां रेमे ताभिः सह यथेप्सितम् ॥३५॥

राजेन्द्रत्वेन संसिक्तः पुत्रपौत्रादिसंयुतः ।
उवास वृष्णिभिस्तस्यां द्वारवत्यां यदूद्वहः ॥३६॥

अन्याश्च विविधा भार्याः परिगृह्य महामुने ।
तासु चोत्पादयामास पुत्रान्कृष्णः सहस्रशः ॥३७॥

तथा हत्वा महाराजं भौमं समरदुर्जयम् ।
सहस्रशः समानीय स्त्रियश्चारुविलोचनाः ॥३८॥

एतस्मिन्नन्तरे तेऽपि पाण्डवा मुनिसत्तम ।
कृत्वोद्वाहादिकं शास्त्रविद्यामभ्यस्य दुर्जयाम् ॥३९॥

युयुत्सवः समाहूतवन्तः कृष्णं महामतिम् ।
स तत्र गत्वा राजानं धर्मपुत्रं युधिष्ठिरम् ॥४०॥

राजसूयमहायज्ञं कर्तुमादिष्टवान्मुने ।
क्षयाय राजवंशानां कुरूणां द्वेषवृद्धये ॥४१॥

स्वयमध्यक्षतामेत्य यज्ञमावर्तयत्तदा ।
दिक्षु प्रस्थापयामास भीमादीन्सह सैनिकैः ॥४२॥

विजित्य नृपतीन्सर्वानानीतुं मुनिसत्तम ।
तेऽपि जित्वा नृपान्सर्वान्नानादेशनिवासिनः ॥४३॥

आनीय नगरं प्रापुर्मागधस्य महौजसः ।
जित्वा तान्नृपान्सर्वान्नीतवान्भीमविक्रमः ॥४४॥

ततस्तं पातयामास शूलेन यदुनन्दरः ।
भीमसेनं पुरस्कृत्य संग्रामे मुनिसत्तम ॥४५॥

ततः सर्वान् समानीय राजन्यान् धर्मनन्दनः ।
अकरोद्राजसूयाख्यं यज्ञं सर्वक्रतूत्तमम् ॥४६॥

तत्र धर्मसुतभ्राता सहदेवो महामतिः ।
सदस्यार्चनकार्येषु नियुक्तो धर्मसूनुना ॥४७॥

मुनीन्द्रैः समनुज्ञातः सर्वादौ यदुनन्दनम् ।
अभ्यर्चयन्मुनिश्रेष्ठ पश्यतां सर्वभूभुजाम् ॥४८॥

तद्दृष्ट्वा शिशुपालस्तु धर्मपुत्रं युधिष्ठिरम् ।
कृष्णं यज्ञं च दुष्टात्मा व्यनिन्दत रुषा ज्वलन् ॥४९॥

ततस्तं पृथिवीभारं तस्मिन् राजन्यसंसदि ।
पातयामास कृष्णस्तु छित्त्वा तस्य शिरो मुने ॥५०॥

तद्यज्ञविभवं दृष्ट्वा धार्तराष्ट्रोऽतिदुर्मतिः ।
अतप्यत्क्रूरचेताश्च कर्णश्चापि सुदुर्मतिः ॥५१॥

ततः स मन्त्रयित्वा तु मातुलेन दुरात्मना ।
द्यूतं चक्रे प्रतिज्ञाय पार्थेनामिततेजसा ॥५२॥

तस्मिन्द्यूते छलाद्राजा धर्मपुत्रो युधिष्ठिरः ।
जितो राज्ञाऽतिदुष्टेन धार्तराष्ट्रेण नारद ॥५३॥

प्रतिज्ञावशतो राजा राज्यं सर्वं क्रमेण तु ।
परित्यस्याज दुष्टात्मा तथाऽपि धृतराष्ट्रजः ॥५४॥

भूयो द्यूते महाराजं धर्मपुत्रं समाह्वयत् ।
स तु धर्मपरो राजा धर्मोल्लङ्घनजाद्भयात् ॥५५॥

पुनर्द्यूते प्रवृत्तोऽभूद्धार्तराष्ट्रेण पापिना ।
प्रतिज्ञां चाकरोद्घोरां तस्मिन्द्यूते पराजये ॥५६॥

द्वादशाब्दं वने वासमज्ञातवसतिं तथा ।
एकाब्दं तत्र च द्यूते धर्मराजः पराजितः ॥५७॥

ततो द्यूते भगवतीं द्रौपदीं परिजित्य च ।
दुर्योधनः सभामध्ये तस्याश्चक्रेऽवमाननाम् ॥५८॥
तस्य तद्दारुणं कर्म दृष्ट्वा भीष्मादयो मुने ।
मेनिरे क्षत्रियाणां तं कण्टकं क्षयकारकम् ॥५९॥
निवार्य द्रौपदीं देवीं पाण्डवेभ्यः समर्घ्य च ।
धार्तराष्ट्रं दुरात्मानं जगर्हुस्ते यतव्रताः ॥६०॥
ततस्तु पाण्डवाः सर्वे राज्यभ्रष्टा महामुने ।
सामात्यैः स्वजनैरन्यैः समस्तैः परिवारितः ॥६१॥
प्रजग्मुर्वनवासाय प्रतिज्ञां निस्तितीर्षवः ।
कृष्णास्तु पृथिवीभारनिवृत्त्यै कारणं महत् ॥६२॥
एतदेवेति निश्चित्य द्वारवत्यामुपागमत् ॥६३॥

श्रीमहाभागवते उपपुराणे पाण्डवानां द्यूते पराजयप्राप्तिर्वनवासगमनं पञ्चपञ्चाशत्तमोऽध्यायः ।

षट्पञ्चाशत्तमोऽध्यायः

श्रीमहादेव उवाच—

भ्रमन्तस्ते महात्मानः पाण्डवा मुनिसत्तम ।
व्यतीत्य सुचिरं कालं कामाख्यां द्रष्टुमाययुः ॥१॥
योनिपीठे भगवतीं प्रत्यक्षफलदायिनीम् ।
यत्राकार्षीत्तपः पूर्वं शम्भुर्देवाधिदैवतैः ॥२॥
तत्र ते तु भगवतीं संपूज्याथ विधानतः ।
राज्यं संप्रार्थयामासुः पाण्डवा धर्मतत्पराः ॥३॥
शत्रूणां निधनं चापि संग्रामेऽतिसुदारुणम् ।
सामात्यानां सुदुष्टानां कुरूणां पापचेतसाम् ॥४॥
तथा प्रार्थयतां तेषां पाण्डवानां महात्मनाम् ।
प्रत्यक्षं सा भगवती समभ्येत्येदमब्रवीत् ॥५॥

देव्युवाच—

धर्मपुत्र महाभाग कुरूणां कीर्तिवर्धन ।
प्रतिज्ञां त्वं समुत्तीर्य हत्वा सर्वदुरात्मनः ॥६॥

धार्तराष्ट्रान्सुदुर्धर्षान् राज्यं प्राप्स्यसि निश्चितम् ।
तवैते भ्रातरो वीराश्चत्वारो भुवि दुर्जयाः ॥७॥
पातयिष्यन्ति संग्रामे ससैन्यान्धृतराष्ट्रजान् ।
अहं तव सहायार्थं पुँरूपेणाभवं स्वयम् ॥८॥
वसुदेवगृहे देव्यां देवक्यां निजलीलया ।
छलेन पृथिवीभारनिवृत्त्यै प्रार्थिता सुरैः ॥९॥
विष्णुश्चार्जुन इत्याख्यस्तव भ्राता महाबलः ।
बभूव पृथिवीभारहरणाय ममाज्ञया ॥१०॥
तदहं कृष्णरूपा ते कृत्वा साहाय्यमुत्तमम् ।
अर्जुनं पुरतः कृत्वा पातयिष्ये महारथान् ॥११॥
भीष्मद्रोणादिकान्वीरानन्यांश्च क्षत्रियर्षभान् ।
अनेकदेशदेशीयान्समेतान् कुरुजाङ्गलान् ॥१२॥
वायुपुत्रस्तु भीमोऽसौ तव भ्राता महाबलः ।
धृतराष्ट्रसुतान्सर्वान्संग्रामे निहनिष्यति ॥१३॥
अन्यांस्तु पृथिवीभारान्प्राज्ञः शतसहस्रशः ।
अपरे निहनिष्यन्ति त्वदीयाः क्षत्रियर्षभाः ॥१४॥
एवं हि भारते युद्धे क्षत्रियेषु हतेषु वै ।
भूयः प्राप्स्यसि राज्यं च मत्प्रसादादसंशयः ॥१५॥

श्रीमहादेव उवाच—

इति देव्या वरं प्राप्य धर्मपुत्रो युधिष्ठिरः ।
प्रसन्नात्मा महादेवीं तुष्टाव परमेश्वरीम् ॥१६॥

युधिष्ठिर उवाच—

नमस्ते परमेशानि ब्रह्मरूपे सनातनि ।
सुरासुरजगद्वन्द्ये कामेश्वरि नमोऽस्तु ते ॥१७॥
न ते प्रभावं जानन्ति ब्रह्माद्यास्त्रिदशेश्वराः ।
प्रसीद जगतामाद्ये कामेश्वरि नमोऽस्तु ते ॥१८॥
अनादिपरमा विद्या देहिनां देहधारिणी ।
त्वमेवासि जगद्वन्द्ये कामेश्वरि नमोऽस्तु ते ॥१९॥
त्वं बीजं सर्वभूतानां त्वं बुद्धिश्चेतना धृतिः ।
त्वं प्रबोधश्च निद्रा च कामेश्वरि नमोऽस्तु ते ॥२०॥

त्वामाराध्य महेशोऽपि कृतकृत्यं हि मन्यते ।
आत्मानं परमात्माऽपि कामेश्वरि नमोऽस्तु ते ॥२१॥

वृत्तवृत्तसंहर्त्रि पापपुण्यफलप्रदे ।
लोकानां तापसंहर्त्रि कामेश्वरि नमोऽस्तु ते ॥२२॥

त्वमेका सर्वलोकानां सृष्टिस्थित्यन्तकारिणी ।
करालवदने कालि कामेश्वरि नमोऽस्तु ॥२३॥

प्रपन्नार्तिहरे मातः सुप्रसन्नमुखाम्बुजे ।
प्रसीद परमे पूर्णे कामेश्वरि नमोऽस्तु ते ॥२४॥

त्वामाश्रयन्ति ये भक्त्या यान्ति चाभयतां तु ते ।
जगतां त्रिजगद्धात्रि कामेश्वरि नमोऽस्तु ते ॥२५॥

शुद्धज्ञानमये पूर्णे प्रकृतिः सृष्टिभाविनी ।
त्वमेव मातर्विश्वेशि कामेश्वरि नमोऽस्तु ते ॥२६॥

श्रीमहादेव उवाच—

एवं स्तुता भगवती धर्मपुत्रेण धर्मिणा ।
प्रत्यक्षं प्राह राजंस्त्वं वरं वृणु यथेप्सितम् ॥२७॥

राजोवाच—

व्यतीतस्त्वत्प्रसादान्मे वने द्वादशवार्षिकः ।
वासः परमदुःखौघः प्रतिज्ञातं यथा पुरा ॥२८॥

वर्षे त्रयोदशे त्वस्मिन्परैरविदितैर्वयम् ।
स्थास्याम इति निष्कर्षः पुरा द्यूते मया कृतः ॥२९॥

सोऽयं कृच्छ्रोऽनुसम्प्राप्तो दुष्करः सङ्कटोदयः ।
यथैनं सन्तरिष्यामस्तथा सम्पादयिष्यसि ॥३०॥

देव्युवाच—

नगरे मत्स्यराजस्य पाञ्चाल्या भ्रातृभिः सह ।
स्थित्वा प्रतिज्ञां निस्तीर्य भूयो राज्यमवाप्स्यसि ॥३१॥

श्रीमहादेव उवाच—

एवमुक्त्वा भगवती क्षणेनान्तरधीयत ।
पश्यतो धर्मपुत्रस्य दिवि सौदामिनी यथा ॥३२॥

ततः सर्वान्समाहूय भ्रातॄन् धर्मभृतां वरः ।
मन्त्रयामास वासाय मुने सर्वार्थवित्तमः ॥३३॥

ततस्ते निश्चयं कृत्वा विसृज्यान्यान्महामते ।
विराटराजनगरे प्रययुर्गुप्तरूपिणः ॥३४॥

नगरान्तिकमभ्येत्य विसृज्य ज्यां धनूंषि च ।
शस्त्रास्त्राणि शमीवृक्षे प्रान्तरे ते न्यवर्तयन् ॥३५॥

ततः स राजा प्रणिपत्य देवीमक्षान्समादाय सुवर्णचित्रान् ।
क्षिप्रं ययौ मत्स्यपतेः पुरस्तात् द्विजातिरूपेण महानुभावः ॥३६॥

तं वीक्ष्य राजेन्द्रमहानुभावं पप्रच्छ मत्स्याधिपतिः समागतम् ।
कस्त्वं किमत्रागतवान्कुतो वा मन्ये ध्रुवं सर्वमहीश्वरोऽसि ॥३७॥

स प्राह राजन् शरणार्थिनं मां विनष्टसर्वस्वमुपस्थितं प्रभो ।
द्यूतप्रवीणं द्विजमेव विद्धि कङ्काह्वयं धर्मसुतेन पालितम् ॥३८॥

तच्छ्रुत्वा तं समादृत्य मत्स्यानामधिपः स्वयम् ।
अरक्षत्स्वसभायां तु धर्मात्मानं महामतिम् ॥३९॥

न चैनं ज्ञातवान्कश्चिदपि राज्ञः समागतम् ।
वर्षे त्रयोदशे तस्मिन् भगवत्याः प्रसादतः ॥४०॥

एवं स भीमसेनोऽपि राजानं तमुपेत्य च ।
नियुक्तः पाकशालायां स्थितवान् राजसम्मतः ॥४१॥

अर्जुनो नृत्यशालायां कन्यानां नर्तको भवेत् ।
स्त्रीवेषधारी स्थितवान्मत्स्यराजमतेन च ॥४२॥

द्रौपद्यपि च सैरन्ध्री भूत्वा तस्य महीपतेः ।
पत्नीं सुदेष्णामासाद्य स्थिता सर्वाङ्गसुन्दरी ॥४३॥

माद्रीसुतौ च विक्रान्तौ राजानं तमुपेत्य च ।
नियुक्तावश्वशालायां गोशालायां च संस्थितौ ॥४४॥

न चैतान् ज्ञातवान्कश्चिदपि सर्वान्महीश्वरान् ।
महादेव्याः प्रसादेन तावद्वर्षे त्रयोदशे ॥४५॥

प्राप्ते चैकादशे मासि सुदेष्णाया निकेतने ।
तस्या भ्राता ददर्शैनां सैरन्ध्रीं कीचको बली ॥४६॥

वृद्धस्य मत्स्यराजस्य स एव राज्यरक्षकः ।
स तस्य मतमुल्लङ्घ्य न किञ्चित्कर्तुमुत्सहेत् ॥४७॥

स तां विलोक्य सैरन्ध्रीं चारुसर्वाङ्गसुन्दरीम् ।
पप्रच्छ भगिनीं केयं चारुसर्वाङ्गसुन्दरी ॥४८॥

शचीयं किं महेन्द्रस्य किं विष्णोः कमला स्वयम् ।
नैतादृशी मया दृष्टा कापि सर्वाङ्गशोभना ॥४९॥

सुदेष्णोवाच—

सैरन्ध्रीयं शृणु भ्रातरकस्मात्समुपागता ।
निवेशाद्धर्मपुत्रस्य सर्वराजेश्वरस्य च ॥५०॥

कीचक उवाच—

यथैषा ह्यचिरेणैव भजते मां तथा कुरु ।
नो चेत्प्राणान्परित्यज्य यास्यामि यममन्दिरम् ॥५१॥

सुदेष्णोवाच—

किञ्चिद्वक्ष्यामि ते भ्रातस्तत्त्वमव्यक्तमद्भुतम् ।
तच्छ्रुत्वा ब्रूहि निश्चित्य तत्करिष्ये प्रियं तव ॥५२॥
इयं यदा समायाता सैरन्ध्री चारुरूपिणी ।
निवासमत्र काङ्क्षन्ती तदा त्वेतन्मयोदितम् ॥५३॥
सैरन्ध्री चारुरूपासि मत्तः शतगुणैरपि ।
न त्वं मत्सेवने योग्या मम चैतन्न युज्यते ॥५४॥
यदि त्वां द्रक्ष्यते राजा राजीवसदृशाननाम् ।
तदा त्वामेव चार्वङ्गि सर्वतः समुपेष्यति ॥५५॥
त्वदाज्ञावशगो राजा रूपसौन्दर्यमोहितः ।
न मामेष्यति दौर्भाग्यां किं मे सैरन्ध्यतः परम् ॥५६॥
तदत्र वासस्ते नास्ति गच्छ स्थानं यथेप्सितम् ।
तच्छ्रुत्वा प्राह सैरन्ध्री कल्याणी तव मन्दिरे ॥५७॥
यावत्स्थास्याम्यहं तावन्न गच्छेत्पुरुषः क्वचित् ।
सन्ति मे पञ्च गन्धर्वाः पतयश्चारुविक्रमाः ॥५८॥
त एव प्रतिरक्षन्ति मामहर्निशमेव हि ।
नहि मां धर्षितुं शक्तः पुमानन्यो महीतले ॥५९॥
तन्नास्ति ते भयं राज्ञि वासं रोचय मेऽन्तिके ।
तच्छ्रुत्वाऽहं च सैरन्ध्रीमरक्षं स्वनिवेशने ॥६०॥
न चेत्स्वसुखसञ्छेदमूलां किं स्थापये गृहे ।
तत्त्वं यदि च सैरन्ध्रीमनुगच्छसि सुन्दरीम् ॥६१॥
तदा त्वां पञ्च गन्धर्वा निहनिष्यन्ति निश्चितम् ।

कीचक उवाच—

नाहं बिभेमि गन्धर्वात्सत्यमेव ब्रवीमि ते ॥६२॥

स्वबाहुवीर्यमाश्रित्य हनिष्ये तान्समागतान् ।
सैरन्ध्रीं मृदुवाक्येन नन्दयित्वा ब्रुतं मम ॥६३॥

शय्यां वेशय चावङ्गीं गन्धर्वान्मा भयं कुरु ।

श्रीमहादेव उवाच—

ततः सुदेष्णा सैरन्ध्रीं समाहूय स्मिताननाः ॥६४॥

प्रोवाच गच्छ सैरन्ध्रि कीचकस्य निवेशनम् ।
स त्वामिच्छति कल्याणि भज तं चारुरूपिणम् ॥६५॥

सैरन्ध्र्युवाच—

नाहं भजेऽन्यपुरुषं विना पञ्चपतीन्मम ।
न मा संधर्षितुं शक्तः सोऽतिपापोऽतिमन्दधीः ॥६६॥

यदि मां वीक्ष्य दुष्टात्मा कामोपहतचेतनः ।
समुपैति ध्रुवं मृत्युस्तेभ्यस्तस्य भविष्यति ॥६७॥

इति तस्या वचः श्रुत्वा सुदेष्णा भ्रातरं तदा ।
उवाच स्वेच्छया नैव सैरन्ध्री त्वामुपैष्यति ॥६८॥

तस्यास्तद्वचनं श्रुत्वा कीचकः पापचेतनः ।
बलात्संधर्षणे चेष्टां विततान स दुर्मतिः ॥६९॥

तस्य तच्चेष्टितं ज्ञात्वा द्रुपदस्य सुता तदा ।
भीता देवीं जगद्धात्रीं जगाम शरणं शिवाम् ॥७०॥

द्रौपद्युवाच—

देवि दुर्गे जगन्मातः सर्वरक्षणकारिणि ।
प्रसीद त्वत्प्रपन्नानां दुःखदारियद्दनाशिनि ॥७१॥

दुष्टस्तम्भिनि विश्वेशि कात्यायनि महेश्वरि ।
विश्वमोहिनि विश्वेशे चितिरूपे नमोऽस्तु ते ॥७२॥

महामोहस्वरूपा त्वं शुद्धज्ञानस्वरूपिणी ।
ये त्वां स्मरन्ति संसारे ते दुर्गान्निस्तरन्ति हि ॥७३॥

पातिव्रत्यस्वरूपा त्वं साध्वीनां जगदम्बिके ।
निस्तारय भयाद्घोराच्छङ्करप्राणवल्लभे ॥७४॥

त्वमेव देवि दीनानां सदासि परमा गतिः।
त्वामहं शरणं प्राप्ता त्राहि मां घोरसङ्कटात् ॥७५॥

श्रीमहादेव उवाच—

पाञ्चाल्यैवं स्तुता देवी दुर्गा दुर्गतिनाशिनी।
अन्तरिक्षे गतोवाच मा सैरन्ध्रि भयं कुरु ॥७६॥

यस्त्वामन्य. पुमाँल्लोभादभिकाङ्क्षति कामुकः।
स मृत्युवशगो नूनं भविष्यति न संशयः ॥७७॥

इति देव्या वरं प्राप्य सैरन्ध्री मुदिताननाः।
निर्भया मत्स्यराजस्य भवने विचचार ह ॥७८॥

सैकदा रुचिरापाङ्गी निशायां कार्यगौरवात्।
प्रायाद्गृहं सुदुष्टस्य कीचकस्य महामुने ॥७९॥

तदा स पापः प्रतिवीक्ष्य सुन्दरीं समीपगां तां द्रुपदस्य पुत्रीम्।
उत्थाय जग्राह कराम्बुजे क्षणात्सा तं विनिःक्षिप्य गृहाद्विनिर्ययौ ॥८०॥

क्रुद्धः स पापोऽतिविघूर्णलोचनः प्रायात्सुताया द्रुपदस्य पश्चात्।
सा तद्भयेनातिविषण्णमानसा जगाम मत्स्याधिपतेः सभायाम् ॥८१॥

यत्रास्ति धर्मस्य सुतश्च भीमो वृद्धेन राज्ञा किल देवने रतः।
तत्रागतां तां प्रतिगृह्य केशतः सूतात्मजोऽसौ सहसा पदाबधीत् ॥८२॥

ततो विलप्य द्रुपदस्य पुत्री मत्स्याधिराजं प्रतिनिन्द्य कोपिता।
रक्तेक्षणेन प्रतिवीक्ष्य भीमं धर्मात्मजं वापि सुदीनचेतसम् ॥८३॥

विमृज्य नेत्रे सहसा गृहं ययौ प्रतीक्ष्य कालं किल मत्स्यभूपतेः।
भीमोऽपि संवीक्ष्य च कीचकस्य विनाशनार्थं मनसा व्यचिन्तयत् ॥८४॥

ततः स एकदा प्राह सैरन्ध्रीं पाण्डवो बली।
आमन्त्र्य नृपशालायां रात्रावानय कीचकम् ॥८५॥

तत्राहं तं हनिष्यामि तवैव प्रियकाम्यया।
गन्धर्वैर्निहतः पाप इत्येवं त्वं वदिष्यसि ॥८६॥

तस्य तन्मतमाज्ञाय तथा चक्रे दृढव्रता।
निशार्धे भीमसेनेन स पापः कीचको हतः ॥८७॥

पौरानुवाच सैरन्ध्री गन्धर्वैः कीचको हतः ॥८८॥

तच्छ्रुत्वान्ये समाजग्मुर्द्रष्टुं तमुपकीचकाः।
ते तस्य दाह उद्युक्तास्तमादाय गृहान्तरात् ॥८९॥

रात्रौ विनिर्ययुः सर्वे रुदित्वा सुचिरं बहु ।
एतस्मिन्नन्तरे तेऽपि विनिश्चित्य परस्परम् ॥९०॥

कीचकेन समं दाहं सैरन्ध्र्याश्च व्यरोचयन् ।
ततो बलात्तामादाय प्रजग्मुरुपकीचकाः ॥९१॥

उच्चैः रुरोद सैरन्ध्री भीमस्तज्ज्ञातवांस्तदा ।
ततः प्राचीरमुल्लङ्घ्य विनिर्गत्य महाबलः ॥९२॥

सैरन्ध्रीं मोचयामास विनिपात्योपकीचकान् ।
गन्धर्वेण हता एते इत्येवं चुक्रुशुर्जनाः ॥९३॥

राजा भीतस्तदा प्राह सैरन्ध्रीं विनयान्वितः ।
त्वदर्थे निहता एते मम राज्यस्य रक्षकाः ॥९४॥

मत्पुरीं त्वं परित्यज्य वासमन्यत्र रोचय ।
सैरन्ध्री तमनुप्राह किञ्चित्कालं क्षमस्व मे ॥९५॥

अचिरेणैव यास्यामि त्यक्त्वा राजंस्तवालयम् ।
ततो व्यतीतः समभूत्तेषां वर्षस्त्रयोदशः ॥९६॥

न चारैः प्रतिसन्धाय यज्ञे राजा सुयोधनः ।
भीष्मद्रोणमुखैः सर्वैर्मन्त्रयित्वा चिरं नृपः ॥९७॥

कीचकानां वधं श्रुत्वा तत्र निश्चित्य पाण्डवान् ।
ससैन्यो मत्स्यराजस्य स देशं समुपागमत् ॥९८॥

तत्रासीद्गोग्रहे युद्धं पार्थेन सह धन्विना ।
भीष्मद्रोणादयः सर्वे तेन तत्र पराजिताः ॥९९॥

ततो जज्ञे विराटोऽपि पाण्डवान्समवस्थितान् ।
विधिवत्पूजयामास विनयावनतो नृपः ॥१००॥

तत्रार्जुनसुतस्याभूद्विवाहमङ्गलोत्सवः ।
विराटात्मजया सार्धं सर्वेषां हर्षवर्धनः ॥१०१॥

ततो युद्धसमुद्योगः प्रावर्तत महामते ।
तत्रायाताश्च पाञ्चालाः सर्वसैन्यसमावृताः ॥१०२॥

काशिराजमुखाश्चान्ये नृपाः साहाय्यहेतवे ।
तैर्वृताः पाण्डवाः सर्वे मत्स्यैश्च परिवारिताः ॥
इच्छन्तस्तुमुलं युद्धं कुरुक्षेत्रमुपागमन् ॥१०३॥

इति श्रीमहाभागवते उपपुराणे कीचकवधोपाख्याने षट्पञ्चाशोऽध्यायः ।

सप्तपञ्चाशत्तमोऽध्यायः

श्रीमहादेव उवाच—

तदा भूभारहाराय कृष्णया कृष्णरूपिणी ।
धार्तराष्ट्रसहायार्थं स्वसेनां संनियम्य च ॥१॥

सात्यकेन समं पूर्णं स्वयं पाण्डुमुपागमत् ।
आगताः पृथिवीपाला नानादेशनिवासिनः ।
पाण्डवानां कुरूणां च साहाय्यार्थं महामते ॥२॥

न तादृशः समुद्देशः क्षत्रियाणां महामुने ।
कदाचित्कुत्रचिद्भूतो भविता वा कदाचन ॥३॥

हस्त्यश्वरथपादातैर्नानादेशनिवासिनाम् ।
व्याप्तमासीत्कुरुक्षेत्रं धर्मक्षेत्रमयं तदा ॥४॥

दृष्ट्वैवं तु समुद्योगं लोकक्षयकरं परम् ।
भीष्माद्याः सुमहात्मानः सुयोधनमवारयन् ॥५॥

आगत्य भगवान्व्यासः स्वयं सर्वार्थवित्तमः ।
सपुत्रं धृतराष्ट्रं च निषिषेध मुहुर्मुहुः ॥६॥

न तद्गृहीतवान् राजा कालपाशेन गुण्ठितः ।
कर्णस्य मतमास्थाय युद्धमेव व्यरोचयत् ॥७॥

ततः शङ्खनिनादैश्च भेरीदुन्दुभिनिःस्वनैः ।
रथनेमिस्वनेनापि कम्पयन्तो धरातलम् ।
धार्तराष्ट्राः सहामात्यैः संग्रामाय विनिर्ययुः ॥८॥

तान्दृष्ट्वा समुपायातान्पाण्डवानां महारथाः ।
सिंहनादान्मुहुश्चक्रुः शङ्खस्वनविनिश्चितान् ॥९॥

स घोषो धरणीं चैव नभश्चाप्यनुनादयन् ॥
चकर्ष धार्तराष्ट्राणां मनस्तेजांसि सर्वतः ॥१०॥

ततो धर्मसुतो राजा गुरून्युद्धे व्यवस्थितान् ।
भीष्मद्रोणमुखान्सर्वान्प्रणिपत्य पृथक्-पृथक् ।
युद्धाय तैरनुज्ञातः स्वरथं पुनरागमत् ॥११॥

ततस्ते पाण्डवाः सर्वे अवप्लुत्य रथोत्तमात् ।
संग्रामे जयलाभाय तुष्टुवुर्जगदम्बिकाम् ॥१२॥

पाण्डवा ऊचुः—

कात्यायनि त्रिदशवन्दितपादपद्मे विश्वोद्भवस्थितिलयैकनिदानरूपे ।
देवि प्रचण्डदलिनि त्रिपुरारिपत्नि दुर्गे प्रसीद जगतां परमार्तिहन्त्रि ॥१३॥
त्वं दुष्टदैत्यविनिपातकरी सदैव दुष्टप्रमोहनकरी किल दुःखहन्त्री ।
त्वां यो भजेदिह जगन्मयि तं कदापि नो बाधते भवसुदुःखमचिन्त्यरूपे ।१४
त्वामेव विश्वजननीं प्रणिपत्य विश्वं
ब्रह्मा सृजत्यवति विष्णुरहोत्ति शम्भुः ।
काले च तान्सृजसि पासि विहंसिमात
स्त्वल्लीलयैव नहि तेऽस्ति जनैर्विनाशः ॥१५॥
त्वं यैः स्मृता समरमूर्धनि दुःखहन्त्रि
तेषां तनूं नहि विशन्ति विपक्षबाणाः ।
तेषां शरास्तु परगात्रनिमग्नपुङ्खाः
प्राणान्ग्रसन्ति दनुजेन्द्रनिपानकर्त्रि ॥१६॥
यस्त्वन्मनुं जपति घोररणे सुदुर्गे
पश्यन्ति कालसदृशं किल तं विपक्षाः ।
त्वं यस्य वै जयकरी खलु तस्य
वक्त्राद्ब्रह्माक्षरात्मकमनुस्तव निःसरेच्च ॥१७॥
त्वामाश्रयन्ति परमेश्वरि ये भयेषु
तेषां भयं नहि भवेदिह वा परत्र ।
तेभ्यो भयादिह सुदूरत एव दुष्टा-
स्त्रस्ताः पलायनपराश्च दिशो द्रवन्ति ॥१८॥
पूर्वे सुरासुररणे सुरनायकस्त्वां
सम्प्रार्थयन्नसुरवृन्दमुपाजघान ।
रामोऽपि राक्षसकुलं निजघान तद्व
त्त्वत्सेवनादृत इहास्ति जयो न चैव ॥१९॥
तस्त्वां भजामि जयदां जगदेकवन्द्यां
विश्वाश्रयां हरिविरञ्चिसुसेव्यपादाम् ।
त्वं नो विधेहि विजयं त्वदनुग्रहेण
शत्रून्निपात्य समरे विजयं लभामः ॥२०॥

श्रीमहादेव उवाच—

इत्येवं संस्तुता देवी पाण्डवैर्यैर्महात्मभिः ।
सुप्रसन्ना वरं प्रादादन्तरिक्षे गता स्वयम् ॥२१॥

देव्युवाच—

मत्प्रसादाद्रणे शत्रून्निपात्य रणमूर्धनि ।
निष्कण्टकमिदं राज्यं भूयो भूयस्त्ववाप्स्यथ ॥२२॥

पृथ्वीभारापहाराय युष्माकं विजयाय च ।
वासुदेवस्वरूपेण जाताहं निजलीलया ॥२३॥

फाल्गुनस्य रथे स्थित्वा विपुले वानरध्वजे ।
वासुदेवस्वरूपाहं युष्मान्रक्ष्यामि निश्चितम् ॥२४॥

स्तोत्रेणानेन मां भक्त्या ये स्तोष्यन्ति नरा भुवि ।
तेषां च जयदा नित्यं भविष्यामि न संशयः ॥२५॥

श्रीमहादेव उवाच—

इत्येवं तु वरं लब्ध्वा पाण्डुपुत्रा महारथाः ।
मेनिरे विजयं युद्धे सुप्रसन्नमुखाम्बुजाः ॥२६॥

ततः पुनः समारुह्य रथान्हेमपरिप्लुतान् ।
विगृह्य कवचं भूयः शङ्खान्दध्मुः पृथक् पृथक् ॥२७॥

वासुदेवश्च बलवानर्जुनस्य रथे स्थितः ।
पाञ्चजन्यं महाशङ्खं दध्मौ घोरतरं मुहुः ॥२८॥

चकम्पे वसुधा तेन क्षुब्धमासीदिदं जगत् ।
विषण्णमानसा आसन्धार्तराष्ट्राः ससैनिकाः ॥२९॥

सेनाध्यक्षस्त्वभूत्तेषां भीष्मो लोकमहारथः ।
कर्णश्च भीष्मविद्वेषान्न्यस्तशस्त्रो व्यतिष्ठत ॥३०॥

अग्रतः पाण्डुसैन्यानां तथैवासीद्वृकोदरः ।
नागायुतबलो वीरो साक्षात्काल इवापरः ॥३१॥

भीष्मेन समभूद्युद्धं दशरात्रं महामुने ।
अर्बुदं स जघानैकः पाण्डुसैन्येषु नारद ॥३२॥

तथान्ये बहवो नष्टा धार्तराष्ट्रस्य सैनिकाः ।
पाण्डवेयैश्च निहता धार्तराष्ट्रस्य सैनिकाः ।
तेभ्योऽधिकतरा संख्या महाबलपराक्रमैः ॥३३॥

दशमेऽहनि संग्रामे किञ्चिच्छेषे दिवाकरे ।
धनञ्जयमहास्त्रेण हतो भीष्मः शिखण्डिना ॥३४॥

उत्तरायणमन्विच्छन्स धर्मात्मा महारथः
स्थितवाञ्शरशय्यायां ह्यापयन्हि पितुर्वरम् ॥३५॥

ततः कर्णमुखा योधा द्रोणं कृत्वा महारथम् ।
चक्रुः सुतुमुलं युद्धं भूयः पञ्च दिनानि च ॥३६॥
निहतस्तत्र संग्रामे सौभद्रेयो महारथः ।
अन्याय्ययुद्धमाश्रित्य धार्तराष्ट्रस्य सैनिकैः ॥३७॥
ततोऽर्जुनः प्रतिज्ञाय सायाह्ने जयद्रथम् ।
शरौघैः पातयामास महाबलपराक्रमः ॥३८॥
एवमन्ये च निहताः सेनयोरुभयोरपि ।
पञ्चमेऽह्नि तथा भग्नो द्रोणः पाञ्चालसूनुना ॥३९॥
ततः कर्णेन समभूद्युद्धं तेषां दिनद्वयम् ।
कर्णेन निहतो वीरो राक्षसेन्द्रो घटोत्कचः ॥४०॥
तं चाप्यपातयत्संख्ये पाण्डवो वानरध्वजः ।
अन्ये च पृथिवीपालाः सेनयोरुभयोरपि ॥४१॥
परस्परं समासाद्य प्रययुर्यमसादनम् ।
ततः शल्यं रणे राजा धर्मपुत्रो युधिष्ठिरः ॥४२॥
न्यपातयद्रणे क्रुद्धः शरैः सन्नतपर्वभिः ।
ततः समभवद्युद्धं राज्ञा दुर्योधनेन हि ॥४३॥
भीमसेनस्य गदया परस्परजयैषिणोः ।
भीमेन गदया चापि हतो दुर्योधनस्ततः ॥४४॥
अन्ये च निहताः सर्वे पूर्वमेव महात्मना ।
दुःशासनमुखा योधा धार्तराष्ट्रा रणाजिरे ॥४५॥
ततो रात्रौ भरद्वाजसुतेन सौप्तिका हताः ।
धृष्टद्युम्नः सुदुर्धर्षो द्रौपद्याः पञ्च सूनवः ॥४६॥
ततोऽर्जुनेन संग्रामादमरौ विनिवर्तितौ ।
अश्वत्थामकृपाचार्यौ शरैः सन्नतपर्वभिः ॥४७॥
एवमष्टादशाहे तु अक्षौहिण्यो निपातिताः ।
अष्टादश मुनिश्रेष्ठ सेनयोरुभयोरपि ॥४८॥
वासुदेवेन सहिताः पाण्डवेया महारथाः ।
सर्वेषां क्ष्माभुजां चक्रुः क्रियामप्यौर्ध्वदेहिकीम् ॥४९॥
माघे मासि सिताष्टम्यां भीष्मः प्राणान्समत्यजत् ।
राज्यं बुभुजिरे पार्थाः महादेव्याः प्रसादतः ॥५०॥

श्रीमहाभागवते उपपुराणे महाभारतयुद्धवर्णने सप्तपञ्चाशत्तमोऽध्यायः ।

अष्टपञ्चाशत्तमोऽध्यायः

श्रीमहादेव उवाच—

एवं निपात्य भूभारं छलेन मुनिसत्तम ।
स्वस्थानं पुनरागन्तुं मतिं चक्रे महीतलात् ॥१॥
एतस्मिन्नन्तरे ब्रह्मा समागत्य धरातलम् ।
द्वारकापुरमाविश्य कृष्णं वचनमब्रवीत् ॥२॥

ब्रह्मोवाच—

पृथिवीभारसंहृत्यै प्रार्थितास्माभिरीश्वरी ।
देहं मानुषमाश्रित्य शम्भोरनुमतेन वै ॥३॥
मायापुरुषरूपेण जातासि धरणीतले ।
तच्च जातु कृतं सर्वं पृथिवीभारपातनम् ॥४॥
परिपूर्णीकृतं चापि शम्भोर्यन्मनसेप्सितम् ।
इदानीं पुनरागत्य स्वस्थानं पृथिवीतलात् ॥५॥
स्वरूपं पुनराश्रित्य पालयास्मान्दिवौकसान् ।

श्रीकृष्ण उवाच—

ब्रह्मन्ममापि तत्रेच्छा विद्यते यत्त्वयोच्यते ॥६॥
अचिरेण समायास्ये भूयः स्वस्थानमुत्तमम् ।

श्रीमहादेव उवाच—

एवमाश्वास्य धातारं विसृज्य जगदीश्वरी ॥७॥
श्यामसुन्दररूपा सा द्वारकात्यागपूर्वकम् ।
स्वर्गारोहणमिच्छन्ती प्रत्युवाचाथ मन्त्रिणः ॥८॥

श्रीकृष्ण उवाच—

यदुवंशसमुत्पन्ना मृताः सर्वे दिवं गताः ।
प्रायशस्तु मुनेः शापादष्टावक्रस्य मन्त्रिणः ॥९॥
स्वल्पास्तिष्ठन्ति वंशेऽस्मिञ्शूरा वृद्धावशेषिताः ।
तेभ्यो न रोचते राज्यं न स्थितिश्च धरातले ॥१०॥
तद्यास्यामि द्रुतं स्वर्गं निश्चितं मन्त्रिसत्तमाः ।
दूतान्प्रेषयत क्षिप्रं हस्तिनायां युधिष्ठिरम् ॥११॥
ब्रुवन्तु मे सखायं च किरीटिनमरिन्दमम् ।
नकुलं सहदेवं च भीमसेनं महाबलम् ।
स्वर्गारोहणं उद्योगं मम ब्रह्मानुशासनात् ॥१२॥

महादेव उवाच—

इति कृष्णाज्ञया सर्वे मन्त्रिणो दीनमानसाः ।
दूतान्प्रस्थापयामासुर्हस्तिनायां त्वरान्विताः ॥१३॥

ते गत्वाऽऽहुर्महाराजं धर्मपुत्रं युधिष्ठिरम् ।
तथान्यान् पाण्डवांश्चापि कृष्णं स्वर्गमनोद्यतम् ॥१४॥

तच्छ्रुत्वा दुःखितास्तेऽपि पाण्डवाः समुपागताः ।
कृष्णानुगमने कृत्वा मतिं स्थिरतरां मुने ॥१५॥

द्रौपद्याद्याः स्त्रियश्चापि कृष्णानुगमने मतिम् ।
निश्चित्य प्रययुः सर्वा द्वारकायां त्वरान्विताः ॥१६॥

अन्ये च बहवः श्रुत्वा कृष्णस्वर्गावरोहणम् ।
कृष्णान्तिकमुपाजग्मुस्तस्यानुगमनेच्छया ॥१७॥

तानभ्यर्च्य यथान्यायं कृष्णः कमललोचनः ।
उवाच सोऽश्रुपूर्णाक्षः स्निग्धगम्भीरया गिरा ॥१८॥

श्रीकृष्ण उवाच—

युधिष्ठिर महाराज मित्रार्जुन वृकोदर ।
युष्माभिः प्रतिपाल्या मे पौरजानपदाः सदा ।
अहं स्वर्गं गमिष्यामि साम्प्रतं पृथिवीतलात् ॥१९॥

श्रीमहादेव उवाच—

इति तस्य वचः श्रुत्वा पाण्डवास्तेऽतिदुःखिताः ।
प्राहुः कृष्णं महात्मानं साश्रुनेत्राः पृथक् पृथक् ॥२०॥

युधिष्ठिर उवाच—

मां विद्धि निश्चितात्मानं तवानुगमने प्रभो ।
न स्थास्यामि क्षितौ कृष्ण त्वां विना पृथिवीतले ॥२१॥

भीम उवाच—

अहं चानुगमिष्यामि त्वामेव यदुनन्दन ।
न स्थास्यामि क्षितौ कृष्ण त्वां विनाहं कथञ्चन ॥२२॥

अर्जुन उवाच—

त्वं मे प्राणस्त्वमात्मा च त्वं गतिस्त्वं मतिर्मम ।
न त्वामृते क्षणं भूमौ स्थास्यामि यदुनन्दन ॥२३॥

नकुल उवाच—

अहमप्यनुयास्यामि त्वामेव जगदीश्वर ।
न त्वामृते क्षणं स्थातुं शक्नोमि पृथिवीतले ॥२४॥

सहदेव उवाच—

तवानुगमने स्वामिन्न स्थास्यामि भुवि क्वचित् ।
त्वं मे प्राणो गतिः शक्तो रक्षकोऽपि जगत्त्रये ॥२५॥

श्रीमहादेव उवाच—

इत्येवं निश्चयं ज्ञात्वा पाण्डवानां महात्मनाम् ।
स्वांशजां द्रौपदीं कृष्णः स्मित्वा वचनमब्रवीत् ॥२६॥

श्रीकृष्ण उवाच—

कृष्णे स्थास्यसि किं पृथ्व्यां किंवा स्वर्गं प्रयास्यसि ।
यथा रुचिस्तथा ब्रूहि मा चिरं द्रुपदात्वजे ॥२७॥

द्रौपद्युवाच—

अहं तवांशसम्भूता त्वमाद्या कालिका परा ।
अहं त्वामनुयास्यामि जले जलमिव क्षणात् ॥२८॥

श्रीमहादेव उवाच—

अथ रामः समागत्य स्वर्गारोहे समुद्यतम् ।
कृष्णं त्रिजगतां नाथं रुदन्वचनमब्रवीत् ॥२९॥

श्रीराम उवाच—

यदि पृथ्वीं परित्यज्य स्वर्गमेवाधियास्यसि ।
अनुवृष्णिकुलोत्पन्नान्नीत्वा त्वं याहि मा चिरम् ॥३०॥
एते वृष्णिकुलोत्पन्नाः सर्व एव महीभुजः ।
न त्वामृते क्षितौ राजन्संस्थास्यन्ति कदाचन ॥३१॥

श्रीमहादेव उवाच—

ततः कौशेयवासास्तु कृष्णः कमललोचनः ।
दत्त्वा धनानि विप्रेभ्यः स्वपुरान्निर्ययौ द्रुतम् ॥३२॥
तत्पश्चान्निर्ययौ रामः सहितः सर्ववृष्णिभिः ।
पाण्डवाश्चापि निर्याताः सामात्या वनितागणैः ॥३३॥
सर्वे प्रापुः समुद्रस्य तीरे तेषां च पृष्ठतः ।
अनेकदेशदेशीया जाता जानपदा मुने ॥३४॥

एतस्मिन्नन्तरे नन्दी रथं रत्नपरिष्कृतम् ।
सिंहवाहं समानीय तत्रायातोऽन्तरिक्षतः ॥३५॥

ब्रह्मा च बहुसाहस्रं रथानां मुनिसत्तम ।
समानीयान्तरिक्षे तु संस्थितो देवतैः सह ॥३६॥

आयातं जलधेस्तीरं वीक्ष्य कृष्णं सुरोत्तमाः ।
पुष्पवृष्टिं मुमहतीं प्रचक्रुर्हृष्टमानसाः ॥३७॥

अवादयन्त विविधान्मृदङ्गपटहादिकान् ।
घण्टाश्च शतशो नेदुर्ननृतुश्चाप्सरोगणाः ॥३८॥

एवं कृते महोत्साहे कृष्णः कमललोचनः ।
सम्भूय सहसा काली सिंहवाहं महारथम् ॥३९॥

आरुह्य त्रिदशश्रेष्ठैर्मुनीन्द्रैश्चातिसंस्तुता ।
कैलासमगमच्छीघ्रं ब्रह्मादीनां च पश्यताम् ॥४०॥

द्रौपदी तु विलीनाऽभूत्तस्यामेव महामते ।
स्पृष्ट्वा जलं समुद्रस्य सर्वलोकस्य पश्यतः ॥४१॥

ततो युधिष्ठिरो राजा साक्षाद्धर्ममयः प्रभुः ।
विचित्रं रथमारुह्य प्राप स्वर्गं द्रुतं शुभम् ॥४२॥

रामार्जुनौ च संस्पृश्य जलधिं मुनिसत्तम ।
त्यक्त्वा देहं समाश्रित्य रूपं नवघनप्रभम् ॥४३॥

चतुर्भुजं लसत्पद्मशङ्खचक्रगदाधरम् ।
आरुह्य गरुडं तूर्णं वैकुण्ठं प्रापतुः स्वयम् ॥४४॥

भीमाद्याश्चापि सन्त्यज्य देहं तस्मिन्महाम्बुधौ ।
प्रापुः स्वर्गे पुरं तत्तु वृष्णयश्च तथापरे ॥४५॥

एवं गतेषु सर्वेषु रुक्मिण्याद्याश्च योषितः ।
शाम्भवं देहमाश्रित्य ययुः स्वस्थानमुत्तमम् ॥४६॥

अपरा योषितश्चापि श्रीकृष्णस्य महामते ।
देहांस्त्यक्त्वा बभूवुश्च पूर्ववद्भैरवाः क्षणात् ॥४७॥

श्रुत्वा कृष्णागमं तत्र श्रीदामः सत्यमन्वयु ।
यस्याभूद्वसुदामस्तु विजया समभूत्तथा ॥४८॥

एवं सममवद्देवी श्यामसुन्दररूपिणी ।
पृथ्वीभारापहाराय मर्तुरिच्छावशेन तु ॥४९॥

पुंरूपेण जगन्माता लीलया धरणीतले ।
हृत्वा च पृथिवीभाराञ्चलेनैव महामते ॥५०॥
भूयः स्वरूपमाश्रित्य स्वस्थानं समुपागमत् ।
कल्पान्तरे तु भूपृष्ठे द्वापरान्ते महामुने ॥५२॥
विष्णुः श्रीकृष्णरूपेण पूर्णांशेन जगत्प्रभुः ।
शम्भोर्वरप्रदानेन सम्भविष्यति लीलया ।
निहनिष्यति भूभारमेवमेव महामते ॥५२॥

कृष्णावतारचरितं जगदम्बिकायाः शृण्वन्ति ये भुवि पठन्ति च भक्तियुक्ताः ।
ते प्राप्य सौख्यमतुलं परतश्च देव्याः सम्प्राप्नुवन्ति पदवीममरैरलभ्याम् ॥५३॥

इति श्रीमहाभागवते उपपुराणे स्वर्गयात्रागमने अष्टपञ्चाशत्तमोऽध्यायः ।

एकोनषष्टितमोऽध्यायः

श्रीनारद उवाच—

देवदेव जगन्नाथ कृपामय जगत्प्रभो ।
भूयस्ते श्रोतुमिच्छामि देव्याख्यानमनुत्तमम् ॥१॥
मूर्तिर्या भगवत्यास्तु कैलासेऽपि शिवान्तिके ।
तयोस्तु खलु दुर्गायाः सूक्ष्मं रूपं तथाऽऽलयम् ॥२॥
शारदीया महापूजा प्रसादात्त्वन्मुखाम्बुजात् ।
इदानीं ब्रूहि काल्याश्च सूक्ष्मं रूपं तथाऽऽलयम् ॥३॥

श्रीमहादेव उवाच—

दुर्गायाः परमं स्थानं यन्मया ते समीरितम् ।
दुर्गम्यं देवगन्धर्वयक्षकिन्नररक्षसाम् ॥४॥
तत्पार्श्वे तु सुदुर्गम्यं ब्रह्माद्यैस्त्रिदशेश्वरैः ।
सुगुप्तं परमं रम्यं स्थानमस्मिन् सुशोभनम् ॥५॥
वेष्टितं परितश्चारु सुधामयमहाब्धिना ।
अनर्घ्यरत्नसम्भारघटितं ज्वलनप्रभम् ॥६॥
तन्मध्येऽस्ति पुरं रम्यं रत्नप्राकारतोरणम् ।
चतुर्द्वारं चतुर्दिक्षु मुक्ताजालातिभूषितम् ।
चित्रध्वजपताकाभिरतीव समलङ्कृतम् ॥७॥

विचित्रखट्वाङ्गकरा रक्तनेत्राः सहस्रशः ।
रक्षन्ति भैरवाः सर्वे तानि द्वाराणि सर्वदा ॥८॥

तस्या आज्ञां विना यानि समुल्लङ्घ्य सुरासुराः ।
न शक्नुवन्ति वै गन्तुं ब्रह्माद्यास्त्रिदशेश्वराः ॥९॥

तन्मध्ये मन्दिरं रम्यं नानारत्नविनिर्मितम् ।
मणिस्तम्भशतैर्युक्तं सुवर्णेनातिवेष्टितम् ॥१०॥

तन्मध्येऽयुतसिंहाढ्यं रत्नसिंहासनं महत् ।
तस्योपरि प्रविन्यस्तशवोपरि महेश्वरी ॥११॥

महाविद्या महाकाली सदा तिष्ठति नारद ।
सर्वेषां हृत्सरोजस्था सैव मायामयी शुभा ॥१२॥

ब्रह्माण्डकोटिकोटीनां सृष्टिस्थितिविनाशिनी ।
एकैव सा महादेवी स्वेच्छया ब्रह्मरूपिणी ॥१३॥

विजयादिचतुःषष्टियोगिन्यः परिचारिकाः ।
पुरकर्माणि कुर्वन्ति सदा सावहिता मुने ॥१४॥

तस्यास्तु दक्षिणे भागे महाकालः सदाशिवः ।
तेन सार्धं महाकाली हृष्टा संरमते सदा ॥१५॥

एवमन्तःपुरं तस्या भैरवैर्बहिरन्वितम् ।
अत्याश्चर्यतमं सौम्यं ब्रह्मादीनां सुदुर्लभम् ॥१६॥

ब्रह्मेशविष्णुभिः सार्धं समागत्य मयामते ।
तस्या दर्शनमात्रेण सुराधीशः पुरन्दरः ।
मुक्तोऽभवद्ब्रह्महत्याजनिताद्घोरकिल्बिषात् ॥१७॥

तदैव ददृशुस्तत्र ब्रह्मविष्णुपुरन्दराः ।
प्रसादाद्देवदेवस्य कालीं परमदेवताम् ॥१८॥

तद्बहिर्वर्णने वत्स शृणुष्वावहितो मुने ।
सर्वतो वेष्टितं रत्नप्राकारैर्बहिरङ्गनम् ।
चतुर्दिक्षु चतुर्द्वारं रत्नतोरणभूषितम् ॥१९॥

तानि रक्षन्त्यविरतं सर्वे तु गणनायकाः ।
तदन्तश्चोपयोगिन्यः कामाख्याद्या महामते ॥२०॥

तद्बहिर्दर्शनाकाङ्क्षिब्रह्माणः कतिकोटयः ।
विष्णवश्च तथाऽसंख्या वसन्ते दर्शनोत्सुकाः ॥२१॥

स्थिता ध्यानसमासक्ता नानाब्रह्माण्डवासिनः ।
तद्बहिस्तु चतुर्द्वारं नानारत्नपरिष्कृतम् ॥२२॥

रक्षन्ति कोटिशस्तानि गणा द्वाराणि सर्वदा ।
तद्बहिः कोटिशः सन्ति इन्द्राद्यास्त्रिदशेश्वराः ॥२३॥

ध्याननिष्ठाश्चिरेणापि सकृद्दर्शनकाङ्क्षिणः ॥२४॥

एवं बहुविधं द्वारं नानारत्नपरिष्कृतम् ।
रक्षन्ति कोटिशः सर्वे देव्याज्ञापरिपालकाः ॥२५॥

पारिजातवनं रम्यमुत्तरे परिकीर्तितम् ।
प्रफुल्लं कुसुमाकीर्णं चित्रभ्रमरसंकुलम् ॥२६॥

वसन्तः सर्वदा तत्र वायुर्वाति शनैः शनैः ।
विचित्रपक्षिरूपेण ब्रह्मविष्णुमुखाः सुराः ॥२७॥

गायन्ति चरितं काल्यास्तस्मिन्मधुरनिःस्वनैः ।
पूर्वस्थं मुनिशार्दूल रम्यं चारुतरं सरः ॥२८॥

स्वर्णपङ्कजकल्हारकुमुदैरतिशोभितम् ।
गुञ्जितभ्रमरश्रेणीपक्षवातप्रकम्पितैः ।
चम्पकाशोकपुष्पैश्च कूलं तस्य मनोहरम् ॥२९॥

विचित्रमणिसोपानैः परितः परिशोभितम् ।
एवं तस्याः पुरं रम्यं वाचातीतं महामते ॥३०॥

तथान्यासां च विद्यानां नवानामपि तत्र वै ।
एवं प्रत्येकतो रम्यं पुरमस्ति पृथक्-पृथक् ॥३१॥

तासां च दक्षिणे भागे नानारूपः सदाशिवः ।
आस्ते पृथक् पृथक् तेन रमते सा पृथक् पृथक् ॥३२॥

श्रीमहाभागवते उपपुराणे श्रीब्रह्ममयीमहाकालीस्थानवर्णनं नामैकोनषष्टितमोऽध्यायः ।

षष्टितमोऽध्यायः

श्रीनारद उवाच—

देवदेव महेशान विस्तरेण मम प्रभो ।
इन्द्रस्य ब्रह्महत्याऽभूद्यथा स च महामतिः ॥१॥

ब्रह्माद्याश्चागमन्देवा महाकालीदिदृक्षवः ।
देवदेवप्रसादेन यथा ब्रह्मादयश्च ते ॥२॥

व्यतीत्य सर्वलोकान्वै तस्या लोकमुपागमन् ।
यथा च तत्पुरद्वारं भैरवैरभिरक्षितम् ॥३॥

व्यतीत्यान्तःपुरगता यथा देवीं व्यलोकयन् ।
ददृशुर्याद्दृशीं मूर्तिमेतदाचक्ष्व साम्प्रतम् ॥४॥

श्रीमहादेव उवाच—

ब्रह्मदत्तवरोद्भूतः पूर्वं वृत्रो महासुरः ।
निर्जित्य सकलान्देवान्स्वयमिन्द्रो बभूव ह ॥५॥

चन्द्रसूर्याग्निमरुतां कुबेरस्य यमस्य च ।
अपहृत्याधिपत्यं महाबलपराक्रमः ।
ऐकाधिपत्यं चक्रे वै त्रिषु लोकेषु नारद ॥६॥

ब्रह्मणा कल्पितो मृत्युर्दधीचेरस्थिनिर्मितात् ।
महास्त्राद्देवराजस्य हस्तात्तस्य दुरात्मनः ॥७॥

बृहस्पत्युपदेशेन देवराजः पुरन्दरः ।
सम्प्रार्थ्य पद्मयोर्नि तज्ज्ञातवान्मुनिसत्तम ॥८॥

ततो दधीचेर्निकटं स्वयमिन्द्रः समभ्यगात् ।
तदस्थिभिक्षामन्विच्छञ्जगतां त्राणहेतवे ॥९॥

स प्रणम्य महात्मानं दधीचिं मुनिसत्तमम् ।
कृताञ्जलिपुटः प्राह दधीचिः स्वागतं मुने ॥१०॥

ततो मुनिरपि ज्ञात्वा देवराजं समागतम् ।
उत्थाय आसनं दत्वा पप्रच्छ कुशलादिकम् ॥११॥

किमर्थमत्रागमनं देवराज वदस्व तत् ।
इत्युक्तो मुनिना प्राह देवराजो मुनिं मुने ॥१२॥

अस्माकं यादृशं वृत्तं युष्माकं किमगोचरम् ।
ब्रह्मदत्तवरोद्भूतो वृत्रो नाम महासुरः ।
विजित्यास्माँल्लोकपालान् त्रिलोकेशोऽभवत्स्वयम् ॥१३॥
वयं तु तद्भयात्सर्वे स्वर्गं त्यक्त्वा दिवौकसः ।
मनुष्याइव मर्त्येऽस्मिन्वसामो मुनिपुङ्गव ॥१४॥
न यज्ञभागं प्राप्नोमि नार्चयन्ति च केचन ।
एवं दुर्गतिमापन्नः किमन्यत्कथयामि ते ॥१५॥
निस्तारयसि चेद्देवांस्त्वमेव कृपया मुने ।
दुःखार्णवनिमग्नानां निष्कृतिस्तु त्वमेव हि ॥१६॥

दधीचिरुवाच—

जानामि सर्वं यद्भूतमपरं यद्भविष्यति ।
विज्ञानचक्षुषैरिन्द्र किं करोमि वदस्व तत् ॥१७॥

इन्द्र उवाच—

कथयिष्यामि किं ब्रह्मन्मयं मे जायते भृशम् ।
यदर्थं त्वामनुप्राप्तस्तच्छृणुष्व महामुने ॥१८॥
न तस्य मृत्युर्विधिना कल्पितोऽन्यप्रकारतः ।
त्वदस्थिनिर्मितास्त्रेभ्यस्तेनाहमागतोऽस्मि भोः ॥१९॥
एतत्ते कथितं सर्वं यदर्थमहमागतः ।
इदानीं मुनिशार्दूल यथायोग्यं विवेचय ॥२०॥

श्रीमहादेव उवाच—

इत्युक्तो देवराजेन मुनीन्द्रः समचिन्तयत् ।
किमेनं विमुखं कुर्यां किंवा देहं त्यजाम्यहम् ॥२१॥
एवं द्वैधमना भूत्वा किञ्चित्कालं महामतिः ।
देहत्यागं विनिश्चित्य देवराजमुवाच ह ॥२२॥

दधीचिरुवाच—

सम्भ्रष्टराज्या यदि देवसङ्घा निस्तारमायान्ति महासुरेन्द्रात् ।
मदस्थिभिस्तत्खलु देवराज त्यक्ष्यामि योगेन शरीरमेतत् ॥२३॥
धन्यं शरीरं खलु तस्य देहिनो यस्य व्ययः स्यात्परसौख्यहेतवे ।
अनित्यमेतत्स हि धर्ममेव नित्यस्तदेनं परिसंत्यजामि ॥२४॥
इत्येवमुक्त्वा स मुनिस्तदा मुने जाज्वल्यमानं निजतेजसा ह्यलम् ।
योगेन संत्यज्य शरीरमेतदवाप मोक्षं सुरराजसम्मुखे ॥२५॥

इन्द्रस्तदालोक्य विनिःश्वसन्मुहुर्विगस्तु लोकान्विषयैषिणोऽस्मान् ।
आक्षिप्य सम्मूय विषण्णमानसस्तस्थौ स कालं कियदेव तत्र सः ॥२६॥
ततस्तवस्थीन्यवगृह्य सादरो महासुरेन्द्रस्य वधार्थमेव सः ।
नानाविधास्त्राणि विनिर्ममे मुने तैरस्थिभिर्देवगणेन मन्त्रयन् ॥२७॥
ततः सुरैः सार्धममोघविक्रमो महासुरं देवदुरासदं ययौ ।
महोग्रधन्वा सुरवृन्दनायकः समाह्वयञ्चापि महाहवे रिपुम् ॥२८॥
ततः प्रवृत्ते तु मुने महाहवे दैत्येश्वरं तं निजघान वासवः ।
तदस्थिसन्निर्मिततीव्रमार्गणैर्वज्रेण चक्रेण महोज्ज्वलेन च ॥२९॥
एवं सुरेन्द्रस्य बभूव पातकं तद्ब्रह्महत्याकृतमेव नारद ।
शृणु प्रवक्ष्यामि च साम्प्रतं यथा ददर्श कालीं जगदेकमातरम् ॥३०॥

महाभागवते उपपुराणे दधीचिप्राणत्यागे देवराजस्य ब्रह्महत्यावर्णने षष्टितमोऽध्यायः ।

एकषष्टितमोऽध्यायः

श्रीमहादेव उवाच—

निहत्य समरे दैत्यं वृत्रं समरदुर्जयम् ।
ऐरावतं समारुह्य सर्वैर्देवगणैर्वृतः ॥१॥
ब्रह्मर्षिभिस्तूयमानो महोत्सवसमुत्सुकः ।
प्रविवेश पुरं स्वीयं सहस्राक्षो महामते ॥२॥
उपविश्य सभायां स देवर्षीन्देवपुङ्गवान् ।
पप्रच्छावनतो भूत्वा स्निग्धगम्भीरया गिरा ॥३॥

इन्द्र उवाच—

दधीचिर्मुनिशार्दूलो मम वाक्यानुसारतः ।
अस्थीनि मह्यं दातुं वै देहं त्यक्त्वा दिवं गतः ॥४॥
तन्मे जाता ब्रह्महत्या ततो मुक्तः कथञ्चन ।
भवामि ब्रूत मे विप्राः किं करिष्यामि साम्प्रतम् ॥५॥

ऋषय ऊचुः—

जीवन्मुक्तो मुनिश्रेष्ठ स्वेच्छया स दिवं गतः ।
संपूर्णा ब्रह्महत्या ते न जाता वृत्रसूदन ॥६॥

अश्वमेधं महायज्ञं महापातकनाशनम् ।
कुरुष्व देवराज त्वं तत्पापशमनाय हि ॥७॥
बृहस्पतिरपि श्रुत्वा तथेत्याह महामतिः ।
ऊचुर्देवा अपि तथा ततः शान्तमना हरिः ॥८॥
विवेशान्तःपुरं देवाः स्वं स्वं स्थानं ततो ययुः ॥९॥
ततः सुरपतिर्यज्ञमश्वमेधं यथाविधि ।
चकार मुनिशार्दूल बहुसद्व्ययपूर्वकम् ॥१०॥
तत आगत्य देवर्षिरेकदा नारदो मुनिः ।
प्राह तं सुरवृन्दानामधिपं सुरसंसदि ॥११॥
तवापि कृतयज्ञस्य ब्रह्महत्याप्रवर्तिने ।
ततस्तत्क्षालनार्थं त्वं यतस्व सुरभूपते ॥१२॥

इन्द्र उवाच—

अश्वमेधो महायज्ञः कृतस्तत्पापशान्तये ।
तथापि वर्तते तत्किं करिष्यामि वदस्व तत् ॥१३॥

नारद उवाच—

गुरुं गौतममिन्द्र त्वं पृच्छ गत्वा महामते ।
कथयिष्यत्युपायं ते स हि सर्वार्थवित्मुनिः ॥१४॥
गुरोर्वाक्यं परं शास्त्रं गुरोर्वाक्यं परं तपः ।
गुरुस्तुष्टो वदान्यश्च तद्ब्रूवत्येव नान्यथा ॥१५॥
प्रायश्चित्तं गुरोर्वाक्यं सर्ववेदेषु सम्मतम् ।
तदाज्ञया कर्म कृत्वा पापान्निष्कृतिमाप्स्यसि ॥१६॥

श्रीमहादेव उवाच—

इत्युक्तः स मुनिः प्रायात्पुनः स्वस्थानमुत्तमम् ।
इन्द्रश्चापि ययौ शीघ्रं गौतमस्यालयं तथा ॥१७॥
ददर्श तं महात्मानं मध्याह्नार्कसमप्रभम् ।
लसत्पिङ्गजटामौलिं ब्रह्मध्यानपरायणम् ॥१८॥
दृष्ट्वैवं स्वगुरुं साक्षान्महेशमिव वृत्रहा ।
कृत्वा प्रदक्षिणं भूमौ प्रणनामापतन्मुनिम् ॥१९॥
समाधिविरमे ज्ञात्वा देवराजं समागतम् ।
पप्रच्छ गौतमस्तात कुशलं ब्रूहि साम्प्रतम् ॥२०॥

इन्द्र उवाच—

प्रभो त्वद्दर्शनादेव सर्वं मे कुशलं मुने ।
भवान्यस्य गुरुस्तस्य विद्यते नाशुभं क्वचित् ॥२१॥
किं त्वेकं कृतवान्पापं न तं पश्यति सर्वथा ।
तेन त्वां समनुप्राप्तो गुरुं निस्तारहेतुकम् ॥२२॥
वृत्रासुरवधार्थाय दधीचेरस्थिसङ्ग्रहात् ।
सञ्जाता ब्रह्महत्या मे दुर्निवर्त्या महामते ॥२३॥
तस्यास्तु शमनार्थाय वाजिमेधं महामखम् ।
कृतवाँश्च तदाप्येषा कदाचिन्न निवर्तते ॥२४॥
तदहं दीनचित्तोऽस्मि गुरो निस्तारकारकम् ।
उपायं वद मे नाथ ब्रह्महत्यानिवर्तकम् ॥२५॥
त्वं यस्य त्राणकर्तासि गुरुः परमधर्मवित् ।
तस्य पापं स्थिरतरं जातं मे बहुदुःखदम् ॥२६॥

गौतम उवाच—

वत्स खेदं त्यज न ते पापं स्थास्यति वै चिरम् ।
ब्रवीम्युपायं श्रुत्वा तत् पूर्वपापप्रशान्तये ॥२७॥
यः कश्चिद् ब्राह्मणो नैव दधीचिर्मुनिसत्तमः ।
द्वितीय इव विश्वेशो जीवन्मुक्तो महामतिः ॥२८॥
तस्य हत्यावशाज्जातं पापं घोरतरं तव ।
किं नश्यत्यश्वमेधेन यज्ञेन सुरनन्दन ॥२९॥
एनां तु ब्रह्महत्यां त्वं यदि त्यक्तुं समिच्छसि ।
पश्य गत्वा महाकालीं महापातकनाशिनीम् ॥३०॥

इन्द्र उवाच—

कीदृशी सा महाकाली कुत्रास्ते पापनाशिनी ।
तन्मे वद ततो गत्वा तां पश्यामि महेश्वरीम् ॥३१॥

गौतम उवाच—

वेदागमेषु सर्वेषु यथादृष्टं तथोदितम् ।
न मया ज्ञायते कुत्र महाकाली परात्परा ॥३२॥
सर्वाभिः श्रुतिभिः प्रोक्तं दृष्ट्वा कालीं महेश्वरीम् ।
विनाशयति पापानि ब्रह्महत्यादिकान्यपि ॥३३॥

इन्द्र उवाच—

न निस्तारं प्रपश्यामि पापादस्मात्कथञ्चन ।
यतः सा कुत्र इत्येव नैव ज्ञास्ये कदाचन ॥३४॥

गौतम उवाच—

महोग्रतपसा कालीं योगिनस्तत्त्वदर्शिनः ।
पश्यन्ति बहुकालेन युगान्तोदीक्षितेन च ॥३५॥
तथाचरति यस्तस्याः समायाति पुरःसरम् ।
महाकाली जगद्धात्री योगगम्या सनातनी ॥३६॥
सुराणामधिपस्त्वं तु सर्वदा राष्ट्रपालकः ।
त्यक्त्वा राज्यं कथं योग्यस्तपः कर्तुं भविष्यसि ॥३७॥
तस्मादन्यं ह्युपायं ते महाकालीप्रदर्शने ।
न पश्यामि विना तस्या आलये गमनादृते ॥३८॥
तस्मात्त्वमनुसन्धाय पुरीं तस्याः पुरन्दर ।
तत्र गत्वा महाकालीं पश्य ब्रह्मादिदुर्लभाम् ॥३९॥
उपायमनुसन्धाने वक्ष्यामि सुरनायक ।
गत्वादौ ब्रूहि लोकानां पितामहमनामयम् ॥४०॥
सोऽपि चेच्चैव जानाति स्वयं भूत्वा तु यत्नवान् ।
अनुसन्धास्यते नूनं महाकाल्याः पुरं ततः ॥४१॥
स चेद्यद्यनुसन्धाता तदावश्यं महामते ।
भविष्यत्यनुसन्धानं सत्यमेतद् ब्रवीमि ते ॥४२॥

इन्द्र उवाच—

न तवाज्ञा वृथा देव भविष्यति कदाचन ।
यास्येऽहं ब्रह्मसान्निध्यं तत्रोपायं भविष्यति ॥४३॥

श्रीमहादेव उवाच—

इत्युक्त्वा देवराजस्तं त्रिधा कृत्वा प्रदक्षिणम् ।
प्रणम्य दण्डवद्भूमौ ब्रह्मलोकं तदा ययौ ॥४४॥
पुष्पकं रथमारुह्य मन्त्रिभिः सह नारद ।
उवाच स यथावृत्तं गौतमेनाभिभाषितम् ॥४५॥
तच्छ्रुत्वा भगवान्ब्रह्मा देवराजमुवाच ह ।
न ज्ञायते मया तस्याः पुरं कुत्र सुराधिप ॥४६॥

कृपया देवकार्यार्थं स्वयमाविर्बभौ यदा ।
तदा दृष्टा महाकाली ब्रह्मरूपा सनातनी ॥४७॥
पुनः सान्तर्हिता भूत्वा सर्वदेवस्य पश्यतः ।
इत्येवमेव जानामि न पुरं ज्ञायते मया ॥४८॥

इन्द्र उवाच—

ब्रह्मंस्त्वं चेन्न जानासि पुरं तस्यास्तदा कथम् ।
ज्ञातव्यं वा मया पारं प्राप्स्यते पापसञ्चयात् ॥४९॥

ब्रह्मोवाच—

त्वयि राजनि देवानां यदि स्थास्यति पातकम् ।
तदा बहुविधोत्पातं भविष्यति सुरालये ॥५०॥
तस्माच्च पापशान्त्यर्थं यत्नवानस्मि वै ध्रुवम् ।
सर्वथैवानुसन्धास्ये पुरं तस्याः सुगोपितम् ॥५१॥
यदि तामनुपश्यामि तव कार्यानुरोधतः ।
भविष्यामि तदा मुक्तः किमु कार्यमतः परम् ॥५२॥

श्रीमहादेव उवाच—

एवमाश्वास्य देवानामधिपं स पितामहः ।
वैकुण्ठं प्रययौ दिव्यं रथमारुह्य नारद ॥५३॥
इन्द्रोऽपि रथमारुह्य पुष्पकं तस्य पृष्ठतः ।
प्रययौ विष्णुना गुप्तं पुरं वैकुण्ठमुत्तमम् ॥५४॥
ततो ब्रह्मा समाश्वास्य देवराजमुवाच ह ।
शृणु वत्स वचो मे त्वं बहिस्तिष्ठ सुरेश्वर ॥५५॥
अहमन्तःपुरं यामि ततस्त्वमनुयास्यसि ।
आज्ञप्तो देवदेवेन ब्रह्मणा विष्णुरूपिणा ॥५६॥
तच्छ्रुत्वा ब्रह्मवचनं देवराजस्तथाकरोत् ।
ब्रह्मा ययौ जगन्नाथो यत्रास्ते भगवान्हरिः ॥५७॥
लक्ष्मीसरस्वतीयुक्तो हृदि कौस्तुभमण्डितः ।
नवीनजलदश्यामः शङ्खचक्रगदाधरः ॥५८॥
तं दृष्ट्वा भगवान्विष्णुः पप्रच्छ स्वागतं विभुः ।
ब्रह्मा प्राह जगन्नाथं स्वागतं त्वत्प्रसादतः ॥५९॥
देवदेवः पुरद्वारि दर्शनार्थं समागतः ।
प्रतीक्षते तवानुज्ञामत्रायातुं जनार्दन ॥६०॥

तच्छ्रुत्वा गरुडं प्राह भगवान्विष्णुरव्ययः ।
प्रवेशय सुराणां तमधिपं पुरमध्यके ॥६१॥
तच्छ्रुत्वा गरुडस्तूर्णं गत्वा तद् द्वारमुत्तमम् ।
प्रवेशयामास मुने तदन्तःपुरमुत्तमम् ॥६२॥
इन्द्रस्तु दण्डवद्भूमौ प्रणिपत्य जगत्पतिम् ।
कृताञ्जलिपुटः प्राह धन्योऽहं तव दर्शनात् ॥६३॥
त्वत्पादपङ्कजजनिः सुरवृन्दवन्द्या गङ्गा पुनाति सकलानि जगन्ति धन्या ।
तत्त्वां दृशा यदिह सर्वसुरैकवन्द्यं पश्यामि भाग्यमतुलं मम पूर्वजातम् ॥६४॥
इत्येवं परमेश्वरं सुरपतिर्विष्णुं स्तुवन्भक्तितो
ब्रह्माज्ञां प्रतिलभ्य गौतममुनेर्वाक्यं समावेदयत् ।
श्रुत्वा श्रीकमलापतिः सुरपतेर्वाक्यं ततो विस्मितः,
प्रासीन्मौनमुखः पितामहपुरस्त्रैलोक्यसम्पालकः ॥६५॥

श्रीमहाभागवते महापुराणे ब्रह्ममयीस्थानानुसन्धानार्थं देवराजस्य
चतुर्मुखविष्णुलोकगमनं नामैकषष्टितमोऽध्यायः ॥६१॥

द्विषष्टितमोऽध्यायः

श्रीमहादेव उवाच—

एवं भूत्वा कियत्कालं मौनी कमललोचनः ।
उवाच देवराजं तं मृदुवाक्येन नारद ॥१॥

श्रीभगवानुवाच —

न मया ज्ञायते देवी कुत्रास्ते सा महेश्वरी ।
महाकाली ब्रह्मरूपा विश्वरूपा सनातनी ॥२॥
यत्र तिष्ठति सा देवी जानीते तन्महेश्वरः ।
तत्र गच्छ महेशानं यथावृत्तं निवेदय ॥३॥
अहमप्यागमिष्येऽद्य द्रष्टुं देव्याः पुरं महत् ।
द्रक्ष्यामि चक्षुषा देवीं किमु कार्यमतः परम् ॥४॥

श्रीमहादेव उवाच—

इत्युक्त्वा तं जगन्नाथो गरुडं सहसोत्थितः ।
प्रययौ शिवसान्निध्यं ब्रह्मणा सहितः प्रभुः ॥५॥

इन्द्रश्च रथमारुह्य तयोः पश्चाद्ययौ मुने ॥६॥
दृष्ट्वा तांस्तु समायातान्नन्दी बुद्धिमतां वरः ।
महेशसन्निधिं गत्वा कथयामास तत्क्षणात् ॥७॥
देवदेव जगन्नाथ विष्णुर्नारायणः स्वयम् ।
आगतो ब्रह्मणा सार्धं देवराजेन च प्रभो ॥८॥
तमाह शम्भुः शीघ्रं तान्प्रवेशय महामते ।
तच्छ्रुत्वा सोऽपि गत्वा तान्पुरं प्रावेशयन्मुने ॥९॥
ते शम्भोः सन्निधिं गत्वा प्रणिपत्यातिभक्तितः ।
पार्वतीसहितं तं च प्रणेमुर्मुनिपुङ्गव ॥१०॥
ततस्तानाह विश्वेशः कथमत्र समागताः ।
द्रुतं वदत युष्माकं किं कार्यं समुपस्थितम् ॥११॥

श्रीविष्णुरुवाच—

इन्द्रोऽयं ब्रह्महत्यायाः प्रायश्चित्तं महामतिः ।
पप्रच्छ मुनिशार्दूलं गौतमं शास्त्रवित्तमम् ॥१२॥
स च प्राह महाकालीं पश्य तस्याः पुरं व्रजन् ।
पुरं तु कुत्र तन्नैव जानामि सुरनायक ॥१३॥
तच्छ्रुत्वा वचनं तस्य ब्रह्मणोऽन्तिकमागतः ।
पप्रच्छ तं पुरं देव्याः कुत्र तन्मे वद प्रभो ॥१४॥
स प्राह नैव जानामि कुत्र देव्याः पुरं महत् ।
ततो ब्रह्मा समायातः सुरेन्द्रेण ममान्तिकम् ॥१५॥
पप्रच्छ मां तथेन्द्रोऽपि ब्रह्मणा प्रेरितः प्रभो ।
तच्छ्रुत्वा विस्मयाविष्टः सह ताभ्यामिहागतः ॥१६॥
त्वमवश्यं हि जानासि महाकाल्याः पुरं विभो ।
स त्वमस्मान्महादेव्याः पुरं नीत्वा प्रदर्शय ॥१७॥
अयमिन्द्रो महाबाहुस्त्रिलोकेशो महेश्वरः ।
महापातकयुक्तश्चेत्कथं तिष्ठेज्जगत्त्रयम् ॥१८॥

श्रीशिव उवाच—

योगेन लक्षवर्षस्य तत्स्थानं ज्ञातवानहम् ।
यूयमागच्छत तथा यास्येऽहं मधुसूदन ॥१९॥
दर्शयिष्यामि तां देवीं नीत्वा तस्याः पुरं द्रुतम् ।

श्रीमहादेव उवाच—

इत्युक्त्वा नन्दिनं प्राह वृषं सज्जीकुरु द्रुतम् ॥२०॥
यास्यामोऽद्य महाकाल्याः पुरं रत्नपरिष्कृतम् ।
तच्छ्रुत्वा सोऽपि सहसा तथा चक्रे महामुने ॥२१॥
ततः समारुह्य वृषं महेश्वरो विष्णुश्च तार्क्ष्यं जितवायुवेगकम् ।
ब्रह्मा विमानं मणिभिः परिष्कृतं प्रायान्महेन्द्रोऽपि च पुष्पकं तथा ॥२२॥
पथि व्रजन्तो गगने सुरोत्तमा ऊचुः समागम्य परस्परं मुने ।
परात्परा सैव महामहेश्वरी श्रीकालिकाया नहि विद्यते परा ॥२३॥
सृजत्यलं सैव जगन्महेश्वरी सम्पाति सर्वासु विपत्सु सा तथा ।
अन्ते तथा संहरते च विश्वं निमित्तमात्रं तु वयं त्रयस्त्विति ॥२४॥
एवं वदन्तो बहुधा सुरोत्तमा व्यतीत्य पन्थानमुपागमन्मुने ।
श्रीकालिकाया नगरं महामुने स्वर्णादिभिश्चित्रितमद्भुतोत्तमम् ॥२५॥
विलोक्य सर्वत्र पुरन्दरस्तथा ब्रह्मा च विष्णुश्च बभूव विस्मितः ।
अन्योन्यमूचुः समुपेत्य मत्पुरं धिगस्तु मन्ये च विनिर्मितं मुधा ॥२६॥

एवं विलोक्य नगरं जगदम्बिकाया
ब्रह्मेन्द्रविष्णुगिरिशाः परितो भ्रमन्तः ।
तस्थुश्चिरं सकलविस्मितवाञ्छितार्थाः
कोऽपि स्मरेन्नहि किमर्थमिहागताः स्मः ॥२७॥

श्रीमहाभागवते उपपुराणे ब्रह्मादीनां देवराजेन सह भगवतीस्थानगमने द्विषष्टितमोऽध्यायः ॥६२॥

त्रिषष्टितमोऽध्यायः

श्रीमहादेव उवाच—

कदाचित्तत्र योगिन्यः पुष्पाहार्यः समागताः ।
ता ऊचुस्तान्महात्मानः किमर्थं समुपागताः ॥१॥
तच्छ्रुत्वा वचनं तासां स्मृत्वागमनकारणम् ।
प्रोचुर्देवीं महाकालीं स्वयं द्रष्टुं समागताः ॥२॥

योगिन्य ऊचुः—

यदि देवीं महाकालीं द्रष्टुमेव समागताः ।
तदात्र सुचिरं स्थित्वा किं निरीक्षथ सादराः ॥३॥

अहो देव्या महामाया ययेदं मोह्यते जगत् ।
तयैव मोहिता यूयं विस्मृताः प्रकृतं ध्रुवम् ॥४॥

श्रीमहादेव उवाच—

इत्युक्त्वा ता ययुस्तेऽपि सर्वे ऊचुः परस्परम् ।
चिरमागत्य च वयं किं कुर्मो ह्यत्र संस्थिताः ॥५॥

विष्णुः प्राह महादेवं किमेवं मोह्यते त्वया ।
बहुकालं समायाता द्रष्टुं कालीं महेश्वर ॥६॥

अद्यापि दृष्टा नो देवी महाकाली महेश्वरी ॥७॥

श्रीशिव उवाच—

अद्यैव गत्वा पश्यामो देवीं भुवनमातरम् ।
प्रविशामो पुरीं देव्याः शुद्धां रत्नविनिर्मिताम् ॥८॥

इत्युक्तास्ते सुरश्रेष्ठाः ध्यायन्तो हृदि कालिकाम् ;
गन्तुमन्तःपुरं देव्याः प्रययुर्मुनिपुङ्गव ॥९॥

ततः स गोपुरं गत्वा महादेवः सुरोत्तमान् ।
उवाच ब्रह्मविष्ण्वादीन्हर्षोत्फुल्लविलोचनः ॥१०॥

दोधूयमानः पवनेन चोक्षितो विद्युत्प्रभो हेमविचित्रितांशुकः ।
सिंहध्वजोऽयं जगदम्बिकापुरःप्रासादशीर्षे परिदृश्यते महान् ॥११॥

सर्वैः परित्यज्य विमानयानकं स्थित्वा क्षितौ साम्प्रतमेव भक्तितः ।
प्रणम्यतां सा जगदेकवन्दिता पुरप्रवेशाखिलविघ्नशान्तये ॥१२॥

एवं समाकर्ण्य शिवेन भाषितं क्षितौ तदा ते ह्यवतीर्य भक्तितः ।
दृष्ट्वा ध्वजं नेमुरुपद्रवान्पुरःप्रवेशविघ्नान्ददृशुः समन्ततः ॥१३॥

ततः शम्भुं पुरस्कृत्य ब्रह्मविष्णुपुरन्दराः ।
विविशुर्नगरीं देव्या रक्षितां भैरवीगणैः ॥१४॥

दृष्ट्वा तु नगरीं दिव्यां वैकुण्ठेशोऽपि चेतसा ।
निनिन्द च पुरं दिव्यमात्मनो विस्मयान्वितः ॥१५॥

ततोऽन्तःपुरबाह्ये तु ददृशुर्गणनायकम् ।
चतुर्भुजं महाबाहुं स्थूलकायं गजाननम् ॥१६॥

तमाह भगवान् रुद्रः प्रीत्या परमया युतः ।
वत्स गत्वा महाकालीं ब्रुतं मे वचनं वद ॥१७॥

ब्रह्मा विष्णुः सुरेन्द्रश्च त्वां द्रष्टुं भक्तिभावतः ।
आयाताः शम्भुमासाद्य पुरद्वारि महेश्वरि ॥१८॥

तैः सार्धं पुरबाह्ये च रुद्रश्चाप्यवतिष्ठते ।
आज्ञां विधेहि तैः सार्धमायातु वृषभध्वजम् ॥१६॥

इति श्रुत्वा वचः शम्भोस्त्वरितं गणनायकः ।
जगामान्तःपुरं देव्याः कथितुं शिवभाषितम् ॥२०॥

स प्रणम्य महादेवीं प्राञ्जलिः शिवभाषितम् ।
न्यवेदयन्यथावच्च महादेव्यै महामते ॥२१॥

तदाकर्ण्य जगन्माता तूर्णं तं गणनायकम् ।
उवाच वत्स गच्छ त्वं क्षिप्रं तान् देववृन्दकान् ॥२२॥

ब्रह्माण्डा बहवः सन्ति ब्रह्माद्या अपि तत्रगाः ।
कस्माद्ब्रह्माण्डादायाताः श्रुत्वा सर्वं निवेदय ॥२३॥

श्रुत्वा स वाक्यं गत्वा चापृच्छद्वै देवतागणान् ।
ते ऊचुर्विस्मयाविष्टा न जानेऽन्यान् सुरेश्वरान् ॥२४॥

पुनर्गत्वाऽब्रवीत्सोऽपि तैरुक्तं जगदम्बिकाम् ।
उवाचानय विश्वेश विष्णुं चाथ प्रजापतिम् ॥२५॥

ततः स समुपागत्य शिवविष्णुप्रजापतीन् ।
अन्तःपुरं महादेव्याः प्रापयामास नारद ॥२६॥

इन्द्रः स्थितो पुरे बाह्ये दुःखितो दीनमानसः ।
अदृष्ट्वा तां परामाद्यां साक्षात्प्रकृतिरूपिणीम् ॥२७॥

महेशप्रमुखास्ते तु मन्दिरद्वारमुत्तमम् ।
सम्प्राप्य ददृशुर्देवीं रत्नसिंहासनोपरि ॥२८॥

प्रावासनां मुक्तकेशीं भीमनेत्रत्रयोज्ज्वलाम् ।
चतुर्भुजां महाघोरां कोटिसूर्यसमप्रभाम् ॥२९॥

रत्नोत्तमसमूहेन ज्वलत्कुण्डलमण्डिताम् ।
अनर्घ्यानेकरत्नौघभूषितां जलदद्युतिम् ॥३०॥

दिगम्बरीं भीमदंष्ट्रां विश्ववन्द्यैरपि स्तुताम् ॥३१॥

सर्वान्तःस्थामुत्तमस्थां मुण्डमालाविराजिताम् ।
वीजितां रत्नदण्डेन चामरेण सखीगणैः ॥३२॥

दुरीक्षां ते तदातीव कालानलसमप्रभाम् ।
दक्षपार्श्वे महादेव्या महाकालं सदाशिवम् ॥३३॥

ददृशुर्भीमनेत्रास्यं जटामुकुटमण्डितम् ।
कपालखट्वाङ्गकरं मदघूर्णितलोचनम् ॥३४॥

शशाङ्काङ्कितमूर्धानं भिन्नाञ्जननिभं प्रभुम् ।
अनादिपुरुषं पूर्णं जगदन्तकरं परम् ॥३५॥

कोटिसूर्यप्रतीकाशं नागेन्द्रकृतभूषणम् ।
द्वीपिचर्माम्बरधरं चितास्मविभूषितम् ॥३६॥

अथ ते दण्डवद्भूमौ निपत्य जगदीश्वरीम् ।
प्रणेमुः परमेशानं महाकालं च नारद ॥३७॥

संस्तुय विविधैः स्तोत्रैर्वेदवेदाङ्गसम्भवैः ।
एतस्मिन्नन्तरे शम्भुर्महाकालेन तेन वै ॥३८॥

एकत्वमनुसम्प्राप सहसा मुनिसत्तम ।
ततो ब्रह्मा च विष्णुश्च न दृष्ट्वा तं सदाशिवम् ॥३९॥

चिन्तयामासतुस्तौ तु क्व गतोऽसौ महेश्वरः ॥
इन्द्रस्य दर्शनं देव्या भविष्यति न वा किमु ॥४०॥

इति चिन्तयतोर्वत्स तयोः सा जगदीश्वरी ।
महाकालेन सहिता त्वदृश्या समभूत्क्षणात् ॥४१॥

तत्रैव संस्थिता काली महाकालश्च शङ्करः ।
न तौ तन्मायया मुग्धौ ददृशाते महामुने ॥४२॥

ततो ब्रह्मा च विष्णुश्च देव्याऽदर्शनकातरौ ।
कृताञ्जलिपुटौ कालीं भक्त्या तुष्टुवतुर्मुने ॥४३॥

ब्रह्मविष्णू ऊचतुः—

नमामि त्वां विश्वकर्त्रीं परेशीं नित्यामाद्यां सत्यविज्ञानरूपाम् ।
वाचातीतां निर्गुणां चातिसूक्ष्मां ज्ञानातीतां शुद्धविज्ञानगम्याम् ॥४४॥

पूर्णां शुद्धां विश्वरूपां सुरूपां देवीं वन्द्यां विश्ववन्द्यामपि त्वाम् ।
सर्वान्तस्थामुत्तमस्थानसंस्थाम् ईडे कालीं विश्वसम्पालयित्रीम् ॥४५॥

मायातीतां मायिनीं वापि मायां भीमां श्यामां भीमनेत्रां सुरेशीम् ।
विद्यां सिद्धां सर्वभूताशयस्थामीडे, कालीं विश्वसंहारकर्त्रीम् ॥४६॥

नो ते रूपं वेत्ति शीलं न धाम नो वा ध्यानं नापि मन्त्रं महेशि ।
सत्तारूपे त्वां प्रपद्ये शरण्ये विश्वाराध्ये सर्वलोकैकहेतुम् ॥४७॥

द्यौस्ते शीर्षं नाभिदेशो नभश्च चक्षूंषि ते चन्द्रसूर्यानलास्ते ।
उन्मेषास्ते सुप्रबोधो दिवा च रात्रिर्मतिश्चक्षुषोस्ते निमेषम् ॥४८॥

वाक्यं देवा भूमिरेषा नितम्बं पादौ गुल्फं जानुजङ्घस्त्वधस्ते ।
प्रीतिर्धर्मोऽधर्मकार्यं हि कोपः सृष्टिर्बोधः संहृतिस्ते तु निद्रा ॥४९॥

अग्निर्जिह्वा ब्राह्मणास्ते मुखाब्जं सन्ध्ये द्वे ते भ्रूयुगं विश्वमूर्तिः ।
श्वासो वायुर्बाहवो लोकपालाः क्रीडा सृष्टिः संस्थितिः संहृतिस्ते ॥५०॥

एवम्भूतां देवि विश्वात्मिकां त्वां कालीं वन्दे ब्रह्मविद्यास्वरूपाम् ।
मातः पूर्णे ब्रह्मविज्ञानगम्ये दुर्गेऽपारे साररूपे प्रसीद ॥५१॥

श्रीमहादेव उवाच—

एवं ताभ्यां स्तुता काली प्रसन्ना मुनिसत्तम ।
महाकालेन सहिता भूयः सन्दर्शनं ददौ ॥५२॥

भूयश्च शङ्करस्तस्मान्महाकालशरीरतः ।
निःससार महाबाहू रजताद्रिसमप्रभः ॥५३॥

स प्राह परमेशानीमिन्द्रोऽपि समुपागतः ।
त्वां द्रष्टुं भक्तिभावेन पुरबाह्ये स्थितस्तु सः ॥५४॥

आज्ञापय तमानीय त्वत्समीपं महेश्वरि ।
दर्शयामि परामेतां मूर्तिं ते दिव्यलक्षणाम् ॥५५॥

इति शम्भोः समाकर्ण्य वचनं जगदम्बिका ।
उवाच तं महादेवं महाकाली महामते ॥५६॥

देव्युवाच—

यद्यानेतुं महादेव देवराजं ममालये ।
समिच्छसि तदेतत्त्वं कुरु कार्यं सुरोत्तम ॥५७॥

तस्य भूतं महत्पापं दधीचेरस्थिसङ्ग्रहात् ।
तन्नष्टं प्रायशो देव मत्पुरादबहिरागमात् ॥५८॥

अपरं विद्यते किञ्चित्तस्योपशमनाय तु ।
अन्तर्गेहरजः किञ्चिद्देहि तस्मै महामते ॥५९॥

ततो निर्धूतपापः स समायातु ममान्तिके ।
सम्प्राप्स्यति च मे दृष्टिं दुर्लभामपि वासवः ॥६०॥

श्रीमहादेव उवाच—

इति काल्या समादिष्टः सोऽपि गत्वा महेश्वरः ।
अन्तर्गेहरजस्तस्मै दत्त्वा पुरमवेशयत् ॥६१॥

ततः इन्द्रः प्रविश्यान्तर्गेहं देव्या महामुने ।
प्रणम्य पादे पादे तां निपत्य धरणीतले ॥६२॥

सम्प्राप मन्दिरद्वारं शिवेन सह नारद ।
दृष्ट्वा त्रैलोक्यजननीं दुर्लभां त्रिदशेश्वरैः ॥६३॥

सहस्राक्षोऽपतद्भूमौ प्रणमद्दण्डवत्तदा ।
उत्थाय वेदवेदाङ्गकथितैः स्तोत्रकैरपि ॥६४॥

तुष्टाव तां जगद्वन्द्यां महाकालीं सुरोत्तमः ।
ततः पुनर्मुनिश्रेष्ठ प्रणिपत्य महेश्वरीम् ॥६५॥

स्वं स्वं स्थानमुपाजग्मुर्ब्रह्माद्यास्त्रिदशेश्वराः ।
इत्युक्तं ते मुनिश्रेष्ठ यत्पृष्टं भवता मम ॥६६॥

पुण्यं सुमहदाख्यानं महाकालीप्रदर्शनम् ।
य इदं शृणुयाद्भक्त्या पठेद्वा प्रयतो नरः ॥६७॥

तस्य नो विद्यते पापमपि ब्रह्मवधादिजम् ।
भवत्यपि महापुण्यं अश्वमेधशतोद्भवम् ॥६८॥

आरोग्यं विपुलं वित्तं पुत्रपौत्रादिसम्पदः ।
अष्टम्यां वा चतुर्दश्यां नवम्यां वा दिनक्षये ॥६९॥

यः पठेत्प्रयतो भूत्वा स देव्याः पदमाप्नुयात् ।
अमावस्यानिशीथे वा पौर्णमास्यां पठेच्च यः ॥७०॥

गवामयुतदानस्य सम्यक् फलमवाप्नुयात् ।
विनश्यन्त्यापदः सद्यः सम्पदाशु प्रवर्तते ॥७१॥

न भयं विद्यते नापि शत्रुतस्तस्य नारद ।
संग्रामे विजयो नित्यं भवेद्देव्याः प्रसादतः ॥७२॥

पितृश्राद्धदिने यस्तु पठेदेतत्समाहितः ।
सन्तुष्टाः पितरस्तस्य भुञ्जते कव्यमुत्तमम् ॥७३॥

अन्यायोपात्तवित्तादिकृतं वापि महामुने ।
पितॄणां परमप्रीतिदायकं तद्भवेदिति ॥७४॥

श्रीमहाभागवते उपपुराणे श्रीभगवतीद्वारगमनाद्देवराजब्रह्महत्याहरणो-
पाख्याने त्रिषष्टितमोऽध्यायः ॥६३॥

चतुःषष्टितमोऽध्यायः

श्रीनारद उवाच—

कथितं महदाख्यानं कृपया परमेश्वर ।
धन्यं पुण्यतमं दिव्यं महापातकनाशनम् ॥१॥

यत्पृष्टं भगवत्यास्ते तत्त्वमव्यक्तमद्भुतम् ।
जन्मकर्मादिकं चापि नित्याया अपि लीलया ॥२॥

तत्रांशेनावतीर्णायाः प्रकृत्या हिमवद्गृहे ।
गङ्गायाः श्रोतुमिच्छामि भूयश्चरितमुत्तमम् ॥३॥

यथा द्रवमयी भूता मूर्तिरेकाघहारिणी ।
यथा पुनाति स देवी त्रैलोक्यं सचराचरम् ॥४॥

यथा चावातरत्पृथ्व्यां लोकानां त्राणहेतवे ।
एतदन्यच्च माहात्म्यं विस्तरेण वद प्रभो ॥५॥

श्रीमहादेव उवाच—

शृणु वत्स प्रवक्ष्यामि पुण्यात्पुण्यतमं परम् ।
यच्छ्रुत्वा मुच्यते पापी जन्मसंसारबन्धनात् ॥६॥

पूर्वं विष्णुः समाकर्ण्य गङ्गोद्वाहमहोत्सवम् ।
दिदृक्षुः शङ्करं हृष्टं गङ्गया सहितं प्रभुम् ।
वैकुण्ठमानयामास स्वपुरीं प्रीतमानसः ॥७॥

ब्रह्माद्याश्चापि वै देवास्तत्र याता महामुने ।
द्रष्टुं तं परमेशानं विष्णुं च जगतः प्रभुम् ॥८॥

तत्र श्रुत्वा चापरेऽपि मरीच्याद्या महर्षयः ।
विविशुश्चारु निर्माय सभां दिव्यासनोपरि ॥९॥

रत्नसिंहासने रम्ये उपवेश्य महेश्वरम् ।
हृष्टः प्राह जगन्नाथः कुरु गानं महेश्वर ॥१०॥

सतीवियोगदुःखार्तश्चिरं विह्वलमानसः ।
स्थितोऽसि सा सतीयं त्वां पुनराप निजांशतः ॥११॥

दृष्ट्वा त्वां सुप्रसन्नास्यं सगङ्गं हृष्टमानसम् ।
सर्व एव प्रहृष्टाः स्मो वयं त्रिदशवन्दित ॥१२॥

तद्गानमतिसम्प्रीतिजनकं त्वन्मुखाच्च्युतम् ।
श्रोतुमिच्छामि विश्वेश कुरु गानं महेश्वर ॥१३॥

इति तस्य वचः श्रुत्वा विष्णोरमिततेजसः ।
शम्भुः सुललितं गानं चक्रेऽत्यद्भुतमुत्तमम् ॥१४॥

प्रथमं गानमाकर्ण्य ब्रह्माद्यास्त्रिदशेश्वराः ।
मुमुहुः सर्व एवातिमनोज्ञं मुनिसत्तम ॥१५॥

द्वितीयं समुपाकर्ण्य वैकुण्ठेशोऽथ नारद ।
विसंज्ञः पतितो भूमौ रोमाञ्चितकलेवरः ॥१६॥

तृतीयं गानमाकर्ण्य स एव परमेश्वरः ।
बभूव द्रवरूपी तु क्षणेन मुनिसत्तम ॥१७॥

विष्णौ जलमयीभूते वैकुण्ठं प्लावितं परम् ॥
बभूव व्याप्तं तोयेन सर्वतो मुनिसत्तम ॥१८॥

ततः प्राप्य प्रबोधं तु ब्रह्माद्यास्त्रिदशोत्तमाः ।
ददृशुः सकलं व्याप्तं तोयेन हरिमन्दिरम् ॥१९॥

अन्यच्च जलसम्पूर्णं स्थानं तस्मिन्पुराजिरे ।
दृष्ट्वा दृष्ट्वा हृषीकेशं विस्मयं परमं ययुः ॥२०॥

ब्रह्मा तदुपधार्याथ शिवगानसमुद्भवम् ।
हरेर्द्रवत्वं तत्तोयं कमण्डलुमुपानयत् ॥२१॥

तत्तोयप्राप्तिमात्रेण कमण्डलुगता तु या ।
गङ्गाया मूर्तिरेकासीद्द्रवरूपापरा च सा ॥२२॥

ब्रह्मा कमण्डलौ कृत्वा गङ्गां नीरमयीं मुने ।
प्रययौ स्वपुरं लक्ष्मीमाश्वास्य च सरस्वतीम् ॥२३॥

शिवस्तु गङ्गया सार्धं कैलासं समुपागमत् ।
गताश्चान्ये दिवं सर्वे त्रिदशा अपि नारद ॥२४॥

एवं द्रवमयी भूत्वा गङ्गा ब्रह्मकमण्डलौ ।
संस्थिता मुनिशार्दूल देवी त्रैलोक्यपावनी ॥२५॥

इदानीं शृणु सा देवी प्राप्य विष्णुपदं शुभा ।
विष्णुपादोद्भवेत्याख्यामनुप्राप सुरेश्वरी ॥२६॥

ततः सा प्रार्थिता पृथ्व्यां यया चावातरत्स्वयम् ।
परित्राणाय लोकानां चतुर्दिक्षु चतुर्मुखी ॥२७॥

श्रीमहाभागवते उपपुराणे शिवनारदसंवादे गङ्गाया द्रवरूपवर्णने
चतुःषष्टितमोऽध्यायः ॥६४॥

पञ्चषष्टितमोऽध्यायः

श्रीमहादेव उवाच—

विरोचनसुतो राजा बलिर्दैत्यगणाधिपः ।
जहार देवराजस्य त्रैलोक्यं धर्मतत्परः ॥१॥
ततोऽदितिर्देवमाता पुत्रराज्यापहारणे ।
दुःखिता प्रार्थयामास विष्णुं त्रिजगतां प्रभुम् ॥२॥
ततः प्रसन्नो भगवान्प्रत्यक्षं समुपागतः ।
उवाच देवमातस्त्वं वृणु यत्ते समीहितम् ।
दास्यामि परमप्रीत्या तपसोग्रेण तोषितः ॥३॥

अदितिरुवाच—

यदि प्रसन्नो भगवन्वरं मे त्वं प्रयच्छसि ।
तदा बलिहृतं राज्यमिन्द्राय त्वं समर्पय ॥४॥

श्रीभगवानुवाच—

वैरोचनो न वध्यो मे प्रह्लादान्वयसम्भवः ।
मदुक्तो धर्मनिष्ठश्च यशस्वी लोकविश्रुतः ॥५॥
तस्माद्वामनरूपेण सम्भूय त्वयि कश्यपात् ।
याच्ञया समुपाहृत्य छलाल्लोकत्रयं पुनः ।
वासवाय प्रदास्यामि त्वत्पुत्रायादिते ध्रुवम् ॥६॥

श्रीमहादेव उवाच—

इति तस्यै वरं दत्त्वा भगवान्पुरुषोत्तमः ।
सहसाऽन्तर्दधे विष्णुः सर्वलोकेश्वरेश्वरः ॥७॥
अथ विष्णुर्देवमातुर्गर्भमेहमुपागमत् ।
जन्मने दैत्यराजस्य राज्यापहरणेच्छया ॥८॥

सा च तं सुषुवे पुत्रं वामनं चारुरूपिणम् ।
सर्वलक्षणसम्पूर्णं सुचारुमुखपङ्कजम् ॥९॥
स ह्येकदा द्विजैः सार्धं द्विजरूपी जनार्दनः ।
आससाद महात्मानं बलिं धर्मपरायणम् ॥१०॥
सोऽयाचत बलिं भूमिं त्रिपादपरिसम्मिताम् ।
तच्छ्रुत्वा चाह तं राजा स्वल्पं किं याचसे द्विज ॥११॥
द्वीपं वा वर्षमेकं वा ग्रामं वापि तदर्धकम् ।
न याचसे कथं विप्र दास्ये तुभ्यं न संशयः ॥१२॥
स्वल्पं दानं द्विजसुत दातुः कीर्तिविनाशकम् ।
तस्मात्स्वल्पतरं दातुं न तुभ्यं रोचते मनः ॥१३॥

श्रीवामन उवाच—

किं तेन ते महाराज यन्मया काङ्क्षितं तव ।
तदेव देहि नाकीर्तिस्तव तेन भविष्यति ॥१४॥
मह्यं त्रिपादभूदानपुण्यं कीर्तिकरं परम् ।
भविष्यति महाराज यथा भूतं न भावि च ॥१५॥

श्रीमहादेव उवाच—

एवं वचनमाकर्ण्य वामनस्य महात्मनः ।
सभ्या ऊचुर्महाराजं बलिं धर्मपरायणम् ॥१६॥

सभ्या ऊचुः—

यद्याचते द्विजसुतस्तदेव त्वं प्रयच्छ भो ।
ग्रहीतुस्तुष्टिदं दानं सफलं कीर्तिवर्धनम् ॥१७॥

श्रीमहादेव उवाच—

इत्याकर्ण्य वचस्तेषां राजा तस्मै द्विजातये ।
त्रिपादसम्मितां भूमिं दातुं तिलकुशं दधे ॥१८॥
एतस्मिन्नेव काले तु दैत्यानां गुरुराह तम् ।
क्षणं तिष्ठ महाराज वचनं मेऽवधारय ॥१९॥
नायं द्विजसुतो नूनं द्विजरूपी जनार्दनः ।
मायया वामनो भूत्वा त्वदन्तिकमुपागतः ॥२०॥

यद्याचते मुहुस्तत्र त्रिपादपरिसम्मिताम् ।
भूमिं तदिन्द्रकार्यार्थं निश्चितं विद्धि भूपते ॥२१॥

त्वयैतस्मै यदि पुनस्त्रिपादपरिसम्मिता ।
भूमिः प्रदीयते तर्हि तव लोकत्रयं ध्रुवम् ।
नेष्यत्ययं चातिखर्वो दातुमिन्द्राय निश्चितम् ॥२२॥

बलिरुवाच—

कुलदेव कथं विष्णुमंम लोकत्रयं गुरो ।
सम्प्रदास्यति चेन्द्राय मत्तो नीत्वा छलेन वा ॥२३॥

भृगुरुवाच—

नासाध्यं विद्यते विष्णोर्देवकार्यानुरोधिनः ।
किञ्चिदत्र महाराज दारुणं कर्म निश्चितम् ॥२४॥

स एव भगवान्नूनमदित्या गर्भसम्भवः ।
मायया वामनो भूत्वा त्वत्तो भूमिं प्रयाचते ॥२५॥

तस्माद्राजँस्त्वमेतस्मै भूमिं मा देहि कश्चन ।
यदि त्रैलोक्यराज्यं त्वं समिच्छसि महामते ॥२६॥

बलिरुवाच—

दास्यामीत्येवमुक्त्वाहं न दास्ये वा कथं गुरो ।
दास्यामि वा कथं भूमिं छलग्राही ह्ययं यदि ॥२७॥

श्रीमहादेव उवाच—

इति राज्ञो वचः श्रुत्वा शुक्रो दानवपूजितः ।
मुहुस्तं वारयामास भूमिदानसमुद्यतम् ॥२८॥

तच्छ्रुत्वा स तु धर्मात्मा तूष्णींभूय महामुने ।
निश्चित्य चेतसा दानं गुरोर्वचनमब्रवीत् ॥२९॥

बलिरुवाच—

गुरो यदि स्वयं विष्णुर्मायावामनरूपधृक् ।
त्रैलोक्यं याचते तर्हि किं मे भाग्यमतः परम् ॥३०॥

यस्य प्रीतिं समुद्दिश्य दानं किमपि मानवः ।
कुर्वन्यत्फलमाप्नोति तदनन्ततमं मतम् ॥३१॥

तस्मै वामनरूपाय विष्णवे द्विजरूपिणे ।
त्रैलोक्यं सम्प्रदास्यामि किं मे भाग्यमतः परम् ॥३२॥

विष्णोः सम्प्रीतये कर्म न करोति विमूढधीः ।
करोति यस्तु सन्क्वापि निमज्जति न वै गुरो ॥३३॥

तस्माद्वामनरूपाय विष्णवे द्विजरूपिणे ।
त्रिपादभूमिं दास्यामि प्रीतिं तस्य समुद्दिशन् ॥३४॥

इत्युक्त्वा स गुरुं राजा विष्णोः प्रीतिं समुद्दिशन् ।
त्रिपादसम्मितां भूमिं ददौ तस्मै परात्मने ॥३५॥

स स्वस्तीत्येवमाभाष्य वामनो मुनिसत्तम ।
विश्वरूपी बभौ विष्णुस्त्रिपादो जगदीश्वरः ॥३६॥

तस्यैकं तु पदं वत्स ब्रह्माण्डं स्फोटयत्तदा ।
ऊर्ध्वं जगाम ब्रह्माण्डे तदा तस्मिन्पदाम्बुजे ॥३७॥

कमण्डलुस्थितं तत्तु तोयं प्रादात्प्रजापतिः ।
तदा नीरमयी गङ्गा प्राप्य विष्णोः परं पदम् ।
तत्रैवावस्थितिं चक्रे सर्वपापप्रणाशिनी ॥३८॥

विष्णुस्तु प्राह राजानं बलिं धर्मपरायणम् ।
सापराध इव स्पृष्ट्वा पादेनैकेन तच्छिरः ॥३९॥

तव लोकत्रयं वत्स न्यस्तं तिष्ठतु साम्प्रतम् ।
शक्राय तावत्पातालं व्रज त्वं सह दानवैः ॥४०॥

तवापि देवराजत्वं भविष्यत्यष्टमे मनौ ।
तदा लोकत्रयं भूयस्त्वमाप्स्यसि न संशयः ॥४१॥

इति विष्णोर्वचः श्रुत्वा बलिः सर्वासुरैः सह ।
पातालं प्रययौ विष्णुं प्रणिपत्य महामुने ॥४२॥

वैकुण्ठे जगतां नाथः प्रययौ त्रिदशेश्वरः ।
गङ्गा तु संस्थिता तस्य चरणे लोकपावनी ॥४३॥

श्रीमहाभागवते उपपुराणे वामनावतारे बलिपातालयात्राकथने
पञ्चषष्टितमोऽध्यायः

षट्षष्टितमोऽध्यायः

श्रीमहादेव उवाच—

एवं हरितनुं प्राप्तां ज्ञात्वा गङ्गां विधिस्तथा ।
शून्यं कमण्डलुं चापि विलोक्य मुनिसत्तम ॥१॥
चेतसा चिन्तयामास क्षणं त्रिदशवन्दितः ।
इयं द्रवमयी गङ्गा त्रिषु लोकेषु दुर्लभा ॥२॥
पुण्यात्पुण्यतमा धन्या स्थिता मम कमण्डलौ ।
प्राप्ता हरिपदाम्भोजं निश्चला समभूदियम् ॥३॥
नूनं नदी स्वयं भूत्वा स्वर्गं मर्त्यं रसातलम् ।
पवित्रं प्रकरिष्यन्ती सिद्धसङ्गमवाप्स्यति ॥४॥
तदहं तपसा सद्यो देवीं गङ्गां सुरेश्वरीम् ।
भूयो विष्णुपदाम्भोजाद् द्रावयिष्यामि निश्चितम् ॥५॥
इति सञ्चिन्त्य स विधिर्वैकुण्ठं समुपागतः ।
गङ्गां सम्प्रार्थयामास स्थितां विष्णुतनौ मुने ॥६॥
विरं प्रार्थयतस्तस्य गङ्गा त्रैलोक्यपावनी ।
प्रत्यक्षं समुपागत्य वचनं त्विदमब्रवीत् ॥७॥

गङ्गोवाच—

अहं हरितनौ ब्रह्मन्स्थास्ये कालं कियद्ध्रुवम् ।
ततो द्रवमयी भूत्वा विष्णोः पादाम्बुजात्पुनः ।
निःसृत्य पावयिष्यामि लोकत्रयमसंशयम् ॥८॥
स्तुता भगीरथेनाहं राज्ञा चामिततेजसा ।
भागीरथीति विख्याता यास्येऽहं धरणीतले ॥९॥
उद्धृत्य तत्पितॄन्सर्वान्सिद्धसंघमवाप्य च ।
पातालं सम्प्रविश्यामि लोकानां त्राणहेतवे ॥१०॥

ब्रह्मोवाच—

अहं वाप्यनुजानामि ज्ञानदृष्ट्या सुरोत्तमे ।
भगीरथस्य राज्ञस्त्वं कीर्तिं संवर्धयिष्यसि ॥११॥
अहं चापि तदर्थं त्वां प्रार्थिता शिवसुन्दरि ।
यत्त्वं भूयो विनिःसृत्य त्रैलोक्यमधियास्यसि ॥१२॥

श्रीमहादेव उवाच—

ततो गङ्गा भगवती स्वयमन्तर्दधेऽचिरात् ।
ब्रह्मापि स्वपुरं प्रायात् सर्वलोकपितामहः ॥१३॥
अथ विष्णुतनुं प्राप्तां गङ्गां द्रवमयीं क्षितौ ।
आनेतुं गुरुणादिष्टः पितॄञ्छापप्रभावतः ॥१४॥
भस्मीभूतान्मुनीन्द्रस्य कपिलस्यातितेजसः ।
उद्दिधीर्षुर्महात्मा स राजा सगरवंशजः ॥१५॥
भगीरथः परात्मानं विष्णुं लोकेश्वरेश्वरम् ।
चिरमाराधयामास यतात्मा मुनिसत्तम ॥१६॥
ततः प्रसन्नो भगवान्परात्मा पुरुषोत्तमः ।
प्रत्यक्षं समभूत्तस्य राज्ञः पुण्यतमात्मनः ॥१७॥
तं दृष्ट्वा जगतां नाथं शङ्खचक्रगदाधरम् ।
पीताम्बरं सुपर्णस्थं वनमालाविराजितम् ॥१८॥
प्रणम्य दण्डवद्भूमौ स्तोत्रमाह महीपतिः ॥१९॥

भगीरथ उवाच—

त्रैलोक्यपावन जगत्परिवन्द्यपाद विश्वेश विश्वग महापुरुषप्रधान ।
नारायणाच्युत हरे मधुकैटभारे विष्णो प्रसीद परमेश्वर ते नमोऽस्तु ॥२०॥
विश्वैककारण पुराण जगन्निधान श्रीवत्सलाञ्छन विभो मधुसूदनाख्य ।
गोविन्द वामन जनार्दन विश्वमूर्ते विष्णो प्रसीद परमेश्वर ते नमोऽस्तु ॥२१॥
अत्यन्तविक्रम जगन्मय वासुदेव दैत्यान्तकान्तक भयान्तक कान्त पूर्ण ।
वैकुण्ठ माधव धराधर चारुरूप विष्णो प्रसीद परमेश्वर ते नमोऽस्तु ॥२२॥
लक्ष्मीपतेऽमरपते जगदेकनाथ मायाश्रयैक करुणामय केशवेश ।
आनन्दसान्द्र कमलेक्षण शुद्धबोध वाणीपतेऽखिलपते सततं नतोऽस्मि ॥२३॥

नमस्ते विश्वरूपाय विष्णवेऽमिततेजसे ।
सच्चिदानन्दरूपाय शुद्धज्ञानात्मने नमः ॥२४॥
अद्य मे सफलं जन्म अद्य मे सफलं तपः ।
यत्त्वां पश्यामि नेत्राभ्यां देवैरपि सुदुर्लभम् ॥२५॥

श्रीमहादेव उवाच—

इत्यादिस्तुतिवाक्यैस्तु स स्तुतो जगदीश्वरः ।
उवाच नृपशार्दूलं भगीरथमरिन्दमम् ॥२६॥

श्रीभगवानुवाच—

किं तेऽभिलषितं राजन्वरं तद्वरयाधुना ।
प्रीत्याहं सम्प्रदास्यामि तव भावेन निश्चितम् ॥२७॥

भगीरथ उवाच—

पितरौ ब्रह्मशापेन भस्मीभूय मम प्रभो ।
अधोगतिमनुप्राप्तास्तेषां निष्कृतिकारणात् ॥२८॥
गङ्गां द्रवमयीं नेतुं क्षित्यामिच्छामि पावनीम् ॥२९॥
सा ते तनुमनुप्राप्य स्थिता त्रैलोक्यपावनी ।
कमण्डलुकृतावासा ब्रह्मणः परमात्मनः ॥३०॥
तां त्वं ददासि चेद्गङ्गां स्वशरीरकृतालयाम् ।
तदा मे पितरः सर्वे प्रयान्ति परमं पदम् ॥३१॥
एतदेव जगन्नाथ वाञ्छितं विद्यते मम ।
त्वत्तः सर्वात्मना देव प्रणतानां कृपाकरः ॥३२॥

श्रीभगवानुवाच—

वत्स क्षितितलं गत्वा गङ्गा द्रवमयी स्वयम् ।
मच्छरीराद्विनिःसृत्योद्धरिष्यति पितॄंस्तव ॥३३॥
त्वं तु तां परमाराध्यां देवानामपि दुर्लभाम् ।
सम्प्रार्थय महाराज तथा शम्भुं जगत्पतिम् ।
ततः सम्पत्स्यतेऽभीष्टं सर्वमेव भगीरथ ॥३४॥

श्रीमहादेव उवाच—

इति तस्मै वरं दत्त्वा भगवान्पुरुषोत्तमः ।
अन्तर्दधे मुनिश्रेष्ठ राज्ञस्तस्य समीपतः ॥३५॥
स तु गत्वा महाराजो हिमाद्रेरुत्तरं शिरः ।
गङ्गामाराधयामास यतात्मा मुनिसत्तम ॥३६॥
गते तु बहुसाहस्रे वर्षे तस्य तपस्यतः ।
प्रसन्ना समभूद्गङ्गा शिवशक्तिः स्मिताननाः ॥३७॥
सा प्रत्यक्षमनुप्राप्य राजानं यतमानसम् ।
उवाच राजन्वृणु तं यत्तेऽभिलषितं वरम् ॥३८॥

भगीरथ उवाच

मातस्त्वं सुप्रसन्ना मे यदि त्वं शिवसुन्दरी ।
तदा हरिपदाम्भोजान्निःसृत्यैहि धरातले ॥३९॥

पवित्रां धरणीं कृत्वा प्रविश्य विवरस्थलम् ।
उद्धारय पितॄन्पूर्वान्मुनिना भस्मसात्कृतान् ॥४०॥
पितॄणां यदि निस्तारं करोषि त्रिदशस्तुते ।
तदाहं कृतकृत्यः स्यामेतन्मे वाञ्छितं शिवम् ॥४१॥

गङ्गोवाच—

एवमस्तु महाराज विष्णुपादाम्बुजादहम् ।
विनिःसृत्योद्धरिष्यामि तव पूर्वतमान्पितॄन् ॥४२॥
त्वत्तः सम्प्रार्थिता यस्माद्भूत्वा विष्णुपदाम्बुजात् ।
क्षिताववतरिष्यामि तस्मात्कन्या भवाम्यहम् ॥४३॥
तेन भागीरथीत्याख्या लोके मे सम्भविष्यति ।
त्वया तु जगतां नाथः शम्भुर्गत्वा प्रसाद्यताम् ॥४४॥
स मे प्रियतमो भर्ता तस्याहं वशवर्तिनी ।
तेन गन्तुं न शक्नोमि विना तस्याज्ञया प्रभो ॥४५॥
तस्मात्प्रसन्नतां याते शङ्करे त्वयि भूपते ।
मेरुशृङ्गं समारुह्य शङ्खं जलदनिःस्वनम् ॥४६॥
संध्मास्यसि यदा राजँस्तदा विष्णुपदाम्बुजात् ।
विनिःसृत्य विनिर्भिद्य ब्रह्माण्डमतिवेगिता ।
त्वदानुगा वसुमतीं यास्यामि जलरूपिणी ॥४७॥
उद्धृत्य त्वत्पितॄन्सर्वान्विवरं समुपेत्य च ।
पातालमनुयास्यामि तव कीर्तिविवर्धिनी ॥४८॥

श्रीमहादेव उवाच—

इत्युक्त्वा सा भगवती गङ्गा शङ्करगेहिनी ।
पश्यतो नृपतेस्तस्य क्षणादन्तरधीयत ॥४९॥
भगीरथश्च भूपालो पितॄणां कीर्तिवर्धनः ।
कृतकृत्यमिवात्मानं मेने गङ्गाभिदर्शनात् ॥५०॥
गत्वा गङ्गाज्ञया राजा धर्मात्माऽसौ भगीरथः ।
महेशं प्रार्थयामास तस्मिन्नेव नगोत्तमे ॥५१॥
निराहारी शताब्दं तु नियतात्मा महामते ।
ततः प्रसन्नो देवेशः शङ्करः प्रभुरव्ययः ।
प्रत्यक्षं समभूत्तस्य पञ्चास्यो वृषभध्वजः ॥५२॥

तं वीक्ष्य रजताभासं पञ्चास्यं शूलधारिणम् ।
व्याघ्राजिनपरीधानं जटामण्डितमस्तकम् ॥५३॥
विभूतिलिप्तसर्वाङ्गं नीलकण्ठं स्मिताननम् ।
नागेन्द्रभूषितं चारुचन्द्रार्धकृतशेखरम् ॥५४॥
दण्डवत्पतितो राजा नाम्नामष्टसहस्रकैः ।
तुष्टाव देवदेवेशं पूर्णं सर्वसुरोत्तमम् ॥५५॥

श्रीमहाभागवते उपपुराणे भगीरथगङ्गासंवादे श्रीशिवदर्शनप्राप्तिर्नाम षट्षष्टितमोऽध्यायः

सप्तषष्टितमोऽध्यायः

भगीरथ उवाच—

ॐनमस्ते पार्वतीनाथ देवदेव परात्पर ।
अच्युतानघ पञ्चास्य भीमास्य रुचिरानन ॥१॥
व्याघ्राजिनधरानन्त पारावारविवर्जित ।
पञ्चानन महासत्त्व महाज्ञानमय प्रभो ॥२॥
अजिताऽमितदुर्धर्ष विश्वेश परमेश्वर ।
विश्वात्मन्विश्वभूतेश विश्वाश्रय जगत्पते ॥३॥
विश्वोपकारिन्विश्वैकधाम विश्वाश्रयाश्रय ।
विश्वाधार सदानन्द विश्वानन्द नमोऽस्तु ते ॥४॥
शर्व सर्वविदज्ञानविवर्जित सुरोत्तम ।
सुरवन्द्य सुरस्तुत्य सुरराज सुरोत्तम ॥५॥
सुरपूज्य सुरध्येय सुरेश्वर सुरान्तक ।
सुरारिमर्दक सुरश्रेष्ठ तेऽस्तु नमो नमः ॥६॥
त्वं शुद्धः शुद्धबोधश्च शुद्धात्मा जगतां पतिः ।
शम्भुः स्वयम्भूरत्युग्र उग्रकर्मोग्रलोचन ॥७॥
उग्रप्रभावश्चात्युग्रमर्दकोत्युग्ररूपवान् ।
उग्रकण्ठः शिवः शान्तः सर्वशान्तिविधायकः ॥८॥
सर्वार्थदः शिवाधारः शिवाय निरमित्रजित् ।
शिवदः शिवकर्ता च शिवहन्ता शिवेश्वरः ॥९॥

शिशुशैशवयुक्तश्च पिङ्गकेशो जटाधरः ।
गङ्गाधरकपर्दी च जटाजूटविराजितः ॥१०॥
जटिलो जटिलाराध्यः सर्वदोन्मत्तमानसः ।
उन्मत्तकेश उन्मत्त उन्मत्तानामधीश्वरः ॥११॥
उन्मत्तलोचनो भीमस्त्रिनेत्रो भीमलोचनः ।
बहुनेत्रो द्विनेत्री च रक्तनेत्रः सुनेत्रकः ॥१२॥
दीर्घनेत्रश्च पिङ्गाक्षः सुप्रभाक्ष्यः सुलोचनः ।
सोमनेत्रोऽग्निनेत्राख्यः सूर्यनेत्रः सुवीर्यवान् ॥१३॥
पद्माक्षः कमलाक्षश्च नीलोत्पलदलेक्षणः ।
सुलक्षणः शूलपाणिः कपाली कपिलेक्षणः ॥१४॥
व्याघूर्णनयनो घूर्तो व्याघ्रचर्माम्बरावृतः ।
श्रीकण्ठो नीलकण्ठाख्यः शितिकण्ठः सुकण्ठकः ॥१५॥
चन्द्रचूडश्चन्द्रधरश्चन्द्रमौलिः शशाङ्कभृत् ।
शशिकान्तः शशाङ्काभः शशाङ्काङ्कितमूर्धजः ॥१६॥
शशाङ्कवदनो वीरो वरदो वरलोचनः ।
शरच्चन्द्रसमाभासः शरदिन्दुसमप्रभः ॥१७॥
कोटिसूर्यप्रतीकाशश्चन्द्रास्यश्चन्द्रशेखरः ।
अष्टमूर्तिर्महामूर्तिर्भीममूर्तिर्भयानकः ॥१८॥
भयदाता भयत्राता भयहर्तृ भयोज्झितः ।
निर्भूतो भूतवन्द्यश्च भूतात्मा भूतभावनः ॥१९॥
कौपीनवासा दुर्वासा विवासा कामिनीपतिः ।
करालः कीर्तिदो वैद्यः किशोरः कामनाशनः ॥२०॥
कीर्तिरूपः कुन्तधारी कालकूटकृताशनः ।
कालकूटसुरूपी च कुलमन्त्रप्रदीपकः ॥२१॥
कलाकाष्ठात्मकः काशीविहारी कुटिलाननः ।
महाकाननसंवासो कालीप्रीतिविवर्धनः ॥२२॥
कालीधरः कामचारिन्कुलकीर्तिविवर्धनः ।
कामारिः कामुकवरः कार्मुकी कामनोहितः ॥२३॥
कटाक्षः कनकाभासः कनकोज्ज्वलगात्रकः ।
कामातुरः क्वणत्वादः कुटिलभ्रूकुटीधरः ॥२४॥

कार्त्तिकेयपिता कोकनदभूषणभूषितः ।
खट्वाङ्गयोद्धा खड्गी च गिरीशो गगनेश्वरः ॥२५॥

गणाध्यक्षः खेटकधृक् खर्वः खर्वतरः खगः ।
खगारूढः खगाराध्यः खेचरः खेचरेश्वरः ॥२६॥

खेचरत्वप्रदः क्षोणीपतिः खेचरमर्दकः ।
गणेश्वरो गणपिता गरिष्ठो गणभूपतिः ॥२७॥

गुरुर्गुरुतरो ज्ञेयो गङ्गापतिरमर्षणः ।
गीतप्रियो गीतरतः सुगोप्यो गोपवृन्दपः ॥२८॥

गवारूढो जगद्भर्ता गोस्वामी गोस्वरूपकः ।
गोप्रदो गोधरो गृध्रो गरुत्मान् गोकृतासनः ॥२९॥

गोपीशो गुरुतातश्च गुहावासी सुगोपितः ।
गजारूढो गजास्यश्च गजाजिनधरोऽग्रजः ॥३०॥

ग्रहाध्यक्षो ग्रहगणो दुष्टग्रहविमर्दकः ।
गानरूपी गानरतः प्रचण्डो गानविह्वलः ॥३१॥

गानमत्तो गुणी गुह्यो गुणग्रामाश्रयो गुणः ।
गूढबुद्धिर्गूढमूर्तिर्गूढपादविभूषितः ॥३२॥

गोप्ता गोलोकवासी च गुणवान्गुणिनां वरः ।
हरो हरितवर्णाक्षो मृत्युर्मृत्युञ्जयो हरिः ॥३३॥

हव्यभुग्हरिसम्पूज्यो हविर्हविर्भुजां वरः ।
अनादिरादिः सर्वाद्य आदितेयवरप्रदः ॥३४॥

अनन्तविक्रमो लोके लोकानां पापहारकः ।
गीष्पतिः सद्गुणोपेतः सगुणो निर्गुणो गुणी ॥३५॥

गुणप्रीतो गुणवरो गिरिजानायको गिरिः ।
गौरीभर्ता गुणाढ्यश्च गोश्रेष्ठासनसंस्थितः ॥३६॥

पद्मासनः पद्मनेत्रः पद्मतुष्टः सुपद्मकः ।
पद्मवक्त्रः पद्मकरः पद्मारूढपदाम्बुजः ॥३७॥

पद्मप्रियतमः पद्मालयः पद्मप्रकाशकः ।
पद्मकाननसंवासः पद्मकाननभुञ्जकः ॥३८॥

पद्मकाननसंवासी पद्मारण्यकृतालयः ।
प्रफुल्लवदनोत्फुल्लकमलाक्षप्रफुल्लकृत् ॥३९॥

फुल्लेन्दीवरसन्तुष्टः प्रफुल्लकमलासनः ।
फुल्लाम्भोजकरोत्फुल्लमानसः पापहारकः ॥४०॥

पापापहारी पुण्यात्मा पुण्यकीर्तिः सुपुण्यवान् ।
पुण्यः पुण्यतमो धन्यः सुपूतात्मा परात्मकः ॥४१॥

पुण्येशः पुण्यदः पुण्यनिरतः पुण्यभाजनः ।
परोपकारी पापिष्ठनाशकः पापहारकः ॥४२॥

पुरातनः पूर्वहीनः परद्रोहविवर्जितः ।
पीवरः पीवरमुखः पीनकायः पुरान्तकः ॥४३॥

पाशी पशुपतिः पाशहस्तः पाषाणविट्पतिः ।
पलात्मकः परावेत्ता पाशबद्धविमोचकः ॥४४॥

पशूनामधिपः पाशच्छेत्ता पाशविभेदकः ।
पाषाणधारी पाषाणशयानः पाशिपूजितः ॥४५॥

पश्वारूढः पुष्पधनुः पुष्पवृन्दसुपूजितः ।
पुण्डरीकः पीतवासा पुण्डरीकाक्षवल्लभः ॥४६॥

पानपात्रकरः पानमत्तः पानातिभूतकः ।
पोष्टा पोष्टवरः पूतः परित्राताऽखिलेश्वरः ॥४७॥

पुण्डरीकाक्षकर्ता च पुण्डरीकाक्षसेवितः ।
पल्लवस्थः प्रपीठस्थः पीठभूमिनिवासकः ॥४८॥

पिता पितामहः पार्थप्रसन्नाभीष्टदायकः ।
पितृणां प्रीतिकर्ता च प्रीतिदः प्रीतिभाजनः ॥४९॥

प्रीत्यात्मकः प्रीतिवशो सुप्रीतः प्रीतिकारकः ।
प्रीतिहृत्प्रीतिरूपात्मन् प्रीतियुक्तस्त्वमेव हि ॥५०॥

प्रणतार्तिहरः प्राणवल्लभः प्राणदायकः ।
प्राणी प्राणस्वरूपश्च प्राणग्राही मुनिर्दयः ॥५१॥

प्राणनाथः प्रीतमनाः सर्वेषां प्रपितामहः ।
वृद्धः प्रवृद्धरूपश्च प्रेतः प्रणयिनां वरः ॥५२॥

पराधीशः परं ज्योतिः परनेत्रः परात्मकः ।
पारुष्यरहितः पुत्री पुत्रदः पुत्ररक्षकः ॥५३॥

पुत्रप्रियः पुत्रवश्यः पुत्रवत्परिपालकः ।
परित्राता परावासः परचेताः परेश्वरः ॥५४॥

पतिः सर्वस्य सम्पाल्यः पवमानः परान्तकः ।
पुरहा पुरुहूतश्च त्रिपुरारिः पुरान्तकः ॥५५॥
पुरन्दरातिसम्पूज्यः प्रधर्षो दुष्प्रधर्षणः ।
पटुः पटुतरः प्रौढः प्रपूज्यः पर्वतालयः ॥५६॥
पुलिनस्थः पुलस्त्याख्यः पिङ्गचक्षुः प्रपन्नगः ।
अभीरुरसिताङ्गश्च चण्डरूपः सिताङ्गकः ॥५७॥
सर्वविद्याविनोदश्च सर्वसौख्ययुतः सदा ।
सुखहर्ता सर्वसुखी सर्वलोकैकपावनः ॥५८॥
सदावनः सारदश्च सुसिद्धः शुद्धरूपकः ।
सारः सारतरः सूर्यः सोमः सर्वप्रकाशकः ॥५९॥
सोममण्डलधारी च समुद्रः सिन्धुरूपवान् ।
सुरज्येष्ठः सुरश्रेष्ठः सुरासुरनिषेवितः ॥६०॥
सर्वधर्मविनिर्युक्तः सर्वलोकनमस्कृतः ।
सर्वाचारयुतः सौरः शाक्तः परमवैष्णवः ॥६१॥
सर्वधर्मविधानज्ञः सर्वाचारपरायणः ।
सर्वरोगप्रशमनः सर्वरोगापहारकः ॥६२॥
प्रकृष्टात्मा महात्मा च सर्वधर्मप्रदर्शकः ।
सर्वसम्पद्युतः सर्वसम्पद्दानसमेक्षणः ॥६३॥
सहास्यवदनो हास्ययुक्तः प्रहसिताननः ।
साक्षी समक्षवक्ता च सर्वदर्शी समस्तवित् ॥६४॥
सकलज्ञः समर्थज्ञः सुमनाः शैवपूजितः ।
शोकप्रशमनः शोकहन्ताऽशोच्यः शुभान्वितः ॥६५॥
शैलज्ञः शैलजानाथः शैलनाथः शनैश्चरः ।
शशाङ्कसदृशज्योतिः शशाङ्कार्धविराजितः ॥६६॥
साधुप्रियः साधुतमः साध्वीपतिरलौकिकः ।
शून्यरूपः शून्यदेहः शून्यस्थः शून्यभावनः ॥६७॥
शून्यगामी श्मशानस्थः श्मशानाधिपतिः सुवाक् ।
शतसूर्यप्रभः सूर्यः सूर्यदीप्तः सुरारिहा ।
शुभान्वितः शुभतनुः शुभबुद्धिः शुभात्मकः ॥६८॥
शुभान्विततनुः शुक्लतनुः शुक्लप्रभान्वितः ।
सुशौक्लः शुक्लदशनः शुक्लाभः शुक्लमाल्यधृक् ॥६९॥

शुक्लपुष्पप्रियः शुक्लवसनः शुक्लकेतनः ।
शेषालङ्करणः शेषरहितः शेषवेष्टितः ॥७०॥

शेषारूढः शेषशायी शेषाङ्गदविराजितः ।
सतीप्रियश्च सशंकः समदर्शी समाधिमान् ॥७१॥

सत्सङ्गी सत्प्रियः सङ्गी निःसङ्गी सङ्गवर्जितः ।

सहिष्णुः शाश्वतैश्वर्यः सामगानरतः सदा ॥७२॥
सामवेत्ता साम्यतरः श्यामापतिरशेषभुक् ।
तारिणीपतिरातास्रनयनस्त्वरितप्रियः ॥७३॥

तारात्मकस्त्वग्वसनस्तरुणीरमणे रतः ।
तृप्तिरूपस्तृप्तिकर्ता तारकारिनिषेवितः ॥७४॥
वायुकेशो भैरवेशो भवानीशो भवान्तकः ।
भवबन्धुर्भवहरो भवबन्धनमोचकः ॥७५॥

अभिभूतोऽभिभूतात्मा सर्वभूतप्रमोहकः ।
भुवनेशो भूतपूज्यो भोगमोक्षफलप्रदः ॥७६॥
दयालुर्दीननाथश्च दुःसहो दैत्यमर्दकः ।
दक्षकन्यापतिर्दुःखनाशको धनधान्यदः ॥७७॥

दयावान् दैवतश्रेष्ठो देवगन्धर्वसेवितः ।
नानायुधधरो नानापुष्पगुच्छविराजितः ॥७८॥
नानासुखप्रदो नानामूर्तिधारी च नर्तकः ।
नित्यविज्ञानसंयुक्तो नित्यरूपोऽनिलोऽनलः ॥७९॥

लब्धवर्णो लघुतरो लघुत्वपरिवर्जितः ।
लोलाक्षो लोकसम्पूज्यो लावण्यपरिसंयुतः ॥८०॥

नपुरीन्याससंस्थश्च नागेशो नगपूजितः ।
नारायणो नारदश्च नानाभरणभूषितः ॥८१॥

नगभूतो नग्नदेशो नग्नः सानन्दमानसः ।
नमस्यो नतनाभिश्च नम्रमूर्धाभिवन्दितः ॥८२॥

नन्दिकेशो नन्दिपूज्यो नानानीरजमध्यगः ।
नवीनबिल्वपत्रौघतुष्टो नवघनद्युतिः ॥८३॥

नन्दः सानन्द आनन्दमयश्चानन्दविह्वलः ।
नालसंस्थः शोभनस्थः सुस्थः सुस्थमतिस्तथा ॥८४॥

स्वल्पासनो भीमरुचिर्भुवनान्तकराम्बुदः ।
आसन्नः सिकतालीनो वृषासीनो वृषासनः ॥८५॥
वैरस्यरहितो वार्यो व्रती व्रतपरायणः ।
ब्राह्म्यो विद्यामयो विद्याभ्यासी विद्यापतिस्तथा ॥८६॥
घण्टाकारो घोटकस्थो घोरावघनस्वनः ।
घूर्णदक्षुरघूर्णात्मा घोरहासो गभीरधीः ॥८७॥
चण्डीपतिश्चण्डमूर्तिश्चण्डमुण्डो प्रचण्डवाक् ।
चितासंस्थश्चितावासश्चितिदण्डकरः सदा ॥८८॥
चितामस्माभिसंलिप्तश्चितानृत्यपरायणः ।
चिताप्रमोदी चित्साक्षी चिन्तामणिरचिन्तकः ॥८९॥
चतुर्वेदमयश्चक्षुश्चतुराननपूजितः ।
चिरवासाश्चकोराक्षश्चलन्मूर्तिश्चलेक्षणः ॥९०॥
चलत्कुण्डलभूषाढ्यश्चलद्भूषणभूषितः ।
चलन्नेत्रश्चलत्पादश्चलन्नूपुरराजितः ॥९१॥
स्थावरः स्थिरमूर्तिश्च स्थावरेशः स्थिरासनः ।
स्थापकास्थैर्यनिरतः स्थूलरूपी स्थलालयः ॥९२॥
स्थैर्यातिपः स्थितिपरः स्थाणुरूपी स्थलाधिपः ।
ऐहिको मदनार्तश्च महीमण्डलपूजितः ॥९३॥
महीप्रियो मत्तरवो मीनकेतुर्विमर्दकः ।
मीनरूपो मीनसंस्थो मृगहस्तो मृगासनः ॥९४॥
मार्गस्थो मेखलायुक्तो मैथिलीश्वरपूजितः ।
मिथ्याहीनो मङ्गलदो माङ्गल्यो मकरासनः ॥९५॥
मत्स्यप्रियो मधुरगीर्मधुपानपरायणः ।
मृदुवाक्यपरः सौरप्रियो मोदान्वितस्तथा ॥९६॥
मुण्डालिर्भूषणो दण्डी उद्दण्डोज्ज्वललोचनः ।
असाध्यसाधकः शूरसेव्यः शोकापनोदनः ॥९७॥
श्रीपतिः श्रीसुसेव्यश्च श्रीधरः श्रीनिकेतनः ।
श्रीमतां श्रीस्वरूपश्च श्रीमाञ्श्रीनिलयस्तथा ॥९८॥
श्रमादिक्लेशरहितः श्रीनिवासः श्रियान्वितः ।
श्रद्धालः श्राद्धदेवश्च श्राद्धो मधुरवाक्तथा ॥९९॥

प्रलयाग्न्यर्कसंकाशः प्रमत्तनयनोज्ज्वलः ।
असाध्यसाधकः शूरसेव्यः शोकापनोदनः ॥१००॥

विश्वभूतमयो वैश्वानरनेत्रोऽधिमोहकृत् ।
लोकत्राणपरोऽपारगुणः पारविवर्जितः ॥१०१॥

अग्निजिह्वो द्विजास्यश्च विश्वास्यः सर्वभूतधृक् ।
खेचरः खेचराधीशो सर्वगः सार्वलौकिकः ॥१०२॥

सेनानीजनकः क्षुब्धाब्धिवारिक्षोभविनाशकः ।
कपालविलसद्धस्तः कमण्डलुभृदर्चितः ॥१०३॥

केवलात्मस्वरूपश्च केवलज्ञानरूपकः ।
व्योमालयनिवासी च बृहद्व्योमस्वरूपकः ॥१०४॥

अम्भोजनयनाम्भोधिशयानः पुरुषातिगः ।
निरालम्बावलम्बश्च सम्भागानन्दरूपकः ॥१०५॥

योगनिद्रामयो लोकप्रमोहापहरात्मकः ।
बृहद्वक्त्रो बृहन्नेत्रो बृहद्बाहुर्बृहद्बलः ॥१०६॥

बृहत्सर्पाङ्गदो दुष्टबृहद्बालविमर्दकः ।
बृहद्भ्रूजबलोन्मत्तो बृहत्तुण्डो बृहद्वपुः ॥१०७॥

बृहदैश्वर्ययुक्तश्च बृहदैश्वर्यदः स्वयम् ।
बृहत्सम्भोगसन्तुष्टो बृहदानन्ददायकः ॥१०८॥

बृहज्जटाजूटधरो बृहन्माली बृहद्धनुः ।
इन्द्रियाधिष्ठितः सर्वलोकेन्द्रियविमोहकृत् ॥१०९॥

सर्वेन्द्रियप्रवृत्तिकृत् सर्वेन्द्रियनिवृत्तिकृत् ।
प्रवृत्तिनायकः सर्वविपत्तिपरिनाशकः ॥११०॥

प्रवृत्तिमार्गनेता त्वं स्वतन्त्रेच्छामयः स्वयम् ।
सत्प्रवृत्तिरतो नित्यं दयानन्दशिवाधरः ॥१११॥

क्षितिरूपस्तोयरूपी विश्वतृप्तिकरस्तथा ।
तर्पस्तर्पणसम्प्रीतिस्तर्पकस्तर्पणात्मकः ॥११२॥

तृप्तिकारणभूतश्च सर्वतृप्तिप्रसाधकः ।
अभेदाभेदकोच्छिद्यच्छेदकोऽछेद्य एव हि ॥११३॥

अचिन्तधन्वाच्छिन्नेषुरच्छिन्नध्वजवाहनः ।
अधृष्टः समधृष्टास्त्रः समधृष्टबलोन्नतः ॥११४॥

चित्रयोधी चित्रकर्मा विश्वसङ्कर्षकः स्वयम् ।
भक्तानामीप्सितकरः सर्वप्सितफलप्रदः ॥११५॥

वाञ्छिताभीष्टफलदो भिन्नज्ञानप्रवर्तकः ।
बोधनात्मा बोधनार्थातिगः सर्वप्रबोधकृत् ॥११६॥

त्रिजटश्चैकजटिलश्चलज्जूटभयानकः ।
जटाटीनो जटाजूटस्पृष्टावरवचः स्वयम् ॥११७॥

षाण्मातुरस्य जनकः शक्तिप्रहरतां वरः ।
अनर्घास्त्रप्रहारी चानर्घधन्वा महार्घ्यपात् ॥११८॥

योनिमण्डलमध्यस्थः मुखयोनिरजृम्भनः ।
महाद्रिसदृशः श्वेतः श्वेतपुष्पस्रगन्वितः ॥११९॥

मकरन्दप्रियो नित्यं मासर्तुहायनात्मकः ।
नानापुष्पप्रसूनानापुष्पैरर्चितगात्रकः ॥१२०॥

षडङ्गयोगनिरतः सदायोगार्द्रमानसः ।
सुरासुरनिषेव्याङ्घ्रिर्विलसत्पादपङ्कजः ॥१२१॥

सुप्रकाशितवक्त्राब्जः सितेतरगलोज्ज्वलः ।
वैनतेयसमारूढः शरदिन्दुसहस्रवत् ॥१२२॥

जाज्वल्यमानं तेजोभिर्ज्वालापुञ्जो यमः स्वयम् ।
प्रज्वलद्विद्युदाभश्च साट्टहासभयङ्करः ॥१२३॥

प्रलयानलरूपी च प्रलयाग्निरुविः स्वयम् ।
जगतामेकपुरुषो जगतां प्रलयात्मकः ॥१२४॥

प्रसीद त्वं जगन्नाथ जगद्योने नमोऽस्तु ते ॥१२५॥

श्रीमहादेव उवाच—

एवं नामसहस्रेण राज्ञा वै संस्तुतो हरः ।
प्रत्यक्षमगमत्तस्य सुप्रसन्नमुखाम्बुजः ॥१२६॥

स तं विलोक्य त्रिदशैकनाथं पञ्चाननं श्वेतरुचिं प्रसन्नम् ।
वृषाधिरूढं भुजगाङ्गदैर्युतं ननर्त राजा धरणीभुजां वरः ॥१२७॥

प्रोवाच चेदं परमेश्वराद्य मे एतानि सर्वाणि सुखार्थकानि ।
तपश्च होमश्च मनुष्यजन्म यत्त्वां प्रपश्यामि दृशा परेशम् ॥१२८॥

मत्तो न त्वन्योस्ति महीतले वा स्वर्गे यतस्त्वं मम नेत्रगोचरः ।
सुरासुराणामपि दुर्लभेक्षणः परात्परः पूर्णमयो निरामयः ॥१२९॥

ततस्तमेवं प्रतिभाषमाणं प्राह प्रपन्नार्तिहरो महेश्वरः ।
किं ते मनोवाञ्छितमेव विद्यते वृणुष्व तत्पुत्र ददामि तुभ्यम् ॥१३०॥
सचाह पूर्वं कपिलस्य शापतः पातालरन्ध्रे मम पूर्ववंशजाः ।
भस्मीबभूवुः सगरस्य पुत्रा महाबला देवसमानविक्रमाः ॥१३१॥
तेषां तु निस्तारणकाम्यया ह्यहं गङ्गां धरण्यामभिनेतुमीहे ।
सा तु त्वदीया परमा हि शक्तिः विनाज्ञया ते नहि याति पृथ्वीम् ॥१३२॥
तदेतदिच्छामि समेत्य गङ्गा क्षितौ महावेगवती महानदी ।
प्रविश्य तस्मिन्विवरे महेश्वरी पुनातु सर्वान्सगरस्य पुत्रान् ॥१३३॥
इत्येवमाकर्ण्य वचः परेश्वरः प्रोवाच वाक्यं क्षितिपालपुङ्गवम् ।
मनोरथस्तेऽयमवेहि पूर्णो मम प्रसादादचिराद्भविष्यति ॥१३४॥
ये चापि मां भक्तित एव मर्त्याः स्तोत्रेण चानेन नृप स्तुवन्ति ।
तेषां तु पूर्णाः सकला मनोरथा ध्रुवं भविष्यन्ति मम प्रसादात् ॥१३५॥

श्रीमहादेव उवाच—

इत्येवं स वरं लब्ध्वा राजा हृष्टमनास्ततः ।
दण्डवत्प्रणिपत्याह धन्योऽहं त्वत्प्रसादतः ॥१३६॥
ततश्चान्तर्दधे देवः क्षणादेव महामते ।
राजा निर्वृत्तचेताः स बभूव मुनिसत्तम ॥१३७॥
राज्ञा कृतमिदं स्तोत्रं सहस्रनामसंज्ञकम् ।
यः पठेत्परया भक्त्या स कैवल्यमवाप्नुयात् ॥१३८॥
न चेह दुःखं कुत्रापि जायते तस्य नारद ।
जायते परमैश्वर्यं प्रसादाच्च महेशितुः ॥१३९॥
महापदि भये घोरे यः पठेत्स्तोत्रमुत्तमम् ।
शम्भोर्नामसहस्राख्यं सर्वमङ्गलवर्धनम् ॥१४०॥
महाभयहरं सर्वं सुखसम्पत्तिदायकम् ।
स मुच्यते महादेवप्रसादेन महाभयात् ॥१४१॥
दुर्भिक्ष्ये लोकपीडायां देशोपद्रव एव वा ।
सम्पूज्य परमेशानं धूपदीपादिभिर्मुने ॥१४२॥
यः पठेत्परया भक्त्या स्तोत्रं नामसहस्रकम् ।
न तस्य देशे दुर्भिक्षं न च लोकादिपीडनम् ॥१४३॥
न चान्योपद्रवो वापि भवेद्देतत्सुनिश्चितम् ।
पर्जन्योऽपि यथाकाले वृष्टिं तत्र करोति हि ॥१४४॥

यत्रेदं पठ्यते स्तोत्रं सर्वपापप्रणाशनम् ।
सर्वसस्ययुता पृथ्वी तस्मिन्देशे भवेद्ध्रुवम् ॥१४५॥
न दुष्टबुद्धिर्लोकानां तत्रस्थानां भवेदपि ।
नाकाले मरणं तत्र प्राणिनां जायते मुने ॥१४६॥
न हिंस्रास्तत्र हिंसन्ति देवदेवप्रसादतः ।
धन्या देशाः प्रजा धन्या यत्र देशे महेश्वरम् ॥१४७॥
सम्पूज्य पार्थिवं लिङ्गं पठेद्यत्रेदमुत्तमम् ।
चतुर्दश्यां तु कृष्णायां फाल्गुने मासि भक्तितः ॥१४८॥
यः पठेत्परमेशस्य नाम्नां दशशताख्यकम् ।
स्तोत्रमत्यन्तसुखदं न पुनर्जन्मभाग्भवेत् ॥१४९॥
वायुतुल्यबलो नूनं विहरेद्धरणीतले ।
धनेशतुल्यो धनवान्कन्दर्पसमरूपवान् ॥१५०॥
विहरेद्देवतातुल्यो निग्रहानुग्रहे क्षमः ।
गङ्गायां वा कुरुक्षेत्रे प्रयागे वा महेश्वरम् ।
परिपूज्य पठेद्यस्तु स कैवल्यमवाप्नुयात् ॥१५१॥
काश्यां यस्तु पठेदेतत्स्तोत्रं परममङ्गलम् ।
तस्य पुण्यं मुनिश्रेष्ठ किमहं कथयामि ते ॥१५२॥
एतत्स्तोत्रप्रसादेन स जीवन्नेव मानवः ।
साक्षान्महेशतामेति मुक्तिरन्ते करास्थिता ॥१५३॥
प्रत्यहं प्रपठेदेतद्बिल्वमूले नरोत्तमः ।
स सालोक्यमवाप्नोति देवदेवप्रसादतः ॥१५४॥
यो ह्येतत्पाठयेत्स्तोत्रं सर्वपापनिबर्हणम् ।
स मुच्यते महापापात्सत्यं सत्यं वदामि ते ॥१५५॥
न तस्य ग्रहपीडा स्यान्नापमृत्युभयं तथा ।
न तं द्विषन्ति राजानो न वा व्याधिभयं भवेत् ॥१५६॥
पठेदेतद्धृदि ध्यात्वा देवदेवं सनातनम् ।
सर्वदेवमयं पूर्णं रजताद्रिसमप्रभम् ॥१५७॥
प्रफुल्लपङ्कजास्यं च चारुरूपं वृषध्वजम् ।
जटाजूटज्वलत्कालकूटशोभितविग्रहम् ॥१५८॥
त्रिशूलं डमरुं चैव दधानं दक्षवामयोः ।
द्वीपिचर्माम्बरधरं शान्तं त्रैलोक्यमोहनम् ॥१५९॥

एवं हृदि नरो भक्त्या विभाव्यैतत्पठेद्यदि ।
इह भुक्त्वा परं भोगं परत्र च महामते ॥१६०॥
शम्भोः स्वरूपतां याति किमन्यत्कथयामि ते ॥१६१॥

तत्रैव सद्भक्तियुतः पठेदिदं स्तोत्रं मम प्रीतिकरं परं मुने ।
मर्त्यो हि योऽन्यः खलु सोऽपि कृच्छ्रं जगत्पवित्रायत एव पापतः ॥१६२॥

श्रीमहाभागवते उपपुराणे गङ्गाया आगमनोपाख्याने शिवसहस्रनामकथनं सप्तषष्टितमोऽध्यायः

अष्टषष्टितमोऽध्यायः

श्रीमहादेव उवाच—

अथ राजा स पुण्यात्मा ज्येष्ठे मासि शुभेऽहनि ।
हस्तायां मङ्गलदिने शुक्लपक्षे महामुने ॥१॥
आरुरोह रथं दिव्यं दमायन्शङ्खं महास्वनम् ।
स रथस्थो महाबाहुर्व्यराजत महामुने ॥२॥
मध्याह्नार्क इवातीव तेजसा ह्यमितेन वै ।
सर्वाभरणसम्पन्नो मुकुटोज्ज्वलमस्तकः ॥३॥
तेजस्वी रुचिरश्यामः सुवासा रक्तलोचनः ।
राजर्षी राजवर्यश्च सुप्रसन्नमुखाम्बुजः ॥४॥
काकपक्षधरो धन्यो राजन्यतिलको बलिः ।
रथश्च विमलाभासो नानारत्नविभूषितः ॥५॥
सुमेरुशृङ्गसङ्काशः कान्त्यातीव व्यराजत ॥६॥
चित्रध्वजपताकाभिर्हयैः काञ्चनभूषितैः ।
विरेजे रथराजस्तु राज्ञः सूर्यरथोपमः ॥७॥
एतस्मिन्नन्तरे क्षोणी ज्ञात्वा तं नृपसत्तमम् ।
गङ्गावतारकं भूमौ दिव्यरूपं समागमत् ॥८॥
सा तं प्रणम्य राजानं धर्मात्मानं भगीरथम् ।
अब्रवीन्मुनिशार्दूल वाक्यं सुरुचिरं तदा ॥९॥

धरण्युवाच—

राजन्धर्ममयः साक्षात्त्वं महात्मा महीक्षितः ।
ज्ञातं मया समुद्धर्तुं पितॄन्सगरवंशजान् ॥१०॥
गङ्गां पुण्यतमां धन्यां विष्णोर्देहकृताश्रयाम् ।
समानेष्यसि यत्रासन्सगरा भस्मरूपिणः ॥११॥
तत्र ते प्रार्थयाम्येतच्चतुर्दिक्ष्वेव भूपते ।
आसमुद्राच्चतुर्धारा भूत्वा मां स पुनाति वै ॥१२॥
यथा तथा विधातव्यं त्वया पुण्यात्मना सदा ।

राजोवाच—

यदा हरिपदाम्भोजान्निसृत्य द्रवरूपिणी ॥१३॥
शाम्भवी सा महाशक्तिर्मेरुशृङ्गमवाप्स्यति ।
तदा त्वयापि सा देवी समाराध्या सुरेश्वरी ॥१४॥
अहं च प्रार्थयिष्यामि त्वत्कृते तां विशेषतः ।
ततस्ते सम्भवित्री सा यथेष्टफलदायिनी ॥१५॥
अहं स्वर्गपुरं यामि तामानेतुमनाः क्षितौ ।
त्वमेहि तत्र तां भक्त्या सम्प्रार्थयितुमुत्तमाम् ॥१६॥

श्रीमहादेव उवाच—

राज्ञा सहैव सा क्षोणी सुप्रसन्नमुखाम्बुजा ।
स्वर्गाभिगमने चक्रे मतिं स्थिरतरां मुने ॥१७॥
ततः प्राह स राजापि सारथिं रथिनां वरः ।
वाहयस्व रथं तूर्णं स्वर्गं नय महाबल ॥१८॥
तच्छ्रुत्वा चालयामास सारथिस्तुरगोत्तमान् ।
वायुतुल्यप्रवेगान्वै तत्क्षणान्मुनिसत्तम ॥१९॥
ततः सम्प्राप सहसा मेरुशृङ्गं रथोत्तमः ।
राजा ददमौ महाशङ्खं युगान्तजलदस्वनम् ॥२०॥
स शब्दः समनुप्राप वैकुण्ठनगरं यदा ।
तदा विष्णुपदाम्भोजान्निःसृत्य द्रवरूपिणी ॥२१॥
गङ्गा कलकलध्वानं कृत्वा वेगवती स्वयम् ।
पात मेरुशृङ्गे तु प्रकृतिर्नीररूपिणी ॥२२॥

तदा राजातिहृष्टात्मा शङ्खशब्दं विहाय वै ।
ननर्त कृतकृत्यः सन्दृष्ट्वा गङ्गां द्रवात्मिकाम् ॥२३॥

विरते शङ्खशब्दे तु सापि वेगं विहाय वै ।
विरराम कियत्कालं तस्मिन्मेरोस्तु शीर्षके ॥२४॥

एतस्मिन्नन्तरे क्षोणी गङ्गां त्रैलोक्यपावनीम् ।
समुपागत्य तुष्टाव स्तोत्रेणानेन भक्तितः ॥२५॥

धरण्युवाच—

देवि गङ्गे जगद्धात्रि ब्रह्मरूपे सुरेश्वरि ।
लोकनिस्तारणार्थाय द्रवरूपे प्रसीद मे ॥२६॥

तवाम्बुकणिकां भक्त्याप्यभक्त्या वापि यः स्पृशेत् ।
सोऽपि मुक्तिमवाप्नोति गङ्गे देवि नमोऽस्तु ते ॥२७॥

ये त्वां पश्यन्ति लोका हि पापात्मानोऽपि वै सकृत् ।
न तेऽपि यमदण्डघाः स्युर्देवि गङ्गे नमोऽस्तु ते ॥२८॥

ये स्मरन्ति सकृन्नाम गङ्गेति परमाक्षरम् ।
न तस्यास्ति समो लोके देवो वा मानुषोऽपि वा ॥२९॥

त्वां नमन्ति सदा भक्त्या प्रकृतिं द्रवरूपिणीम् ।
न तेषां दुर्गतिः क्वापि न वा भीतिर्यमादपि ॥३०॥

प्राप्नुवन्ति परं मोक्षं गङ्गे देवि नमोऽस्तु ते ।
त्वमेका परमा शक्तिः सर्वभूताशये स्थिता ॥३१॥

अविद्योच्छेदिनी विद्या गङ्गे देवि नमोऽस्तु ते ।
अविद्याधारिणी विद्या विष्णुदेहकृतालये ।
विष्णुपादाब्जसम्भूते देवि गङ्गे नमोऽस्तु ते ॥३२॥

विश्वात्मिके जगद्वन्द्ये शिवध्यानपरायणे ।
गिरिराजसुते देवि गङ्गे देवि नमोऽस्तु ते ॥३३॥

त्वयि भक्तिस्त्वयि प्रीतिस्त्वयि श्रद्धा मतिस्त्वयि ।
येषामस्ति न ते मृत्योर्वशमायान्ति कुत्रचित् ॥३४॥

नवाऽधः पतनं तेषां न वा दुःखं न वा भयम् ।
त्वत्प्रसादाद्भवेद्देवि गङ्गे मातर्नमोऽस्तु ते ॥३५॥

शुद्धबोधात्मिके सर्वलोकचैतन्यरूपिणि ।
प्रसीद गङ्गे पापानि ध्वंस विश्वेशि ते नमः ॥३६॥

श्रीमहादेव उवाच—

इत्येवं संस्तुवन्तीं तां धरणीं जगदम्बिका ।
गङ्गा प्राह वचो देवीं दिव्यरूपां महामुने ॥३७॥

गङ्गोवाच—

क्षिते किं याचसे मत्तस्तद्ब्रूहि तव वाञ्छितम् ।
किमर्थं स्तौषि धरणि दृष्ट्वा मां वै द्रवात्मिकाम् ॥३८॥

धरण्युवाच—

अनुगृह्य महात्मानं राजानं त्वं भगीरथम् ।
प्रयासि विवरस्थानं यत्रास्य पितरः पुरा ।
भस्मीभूता मुनेः शापात्सगरस्य महामते ॥३९॥

अत्रैतत्प्रार्थये दिक्षु चतुर्ष्वेव सुरेश्वरि ।
आसमुद्राच्चतुर्धारा भूत्वा त्वं मम पृष्ठतः ।
विहृत्य सरितां श्रेष्ठे पवित्रं कुरु मे तनुम् ॥४०॥

गङ्गोवाच—

भगीरथस्तुता विष्णोः पदं त्यक्त्वाहमागता ।
न तस्याभिमतादन्यत्कर्तुं शक्नोमि किञ्चन ॥४१॥

श्रीमहादेव उवाच—

ततो भगीरथो राजा धरणीहितकाम्यया ।
प्रणिपत्य वचः प्राह गङ्गां परमवेगिनीम् ॥४२॥

राजोवाच—

मातर्गङ्गे महाभागे पुण्ये पुण्यतमोत्तमे ।
धरणीयमनुग्राह्या त्वया त्रिदशवन्दिते ॥४३॥

श्रीमहादेव उवाच—

एवं मतमभिज्ञाय राज्ञस्तस्य महामतेः ।
पश्चिमोत्तरपूर्वासु त्रिधा भूत्वानुवेगिनी ।
निःससार जगन्माता स्वर्गात्त्रैलोक्यपावनी ॥४४॥

अपरैका महाधारा भगीरथपथानुगा ।
अवाच्यां दिशि मार्गे तु स्वर्गे वेगवती बभौ ॥४५॥

सा धारा प्लावयित्वा च स्वर्गं सुरतरङ्गिणी ।
दक्षिणाभिमुखी वेगात्कियद्दूरं जगाम ह ॥४६॥

अग्रे भगीरथो राजा मध्याह्नार्कसमप्रभः ।
अपूर्वं रथमारुह्य ययायन्शङ्खमुपागमत् ॥४७॥

त्रिदिवं प्लवमानं तु दृष्ट्वा देवाः सकिन्नराः ।
देव्यश्च समुपागत्य गङ्गां भक्त्याभ्यपूजयन् ॥४८॥

अथाह देवराजस्तं राजानं सूर्यवंशजम् ।
विनयेन महाबाहुं सहितः सर्वदैवतैः ॥४९॥

भो भो क्षत्रियशार्दूल पुण्यकीर्ते भगीरथ ।
त्रैलोक्यदुर्लभां गङ्गां नीत्वा यासि महीतले ।
क्षणं तिष्ठ महाभाग वचोऽस्माकं निशामय ॥५०॥

इति देवाधिराजस्य वचः श्रुत्वा भगीरथः ।
विरम्य तत्र देवेशं प्रत्युवाच पुरन्दरम् ॥५१॥

किमर्थं देवराज त्वं ममादिशसि तद्वद ।
करिष्यामि तदेवाहं तवाज्ञावशगः प्रभो ॥५२॥

देवराज उवाच—

आनीता भवता गङ्गा ब्रह्मादीनां सुदुर्लभा ।
क्षितावेव समग्रां तां नीत्वा यासि कथं नृप ॥५३॥

एका सुललिता धारा स्वर्गे वाप्यवतिष्ठतु ।
यथा मर्त्ये तथा स्वर्गे कीर्तिस्तेऽपि विराजताम् ॥५४॥

श्रीमहादेव उवाच—

इति देवाधिराजस्य वचनं वै निशम्य सः ।
राजा सम्प्रार्थयामास गङ्गां तत्र महामुने ॥५५

मातर्गङ्गे महाभागे धारैका ते सुरालये ।
सम्पावनार्थं देवानामपि तिष्ठतु शोभना ॥५६॥

इत्येवं प्रार्थिता राज्ञा गङ्गा द्रवमयी तदा ।
भूत्वाऽपरा महाधारा उत्तराभिमुखी ययौ ॥५७॥

सा तु धारा महापुण्या स्वर्गलोकस्य पावनी ।
मन्दाकिनीति विख्याता स्थिता स्वर्गपुरे मुने ॥५८॥

तत्र देवाः सगन्धर्वाः सर्वे देवर्षयस्तथा ।
स्नानावगाहनं नित्यं कुर्वन्ति परमादृताः ॥५९॥

अथ राजा तु संध्माय शङ्खं भूयो रथोपरि।
दक्षिणां दिशमभ्यायाद्गङ्गां कृत्वा तु पृष्ठतः ॥६०॥
सुमेरोर्दक्षिणं शृङ्गं समवाप्य भगीरथः।
दृष्ट्वा तुङ्गं महाबाहुर्गङ्गामाह कृताञ्जलिः ॥६१॥
मातरेनं महाशृङ्गं निर्भिद्याहं कथं शिवे।
पृथिव्यां त्वां नयिष्यामि तन्मे वद सुरोत्तमे ॥६२॥

गङ्गोवाच—

अहमत्रैव तिष्ठामि त्वं चोल्लङ्घ्य गिरेः शिरः।
दक्षिणं पार्श्वमभ्येहि रथेनानेन भूपते ॥६३॥
तत्र त्वया कृते शङ्खनिस्वनेऽतिसुघोरके।
अहं परमवेगेन विनिर्भिद्य गिरेः शिरः।
अन्विष्य रथमार्गं ते चानुयास्यामि निश्चितम् ॥६४॥

श्रीमहादेव उवाच—

इति गङ्गाज्ञया राजा व्यतीत्य शिखरं गिरेः।
महता रथवेगेन दक्षिणं पार्श्वमाययौ ॥६५॥
तत्र दध्मौ महाशङ्खं युगान्तजलदस्वनम्।
तेनासीत्तुमुलः शब्दो व्याप्तं तेन नभोऽन्तरम् ॥६६॥
तमाकर्ण्य महाशब्दं गङ्गा परमवेगिनी।
निर्भिद्य दक्षिणं शृङ्गं मेरोः स्वयमवातरत् ॥६७॥

श्रीमहाभागवते उपपुराणे गङ्गानिर्गमनं नामाष्टषष्टितमोऽध्यायः

एकोनसप्ततितमोऽध्यायः

श्रीमहादेव उवाच—

ज्येष्ठे शुक्लदशम्यां तु गङ्गा वै निःससार ह।
परित्राणाय लोकानां महापातकिनामपि ॥१॥
तस्यां स्नानं तपो दानं गङ्गायां मुनिसत्तम।
महाफलप्रदं तद्वन्महापातकनाशनम् ॥२॥
दशजन्मार्जितं पापं हरते तत्र जाह्नवी।
तस्मात्सा दशमी प्रोक्ता मुने दशहरातिथिः ॥३॥

हस्तमङ्गलयोगे तु तस्यां भागीरथी स्वयम् ।
पापं दशविधं हन्ति दशजन्मसु सञ्चितम् ॥४॥
स्नानावगाहनैर्नृणां तस्मात्तस्यां प्रयत्नतः ।
स्नातव्यं देहिभिः सर्वैर्महापापापमुमुक्षुभिः ॥५॥
अथ स्वर्गाद्विनिःसृत्य राजंस्तस्य रथानुगा ।
महावेगवती गङ्गा दक्षिणां दिशमाययौ ॥६॥
पथि देवर्षिगन्धर्वैर्मनुजैश्चातिभक्तितः ।
चित्रपुष्पसमूहैश्च बिल्वपत्राक्षतादिभिः ॥७॥
समपूज्यत सा गङ्गा चारुदूर्वादलैरपि ।
तैः पुष्पैश्चित्रिता गङ्गा शुद्धस्फटिकसन्निभा ॥८॥
फेनैः सुरुचिरा वेगवती सुरतरङ्गिणी ।
व्यतीत्य पर्वतान्दुर्गान्दुर्भेद्यान्भीमनिःस्वना ॥९॥
द्रावयन्ती गजान् सिंहान्निषधाख्यं महाबलम् ।
व्यतीत्य हेमकूटं च हिमाद्रेः प्राप सन्निधिम् ॥१०॥
तत्रागत्य महावेगवती गङ्गा बभौ तदा ।
शम्भोर्मौलौ समारोढुं फेनराशिविचित्रिता ॥११॥
अथ ज्ञात्वा महादेवो गङ्गां निकटमागताम् ।
मौलौ विस्तीर्णजटया बद्ध्वा सेतुमितस्ततः ।
हिमाद्रेः शिखरे तस्थौ तां धर्तुं शिरसा मुने ॥१२॥
अथ वै ज्येष्ठमासस्य पौर्णमास्यां दिनार्धके ।
गङ्गावेगादनुप्राप शम्भोर्मौलिं महामते ॥१३॥
स ज्ञात्वा मौलिमापन्नां गङ्गां गङ्गाधरस्तदा ।
ननर्त परमानन्दः पूर्णात्मा जगदीश्वरः ॥१४॥
प्रमथास्तस्य देवस्य कोटिकोटिसहस्रशः ।
ननृतुः पार्श्वतस्तुष्टा वीक्ष्य नृत्यं महेशितुः ॥१५॥
गङ्गा शम्भोः शिरः प्राप्य परमानन्दसंयुता ।
व्यचरत्फेनपुष्पौघरुचिराऽतितरङ्गिणी ॥१६॥
राजा तु पश्चादालोक्य गङ्गया रहितां दिशम् ।
नृत्यन्तं देवदेवं च महाचिन्तापरोऽभवत् ॥१७॥
तत्र श्रुत्वा महाशब्दं शम्भोर्मौलौ भगीरथः ।
गङ्गां शम्भुशिरः प्राप्ता मेने परमकोपनाम् ॥१८॥

ततो महास्वनं शङ्खं राजा दध्मौ भगीरथः ।
तच्छ्रुत्वा व्यचरद्गङ्गा गवेषन्ती विनिर्गमम् ॥१९॥
शम्भोर्मौलौ महावेगा भगीरथवशानुगा ।
अप्राप्य निःसृतिद्वारं शङ्खध्वन्युपकर्षिता ।
निनाय च मुने तत्र वर्षमेकं महानदी ॥२०॥
अथ राजा महादेवं नृत्यन्तं प्रणिपत्य च ।
प्राञ्जलिः प्राह धर्मात्मा सूर्यवंशप्रदीपनः ॥२१॥

राजोवाच—

देवदेव जगद्वन्द्य प्रणतानां कृपाकर ।
देहि शीर्षात्सुरधुनीं पितॄणां त्राणहेतवे ॥२२॥
त्वयैव मे वरो दत्तो गङ्गा त्रिपथगा स्वयम् ।
विवरस्थानमभ्येति मत्पितॄनुद्धरिष्यति ॥२३॥
सेयं हरितनोश्चापि मयाऽऽनीता त्वया हृता ।
निष्कृतिस्तत्कथं देव मत्पितॄणां भविष्यति ॥२४॥
तस्मात्तां देहि निःसार्य शिरसः परमेश्वर ।
त्वया दत्तं वरं पूर्णं सफलं कुरु शङ्कर ॥२५॥

श्रीशिव उवाच—

दास्यामि सरितां श्रेष्ठां तुभ्यं राजन्न संशयः ।
पितॄणां ते विमुक्त्यर्थं प्राक्स्वीकृतवरेण हि ॥२६॥
किं त्वियं ज्येष्ठमासस्य दशम्यां शुक्लपक्षभे ।
हस्तमङ्गलयोगेन मच्छीर्षान्निःसरिष्यति ।
तावत्तिष्ठ महीपाल शिखरेऽस्मिन्महामते ॥२७॥

श्रीमहादेव उवाच—

इति श्रुत्वा मुनिश्रेष्ठ राजा तत्र भगीरथः ।
प्रतीक्ष्य तां तिथिं कालं व्यतीयाय कियत्तरम् ॥२८॥
ततः प्राप्य तिथिं तां तु राजा दध्मौ महास्वनम् ।
शङ्खं दिव्यतुषाराभं गङ्गे गङ्गेति चाब्रुवत् ॥२९॥
तच्छ्रुत्वा सा महावेगवती कलकलं ध्वनिम् ।
कृत्वा शम्भुजटामध्ये बभ्राम सरितां वरा ॥३०॥
अप्राप्य निःसृतिद्वारं पीडिता शङ्खनिःस्वनैः ।
शम्भोः शरणमापन्ना गङ्गा तं समुवाच ह ॥३१॥

गङ्गोवाच—

प्रभो देव जगन्नाथ तवाहं शरणं गता ।
देहि वर्त्म विनिर्यामि भगीरथवशानुगा ॥३२॥
पृथिव्यां सर्वभूतानां निस्तारार्थं महेश्वर ।
व्यथितास्मि भृशं राज्ञः शङ्खध्वानेन कर्षिता ॥३३॥

श्रीमहादेव उवाच—

इति गङ्गावचः श्रुत्वा शम्भुः सव्येन पाणिना ।
जटाबन्धं विनिर्भिद्य दक्षिणस्यां दिशि क्षणात् ॥३४॥
ततः सा निर्ययौ शम्भोः शीर्षान्निःसृत्य सस्वना ।
दक्षिणां दिशमत्युग्रवेगाद्राज्ञो रथं प्रति ॥३५॥
राजाऽपि चालयामास रथं हेमपरिष्कृतम् ॥३६॥
ध्मायन् शङ्खं महाशब्दं सत्वरो मुनिसत्तम ।
ततो गिरिपतेः पृष्ठे विहरन्तीं सरिद्वराम् ॥३७॥
गच्छन्तीं गर्जसिंहादीन्द्रावयन्तीं दिशो दश ।
श्रुत्वा मेना गिरीन्द्रश्च द्रष्टुं निकटमाययौ ॥३८॥
तौ दृष्ट्वा पितरौ गङ्गा प्रणिपत्य सुरोत्तमा ।
ताभ्यां सम्पूजिता तूर्णं पपात धरणीतले ॥३९॥
ततः समभवत्पुष्पवृष्टिर्दिक्षु विदिक्षु च ।
लोकानां जयशब्दश्च सर्वतः समपद्यत ॥४०॥
सम्प्राप्य धरणीपृष्ठं गङ्गा भागीरथी तदा ।
जज्वाल तेजसाऽतीव तप्तकाञ्चनसन्निभा ॥४१॥
वेगश्चतुर्गुणश्चासीन्निःस्वनश्च महत्तरः ।
तथापि धरणी गङ्गालाभादानन्दिताभवत् ॥४२॥
सापि वेगवती गङ्गा रथनेमिगतं मुनेः ।
पन्थानं मृगयन्त्यागाद्दक्षिणस्यां कलस्वना ॥४३॥
वृक्षान्शालपियालादीन्द्रोणपुष्पवनानि च ।
सर्वांश्च नगरग्रामगृहादीनि च सर्वतः ॥४४॥
प्लावयित्वा महादेवी स्तूयमाना सुरर्षिभिः ।
प्राभ्यधावत वेगेन भगीरथवशानुगा ॥४५॥

श्रीमहाभागवते उपपुराणे गङ्गाभूपृष्ठागमनं ऊनसप्ततितमोऽध्यायः

सप्ततितमोऽध्यायः

श्रीमहादेव उवाच—

व्यतीत्यैवं महादेवी योजनानां बहूनि सा ।
हरिद्वारं समायाता राज्ञा तेन महात्मना ॥१॥

तत्र सप्तर्षयो वीक्ष्य गङ्गां देवसुदुर्लभाम् ।
अभ्यर्च्य वीक्ष्य सानन्दाः शङ्खशब्देन नारद ॥२॥

दध्मुस्तेऽपि महाशङ्खान् सप्तसप्तसु दिक्षु च ।
तच्छ्रुत्वा सप्तधाराभूद्गङ्गा भागीरथी तदा ॥३॥

परमं वेगमास्थाय राज्ञस्तस्य ससीपतः ।
ततो निर्भिद्य पाषाणं वेगात्सा शाम्भवी परा ॥४॥

अग्निकोणमुखी प्रायात्सरिद्भिः सङ्गतापगा ।
प्रयागदेशमागत्य सार्धं यमुनया शिवा ॥५॥

सरस्वत्या च सम्मिश्रा समभून्मुनिपुङ्गव ।
तत्र भागीरथी पुण्या देवानामपि दुर्लभा ॥६॥

तत्र स्नानं तपो दानं पुण्यात्पुण्यतरं मुने ।
अपि ब्रह्मादयः सर्वे सुराधीशाश्च तत्र वै ।
स्नात्वा पवित्रमात्मानं मन्यन्तेऽन्यस्य का कथा ॥७॥

ततः पूर्वमुखी भूत्वा कियद्दूरं महेश्वरी ।
द्रष्टुं महेश्वरं काश्यामुत्तराभिमुखी ययौ ॥८॥

तत्र पुण्यतमा गङ्गा महापापविमोचनी ।
महामोक्षप्रदा काशी यथा तद्वच्च सा मुने ॥९॥

ज्ञानतोऽज्ञानतो वापि देहं सन्त्यजतः शिवा ।
निर्वाणमोक्षदा देवी तत्र गङ्गा सुरोत्तमा ॥१०॥

न तत्र त्यजतां देहं देहिनां पापिनामपि ।
अपेक्षा विद्यते मुक्तौ सत्यं सत्यं महामुने ॥११॥

सर्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा ।
हरिद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥१२॥

अथ गङ्गां तु सम्प्राप्तां काशीं परमवेगिनीम् ।
दृष्ट्वा क्षेत्राभिसंरक्षाकारी भैरवपुङ्गवः ॥१३॥

दण्डमुद्यम्य वेगेन प्राम्यधावत नारद ।
स प्राह गङ्गा दुर्धर्षः का त्वं नीरमयी कुतः ॥१४॥
समायाता कथं काशीं संप्लावयसि निम्नगे ।
पुरीयं देवदेवस्य शङ्करस्य महात्मनः ॥१५॥
एतस्य रक्षकं किं त्वं मां न जानासि भैरवम् ।
अथ गङ्गाऽब्रवीद्वाक्यं भैरवं भीमलोचनम् ॥१६॥
उद्यद्दण्डकरं घोरं साक्षात्कालं युगान्तकम् ।
अहं द्रवमयी गङ्गा देवी शङ्करगेहिनी ॥१७॥
आयाता धरणीपृष्ठं शम्भोर्मौलौ प्रतिष्ठिता ।
द्रष्टुं विश्वेश्वरं काश्यां निकटं समुपागता ।
न काशीं प्लावयिष्येऽहं तिष्ठ त्वं कालभैरव ॥१८॥

श्रीमहादेव उवाच—

एवमुक्तो महाबाहुर्गङ्गया कालभैरवः ।
संहृत्य दण्डं तां नेमे देवीं शङ्करगेहिनीम् ॥१९॥
एवं सम्मानिता तत्र भैरवेण महात्मना ।
कामाख्यां द्रष्टुमुद्युक्ता गङ्गा पूर्वानताभवत् ॥२०॥
तदभिज्ञाय राजापि किञ्चित्कालं महामतिः ।
सारथिं वारयामास शङ्खध्मानं न्यवारयत् ॥२१॥
एतस्मिन्नेव काले तु जह्नुः शङ्खमवादयत् ।
तच्छ्रुत्वा चातिवेगेन गङ्गा तस्याश्रमं ययौ ॥२२॥
तत्र वेगेन गच्छन्तीं दृष्ट्वा गङ्गां भगीरथः ।
भूयो दध्मौ महाशङ्खं महाजलदनिःस्वनम् ॥२३॥
तच्छब्दं सा निशम्याथ पूर्वशब्दं बुबोध च ।
जह्नुनाम्ना मुनीन्द्रेण हृता परमतेजसा ॥२४॥
ततः श्रुत्वा भगवती गङ्गा क्रोधान्विता मुने ।
तस्याश्रमं प्लावयितुं ययौ वेगसमाश्रिता ॥२५॥
तज्ज्ञात्वा स मुनिश्चापि ब्रह्मतेजोबलेन च ।
गण्डूषीकृत्य तां गङ्गां समस्तां निःपपौ हठात् ॥२६॥
ततश्च समभूच्छब्दो हा हेति दिवि सर्वतः ।
क्षितौ च मनुजादीनां सर्वेषां प्राणिनां तथा ॥२७॥

रुरोद राजा दुःखार्तः पृथ्वी दुःखमवाप च ।
दिशश्च व्याकुला आसन् म्लानतेजा दिवाकरः ॥२८॥
ततो रुदन्तं संवीक्ष्य राजानं भक्तवत्सला ।
उवाच शङ्खं भूयस्त्वं वादयस्व भगीरथ ॥२९॥
न मां संरक्षितुं शक्तः कोऽपि लोके महामते ।
त्वच्छङ्खनिःस्वनाकृष्टमानसामतिवेगिनीम् ॥३०॥
गङ्गयैवं समादिष्टो राजा हृष्टमनाः पुनः ।
दध्मौ शङ्खं महाशब्दं क्षोभयन्धरणीतलम् ॥३१॥
तच्छ्रुत्वा सा महादेवी जानू निर्भिद्य तस्य वै ।
निःससार महावेगा सहसातितरङ्गिणी ॥३२॥
ततो गङ्गातिवेगेन मुनिजङ्घाद्बहिर्गता ।
मुनिश्चापि तदा ज्ञात्वा नत्वा स्तुतिमथाकरोत् ॥३३॥

मुनिरुवाच—

मातस्त्वं परमासि शक्तिरतुला सर्वाश्रया पावनी
लोकानां सुखमोक्षदाखिलजगत्सम्वन्द्यपादाम्बुजा ।
न त्वां वेद विधिर्न वा स्मररिपुर्नो वा हरिर्नापरे
सञ्जानन्ति शिवे महेशशिरसा मान्ये कथं वेद्म्यहम् ॥३४॥
किं तेऽहं प्रवदामि रूपचरितं यच्चेतसो दुर्गमं
पारावारविवर्जितं सुरधुनी ब्रह्मादिभिः पूजिता ।
स्वेच्छाचारिणि संवितत्य करुणां स्वीयैर्गुणैर्मां शिवे
पुण्यं त्वं तु कृतागसं शरणगं गङ्गे क्षमस्वाम्बिके ॥३५॥
धन्यं मे भुवि जन्म कर्म च तथा धन्यं तपो दुष्करं
धन्यं मे नयनं यतस्त्रिनयनाराध्या दृशा लोकये ।
धन्यं मत्करयुग्मकं तव जलं स्पृष्टं यतस्तेन वै
धन्यं मत्तनुरप्यहो तव जलं तस्मिन्यतः सङ्गतम् ॥३६॥
नमस्ते पापसंहर्त्रि हरमौलिविराजिते ।
नमस्ते सर्वलोकानां हिताय धरणीगते ॥३७॥
स्वर्गापवर्गदे देवि गङ्गे पतितपावनि ।
त्वामहं शरणं यातः प्रसन्ना मां समुद्धर ॥३८॥

श्रीमहादेव उवाच—

एवं स्तुता मुनीन्द्रेण गङ्गा तं मुनिसत्तमम् ।
दिव्यरूपधरोवाच सुप्रसन्नमुखाम्बुजा ॥३९॥

सप्ततितमोऽध्यायः

गङ्गोवाच—

अहं तव सुता तात यतस्त्वद्देहनिर्गता ।
तव नास्त्यपराधोऽत्र मुने त्वं सुस्थिरो भव ॥४०॥

अद्यप्रभृति मे नाम जाह्नवीत्यभवत्पितः ।
कीर्तिस्ते हि मुनिश्रेष्ठ लोके ख्याता भविष्यति ॥४१॥

ये स्मरिष्यन्ति लोकेऽत्र जाह्नवीति सकृन्मुने ।
न तेषां प्रभविष्यन्ति पापानि दुःखमेव वा ॥४२॥

त्वं च मे परमो भक्तस्तवैव चरितं च ये ।
स्मरिष्यन्ति मुनिश्रेष्ठ तेषां तुष्टा ह्यहं तदा ॥४३॥

श्रीमहादेव उवाच—

एवमाभाष्य बहुधा गङ्गा तं मुनिसत्तमम् ।
पूजिता तेन सद्भक्त्या गन्तुमिच्छुर्महामतिम् ।
राजानमब्रवीद्वाक्यं पुण्यकीर्तिं भगीरथम् ॥४४॥

गङ्गोवाच—

त्वया सम्प्रार्थिता तात त्यक्त्वा विष्णुशरीरकम् ।
आगताहं महीपृष्ठं तेनैव वशगा तव ॥४५॥

प्राच्यामहं सममवं कामाख्यादर्शनेच्छया ।
तत्र प्रथममेवाभून्मुनिना सह वैरसम् ॥४६॥

तत्त्वां पृच्छामि ते यत्र गमने वर्तते रुचिः ।
तत्राहमनुयास्यामि यथारुचि तथा वद ॥४७॥

राजोवाच—

दक्षिणस्यां मुनेः शापान्मम पूर्वपितामहाः ।
भस्मीभूतास्तु येषां त्वामुद्धाराय धरातलम् ।
आनीतवानहं तेषामुद्धाराय द्रुतं व्रज ॥४८॥

श्रीमहादेव उवाच—

इत्युक्त्वा तं महाबाहुः पुनः शङ्खमपूरयत् ।
गङ्गापि प्रययौ पश्चाद्दक्षिणां दिशमेव हि ॥४९॥

ततो राजा कियद्दूरं गत्वा श्रान्तो भगीरथः ।
विरराम रथोपस्थः सारथिश्च श्रमातुरः ॥५०॥

एतस्मिन्नन्तरे जह्नोर्मुनेः पुत्री महामते ।
पद्माऽभ्यवादयच्छङ्खं दिदृक्षुर्भगिनीं मुने ॥५१॥

तच्छ्रुत्वा चञ्चला देवी तच्छब्दं प्रति वेगिता ।
वह्निकोणमुखी प्रागात्स्वल्पदूरं सुनिम्नगा ॥५२॥
राजा विलोक्य गच्छन्तीं गङ्गामन्यत्र तत्क्षणात् ।
सारथिं कथयामास चालयाश्वान्द्रुतं सखे ॥५३॥
गङ्गान्यत्र निशम्यैव शङ्खध्वानविमोहिता ।
सन्धावति यथा गौर्वा वत्सशब्दातिकर्षिता ॥५४॥
एवमुक्त्वा स राजापि द्रुतं शङ्खमवादयत् ।
सारथिश्च रथं तूर्णं चालयामास नारद ॥५५॥
तदाकर्ण्य पुनर्देवी राज्ञस्तस्य रथानुगा ।
समभूत्तेन पथातिक्रुद्धा जलमयी बभौ ॥५६॥
सा तु पूर्वदिशं प्रायाद्विस्तीर्णसलिला नदी ।
पुण्या वेगवती सिन्धुराजेनापि सुसङ्गता ॥५७॥
ततः सा तु महादेवी गङ्गा या पापहारिणी ।
वेगं परममास्थाय दक्षिणां दिशमभ्यगात् ॥५८॥
अन्वेषयन्ती सगरान्वयांस्तु समुद्रसान्निध्यमुपेत्य वेगिता ।
धारासहस्रैः परितोऽस्य विस्तृता बभौ स तस्याः कलनिःस्वनाकुलः ॥५९
सिन्धुस्तदाज्ञाय सुरेशपूजितां गङ्गां महावेगवतीं समागताम् ।
आगत्य धारां परिसंवितत्य वै अभ्यर्चयत्पुष्पसुगन्धधूपकैः ॥६०॥

श्रीमहाभागवते उपपुराणे श्रीगङ्गासमुद्रतीरप्राप्तिर्नाम सप्ततितमोऽध्यायः

एकसप्ततितमोऽध्यायः

श्रीमहादेव उवाच—

ततः सा सिन्धुना सङ्गं समवाप्य महामुने ।
परमं मोदमापन्ना विवरं समुपेत्य च ॥१॥
पातालमुपसङ्गम्य कपिलस्यान्तिकं ययौ ।
कपिलस्त्वथ विज्ञाय गङ्गां देवादिदुर्लभाम् ॥२॥
आगतां लोकभाग्येन पाद्याद्यैः समपूजयत् ।
तेन सम्पूजिता गङ्गा प्रत्युवाच महामुनिम् ॥३॥

मुने ब्रूहि द्रुतं कुत्र सगरा भस्मरूपिणः ।
ततः सन्दर्शयामास मुनिः सगरसन्ततीः ॥४॥

दृष्ट्वा गङ्गापि तद्भस्मात्मानं प्रापयत क्षणात् ।
प्लावयामास वेगेन सर्वतो भस्मसात्कृतान् ॥५॥

सगरान्सरितां श्रेष्ठा गङ्गा त्रैलोक्यगामिनी ।
तत्क्षणात्सगरास्ते तु दिव्यरूपधराऽभवन् ॥६॥

अपूर्वं रथमास्थाय ब्रह्मलोकमुपागमन् ।
पितॄणां निष्कृतिं दृष्ट्वा राजा परमहर्षितः ॥७॥

ननर्त स रथोपस्थे जय गङ्गेति संस्तुवन् ।
दध्मौ शङ्खं महाशब्दं रोमाञ्चितकलेवरः ॥८॥

तेजस्वी तरुणादित्यसन्निभो राजवन्दितः ।
गङ्गा तद्ध्वनिमाकर्ण्य महावेगं समाश्रिता ॥९॥

विवरद्वारतो भस्म मर्त्यलोकमुपानयत् ।
धारानुसंस्थिता चैका पातालेऽपि मुनिर्मला ॥१०॥

ख्याता भोगवती सा तु सर्वलोकफलप्रदा ।
सा तथा क्रमतो गत्वा कारुण्यं जलमाविशत् ।
ब्रह्माण्डं भासते यत्र मुने शतसहस्रशः ॥११॥

भगीरथस्तु सम्पूज्य गङ्गां सागरसङ्गताम् ।
प्रणम्य स्वपुरं प्रायात्प्रसन्नात्मा महीश्वरः ॥१२॥

एवं भगवती गङ्गा विष्णुदेहकृतालया ।
हिताय सर्वभूतानां पृथिव्यां समुपागमत् ॥१३॥

य इदं पुण्यमाख्यानं गङ्गावतरणं क्षितौ ।
पठेद्वा पाठयेद्वापि तस्य मुक्तिः करे स्थिता ॥१४॥

आयुर्वृद्धिर्भवेत्तस्य यशोवृद्धिश्च जायते ।
सर्वत्र लभते सौख्यं मङ्गलं सर्वतो भवेत् ॥१५॥

पितृश्राद्धदिने विप्रसन्निधौ भक्तितत्परः ।
प्रपठेद्य इदं तस्य पितरः परमां गतिम् ॥१६॥

समुपायान्ति सन्तुष्टाः पापिनोऽपि महामते ।
अकालेऽप्यथवाऽदेशे कृतं दम्भाश्रितैरपि ।
पितॄणां परमप्रीतिकारणं तद्भुवेद्ध्रुवम् ॥१७॥

एकादशीदिने भक्त्या यः पठेत्प्रयतो नरः ।
तस्य गङ्गाप्रसादेन सर्वसिद्धिः प्रजायते ॥१८॥
अतुलं वर्धते सौख्यं पुत्रदारादिसङ्कुलम् ।
गृहाश्रमं श्रिया युक्तं भवेद्देव्याः प्रसादतः ॥१९॥
काश्यां यः प्रपठेदेतत्पुण्याख्यानं महामुने ।
स साक्षादेव विश्वेशो लोकानां मोक्षदायकः ॥२०॥
तस्य सन्दर्शनात्पापी मुच्यते घोरपातकात् ।
सङ्क्रान्त्यां पौर्णमास्यां वा यः पठेदेतदुत्तमम् ॥२१॥
पुण्याख्यानं स चाप्नोति वाजिमेधफलादिकम् ।
गङ्गातीरं समभ्येत्य स्नात्वा नियममास्थितः ॥२२॥
यः पठेच्छृणुयाद्वापि न तस्यास्ति समो भुवि ।
लिखितं तिष्ठते वापि गेहे यस्यैतदुत्तमम् ॥२३॥
तेषां न प्रभवेत्क्वापि दौर्भाग्यं वा रिपुः क्वचित् ।
आजन्म गङ्गास्नानस्य फलं चापि समुद्भवेत् ॥२४॥
न तस्य ग्रहपीडा स्यान्नवा बन्धुवियोजनम् ।
न व्याधिपीडनं वापि जायते शत्रुतो भयम् ॥२५॥
गङ्गासमं क्षितौ तीर्थं विद्यते न महामुने ।
तस्मात्तस्याः समाख्यानं महापुण्यतमं स्मृतम् ॥२६॥

श्रीमहाभागवते उपपुराणे श्रीगङ्गाविवरस्थलद्वारात्पातालप्राप्तिर्नामैकसप्तति-तमोऽध्यायः

द्विसप्ततितमोऽध्यायः

श्रीमहादेव उवाच—

सेयं सुरधुनी पुण्या महापातकनाशिनी ।
स्पर्शनाद्दर्शनाच्चापि निर्वाणफलदायिनी ॥१॥
इदानीं शृणु वक्ष्यामि माहात्म्यं मुनिसत्तम ।
गङ्गाया द्रवरूपिण्याः संक्षेपेण समाहितः ॥२॥
प्रातरुत्थाय यो गङ्गां हेलयापि नरः स्मरेत् ।
न तस्याशुभभीतिस्तु विद्यते भुवनत्रये ॥३॥

प्रवर्तते गृहे सम्पद्विनश्यन्त्यापदः क्षणात् ।
पापानि संक्षयं यान्ति जन्मान्तरकृतान्यपि ॥४॥
भवन्ति च सुपुण्यानि चाशयानि महामते ।
दुस्स्वप्नदर्शने वापि विपत्तावतिदुर्गमे ।
स्मृत्वा गङ्गां सकृन्मर्त्यो मुच्यते नात्र संशयः ॥५॥
क्रियारम्भे स्मरेद्देवीं गङ्गां त्रैलोक्यपावनीम् ।
तदा सा सफला भूयाद्यथाविधि कृतापि च ॥६॥
जपहोमादिसंसक्तः प्राकृतं यदि भाषते ।
तदा स्मृत्वा सकृद्गङ्गां पुनः कर्म समाचरेत् ॥७॥
मुमुक्षुर्यत्र कुत्रापि यदि गङ्गामनुस्मरेत् ।
तदा तन्मुक्तये गङ्गासन्निधौ वसते स्वयम् ॥८॥
सर्वार्थसाधिनी गङ्गा सर्वपापप्रमोचिनी ।
सर्वाशुभविहन्त्री च सर्वसम्पत्प्रदायिनी ॥९॥
स्वर्गापवर्गदा पुंसां प्रत्यक्षा प्रकृतिः स्वयम् ।
यस्तां नैव स्मरेत्तस्य विफलं जीवनं स्मृतम् ॥१०॥
सर्वतीर्थकृतस्नानैः सर्वदेवाभिपूजनैः ।
सर्वयज्ञतपोदानैः सर्वतीर्थाभिदर्शनैः ॥११॥
सर्वाभिवन्द्यपादाब्जवन्दनैः स्तवनैरपि ।
यथा न जायते पुण्यं तथा गङ्गास्मृतेर्भवेत् ॥१२॥
नाम्नां सहस्रमध्ये तु सत्यं सत्यं महामुने ।
भगवत्याः परं नाम गङ्गेति समुदीरितम् ॥१३॥
नीचोऽपि कथितः श्रेष्ठो गङ्गास्मृतिपरायणः ।
प्रोक्तस्त्वनुत्तमो नीचो गङ्गास्मृतिपराङ्मुखः ॥१४॥
न गङ्गास्मरणं यत्र दिने समुपजायते ।
तद्दिनं दुर्दिनं ज्ञेयं मेघच्छन्नं च दुर्दिनम् ॥१५॥
मिथ्याभाषणजं पापं परदाराभिसम्भवम् ।
अवैधहिंसाजनितं सुरापानादिजं तथा ॥१६॥
अन्यच्च दुरितं किञ्चिद्यद्यदस्ति महामते ।
तत्सर्वं विलयं याति गङ्गानामानुसंस्मृतेः ॥१७॥
गङ्गामुद्दिश्य यो गच्छेन्नरः प्रयतमानसः ।
पदे पदेऽश्वमेधः स्याद्वाजपेयशतं तथा ॥१८॥

नृत्यन्ति पितरः सर्वे गङ्गामुद्दिश्य गच्छताम् ।
पापानि प्रपलायन्ते गर्हितान्यपि दूरतः ॥१९॥
मुमूर्षुर्जाह्नवीयात्रां कुरुते यस्तु मानवः ।
तं दृष्ट्वा दूरतो यान्ति यमदूता भयार्दिताः ॥२०॥
देहावसानकं तस्य यत्र कुत्रापि सम्भवेत् ।
तत्रैव मुक्तिर्विज्ञेया गङ्गायां तु विशेषतः ॥२१॥
गङ्गामुद्दिश्य गच्छन्तं पथि भाग्यादुपस्थितम् ।
आतिथ्यं कुरुते यस्तु तस्य पुण्याधिकं स्मृतम् ॥२२॥
प्रणमेच्चापि तं यस्तु विनयेनाभिभाषते ।
सोऽपि पापात्प्रमुच्येत सत्यं सत्यं न संशयः ॥२३॥
यस्तु मोहात्तिरस्कुर्यात्स पापात्मा तु नारद ।
पच्यते नरके घोरे यावदिन्द्राश्चतुर्दश ॥२४॥
कृतापराधो यदि वा भवेद्गङ्गानुगो जनः ।
सोऽपि त्याज्यः क्षितीशेन न च दण्ड्यः कथञ्चन ॥२५॥
गङ्गामुद्दिश्य सङ्गच्छन् श्रान्तो यस्य जलं पिबेत् ।
कूपवापीतडागानां तस्य भाग्यं महत्तरम् ॥२६॥
अशक्तो गमने यस्तु व्रजन्तं जाह्नवीं प्रति ।
यानैः प्रस्थापयेद्वत्स तस्य पुण्यं निबोध मे ॥२७॥
पितरः परमां प्रीतिं प्राप्नुवन्ति च शाश्वतीम् ।
पुण्यं च जायते यस्य पापं सर्वं विनश्यति ॥२८॥
अन्ते च मृत्युर्विज्ञेयो निश्चितं जाह्नवीजले ।
पृथिव्यां परमा कीर्तिः सन्ततिः पुत्रपौत्रिकी ॥२९॥
शाश्वती जायते तस्य चान्ते गङ्गास्मृतिर्भवेत् ।
गङ्गादर्शनमात्रेण ब्रह्महापि नरः क्षणात् ।
मुच्यते घोरपापेभ्यो मुने नास्त्यत्र संशयः ॥३०॥
आगत्य प्रणमेद्देवीं यस्तु भक्त्या समाहितः ।
शरीरं सार्थकं यस्य नृषु जन्म च सार्थकम् ॥३१॥
धन्याश्च पितरस्तस्य स तु धन्यतमः स्मृतः ।
न तस्य विद्यते पापं नापि मृत्युभयं तथा ॥३२॥
अतुलं लभते सौख्यं परत्र च महामते ।
गङ्गायां जायते मृत्युर्गङ्गास्मृतिपुरःसरम् ॥३३॥

दर्शनात्कृतकृत्याश्च गङ्गायाः सर्वदेवताः ।
ऋषयश्च महात्मानो मानवानां तु का कथा ॥३४॥
सम्पर्केणापि यो गङ्गां सम्पश्यति महामते ।
न सोऽपि यमदण्डघ्नः स्यात्कृतपापसहस्रकः ॥३५॥
अत्र ते शृणु वक्ष्यामि रहस्यमतिशोभनम् ।
सेतिहासं मुनिश्रेष्ठ गङ्गामाहात्म्यमुत्तमम् ॥३६॥
पुराऽऽसीदतिदुर्धर्षः शवरान्वयसम्भवः ।
व्याधः परमपापात्मा नाम्ना सर्वान्तको बली ॥३७॥
आजीवं विनिहत्यैव प्राणिनः स बहून् बलात् ।
मांसादिविक्रयं कृत्वा स्वकुटुम्बमबीभरत् ॥३८॥
परस्त्रीगमनं चक्रे परद्रव्यापहारणम् ।
न तु धर्माश्रितं कर्म कृतं तेन दुरात्मना ॥३९॥
स ह्येकदा वनं गत्वा हत्वाऽनेकविधान्पशून् ।
नद्यास्तीरं समासाद्य भ्रान्तश्चक्रेऽवगाहनम् ॥४०॥
एतस्मिन्नन्तरे राजा चित्रसेनो नृपोत्तमः ।
मृगयार्थं समायातस्तस्मिन्नेव हि कानने ॥४१॥
स ददर्श दुरात्मानं व्याधं सर्वान्तकाह्वयम् ।
मांसभारसमायुक्तं स्वपुरे गमनोद्यतम् ॥४२॥
एतस्मिन्नेव काले तु राजा दृष्ट्वा मृगोत्तमम् ।
बाणं धनुषि सन्धाय लक्षं चक्रे महाबलः ॥४३॥
मृगस्तु वीक्ष्य राजानमुद्यतास्त्रं महौजसम् ।
प्राम्यधावत वेगेन राजा बाणं समाहिनोत् ॥४४॥
तेन विद्धो मृगः सोऽपि तस्य व्याधस्य सन्निधिम् ।
उपागमन्मुनिश्रेष्ठ स्रवद्रक्तपरिप्लुतः ॥४५॥
व्याधस्त्वदृष्ट्वा राजानं मृगं दृष्ट्वा च विह्वलम् ।
क्लेशेन बद्ध्वा जगृहे राजा तच्च व्यलोकयत् ॥४६॥
ततः स राजाऽप्यागत्य क्रुद्धस्तं पापचेतसम् ।
बबन्ध बलवान्पाशैर्विविधैर्मुनिसत्तम ॥४७॥
ततस्तु मृगमादाय राजा तं चापि पापिनम् ।
स्वपुरं प्रति निर्यातः समारुह्य हयोत्तमम् ॥४८॥

तत्र नावं समारुह्य गङ्गां राजा समातरत् ।
व्याधो ददर्श तां देवीं तदा सम्पर्कतो मुने ॥४९॥

ततो राजा समागत्य पुरं तं पापचेतसम् ।
कारागारेऽतिसंक्रुद्धः स्थापयामास दुःसहे ॥५०॥

ततः काले गते तत्र व्याधः सर्वान्तकाह्वयः ।
ममार बद्ध्वा तं पाशैर्यमदूता उपागमन् ॥५१॥

एतस्मिन्नेव काले तु शिवदूताः शिवाज्ञया ।
निर्जित्य यमदूतांस्ताञ्छिवलोकमुपानयन् ॥५२॥

ततस्ते निर्जिता दूता धर्मराजमुपेत्य च ।
न्यवेदयन्यथावृत्तं शिवदूताभिचेष्टितम् ॥५३॥

तच्छ्रुत्वा धर्मराजस्तु चित्रगुप्तं महामतिम् ।
पप्रच्छ एष व्याधः किं नीतः सर्वेशसन्निधिम् ॥५४॥

पश्यास्य विद्यते पापं पुण्यं वापि तथा कियत् ।
विना पापं न पश्यामि पुण्यं किञ्चिदहं पुनः ॥५५॥

ततः स चित्रगुप्तस्तु धर्माधर्मविवेचकः ।
न्यवेदयच्च सम्पर्काद्गङ्गादर्शनमुत्तमम् ॥५६॥

सर्वपापहरं पुण्यं महापातकनाशनम् ।
तच्छ्रुत्वा विस्मयं प्राप्य धर्मराजो महामते ।
गङ्गां प्रणम्य दूतांस्तानिदं वचनमब्रवीत् ॥५७॥

धर्मराज उवाच—

दूताः पश्यन्ति ये गङ्गां सम्पर्केणातिपावनीम् ।
न ते कदाचिन्मे दण्ड्या अपि पापशतैर्युताः ॥५८॥

ये स्मरन्ति सकृद्गङ्गां देवीं पतितपावनीम् ।
न ते कदाचिन्मे दण्ड्या अपि पापशतैर्वृताः ॥५९॥

ये ध्यायन्ति सदा भक्त्या देवीं तां द्रवरूपिणीम् ।
न तेऽपि मम दण्ड्या वै कृतपापशता अपि ॥६०॥

येऽभ्यर्चन्ति तु तां गङ्गां विनिमज्जन्ति वाम्भसि ।
न ते कदाचिन्मे दण्ड्या महापातकिनो जनाः ॥६१॥

गङ्गायां त्यजतां देहमहमाज्ञावशः स्वयम् ।
ते नमस्याः सुरेन्द्राणां दण्डशङ्कास्ति तत्कृतः ॥६२॥

श्रीमहादेव उवाच—

इत्येवं विनिशम्य ते यमभटा गङ्गाप्रभावं मुने
वक्त्राच्छ्रीयमराजधर्मविदुषो जग्मुः परं विस्मयम् ।
अध्यायं प्रपठेत्समाहितमना यश्चैनमत्युत्तमं
नो भीतिः खलु विद्यते यमभटात्तस्योरुपापादपि ॥६३॥

श्री महाभागवते उपपुराणे श्रीगङ्गामाहात्म्यकथने
द्विसप्ततितमोऽध्यायः ॥

त्रिसप्ततितमोऽध्यायः

श्रीमहादेव उवाच—

गङ्गायां तु कृतस्नानो मुच्यते घोरपातकात् ।
ब्रह्महा चैव गोघ्नश्च सुरापो गुरुतल्पगः ॥१॥
पतितोऽपि महादेव्याः प्रसादान्मुनिसत्तम ।
विना मन्त्रादिभिश्चापि सद्भक्तिविधुरोऽपि च ॥२॥
सकृत्स्नात्वा नरो ज्ञानादज्ञानादपि मुच्यते ।
अनन्तं जायते पुण्यमक्षयं सप्तजन्मजम् ॥३॥
वित्तं परमसौख्यं च जायते जाह्नवीतटे ।
विधियुक्तेन कृतस्नाने भक्त्या गङ्गाजले मुने ॥४॥
निर्धूतपापः परमं पदं याति नरोत्तमः ।
अन्यत्रापि स्मरन् गङ्गां यदि स्नानं समाचरेत् ।
तत्रापि लभते पुण्यं गङ्गास्नानजतुल्यकम् ॥५॥
प्रातः स्नानं तु यः कुर्यात्प्रत्यहं जाह्नवीजले ।
स पुण्यात्मा मुनिश्रेष्ठ साक्षाच्छम्भुरिवापरः ॥६॥
तं दृष्ट्वा पापिनो पापान्मुच्यन्ते नात्र संशयः ।
तुलामकरमेषेषु प्रातःस्नानं विधानतः ।
यः कुर्याज्जाह्नवीतोये तस्य पुण्यं निबोध मे ॥७॥
उद्धृत्योभयवंश्यानां पितॄणां बहुकोटिशः ।
स्वयं शङ्करतामेति देहं त्यक्त्वा न संशयः ॥८॥
महायज्ञसहस्राणि व्रतपूजाशतानि च ।
नार्हन्ति जाह्नवीस्नानकलामेकां महामुने ॥९॥

माघस्य शुक्लसप्तम्यां गङ्गायामरुणोदये ।
स्नात्वा प्रमुच्यते प्राणी जन्मसंसारबन्धनात् ॥१०॥

तस्मिन्नेव दिने सूर्यं पूजयन् जाह्नवीतटे ।
मुक्तो भवेन्महारोगाद्रोगी सत्यं न संशयः ॥११॥

पौर्णमास्यां नरः स्नात्वा विधिवज्जाह्नवीजले ।
निर्धूतपापः सायुज्यमन्ते प्राप्नोति शम्भुना ॥१२॥

कार्तिक्यां पौर्णमास्यां तु स्नात्वा दृष्ट्वा च जाह्नवीम् ।
महापातकसङ्घैस्तु मुच्यते नात्र संशयः ॥१३॥

चैत्रकृष्णत्रयोदश्यां स्नात्वा विधिविधानतः ।
सर्वपापविनिर्मुक्तः प्रयाति परमं पदम् ॥१४॥

आरोग्यमतुलैश्वर्यं यदन्यच्च मनोगतम् ।
सर्वं सम्पद्यते गङ्गाप्रसादान्मुनिपुङ्गव ॥१५॥

अन्यच्चापि दिने यस्मिन्कस्मिन्नपि महामते ।
स्नात्वा पापविनिर्मुक्तः प्रयाति परमं पदम् ॥१६॥

सन्तर्पयन्ति गङ्गायां पितॄन्ये तु समाहिताः ।
तेषां तु पितरो यान्ति ब्रह्मलोकमनामयम् ॥१७॥

उद्धृत्य गङ्गासलिलं नान्यत्र तर्पयेत्पितॄन् ।
तर्पयेद्यदि मोहेन प्रायश्चित्ती भवेत्तदा ॥१८॥

पितॄन्सन्तर्पयेद्यो हि गङ्गायां सुसमाहितः ।
स एव प्रोच्यते पुत्रो नान्यः पुत्रः समुच्यते ॥१९॥

गङ्गातीर्थं समासाद्य श्राद्धं कुर्याच्च तर्पणम् ।
पितॄणां तृप्तये मर्त्यस्त्वन्यथा नरकं व्रजेत् ॥२०॥

गङ्गामुद्दिश्य गच्छन्तं वीक्ष्य तस्य पितामहाः ।
श्राद्धं बुभुक्षवः सर्वे नृत्यन्ति प्रहसन्ति च ॥२१॥

निराशाः पितरो यान्ति श्राद्धाभावे यतो मुने ।
तस्मात्स निरयं याति यदि श्राद्धं न चाचरेत् ॥२२॥

गङ्गासलिलपक्वान्नं देवानामपि दुर्लभम् ।
तदन्नेन कृते श्राद्धे पितरो यान्ति निर्वृतिम् ॥२३॥

सन्तुष्टाः पितरो यस्य तस्य जन्म च सार्थकम् ।
विफलं जीवनं तस्य पितरो यस्य कोपिताः ॥२४॥

रुष्टैः पितृगणैर्नृणां धर्मो नैव प्रजायते ।
तस्मात्पितॄन्सुसन्तर्प्य धर्मकर्म समाचरेत् ॥२५॥
गङ्गायां यदि भाग्येन चन्द्रसूर्यग्रहं लभेत् ।
तदा स्नात्वा पितृश्राद्धं कुर्याद्विधिविधानतः ।
अक्षय्यं तद्भवेच्छ्राद्धं पितृणां तृप्तिकारकम् ॥२६॥
गङ्गाश्राद्धशतं श्रेष्ठं निर्वाणपददायकम् ।
पुरश्चर्यां तदा कृत्वा सिद्धमन्त्रो भवेत्पुमान् ॥२७॥
असाध्यं साधयेच्चापि शिवतुल्यो भवेत्स्वयम् ।
पुरश्चरणकृच्छ्राद्धं कारयेदन्यतोऽपि वा ॥२८॥
न श्राद्धविरहं कुर्यात्कदाचिदपि मोहितः ।
अक्षय्यायां युगाद्यायां स्नात्वा वै जाह्नवीजले ॥२९॥
पितॄन्सन्तर्प्य दानेन न पुनर्जन्ममाग्भवेत् ॥३०॥
गङ्गायां तु पुरश्चर्यां कृत्वा पापविवर्जितः ।
सिद्धमन्त्रो महाज्ञानी भवेद्वै साधकोत्तमः ॥३१॥
दानं ध्यानं जपो होमोऽभ्यर्चनं श्राद्धतर्पणम् ।
बहुपुण्यकरं प्रोक्तं गङ्गायां मुनिसत्तम ॥३२॥
गङ्गायां मोहतो नैव विण्मूत्रं विसृजेन्नरः ।
विसृजेन्निरयं याति यावदिन्द्राश्चतुर्दश ॥३३॥
असत्यभाषणं लोभं हित्वा च परनिन्दनम् ।
परद्रोहादिकं पापं वर्जयेत्सुसमाहितः ॥३४॥
यदि कुर्याच्च मोहेन तदा तत्पापशान्तये ।
कृत्वा स्नानं नमस्कृत्य क्षेत्रादन्तर्हितो भवेत् ॥३५॥
यस्तु गङ्गां महादेवीं प्रकृतिं नीररूपिणीम् ।
नदीति मन्यते मोहात्स याति नरकान्बहून् ॥३६॥
साक्षाद्ब्रह्ममयीं पूर्णां लोकानां त्राणहेतवे ।
द्रवरूपेण निर्याता शक्तिराद्येति भावयेत् ॥३७॥
सर्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा ।
हरिद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥३८॥
महाफलप्रदा गङ्गा तस्मात्तत्र विशेषतः ।
प्रयतः स्नानदानादीन्कुर्यान्मर्त्यो महामतिः ॥३९॥

काश्यां यस्तु समागत्य गङ्गायां विधिवन्नरः ।
स्नानमुत्तरवाहिन्यां कुरुते भक्तिभावतः ॥४०॥

स साक्षाच्छिवतामेति देवपूज्यतमः स्मृतः ।
पितृणां तर्पणं चापि तत्र निर्वाणदायकम् ॥४१॥

सर्वतीर्थादिनिलया काशी विश्वेश्वरालया ।
दुर्लभा पृथिवीबाह्या पृथिव्यन्तःस्थितापि च ॥४२॥

सा स्थली जाह्नवीतोयं जलं यत्र महामते ।
तत्र मुक्तिः करस्था तु देहिनां पापिनामपि ॥४३॥

अन्नपूर्णान्नदा यत्र माता देहभृतां स्वयम् ।
गङ्गा च जलदा यत्र ज्ञानदा च सरस्वती ॥४४॥

ब्राह्मादितो मुनिश्रेष्ठ यत्र मृत्युः परं पदम् ।
पिता विश्वेश्वरो यत्र मोक्षमार्गोपदेशतः ॥४५॥

तां काशीं यो न सेवेत विधिना वञ्चितस्तु सः ।
मणिकर्ण्यां कृतस्नानः काश्यां विश्वेश्वरं प्रभुम् ।
सम्पूज्य बिल्वपत्राद्यैः शिवसायुज्यमाप्नुयात् ॥४६॥

गङ्गामृत्तिकया कृत्वा तिलकं मुनिसत्तम ।
यत्किञ्चित्कुरुते कर्म तत्सर्वं पूर्णतामियात् ॥४७॥

यत्रकुत्रापि गङ्गायाः सलिलैर्देवपूजनम् ।
श्राद्धाभिषेककर्मादि कुरुते मानवोत्तमः ॥४८॥

ज्ञानतोऽज्ञानतो वापि विधिहीनं भवेद्यदि ।
वाग्भिकं भावमास्थाय कृतं वा द्रव्यवर्जितम् ॥४९॥

अशुद्धद्रव्यसङ्गेन कृतं वा पापचेतसा ।
सम्पूर्णफलदं सर्वं तथापि खलु तद्भवेत् ॥५०॥

श्रीमहाभागवते उपपुराणे श्रीगङ्गामाहात्म्यकथने त्रिसप्ततितमोऽध्यायः ।

चतुःसप्ततितमोऽध्यायः

श्रीमहादेव उवाच—

गङ्गायां सन्त्यजन्देहं ज्ञानतो मुनिसत्तम ।
कैवल्यं समवाप्नोति मानवः पापवर्जितः ॥१॥
अज्ञानाच्छिवसायुज्यं त्यक्त्वा तत्र कलेवरम् ।
प्राप्नुयान्मानवो गङ्गाप्रसादादतिपातकी ॥२॥
मृतस्य यत्रकुत्रापि मांसमस्थि च नारद ।
प्रपतेज्जाह्नवीतोये सोऽपि स्वर्गमवाप्नुयात् ॥३॥
यदि पापसहस्रं स्याद्ब्रह्महत्यादिगर्हितम् ।
यत्रकुत्रस्थितं मांसमस्थि गङ्गाजलं लभेत् ।
मृतस्य सोऽपि निर्याति स्वर्गं लोकमनामयम् ॥४॥
गङ्गायां च जले मुक्तिर्वाराणस्यां जले स्थले ।
जले स्थले चान्तरिक्षे त्रिधा सागरसङ्गमे ॥५॥
अत्रेतिहासं वक्ष्यामि शृणु सावहितो मुने ।
आश्चर्यं महदाख्यानं मुने श्रोतृसुखावहम् ॥६॥
आसीत्परमपापात्मा वैश्यो नाम्ना धनाधिपः ।
दस्युकर्मरतो नित्यं परदाररतः सदा ॥७॥
स पापात्मा त्यजन्देहं यमस्य वशतामगात् ।
यमस्तं पातयामास नरके त्वसिपत्रके ॥८॥
देहस्तस्य त्वनिर्दग्धः स्थितोऽरण्यस्य मध्यतः ।
तं चखाद शृगालस्तु क्षुधार्तो मुनिसत्तम ॥९॥
एतस्मिन्नन्तरे तत्र कानने मुनिसत्तम ।
आगत्य गृध्रराजस्तं शृगालं प्राग्यधावत ॥१०॥
वियद्गतोऽतिश्रान्तस्तु गङ्गायां समुपेत्य वै ।
पपौ जलं मुनिश्रेष्ठ तत्र तन्मांसमाविशत् ॥११॥
तत्तोयस्पर्शमात्रेण स पापी घोरकिल्बिषात् ।
विमुक्तः शाङ्करं देहं प्राप्य स्वर्गं जगाम ह ॥१२॥
रक्षकास्त्वसिपत्रस्थं गच्छन्तं वीक्ष्य पापिनम् ।
धर्मराजमुपागत्य वचनं चेदमब्रुवन् ॥१३॥

रक्षका ऊचुः—

प्रभोऽसिपत्रे नरके यः पापी रक्षितस्त्वया ।
स साक्षाच्छाङ्करं देहं प्राप्य स्वर्गं जगाम ह ॥१४॥

तच्छ्रुत्वा विस्मयं प्राप्य यमः प्राह भटान्प्रति ।
विज्ञाय कारणं तस्य ज्ञानदृष्ट्या तपोधनः ॥१५॥

यम उवाच—

दूता गङ्गाजलस्पर्शात्शृगालकवलीकृते ।
मांसे चातिनिकृष्टोऽपि मुक्तोऽसौ सहसाऽभवत् ॥१६॥

श्रीमहादेव उवाच—

तच्छ्रुत्वा विस्मयं प्राप्य दूताः स्वस्थानमाययुः ।
स्मरन्तो जाह्नवीतोयमाहात्म्यं मुनिसत्तम ॥१७॥
स तु स्वर्गपुरे देवैः स्तूयमानो महामते ।
सम्प्राप्य शिवसायुज्यं मुमोद सुचिरं मुने ॥१८॥
एवं भगवती गङ्गा महापातकनाशिनी ।
दर्शनात्स्पर्शनाच्चापि मोक्षदा च यतस्ततः ॥१९॥
सर्वात्मना नरो भक्त्या गङ्गामेव समाश्रयेत् ।
अद्य वाब्दशतान्ते वा मृत्युर्नैयत्यवर्जितः ।
तस्मात्प्रागेव तां गङ्गां मुमुक्षुः समुपाश्रयेत् ॥२०॥
अतर्कितमिवागम्य शमनोऽतिदुरासदः ।
यावत्केशान्न गृह्णाति तावद्गङ्गामुपाश्रयेत् ॥२१॥
पुत्रमित्रकलत्रादि न बन्धुः कथ्यते मुने ।
गङ्गैव परमा बन्धुर्भवमोचनकारिणी ॥२२॥
दर्शनात्स्पर्शनान्नामकीर्तनाद्ध्यानतोऽपि च ।
सुखदा मोक्षदा गङ्गा बन्धुः परम ईरिता ॥२३॥
महाघोरतरे याम्ये भये निर्भयदायिनीम् ।
गङ्गां ये नाश्रयन्तीह ज्ञेयास्ते चात्मघातिनः ॥२४॥
वृथा पुत्रादिकं सर्वं मोहबन्धप्रवर्तकम् ।
शाश्वतीं मुक्तिदा गङ्गेत्येवं मत्वा समाश्रयेत् ॥२५॥
मुमूर्षुं प्रापयेद्गङ्गां निर्वाणपददायिनीम् ।
सोऽपि निर्वाणमायाति जाह्नव्यास्तु प्रसादतः ॥२६॥
गङ्गैव परमो बन्धुर्गङ्गैव परमं सुखम् ।
गङ्गैव परमं वित्तं गङ्गैव परमा गतिः ॥२७॥
गङ्गैव परमा मुक्तिर्गङ्गा सारतरेति ये ।
विभावयन्ति तेषां तु न दूरस्था कदाचन ॥२८॥

गङ्गेति वदतां गङ्गा पृष्ठतश्चानुधावति ।
शङ्खस्वनाद्यथा पूर्वं भगीरथमुपाययौ ॥२९॥
गङ्गातीरं परित्यज्य योऽन्यत्र निवसेन्नरः ।
करस्थां सन्त्यजन्मुक्तिं सोऽन्वेषी नरकस्य तु ॥३०॥
धन्यः स देशो यत्रास्ति गङ्गा त्रैलोक्यपावनी ।
गङ्गाहीनस्तु यो देशो न प्रदेशः स भण्यते ॥३१॥
गङ्गातीरे वरं भिक्षा वरं प्राणवियोजनम् ।
अन्यत्र पृथिवीपत्यं न नरः प्रार्थयेत्क्वचित् ॥३२॥
यस्मिन्देशे वसेदेको गङ्गाभक्तिपरो नरः ।
सोऽपि पुण्यतमो देशस्तत्र दानं महाफलम् ॥३३॥
श्राद्धं च तर्पणं तत्र पितॄणां तृप्तिकारकम् ।
अनन्तफलदं ज्ञेयं जपहोमादिकं तथा ॥३४॥
गङ्गा नाम परं सौख्यं गङ्गा नाम परं तपः ।
गङ्गेति संस्मरन्नित्यं तस्य नास्ति यमाद्भयम् ॥३५॥

श्रीमहाभागवते उपपुराणे गङ्गाजलस्पर्शेन धनाधिपमुक्तिपदगमनं नाम चतुःसप्ततितमोऽध्यायः ॥

पञ्चसप्ततितमोऽध्यायः

श्रीनारद उवाच—

गङ्गा नाम परं पुण्यं कथितं परमेश्वर ।
नामानि कति शस्तानि गङ्गायाः प्रणिशंस मे ॥१॥

श्रीमहादेव उवाच—

नाम्नां सहस्रमध्ये तु नामाष्टशतमुत्तमम् ।
जाह्नव्या मुनिशार्दूल तानि मे शृणु तत्त्वतः ॥२॥
ॐ गङ्गा त्रिपथगा देवी शम्भुमौलिविहारिणी ।
जाह्नवी पापहन्त्री च महापातकनाशिनी ॥३॥
पतितोद्धारिणी स्रोतस्वती परमवेगिनी ।
विष्णुपादाब्जसम्भूता विष्णुदेहकृतालया ॥४॥
स्वर्गाध्वनिलया साध्वी स्वर्णदी सुरनिम्नगा ।
मन्दाकिनी महावेगा स्वर्णभृङ्गप्रभेदिनी ॥५॥

देवपूज्यतमा दिव्या दिव्यस्थाननिवासिनी ।
सुचारुनीररुचिरा महापर्वतभेदिनी ॥६॥
भागीरथी भगवती महामोक्षप्रदायिनी ।
सिन्धुसङ्गगता शुद्धा रसातलनिवासिनी ॥७॥
महाभोगा भोगवती सुभगानन्ददायिनी ।
महापापहरा पुण्या परमाह्लाददायिनी ॥८॥
पार्वती शिवपत्नी च शिवशीर्षगतालया ।
शम्भोर्जटामध्यगता निर्मला निर्मलानना ॥९॥
महाकलुषहन्त्री च जह्नुपुत्री जगत्प्रिया ।
त्रैलोक्यपावनी पूर्णा पूर्णब्रह्मस्वरूपिणी ॥१०॥
जगत्पूज्यतमा चारुरूपिणी जगदम्बिका ।
लोकानुग्रहकर्त्री च सर्वलोकदयापरा ॥११॥
याम्यभीतिहरा तारा पारा संसारतारिणी ।
ब्रह्माण्डभेदिनी ब्रह्मकमण्डलुकृतालया ॥१२॥
सौभाग्यदायिनी पुंसां निर्वाणपददायिकी ।
अचिन्त्यचरिता चारुरुचिरातिमनोहरा ॥१३॥
मर्त्यस्था मृत्युभयहा स्वर्गमोक्षप्रदायिनी ।
पापापहारिणी दूरचारिणी वीचिचारिणी ॥१४॥
कारुण्यपूर्णा करुणामयी दुरितनाशिनी ।
गिरिराजसुता गौरी भगिनी गिरिशप्रिया ॥१५॥
मेनकागर्भसम्भूता मैनाकभगिनी प्रिया ।
आद्या त्रिलोकजननी त्रैलोक्यपरिपालिनी ॥१६॥
तीर्थश्रेष्ठतमा श्रेष्ठा सर्वतीर्थमयी शुभा ।
चतुर्वेदमयी सर्वा पितृसन्तृप्तिदायिनी ॥१७॥
शिवदा शिवसायुज्यदायिनी शिववल्लभा ।
तेजस्विनी त्रिनयना त्रिलोचनमनोरमा ॥१८॥
सप्तधारा शतमुखी सगरान्वयतारिणी ।
मुनिसेव्या मुनिसुता जह्नुजानुप्रभेदिनी ॥१९॥
मकरस्था सर्वगता सर्वाशुभनिवारिणी ।
सुदृश्या चाक्षुषीतृप्तिदायिनी मकरालया ॥२०॥

सदानन्दमयी नित्यानन्ददा नगपूजिता ।
सर्वदेवाधिदेवैश्च परिपूज्यपदाम्बुजा ॥२१॥

एतानि मुनिशार्दूल नामानि कथितानि ते ।
शस्तानि जाह्नवीदेव्याः सर्वपापहराणि च ॥२२॥

य इदं पठते भक्त्या प्रातरुत्थाय नारद ।
गङ्गायाः परमं पुण्यं नामाष्टशतमेव हि ॥२३॥

तस्य पापानि नश्यन्ति ब्रह्महत्यादिकान्यपि ।
आरोग्यमतुलं सौख्यं लभते नात्र संशयः ॥२४॥

यत्रकुत्रापि संस्नायात्पठेत्स्तोत्रमनुत्तमम् ।
तत्रैव गङ्गास्नानस्य फलं प्राप्नोति निश्चितम् ॥२५॥

प्रत्यहं प्रपठेदेतद्गङ्गानामशताष्टकम् ।
सोऽन्ते गङ्गामनुप्राप्य प्रयाति परमं पदम् ॥२६॥

गङ्गायां स्नानसमये यः पठेद्भक्तिसंयुतः ।
सोऽश्वमेधसहस्राणां फलमाप्नोति मानवः ॥२७॥

गवामयुतदानस्य यत्फलं समुदीरितम् ।
तत्फलं समवाप्नोति पञ्चम्यां प्रपठन्नरः ॥२८॥

कार्त्तिक्यां पौर्णमास्यां तु स्नात्वा सागरसङ्गमे ।
यः पठेत्स महेशत्वं याति सत्यं न संशयः ॥२९॥

सिन्धुना तीर्थराजेन सर्वतीर्थमयी स्वयम् ।
सङ्गता समभूद्यत्र तीर्थं नास्ति ततोऽधिकम् ॥३०॥

अन्यत्र जाह्नवीतीर्थे निर्वाणं ज्ञानतो भवेत् ।
वाराणस्यां स्थले वापि जले वा मुनिसत्तम ॥३१॥

ज्ञानादज्ञानतश्चापि विज्ञानं परिकल्पितम् ।
स्थले वा जाह्नवीतोये गगनेऽज्ञानतोऽपि च ।
अज्ञानादपि सन्त्यज्य देहं मुक्तिमवाप्नुयात् ॥३२॥

तत्र त्यजति यो देहं नरोऽन्यस्येच्छया मुने ।
सोऽपि निर्वाणमाप्नोति महातीर्थप्रसादतः ॥३३॥

तीर्थश्रेष्ठतमां गङ्गां नृणां सर्वार्थसाधिनीम् ।
शक्तिं नीरमयीं मूर्तिं लोकनिस्तारकारिणीम् ॥३४॥

अविद्याछेदिनीं देवीं ब्रह्मविद्याप्रदायिनीम्।
गृहीत्त इव केशेषु मृत्युना समुपाश्रयेत् ॥३५॥

इत्युक्तं ते मुनिश्रेष्ठ गङ्गामाहात्म्यमुत्तमम् ।
पवित्रं परमं गुह्यं महापातकनाशनम् ॥३६॥

यश्चैतन्महदाख्यानं प्रपठेद्भक्तिसंयुतः ।
स देव्याः पदवीं याति मुने नास्त्यत्र संशयः ॥३७॥

यत्रैतत्पठ्यते पुण्यं गङ्गामाहात्म्यमुत्तमम् ।
तत्र गङ्गा वसेत्साक्षात्सर्वतीर्थैः समावृता ॥३८॥

अत्र यत्क्रियते कर्म दैवं पित्र्यं च मानवैः ।
तदक्षयतमं लोके फलदं परिकीर्तितम् ॥३९॥

लिखितं तिष्ठते यत्र पुण्याख्यानमिदं मुने ।
तद्देशं न स्पृशेत्पापं भयात्सत्यं न संशयः ॥४०॥

आसन्ने मृत्युकाले तु भक्त्या यः शृणुयान्नरः ।
न मृत्युवशतामेति स याति परमां गतिम् ॥४१॥

एकादश्यां कृतस्नानस्तुलसीबिल्वसन्निधौ ।
उपोष्य प्रपठेदेतत्स याति परमां गतिम् ॥४२॥

पितृश्राद्धदिने यस्तु पठेद्विप्रस्य सन्निधौ ।
तस्य तृप्तिमुपायान्ति पितरः शाश्वतीं मुने ॥४३॥

महाष्टम्यां निशीथे तु प्रपठेन्मानवोत्तमः ।
स याति परमं सौख्यं महादेव्याः प्रसादतः ॥४४॥

आत्यन्तिकं मुनिश्रेष्ठ फलमेतस्य कथ्यते ।
नैतस्य सदृशं लोके पुण्याख्यानं प्रगीयते ॥४५॥

महापापहरं पुण्यं स्मृतं पुण्यतमादपि ।
एतदाख्यानमाकर्ण्य नरः स्वर्गमवाप्नुयात् ॥४६॥

श्रीमहाभागवते उपपुराणे श्रीगङ्गादेव्या अष्टोत्तरशतनाम
पञ्चसप्ततितमोऽध्यायः ॥

षट्सप्ततितमोऽध्यायः

श्रीनारद उवाच—

अहो देव जगन्नाथ श्रुत्वा तव मुखाम्बुजात् ।
गङ्गामाहात्म्यमतुलं पवित्रोऽस्मि न संशयः ॥१॥
भूयस्ते श्रोतुमिच्छामि माहात्म्यमति विस्तरात् ।
कामरूपस्य तीर्थस्य तत् समाचक्ष्व साम्प्रतम् ॥२॥

श्रीमहादेव उवाच—

शृणु सावहितो वक्ष्ये माहात्म्यं मुनिसत्तम ।
कामरूपस्य तीर्थस्य यत्र साक्षात्स्वयं शिवा ।
प्रत्यक्षफलदा मर्त्ये स्थानं नास्ति ततोऽधिकम् ॥३॥
यत्र देवाः सगन्धर्वा ब्रह्माद्याश्च सुरोत्तमाः ।
प्रत्यहं समुपागत्य सेवन्ते भक्तितत्पराः ॥४॥
योनिरूपा महामाया पूर्णाद्या परमेश्वरी ।
पृथ्व्यां लोकहितार्थाय यत्रास्ते निजलीलया ॥५॥
यत्राकार्षीत्तपः पूर्वं ब्रह्मा विष्णुस्तथेश्वरः ।
अभीष्टुर्भगवत्यास्तु कामाख्यं मुनिसत्तम ॥६॥
यत्र कृत्वा पुरश्चर्यां वसिष्ठो मुनिसत्तमः ।
सिद्धमन्त्रोऽभवत्पूर्वं सृष्टिकर्त्रेव चापरः ॥७॥
अव्याहताज्ञा ये चान्ये सिद्धा देवर्षयस्तथा ।
ते सर्वे मुनिशार्दूल कामाख्यायाः प्रसादतः ॥८॥
सिद्धमन्त्राः सममदंस्तत्र जप्त्वा महामनुम् ।
खेचरत्वमनुप्रापुस्तथा देवाधिपूज्यताम् ॥९॥
योनिरूपां भगवतीं सुगुप्तां मुनिसत्तम ।
दृष्ट्वा स्पृष्ट्वा सुसम्पूज्य जीवन्मुक्तो भवेन्नरः ॥१०॥
विहरेत्पृथिवीपृष्ठे शूलपाणिरिवापरः ।
निग्रहानिग्रहे शक्तो देवानामपि नारद ॥११॥
तदाज्ञावशगाः सर्वे देवा इन्द्रपुरोगमाः ।
नासाध्यं विद्यते तस्य मुने लोकत्रये तथा ॥१२॥
तस्यैव जन्म सफलं यो गत्वा योनिमण्डले ।
प्रणमेत्परया भक्त्या देवीं त्रिपुरभैरवीम् ॥१३॥

क्षेत्रस्पर्शनमात्रेण ब्रह्महापि नरः क्षणात् ।
मुच्यते नात्र सन्देहः कामाख्यायाः प्रसादतः ॥१४॥
कामाख्यादर्शनं वत्स देवानामपि दुर्लभम् ।
तद्यः पश्यति कामाख्यां स देवपरिपूजितः ॥१५॥
जन्मान्तरसहस्रैस्तु सञ्चितं पापपुञ्जकम् ।
क्षणेन भस्मसात्कुर्यात्कामाख्यायाः प्रदर्शनम् ॥१६॥
गोपनीयं त्वया वत्स नान्यत्रैतत्प्रकाश्यताम् ।
कामाख्यासदृशं तीर्थं नास्त्येव धरणीतले ॥१७॥
अङ्गप्रत्यङ्गपातेन सत्याः पुण्यतमो मुने ।
देशो भारतखण्डेऽस्मिन्नृणां पापप्रणाशकः ॥१८॥
अङ्गेषु भगवत्यास्तु योनिः श्रेष्ठतमा यतः ।
योनिरूपा हि सा देवी सर्वासु स्त्रीष्ववस्थिता ॥१९॥
सा योनिः पतिता यत्र तत्र साक्षात्स्वयं सती ।
तेन नास्ति समं स्थानं पुण्यदं धरणीतले ॥२०॥
शम्भुर्वाराणसीक्षेत्रे नराणां मुक्तिदायकः ।
आराध्यः सिद्धगन्धर्वैर्देवकिन्नरराक्षसैः ॥२१॥
स शम्भुः काङ्क्षते यत्र मुक्तिस्तस्मान्महेश्वरीम् ।
प्रत्यहं समुपागत्य स्थानं नास्ति ततोऽधिकम् ॥२२॥
प्रदक्षिणं कृतं येन तीर्थं श्रीयोनिमण्डलम् ।
कृतं लोकत्रयं तेन प्रदक्षिणमशेषतः ॥२३॥
निर्माल्यं शिरसा यस्तु कामाख्यायाः प्रधारयेत् ।
स देवपूयतामेत्य विहरेद् भैरवोपमः ॥२४॥
न तस्य विद्यते भीतिः कुत्रापि धरणीतले ।
भयदाः प्रपलायन्ते भयात्तस्य सुदूरतः ॥२५॥
प्रसादो येन केनापि दत्तो देव्या महामुने ।
प्राप्तिमात्रेण भोक्तव्यो नात्र कार्या विचारणा ॥२६॥
उत्तमोऽपि मुने वर्णो न्यूनवर्णादवाप्य वै ।
प्रसादं भक्षयेद्भक्त्या नत्वा च शिरसा पुनः ।
विभूतिं समवाप्नोति कैवल्यं तत्प्रसादतः ॥२७॥
तत्र श्राद्धं कृतं येन पितॄणां तृप्तिमिच्छता ।
गयाश्राद्धं कृतं तेन सहस्राब्दं न संशयः ॥२८॥

लौहित्ये तु कृतस्नानः प्रयतः साधकोत्तमः ।
पुरश्चर्यां नरः कृत्वा सिद्धमन्त्रो भवेद्ध्रुवम् ॥२९॥
अव्याहताज्ञः स भवेन्भवेश्वर इवापरः ।
भूचरः खेचरत्वं च प्राप्नुयात्तत्प्रसादतः ॥३०॥
कालादींस्तत्र मोहेन कदाचिन्न विचारयेत् ।
पुरश्चर्याविधौ मन्त्री विचार्य नरकं व्रजेत् ॥३१॥
सुरत्वं सुरराजत्वं ब्रह्मत्वं वा शिवत्वकम् ।
विष्णुत्वं सुलभं तत्र जपतां भैरवीमनुम् ॥३२॥
जमदग्निसुतो रामः कार्तवीर्यवधेच्छया ।
तत्र कृत्वा पुरश्चर्यां प्रत्यक्षं विष्णुतामगात् ॥३३॥
तथैव भुवि ये चान्ये कुर्युस्तत्र पुरस्क्रियाम् ।
ते सर्वे समतामेत्य अन्ते मोक्षमवाप्नुयुः ॥३४॥
कामाख्या परमं तीर्थं कामाख्या परमं तपः ।
कामाख्या परमो धर्मः कामाख्या परमा गतिः ॥३५॥
कामाख्या परमं वित्तं कामाख्या परमं पदम् ।
विमार्ष्टयैवं मुनिश्रेष्ठ न पुनर्जन्ममाग्भवेत् ॥३६॥
दर्शनं बहुसाहस्रजन्मान्तरसुसञ्चितम् ।
विद्यते सुमहत्पुण्यं यस्य तस्यैव जायते ॥३७॥
तीर्थं श्रीकामरूपाख्यं देवानामपि दुर्लभम् ।
अन्येषां दुर्लभं ज्ञेयं देवीलोकं यथा मुने ॥३८॥

श्रीमहाभागवते उपपुराणे कामाख्यामाहात्म्यवर्णने
षट्सप्ततितमोऽध्यायः ।

सप्तसप्ततितमोऽध्यायः

श्रीनारद उवाच—
कामरूपे महाक्षेत्रे काऽधिष्ठात्री महेश्वरी ।
विद्यानां दशमूर्तीनां तन्मे ब्रूहि महेश्वर ॥१॥

श्रीमहादेव उवाच—
दशैवैता महाविद्याः क्षेत्रस्था मुनिसत्तम ।
साधकानां हितार्थाय जपपूजाफलप्रदाः ॥२॥
कामाख्या कालिका देवी स्वयमाद्या सनातनी ।
तस्याः पार्श्वे स्थिताश्चान्या नव विद्या महामते ॥३॥

सर्वविद्यात्मिका काली कामाख्यारूपिणी यतः ।
ततस्तां तत्र सम्पूज्य पूजयित्वेष्टदेवताम् ।
इष्टमन्त्रं जपेद्भक्त्या सिद्धमन्त्रो भवेत्तदा ॥४॥
ध्यायतां परमेशानीं कामाख्यां कालिकां पराम् ।
रक्तवस्त्रपराधीनां घोरनेत्रत्रयोज्ज्वलाम् ॥५॥
चतुर्भुजां भीमदंष्ट्रां युगान्तजलदद्युतिम् ।
मणिसिंहासने न्यस्तां सिंहप्रेताम्बुजस्थिताम् ॥६॥
हरिः सिंहः शवः शम्भुर्ब्रह्मा कमलरूपधृक् ।
ललज्जिह्वां महाघोरां किरीटकनकोज्ज्वलाम् ॥७॥
अनर्घ्यमणिमाणिक्यघटितैर्भूषणोत्तमैः ।
अलङ्कृतां जगद्धात्रीं सृष्टिस्थित्यन्तकारिणीम् ॥८॥
वामे तारा भगवती दक्षिणे भुवनेश्वरी ।
अग्नौ तु षोडशी विद्या नैर्ऋत्यां भैरवी स्वयम् ॥९॥
वायव्यां छिन्नमस्ता च पृष्ठतो बगलामुखी ।
ऐशान्यां सुन्दरी विद्या चोर्ध्वमनङ्गनायिका ॥१०॥
याम्यां धूमावती विद्या महापीठस्य नारद ।
अधस्ताद्भगवान्भूद्रो भस्माचलमयः स्वयम् ॥११॥
ब्रह्मविष्णुमुखाश्चान्ये देवाः शक्तिसमन्विताः ।
सदा सन्निहितास्तत्र पीठे लोके सुदुर्लभे ॥१२॥
तत्र सम्पूजयेद्देवीं परिवारसमन्विताम् ।
विविधैरुपचारैश्च यथाशक्तिमविस्तरैः ॥१३॥
इच्छन्देव्याः परां प्रीतिं सद्भक्त्या प्रयतो नरः ।
न पुनर्जननाशङ्का विद्यते मुनिसत्तम ॥१४॥
बिल्वपत्रं महादेव्यै यो दद्याद्भक्तिभावतः ।
स साक्षाच्छङ्करो ज्ञेयः सर्वलोकेश्वरेश्वरः ॥१५॥
त्रिपत्रं बिल्वपत्रं तु ब्रह्मविष्णुशिवात्मकम् ।
यदात्मकमिदं सर्वं जगत्स्थावरजङ्गमम् ॥१६॥
तद्ददाति च यो देव्यै पूर्णायै मुनिसत्तम ।
सम्पूर्णजगतो दानफलं सम्प्राप्नुयान्नरः ॥१७॥
सम्पूर्णकामो भूपृष्ठे विहरेन्मानवोत्तमः ।
तस्य जन्म च सम्पूर्णं न पुनर्जायते क्वचित् ॥१८॥

तत्र यो भक्तिभावेन भस्मावलमयं शिवम् ।
पूजयेद्भस्मलिप्ताङ्गो बिल्वपत्रैर्महामते ।
स याति परमं मोक्षं भुक्त्वा भोगं मनोरथम् ॥१९॥
रुद्राक्षं बिभृयान्नित्यं शैवः शाक्तोऽथ वैष्णवः ।
युक्तस्तेन महापुण्यं कृत्वा कर्म समश्नुते ॥२०॥
रुद्राक्षधारी सम्पूज्य रुद्रं संहारकारकम् ।
रुद्रत्वं समवाप्नोति क्षेत्रेऽस्मिन्नात्र संशयः ॥२१॥
अमायां वा चतुर्दश्यामष्टम्यां वा दिनक्षये ।
नवम्यां रजनीयोगे योजयेद्भैरवीमनुम् ॥२२॥
क्षेत्रेऽस्मिन्प्रयतो भूत्वा निर्भयः साहसं वहन् ।
तस्य साक्षाद्भगवती प्रत्यक्षं जायते ध्रुवम् ॥२३॥
आत्मसंरक्षणार्थाय मन्त्रसंसिद्धयेऽपि च ।
प्रपञ्चैकवचं देव्यास्ततो भीतिर्न जायते ॥२४॥
तस्मात्पूर्वं विधायैवं रक्षां सावहितो नरः ।
प्रजपेत्स्वेष्टमन्त्रस्तु निर्भीतो मुनिसत्तम ॥२५॥

नारद उवाच—

कवचं कीदृशं देव्या महाभयनिवर्तकम् ।
कामाख्यायास्तु तद्ब्रूहि साम्प्रतं मे महेश्वर ॥२६॥

श्रीमहादेव उवाच—

शृणुष्व परमं गुह्यं महाभयनिवर्तकम् ।
कामाख्यायाः सुरश्रेष्ठ कवचं सर्वमङ्गलम् ॥२७॥
यस्य स्मरणमात्रेण योगिनीडाकिनीगणाः ।
राक्षस्यो विघ्नकारिण्यो याश्चान्याः विघ्नकारिकाः ॥२८॥
क्षुत्पिपासा तथा निद्रा तथान्ये ये च विघ्नदाः ।
दूरादपि पलायन्ते कवचस्य प्रसादतः ॥२९॥
निर्भयो जायते मर्त्यस्तेजस्वी भैरवोपमः ।
समासक्तमनाश्चापि जपहोमादिकर्मसु ।
भवेच्च मन्त्रतन्त्राणां निर्विघ्नेन सुसिद्धये ॥३०॥

अथ कवचम्—

[ओं] प्राच्यां रक्षतु मे तारा कामरूपनिवासिनी ।
आग्नेय्यां षोडशी पातु याम्यां धूमावती स्वयम् ॥३१॥

नैर्ऋत्यां भैरवी पातु वारुण्यां भुवनेश्वरी ।
वायव्यां सततं पातु छिन्नमस्ता महेश्वरी ॥३२॥

कौबेर्यां पातु मे देवी श्रीविद्या बगलामुखी ।
ऐशान्यां पातु मे नित्यं महात्रिपुरसुन्दरी ॥३३॥

ऊर्ध्वं रक्षतु मे विद्या मातङ्गी पीठवासिनी ।
सर्वतः पातु मे नित्यं कामाख्या कालिका स्वयम् ॥३४॥

ब्रह्मरूपा महाविद्या सर्वविद्यामयी स्वयम् ।
शीर्षे रक्षतु मे दुर्गा भालं श्रीभवगेहिनी ॥३५॥

त्रिपुरा भ्रूयुगे पातु शर्वाणी पातु नासिकाम् ।
चक्षुषी चण्डिका पातु श्रोत्रे नीलसरस्वती ॥३६॥

मुखं सौम्यमुखी पातु ग्रीवां रक्षतु पार्वती ।
जिह्वां रक्षतु मे देवी जिह्वाललनभीषणा ॥३७॥

वाग्देवी वदनं पातु वक्षः पातु महेश्वरी ।
बाहू महाभुजा पातु कराङ्गुलीः सुरेश्वरी ॥३८॥

पृष्ठतः पातु भीमास्या कट्यां देवी दिगम्बरी ।
उदरं पातु मे नित्यं महाविद्या महोदरी ॥३९॥

उग्रतारा महादेवी जङ्घोरू परिरक्षतु ।
गुदं मुष्कं च मेढ्रं च नाभिं च सुरसुन्दरी ॥४०॥

पदाङ्गुलीः सदा पातु भवानी त्रिदशेश्वरी ।
रक्तमांसास्थिमज्जादीन्पातु देवी शवासना ॥४१॥

महाभयेषु घोरेषु महाभयनिवारिणी ।
पातु देवी महामाया कामाख्या पीठवासिनी ॥४२॥

मस्माचलगता दिव्यसिंहासनकृताश्रया ।
पातु श्रीकालिकादेवी सर्वोत्पातेषु सर्वदा ॥४३॥

रक्षाहीनं तु यत्स्थानं कवचेनापि वर्जितम् ।
तत्सर्वं सर्वदा पातु सर्वरक्षणकारिणी ॥४४॥

इदं तु परमं गुह्यं कवचं मुनिसत्तम ।
कामाख्याया मयोक्तं ते सर्वरक्षाकरं परम् ॥४५॥

अनेन कृत्वा रक्षां तु निर्भयः साधको भवेत् ।
न तं स्पृशेद्भयं घोरं मन्त्रसिद्धिविरोधकम् ॥४६॥

जायते च मनःसिद्धिर्निर्विघ्नेन महामते ।
इदं यो धारयेत्कण्ठे बाहौ वा कवचं महत् ॥४७॥
अव्याहताज्ञः स भवेत्सर्वविद्याविशारदः ।
सर्वत्र लभते सौख्यं मङ्गलं तु दिने दिने ॥४८॥
यः पठेत्प्रयतो भूत्वा कवचं चेदमद्भुतम् ।
स देव्याः पदवीं याति सत्यं सत्यं न संशयः ॥४९॥

श्रीमहाभागवते उपपुराणे श्रीमहाकामाख्याकवचवर्णनं नाम सप्तसप्ततितमोऽध्यायः ।

अष्टसप्ततितमोऽध्यायः

श्रीमहादेव उवाच—

वैशाखस्य तृतीयायां तत्र सम्पूज्य चण्डिकाम् ।
यो जपेत्परमं मन्त्रं तस्य कोटिगुणोत्तरम् ॥१॥
जायते सुमहत्पुण्यं न पुनर्जन्म विद्यते ।
शिवरात्रिचतुर्दश्यां रात्रौ सम्पूज्य शङ्करम् ॥२॥
सर्वतीर्थमये तस्मिन्क्षेत्रे देवादिदुर्लभे ।
उपोष्य नियतो भूत्वा प्रहरे प्रहरे नरः ॥३॥
पूजयेत्परया भक्त्या मां सदा तत्र संस्थितः ।
प्राप्नोति स महापुण्यं वाजिमेधशतोद्भवम् ॥४॥
अन्यच्च यन्महापुण्यं स्नानदानादिसम्भवम् ।
काश्यां तत्र दिने चापि पूजने यत्फलं तथा ॥५॥
गवां कोटिसहस्राणां कुरुक्षेत्रे प्रदानतः ।
यत्फलं जायते तस्मादधिकं मुनिसत्तम ॥६॥
एकं मे बिल्वपत्रं यः प्रदद्याद्भक्तिभावतः ।
स याति परमां मुक्तिं सत्यं सत्यं न संशयः ॥७॥
स्वर्णपुष्पसहस्रैश्च मणिमाणिक्यसञ्चयैः ।
अनर्घ्यरत्नैरभ्यर्चा न तथा प्रीतिकारिका ॥८॥

यथा प्रीतिकरं बिल्वपत्रं मम महामुने ।
बिल्वमूले प्रपूज्याथ शङ्करं लोकशङ्करम् ॥९॥
सुरश्रेष्ठत्वमाप्नोति न ततो विच्युतिर्भवेत् ।
बिल्वमूले वसेत्तीर्थं सर्वश्रेष्ठतमं परम् ।
तत्र सम्पूजनं शम्भोर्महापातकनाशनम् ॥१०॥
ब्रह्मरूपी स्वयं रुद्रः सर्वलोकहिताय वै ।
पृथिव्यां संस्थितः साक्षात्सर्वलोकेश्वरेश्वरः ॥११॥
अतः पुण्यतमं स्थानं महापातकनाशनम् ।
बिल्वमूलं मुनिश्रेष्ठ सर्वतीर्थान्महत्तरम् ॥१२॥
गङ्गा काशी गयातीर्थं प्रयागश्च महामते ।
कुरुक्षेत्रं च यमुना तथैव च सरस्वती ॥१३॥
गोदावरी नर्मदा च तथान्यत्तीर्थमुत्तमम् ।
सदा सन्निहितं ज्ञेयं बिल्वमूलेषु नारद ॥१४॥
तत्र यत्क्रियते कर्म दैवं पैत्रं विधानतः ।
तदक्षयतमं ज्ञेयं कोटिजन्मसुनिश्चितम् ॥१५॥
यस्तु बिल्वतरोर्मूले देहं त्यजति मानवः ।
स याति परमं सौख्यं पदं ब्रह्मादिदुर्लभम् ॥१६॥
एवं पुण्यतमो यस्माद्बिल्ववृक्षः परात्परः ।
शम्भोः प्रीतिकरो नित्यं तस्मात्तस्य त्रिपत्रकैः ॥१७॥
पूजयित्वा महेशानं मुच्यते भवबन्धनात् ।
फलं तस्य तथा शम्भोः परमाह्लाददायकम् ॥१८॥
दत्त्वा तस्मै नरः सद्यो महापुण्यं समश्नुते ।
अन्यत्र यत्र कुत्रापि बिल्वपत्रादिकं मुने ॥१९॥
महाप्रीतिकरं ज्ञेयं कामरूपे विशेषतः ।
अन्यत्ते किं मुने वक्ष्ये कामाख्यातीर्थतः क्वचित् ॥२०॥
नापरं विद्यते स्थानं महापुण्यफलप्रदम् ।
चैत्रे मासि सिताष्टम्यां सर्वतीर्थमये शुभे ॥२१॥
लौहित्ये विधिवत्स्नात्वा तत्तोयैर्जगदम्बिकाम् ।
पूजयेत्तत्र यो भक्त्या स मुक्तो भवबन्धनात् ॥२२॥
सर्वतीर्थमयं स्थानं सर्वतीर्थादिकं परम् ।
योनिपीठं महादेव्याः सर्वदेवसुदुर्लभम् ॥२३॥

सर्वदेवमयी पूर्णा यत्र पूज्यतमा स्वयम् ।
सर्वतीर्थमयं पुण्यं लौहित्यं च सुदुर्लभम् ॥२४॥
अष्टम्यां च महापुण्यां तिथि परमदुर्लभाम् ।
एतेषां सङ्गतिर्यस्य बहुपुण्यवशेन वै ।
तस्य भूयः क्षितौ जन्मशङ्कैव हि न विद्यते ॥२५॥
तत्र यस्तर्पयेद्भक्त्या पितॄन् लौहित्यवारिणा ।
तस्य ते पितरो यान्ति ब्रह्मलोकमनामयम् ॥२६॥
अन्यच्चापि तपो दानं तत्र पुण्यफलप्रदम् ।
अन्यतीर्थसहस्रेभ्यो ह्यधिकं मुनिसत्तमाः ॥२७॥
यथा पूज्यतमे लोके भवानी भवसुन्दरी ।
पत्रेषु तुलसीपत्रं बिल्वपत्रं च शोभनम् ॥२८॥
यथा मायाविनां श्रेष्ठः पुरुषः स गदाधरः ।
तथा तीर्थेषु सर्वेषु श्रेष्ठं श्रीयोनिपीठकम् ॥२९॥
य इदं तीर्थराजस्य योनिपीठस्य नारद ।
माहात्म्यं शृणुयान्मर्त्यः स देव्याः पदवीमियात् ॥३०॥
इत्युक्तं तीर्थराजस्य योनिपीठस्य नारद ।
माहात्म्यं परमं गुह्यं भूयः किं श्रोतुमिच्छसि ॥३१॥

श्रीमहाभागवते उपपुराणे योनिपीठमाहात्म्यवर्णनेऽष्टसप्ततितमोऽध्यायः ।

ऊनाशीतितमोऽध्यायः

श्रीनारद उवाच—

श्रुतं भवन्मुखाम्भोजान्माहात्म्यं परमेश्वर ।
योनिपीठस्य तीर्थस्य महापातकनाशनम् ॥१॥
तत्र त्वयोक्तं संक्षेपाद् बिल्वपत्रस्य चेश्वर ।
अनुत्तमं महापुण्यं माहात्म्यं तच्च संश्रुतम् ॥२॥
साम्प्रतं श्रोतुमिच्छामि तुलस्याः परमाद्भुतम् ।
माहात्म्यमथ संक्षेपाद्रुद्राक्षस्य शिवस्य वै ।
पूजायाश्च महादेव संक्षेपादनुशाधि मे ॥३॥

श्रीमहादेव उवाच—

तुलस्याः शृणु माहात्म्यं संक्षेपेण महामते ।
यच्छ्रुत्वा सर्वपापेभ्यो नरो मुक्तिमवाप्नुयात् ॥४॥

तुलसीद्रुमरूपस्तु भगवान्पुरुषोत्तमः ।
सर्वलोकपरित्राता विश्वात्मा विश्वपालकः ॥५॥

दर्शनात्स्पर्शनान्नामकीर्तनाद्धारणादपि ।
प्रदानात्पापसंहर्त्री धरायां तुलसी सदा ॥६॥

प्रातरुत्थाय सुस्नातो यः पश्येत्तुलसीद्रुमम् ।
स सर्वतीर्थसंसृष्टिफलमाप्नोत्यसंशयम् ॥७॥

दृष्ट्वा गदाधरं देवं क्षेत्रे श्रीपुरुषोत्तमे ।
यत्पुण्यं समवाप्नोति तुलसीदर्शनाच्च तत् ॥८॥

दिनं तच्च शुभं प्रोक्तं तुलसी यत्र दृश्यते ।
न तत्र जायते तस्य विपत्तिः कुत्रचिन्मुने ॥९॥

अपि जन्मान्तरकृतं पापमत्यन्तगर्हितम् ।
विनश्यति मुनिश्रेष्ठ तुलसीवृक्षदर्शनात् ॥१०॥

अशुचिर्वा शुचिर्वापि यः स्पृशेत्तुलसीदलम् ।
सर्वपापविनिर्मुक्तस्तत्क्षणाच्छुद्धतामियात् ॥११॥

प्रयाति च पदं विष्णोरन्ते देवसुदुर्लभम् ।
तुलसीस्पर्शनं मुक्तिस्तुलसीस्पर्शनं व्रतम् ॥१२॥

प्रदक्षिणीकृता येन तुलसी मुनिसत्तम ।
कृतः प्रदक्षिणस्तेन विष्णुः साक्षान्न संशयः ॥१३॥

तुलसीं प्रणमेद्यस्तु भक्त्या मानवसत्तमः ।
स याति विष्णुसायुज्यं न पुनः प्रपतेत्क्षितौ ॥१४॥

तुलसीकाननं यत्र तत्र साक्षाज्जनार्दनः ।
लक्ष्मीसरस्वतीयुक्तो मोदते मुनिसत्तम ॥१५॥

यत्र विष्णुर्जगन्नाथः सर्वदेवमयः प्रभुः ।
तत्राहं सह रुद्राक्षैः सावित्र्या च प्रजापतिः ॥१६॥

तस्मात्तत्परमं स्थानं देवानामपि दुर्लभम् ।
यो गच्छेत्स व्रजेद्विष्णोर्वैकुण्ठनगरं मुने ॥१७॥

स्नात्वा प्रमार्जयेद्यस्तु तत्क्षेत्रं पापनाशनम् ।
सोऽपि पापविनिर्मुक्तः स्वर्गलोकमवाप्नुयात् ॥१८॥

यः कुर्यात्तुलसीमूलमृदा तिलकमुत्तमम् ।
कपाले कण्ठदेशे च कर्णे करकुचद्वये ॥१९॥
ब्रह्मरन्ध्रे तथा पृष्ठे पार्श्वयोर्नाभिदेशके ।
स पुण्यात्मा मुनिश्रेष्ठ विज्ञेयो वैष्णवोत्तमः ॥२०॥
तुलसीपुष्पवृन्तेन पूजयेद्यो जनार्दनम् ।
सोऽप्युक्तो वैष्णवश्रेष्ठः सर्वपापविवर्जितः ॥२१॥
वैशाखे कार्तिके माघे प्रातः स्नात्वा विधानतः ।
यो ददाति सुरेशाय विष्णवे परमात्मने ॥२२॥
तुलसीपत्रकं तस्य फलं बहुगुणं स्मृतम् ।
गवामयुतदानस्य वाजपेयशतस्य च ॥२३॥
यत्फलं समवाप्नोति कार्त्तिके पूजनाद्धरेः ।
तुलसीपत्रकैस्तद्वत्तुलसीपुष्पकैरपि ॥२४॥
तुलसीकानने यस्तु जगन्नाथं समर्चयेत् ।
महाक्षेत्रकृतायाः स पूजायाः फलमाप्नुयात् ॥२५॥
तुलस्या रहितं नैव कर्म कुर्याद्विचक्षणः ।
कुर्वन्न कर्मणस्तस्य सम्यक्फलमवाप्नुयात् ॥२६॥
तुलस्या रहिता सन्ध्या कालातीतेव निष्फला ।
तुलसीवृन्दमध्ये तु निर्माय हरिमन्दिरम् ॥२७॥

एवं यः प्रणमत्येनां प्रत्यहं मुनिसत्तम ।
तस्य सर्वार्थदा देवी यत्र कुत्रापि तिष्ठतः ॥३४॥

तुलसी सर्वदेवानां परमा प्रीतिवर्धिनी ॥३५॥

सर्वदेवाधिसंस्थानं यत्रास्ते तुलसीवनम् ।
पितरः परमा प्रीत्या वसन्ति तुलसीवने ॥३६॥

अवश्यं तुलसी देया पितृदेवार्चनादिषु ।
अदत्त्वा मनुजैः सम्यक् न कर्मफलमाप्यते ॥३७॥

विष्णोस्त्रैलोक्यनाथस्य पितृणां च विशेषतः ।
सर्वेषामेव देवानां देवीनां च महामते ॥३८॥

परमप्रीतिदा ज्ञेया तुलसी लोकमुक्तिदा ।
तस्माद्धि तुलसी देया दैवे पित्र्ये च कर्मणि ॥३९॥

यत्रास्ते तुलसीवृक्षस्तत्र भागीरथी स्वयम् ।
तीर्थैः समस्तैः सहिता वसति कुरुते सदा ॥४०॥

तस्मात्तत्र मुनिश्रेष्ठ देहं सन्त्यजतां नृणाम् ।
गङ्गायां मरणे यादृक् फलं स्यात्तादृगेव हि ॥४१॥

धात्रीवृक्षश्च चेत्तत्र वर्तते बहुभाग्यतः ।
तदाधिकतरं ज्ञेयं स्थलं तद्बहुपुण्यदम् ॥४२॥

तत्र देहभृतां देहपरित्यागान्महामते ।
अज्ञानतोऽपि मुक्तिः स्यात्सत्यं सत्यं न संशयः ॥४३॥

एतयोः सन्निधौ यत्र बिल्ववृक्षोऽपि विद्यते ।
तत्स्थानं हि महातीर्थं साक्षाद्वाराणसीसमम् ॥४४॥

तत्र सम्पूजनं शम्भोर्विष्णोश्च भावतः ।
बहुपुण्यप्रदं ज्ञेयं महापातकनाशनम् ॥४५॥

तत्रैकं बिल्वपत्रं यो महेशाय निवेदयेत् ।
स साक्षात्परमेशस्य पदवीं समवाप्नुयात् ॥४६॥

तथा विष्णुं च सम्पूज्य तुलस्यामलकीदलैः ।
प्रयाति विष्णोः सायुज्यं सत्यमेव महामते ॥४७॥

तत्रैकं बिल्वपत्रं यो महेशायाथ विष्णवे ।
देव्यै वा प्रददातीह सोऽपि पापाद्विमुच्यते ॥४८॥

तत्र प्राणान् परित्यज्य मोक्षं प्राप्नोति मानवः ।
न पुनर्जन्म चाप्नोति तत्क्षेत्रस्य प्रभावतः ॥४९॥
इत्युक्तं ते मुनिश्रेष्ठ माहात्म्यं वै समासतः ।
य इदं शृणुयान्मर्त्यः सोऽपि स्वर्गमवाप्नुयात् ॥५०॥

श्रीमहाभागवते पुराणे तुलसीमाहात्म्यवर्णने नाम ऊनाशीतितमोऽध्यायः ।

अशीतितमोऽध्यायः

श्रीमहादेव उवाच—

इदानीं शृणु वक्ष्यामि माहात्म्यं मुनिसत्तम ।
रुद्राक्षस्य परं गुह्यं पुण्याख्यानं समासतः ॥१॥
अङ्गेषु धारणात्सर्वदेहिनां पापसञ्चयम् ।
विनाशयति रुद्राक्षफलं जन्मशतार्जितम् ॥२॥
गुरोरप्रणतेर्जातं देवानां च महात्मनाम् ।
अप्रणामाद्द्विजातीनां दर्पादज्ञानतोपि वा ॥३॥
यत्पापं सञ्चितं पूर्वं जन्मकोटिषु नारद ।
तत्पापं नाशमायाति शिरसाप्यभिधारणात् ॥४॥
असत्यभाषणाल्लोभात् परोच्छिष्टादिभक्षणात् ।
सुरापानाच्च सम्भूतं यत्पापं जन्मकोटिषु ।
कण्ठेऽभिधारणादस्य तत्पापं नाशमाप्नुयात् ॥५॥
परद्रव्यापहाराच्च परदेहातिताडनात् ।
अस्पृश्यवस्तुसंस्पर्शात्तथा गर्ह्यपरिग्रहात् ॥६॥
यत्पापं सञ्चितं पूर्वं कोटिजन्मसु नारद ।
तत्पापं नाशमायाति करे रुद्राक्षधारणात् ॥७॥
असत्प्रसङ्गं श्रुत्वा च यत्पापं पूर्वसञ्चितम् ।
तत्पापं नाशमायाति कर्णे रुद्राक्षधारणात् ॥८॥
परस्त्रीगमनाद्ब्रह्मवधाद्वेदस्य कर्मणः ।
सन्त्यागात्सञ्चितं पापं यत्पूर्वं बहुजन्मसु ।
तत्पापं नाशमायाति यत्र कुत्रापि धारणात् ॥९॥

रुद्राक्षभूषणैर्युक्तं दृष्ट्वा सम्प्रणमेत्तु यः ।
सोऽपि पापात्प्रमुच्येत कृतपापशतोऽपि चेत् ॥१०॥

रुद्राक्षधारी विहरेन्महारुद्र इवापरः ।
निर्भयो धरणीपृष्ठे देवपूज्यतमः स्वयम् ॥११॥

विधृत्य चैकं रुद्राक्षं शम्भुं वा परमेश्वरीम् ।
विष्णुं वा योऽर्चयेत्सोऽपि शिवसायुज्यमाप्नुयात् ॥१२॥

अविधृत्य नरो यस्तु रुद्राक्षं मुनिसत्तम ।
कुरुते पैतृकं कर्म दैवं वापि विमोहितः ।
न तस्य फलमाप्नोति वृथा तत्कर्म च स्मृतम् ॥१३॥

रुद्राक्षमालया मन्त्रं यो जपेच्छिवदुर्गयोः ।
स प्रयाति नरः स्वर्गं महादेवप्रसादतः ॥१४॥

काश्यां वा जाह्नवीक्षेत्रे तीर्थेऽन्यस्मिंश्च वा नरः ।
रुद्राक्षरहितः कर्म नैव कुर्यात्कदाचन ॥१५॥

एकवक्त्रं तु रुद्राक्षं गृहे यस्य हि वर्तते ।
तस्य गेहे सदैवेल्लक्ष्मीः सुस्थिरा मुनिसत्तम ॥१६॥

न दौर्भाग्यं भवेत्तस्य नापमृत्युः कदाचन ।
बिभर्ति यस्तु तं कण्ठे बाहौ वा मुनिसत्तम ॥१७॥

तस्य प्रसन्नो भगवाञ्शम्भुर्देवः सुदुर्लभः ।
कुरुते यत्परं धर्मकर्म तच्च महाफलम् ॥१८॥

रुद्राक्षधारी सन्त्यज्य देहं वै यत्र कुत्रचित् ।
अवश्यं स्वर्गमाप्नोति तत्र नास्त्येव संशयः ॥१९॥

गङ्गायां तु विशेषेण फलदं तस्य धारणम् ।
काश्यां ततोऽधिकं ज्ञेयं किमन्यत्कथयामि ते ॥२०॥

इति ते कथितं पुण्यं माहात्म्यं मुनिसत्तम ।
रुद्राक्षस्य तु संक्षेपान्महापातकनाशनम् ॥२१॥

य इदं प्रपठेद्भक्त्या शृणुयाद्वापि यो नरः ।
प्राप्नोति स पदं शम्भोरपि देवैः सुदुर्लभम् ॥२२॥

बिल्वमूले पठेदेतच्चतुर्दश्यामुपोषितः ।
स मुच्यते महापापादपि जन्मशतार्जितात् ॥२३॥

गङ्गायां वा कुरुक्षेत्रे काश्यां वा मुनिसत्तम।
सेतुबन्धे महातीर्थे गङ्गासागरसङ्गमे ॥२४॥
शिवरात्रिचतुर्दश्यां यः पठेच्छिवसन्निधौ।
सर्वपापविनिर्मुक्तो रुद्रलोकमवाप्नुयात् ॥२५॥

श्रीमहाभागवते उपपुराणे रुद्राक्षमाहात्म्यवर्णनेऽशीतितमोऽध्यायः।

एकाशीतितमोऽध्यायः

श्रीमहादेव उवाच—

शृणुष्वावहितो वत्स माहात्म्यं भक्तिभावतः।
पूजायाः श्रीमहेशाय संक्षेपेण ममाग्रतः ॥१॥
कलौ सर्वे भविष्यन्ति मानवा धर्मवर्जिताः।
नरा पापरताः सर्वे सत्यधर्मपराङ्मुखाः ॥२॥
परदाररता नित्यं परद्रोहपरायणाः।
परनिन्दारताश्चैव परवित्तापहारिणः ॥३॥
गुरुभक्तिविहीनाश्च गुरुनिन्दारताः सदा।
स्वस्वकर्मविहीनाश्च धनलुब्धाः कलौ युगे ॥४॥
भविष्यन्ति द्विजाः सर्वे शूद्राचाररताः सदा।
श्रुतिहीनास्तपोहीना योगाभ्यासविवर्जिताः ॥५॥
भविष्यन्ति कलौ वत्स शिश्नोदरपरायणाः।
स्त्रियः सर्वा भविष्यन्ति पतिभक्तिविवर्जिताः ॥६॥
भ्रष्टाश्च प्रायशस्ता वै श्वश्रूद्रोहपरायणाः।
अल्पसस्या वसुमती नराश्चान्नविवर्जिताः ॥७॥
करग्रहरता नित्यं राजानो म्लेच्छरूपिणः।
भविष्यति सतां हानिरसतामुन्नतिः सदा ॥८॥
एव घोरकलौ चापि नराणां पापचेतसाम्।
मुक्तिप्रदं महादेवपूजनं मुनिसत्तम ॥९॥
निर्माय पार्थिवं लिङ्गं शिवशक्त्यात्मकं परम्।
पूजयेत्प्रयतो भूत्वा नहि तं बाधते कलिः ॥१०॥

उपायो विद्यते नान्यः सत्यं सत्यं कलौ युगे ।
शम्भोराराधनात्स्वल्पसाधनान्मुनिसत्तम ॥११॥

मूर्तिर्मृदा बिल्वदलेन पूजा अयत्नसाध्यं वदनेन वाद्यम् ।
फलं च सायुज्यपदप्रदानं निःस्वस्य विश्वेश्वर एव देवः ॥१२॥

शम्भोराराधनसमं नास्ति कर्म कलौ युगे ।
शाक्तो वा वैष्णवः शैवः पूर्वं सम्पूज्य शङ्करम् ॥१३॥

पश्चात्प्रपूजयेत्स्वेष्टदेवतां भक्तिभावतः ।
आदौ लिङ्गं प्रपूज्येत बिल्वपत्रैश्च नारद ।
अन्यथा शूद्रवत्सर्वं शिवपूजां विना कृतम् ॥१४॥

व्यतिक्रमं तु यो दर्पान्मोहाद्वापि समाचरेत् ।
सोऽधः पतति पापात्मा तस्यार्चा विफला भवेत् ॥१५॥

यो ध्यायति महादेवं सर्वलोकेश्वरेश्वरम् ।
स तेन साम्यमायाति न पुनर्जन्मभाग्भवेत् ॥१६॥

पूजयेद्यस्तु सद्भक्त्या सर्वदेवात्मकं शिवम् ।
सर्वपापविनिर्मुक्तः शिवलोकमवाप्नुयात् ॥१७॥

पाद्यं यस्तु महेशाय ददाति मनुजोत्तमः ।
सोऽपि पापविनिर्मुक्तः स्वर्गलोकमवाप्नुयात् ॥१८॥

अर्घ्यादिकं तु यत्किञ्चिद्दीयते शम्भवे मुने ।
सर्वं तत्सम्प्रदद्याच्च लिङ्गोपरि कियत्कियत् ॥१९॥

अग्राह्यं तन्महाबुद्धे प्रसादं नापि भक्षयेत् ।
विष्णोरग्राह्यं च नान्यस्य ग्रहणाद्दिष्टभोगभाक् ॥२०॥

शालिग्रामशिलास्पर्शात् सर्वं तद्ग्राह्यमेव च ।
अनादिलिङ्गनिर्माल्यं भुक्त्वा शङ्करतां व्रजेत् ।
प्रसादं भक्षयेन्मर्त्यः स्वयं शङ्करतां व्रजेत् ॥२१॥

शिवं यः पूजयेद्भक्त्याऽव्यभक्त्या वापि नारद ।
स नैव यमदण्डयः स्यात्सत्यं सत्यं न संशयः ॥२२॥

आरोग्यमतुलं सौख्यं प्रजापुष्टिविवर्धनम् ।
शिवलिङ्गार्चनं कृत्वा प्राप्नुयान्मानवोत्तमः ॥२३॥

यो नृत्यति महेशस्य सन्निधौ भक्तितत्परः ।
स प्राप्य शाम्भवं लोकं मोदते सुचिरं मुने ॥२४॥

गीतं वाद्यं च यः कुर्यान्मनुजः शिवसन्निधौ ।
स शम्भोरन्तिकस्थायी भवेत्तत्प्रमथेश्वरः ॥२५॥

यत्र देशे वसेच्छम्भुपूजामक्तिपरायणः ।
सोऽपि पुण्यतमो देशो गङ्गाहीनोऽपि चेन्मुने ॥२६॥

बिल्वमूले महादेवं यः पूजयति भक्तितः ।
सोऽश्वमेधसहस्राणां फलं प्राप्नोति निश्चितम् ॥२७॥

गङ्गायां यो महादेवं बिल्वपत्रैः प्रपूजयेत् ।
स कैवल्यमवाप्नोति कृतपापशतोऽपि चेत् ॥२८॥

काश्यां यः पूजयेच्छम्भुं हेलयापि नरोत्तमः ।
तस्यान्ते मुक्तिदाता स महेशः स्वयमेव हि ॥२९॥

पुण्ये भारतखण्डे तु स्थलं यत्पुण्यदायकम् ।
तत्र सम्पूज्य विश्वेशं न पुनर्जन्मभाग्भवेत् ॥३०॥

हिमाद्रेर्दक्षिणे पार्श्वे गङ्गासागरसङ्गमम् ।
यावत्पुण्यतमो देशः सर्वकामफलप्रदः ॥३१॥

एतस्मिन्नास्ति कर्मान्यच्छिवपूजासमं मुने ।
महापापहरं पुण्यं सर्वापद्विनिवारकम् ॥३२॥

असङ्ख्यानि च कर्माणि पुण्यदानि महामुने ।
उक्तान्यनेकशास्त्रेषु नृणां पापहराणि वै ॥३३॥

तेषु श्रेष्ठतमं ज्ञेयं शिवसम्पूजनं परम् ।
कीर्तनं शिवनाम्नश्च दुर्गानाम्नो विशेषतः ॥३४॥

दुर्गायाः पूजनं तद्वन्नामनामप्रकीर्तनम् ।
श्रवणं तद्गुणानां च तीर्थेषु भ्रमणं तथा ।
विज्ञेयं परमं श्रेष्ठं कलौ पातकनाशनम् ॥३५॥

संस्मृत्य शम्भोर्नामानि यत्किञ्चित्कुरुते नरः ।
कर्म वेदादिशास्त्रोक्तं तदक्षय्यतमं भवेत् ॥३६॥

शिवेति विश्वनाथेति विश्वेशेति हरेति च ।
गौरीपते प्रसीदेति यो नरो भाषते सकृत् ॥३७॥

तस्य संरक्षणार्थाय पृष्ठतः प्रमथैः सह ।
शूलमादाय वेगेन स्वयं धावति शूलभृत् ॥३८॥

शिवनाम स्मरन्मर्त्यस्त्यक्त्वा देहं महामते ।
साक्षान्महेशतां याति कृतपापशतोऽपि चेत् ॥३९॥

यत्र कुत्र च संस्थाय संस्मरेत्परमेश्वरम् ।
तत्रैव सर्वतीर्थानि निवसन्ति महामते ॥४०॥

इति ते कथितं सर्वं यत्पृष्टं मुनिसत्तम ।
महापापहरं पुण्यं सर्वमङ्गलदं परम् ॥४१॥

य इदं शृणुयान्मर्त्यः सश्रद्धः पठतेऽथवा ।
सर्वपापविनिर्मुक्तः प्रयाति परमं पदम् ॥४२॥

व्यास उवाच—

एतावदुक्तं देवेन पृष्टेन मुनिना स्वयम् ।
खण्डेस्मिञ्जैमिने वाक्यं पुण्यं परमशोभनम् ॥४३॥

एतद्यः शृणुयान्मर्त्यः पठेद्वा भक्तिसंयुतः ।
सोऽन्ते निर्वाणमाप्नोति भुक्त्वा भोगान्मनोगतान् ॥४४॥

सुगुप्तमेतत्परमं कथितं शूलपाणिना ।
महात्मने मुनीन्द्राय नारदाय महामते ।
यस्य संविद्यते गेहे तमापन्न स्पृशेत्क्वचित् ॥४५॥

य इदं परमाख्यानं श्रावयेद्विष्णुसन्निधौ ।
सद्भक्त्या जैमिने तस्य पापं नश्यति तत्क्षणात् ॥४६॥

अप्यनेकशतं कोटिजन्मान्तरसुसञ्चितम् ।
एतदाकर्ण्य संत्यज्य पापं मोक्षमवाप्नुयात् ॥४७॥

श्रीमहाभागवते उपपुराणे श्रीमहादेवनारदप्रश्नोत्तरकथने
एकाशीतितमोऽध्यायः ।

॥ समाप्तं चेदं महाभागवतं नामोपपुराणम् ॥